दिवोदासाय अस्मिन्वा निनतम् अपि शत्रुं निहतवान् इदानीं परोक्षेणाह । अतिथिग्वाय श्र
र्जार्यमतिथिं गच्छते दिवोदासाय तदर्थं गामा रोणादिकोरको द्व्रत्यय: । उग्र उद्गूर्णबल इंद्रः ६७
पूर्वं पुरभेदनसमये विद्धमपि अभ्रियमाणं गिरिमारूढं शंबरं एतन्नामानमसुरं गिरेः दुर्गमा

२

त्पर्वतादेः सकाशात् । अवाभरत् अवस्थाप्यमाणं हृतवान् । किं कुर्वन् महः महांति धनानि तदीय गवा
श्वादीनि दयमानः दिवोदासाय राज्ञे साधयन् । दय दानगतिहिंसादानेषु शपः पित्वा
त् अनुदात्तत्वे शानच लसार्वधातुकस्वरेण धातुस्वरः । नाकेवलमल्पं धनं किंतु विश्वा धनानि सर्वा
ण्यपि तेषां मणिमुक्तादीनि ओजसा स्वकीयेन बलेन दयमानः साधयन् अवाभरत् ॥७॥ अथा
ष्टमीमृचमाह ॥७॥ ॥ इंद्रः समत्सु यजमानमार्यं प्रावद्विश्वेषु शतमूतिराजिषु स्वर्मीळ्हेष्वाजि
षु । मनवे शासदव्रतांस्त्वचं कृष्णामरंधयत् । दक्षन्न विश्वं ततृषाणमोषति न्यर्शसानमोषति ॥८॥
॥ ॥ अयमिंद्रः समत्सु संग्रामेषु इति तन्नामसु पाठात् । किंच शतमूतिः स्वभक्तेषु परिमितरक्ष
ण इंद्रः विश्वेषु लिंगव्यत्ययः आजिषु स्पर्धानिमित्तेषु यजमानं प्रावत तथा स्वर्मीळ्हेषु स्वर्गदेषु

रवस्यमेचयस्तुवाआजिषुमहासंग्रामेषुप्रावतस्वर्गप्रदानेनरक्षतिरणेअभिमुख्येनहतानांवीरा
स्वर्गःपराचारेणस्मर्यते॥द्वाविमौपुरुषौलोकेसूर्यमंडलभेदिनौ।परिव्राड्योगयुक्तश्चरणेयो
भिमुखोहतःइति।अत्रेतिहासमाचक्षते।अंशुमतीनामनदीतस्यास्तीरेकृष्णनामासुरवर्णतिष्ठ
न्नासादशसहस्रैरनुचारैरुपेतं।तद्देशवर्त्तिनःपीडयन्नास्तेतत्रेंद्रोबृहस्पतिनाप्रेरितःसन्मरुद्भिः
सहितःकृष्णांतदीयपत्नीश्चसृष्णन्त्यमानुचरमवधीत्अयमर्थः।अवद्रप्सोअंशुमतीमतिष्ठदित्या
दिनोपरिष्टाद्वक्ष्यतेनतत्रोच्यते।अयमिंद्रोमनवेमनुष्यायविभक्तिव्यत्ययःमनुष्याणामर्था
यअव्रतान्व्रतमितिकर्मनामतद्रहितान्यागविद्वेषिणःशासन्शिक्षितवान्हिंसितवान् ७०
शासेर्लेङ्यडागमःतथात्वचंकृष्णांत्वचंकृष्णनाम्नोसुरस्यकृष्णवर्णांत्वचंउत्कृत्यारंधयन्हिंसितवा

न्।रधेर्हिंसार्थस्यरधिजभोरचीतिनुम।केनप्रकारेणेतितदुच्यते।दक्षन्नभस्मीकरोति।लेट्यडागमःसि
ब्बहुलमितिसिप्तथाविश्वंतृषाणमोषतिसर्वमपिहिंसितंतदनुचरमवृंदंहंतियत्किंचिदवशि
ष्टमितिनेत्याह।अर्शसानंहिंसाकृचिंहतावशिष्टंसर्वमपिन्योषतिनिःशेषेणदहति॥८॥अथन
वमीमृचमाह॥८॥ ॥सूरश्चक्रंप्रवृहज्जातओजसाप्रपित्वेवाचमरुणोमुषायतीशानआमु
षायति।उशनायत्परावतोजगन्नूतयेकवे।सुम्नानिविश्वामनुषेवतुर्वणिरहाविश्वेवतुर्वणिः॥९॥
अत्रापीतिहासमाचक्षते॥केचनासुराःसर्वइंद्रवज्रेणवधोमाभूदितिब्रह्मणोवरंलब्ध्वाइंद्रम
गणाद्वोहन्नाआगतान्दृष्ट्वामिंद्रःसूर्यरथस्यचक्रमादायअवधीदितितदिदमुच्यते।अय
मिंद्रःसूरःसूर्यस्यषष्ठ्यर्थेप्रथमा।चक्रंरथस्यचक्रमादायओजसाशारीरेणबलेनजातःसन्वृह

सन् प्रदृहत् प्रद्दिन्नवान् ह्यस्तउह्यमाने दौदादिकः किंच अरुणः अरुणवर्णः अत्यंततेजोयुक्त
सन् प्रपित्वे तेषां समीपे तत्समीपमागत्य वाचं वागुपजल्हितं प्राणन्तु पायत्ति मुषो मुष्णाति वा
।प्रपित्व इत्यासन्ननामयद्वा वंतेषां प्रहारध्वनिं मुरवायनिषुदृ तेषु धनः। स्वयमेवविश्रांतोन
वति अवधीरित्यर्थः। अथवा इंद्र एवकल्पानः सन् उजसा स्वकीयेन तेजसा युक्तः चक्रं प्रदृहन्
तमो निवारणार्थं अस्तुरजयाय वाचाक्रापजल्हितं रथं प्रकर्षेणोद्यतं तनः करोति इत्रवं अरुणा
न इथ यंता प्रपित्वे मदेशाद्य सुराणां प्रपित्वे वाचं तेषां जर्हिणीधीत्यादि ध्वनिं मुषायति मुष्णा
ति मुषेरुत्तरस्य श्नः। अत्रापि छंदसि शायजपीति शायजादेशः। तदनंतरं सूर्यः ईशानः सर्वा ७२
णितमांस्यस्तु रात्रानि कर्तुं समर्थः सन् आमुषायति समंतात् मुष्णाति। अथ प्रत्यत्तस्ततः हेक

३२

वेक्रांतदर्शिनयन् नस्त्वं उशनाउशनसः एतन्नाम्ना महर्षेर्हृताय रक्षणायपरावतो दूरात् स्वर्गस्थानात्
अजगन् गतवानसि प्राप्तवानसि गमेः सिपि छांदसः शपः श्लुः हृजह्यादिरूपेण मोनो धातोरिति
नत्वं यद्वा उशनसो युक्तः सन् अजगन् आगच्छ आगत्य च विश्वा विश्वानि सुम्नानि सुखधनानि
धनान्यादायास्माकं तुर्वनि स्तूर्णवनिः छिप्रं संभक्तानवेति शेषः। तुर्वणिस्तूर्णवनिरिति नि
रुक्तं तत्र दृष्टांतः। मत्तुषेव मनुष्येणैव यथा वो नवपरिवृत्तायदेशांतरान् अनिमतं धनमा
नीयेत इत्। यद्वा मत्तुषेव मनुष्याणामिव इतरेषामृत्विजां विश्वा सुम्नानि सर्वाणि धनान्यदा
यतुर्वणिर्नवसि तद्वदस्माकमपि न केवलमेकस्मिन्नेव यागदिने किंतु अहा विश्वेव विश्वान्य
हानि सर्वेध्वप्यहःस्तु तुर्वणिर्नवा। यद्वा तुर्वणिस्त्वं अहा विश्वेव विश्वान्यहान्यतिदीर्घमायु

षंयथाददासितथास्तुत्यान्यपिउन्नयमपिदेहीत्यर्थः॥७॥अथदशमी॥७॥ ॥मन्दोनव्येभिर्वृषक
र्मन्नुक्थैःपुरांदर्त्तःपायुभिःपाहिशग्मैः॥दिवोदासेभिरिंद्रस्तवानोवावृधीथाअहोभिरिवद्यौः॥७॥
॥ ॥हेइंद्रवृषकर्मन्अभिमतवर्षणव्यापारवन्पुरांदर्त्तःअसुरपुराणांदारयितःस्तुवामंत्रि
तइतिषष्ठ्याःपरागवद्भावानुषष्ठ्यामंत्रितेसमुदायस्यपादादित्वादाष्टमिकव्याद्युदात्तत्वं॥सता
दृशोमहानुभावस्त्वंनोऽस्मत्संबंधिभिःनव्येभिःनूतनैःधृद्ध्यैःउक्थैःइदानींप्रतिपादितप्रकारैः
स्तोत्रैःस्तुष्टःसन्पायुभिःपालनप्रकारैःशग्मैःसुखोत्पादिकाभिष्मिकरूपैःपाहिपालय॥किं
चहेइंद्रदिवोदासेभिःदिवोदासगोत्रोत्पन्नैःअर्शआदित्वादच्अस्माभिःपरुच्छेपैः॥यद्वा
पूजार्थंबहुवचनंस्तवानःस्तूयमानःकर्मणिकर्तृप्रत्ययः॥वावृधीथाःप्रवृद्धोभवाभवेर्लिङिछां ७२

३३

दसःशपःश्लुः॥किमिवअहोभिरिवद्यौः॥द्योतनशीलःआदित्यःअहोभिःप्रसिद्धैर्यथाप्रवृद्धोभवति।
तथाअस्मत्स्तुत्याअत्यंतंप्रवृद्धोभवेत्यर्थः॥७॥इतिद्वितीयस्यप्रथमेएकोनविंशोवर्गः॥७॥ ॥
इंद्रायहीतिसप्तर्चंपंचमंसूक्तंइंद्रायसप्तेत्यनुक्रमणिका।परुच्छेपऋषिः।अत्यष्टिछंदः।इंद्रोदेव
ता।पृष्ठ्यस्यषष्ठेहनिमाध्यंदिनेसवनेहोत्रकाःस्वस्वशस्त्रतस्सूक्तंरचत्रयंचत्वाआरंभणीयान्
जहुर्माचपेयुः॥अत्रायंविभागः॥आद्यास्तिस्रोमैत्रावरुणस्यतृतीयाद्यास्तिस्रोब्राह्मणाच्छंसि
नःपंचम्याद्यास्तिस्रोऽच्छावाकस्यएतच्चचतुर्थेहनीतिखंडेसूत्रितंषष्ठेहनींद्रायहिद्यौरसुरोअनम्न
तेत्येवमेवेतितत्रैवाहनितस्मिन्नेवसवनेप्रशास्त्रादीनांप्रस्थितयाज्यान्याःपुरस्तात्आदितःएके
कशःप्रक्षेपणीयाःपष्ठस्येतिखंडेसूत्रितं॥इंद्रायहिद्यौरसुरोअनम्नतेतिखल्वितिमहाव्रतेनि

क्वचन्येइंद्रायहीतितृचोवैकल्पिकास्तुरूपद्वितीयः।महाव्रतेस्योतिरवंडेसूत्रितं।एइंद्रयाह्यक्रपनेपरा
वतइंद्रायहिद्यौरसुरोअनम्नतेति।छ।तत्रेयंप्रथमा।छ। ।।इंद्रायहिद्यौरसुरोअनम्नतेंद्रा
यमहीपृथिवीवरीमभिर्द्युम्नसातावरीमभिः।इंद्रंविश्वेसजोषसोदेवासोदधिरेपुरःइंद्रायवि
श्वासवनानिमानुषारातानिसंतुमानुषा।छ। ।।द्यौर्द्योतनशीलोद्युलोकः।तन्निवासीदेव
संघोवासचासुरोचिरसनशीलःशत्रूणांक्षपयन्नेतामेवतन्निवासात्इंद्रायहिइंद्रायैववज्रनम्न
तस्वयमेवप्रह्वोनवतिनमेश्छांदसेलुङिकर्मकर्तर्यात्मनेपदंनदुहस्नुनमामितियगभावःश्छां
दसःशपःलुक्।हलादिशेषाभावश्चअत्तुनासिकलोपः।हिशब्दःअपिशब्दार्थोवातथाइंद्रायेंद्रा
र्थंमहीमहतीपृथिवीचअमितनम्रत्।सर्वोजनोवाअनम्नत।उन्नयत्राश्रयवादिविशब्देनाश्रयीलक्ष

क्ष्यतेयामञ्चागछतइतिवत्केनसाधनेनेतितदीमभिर्वरणीयैःस्तोत्रैर्हविर्भिर्वा।किंविद्युम्नसातौअन्नस्य
यशसोलाभनिमित्तेसतिवरीमभिर्वरणीयैर्हविर्भिर्युक्तायजमानाःप्रह्वाभवंतिकिंचइंद्रंसर्वविश्वे
सर्वेदेवासजोषसःसमानप्रीतियुक्ताःएकमत्यनावःपूर्वंअसुरजयार्थंपुरोदधिरेपुरोदधिरेपुर
तस्थापितवंतःइंद्रमुखेनैवासुराञ्जितवंतइत्यर्थः।तथामानुषामनुष्यसंबंधीन्यनिषवयु
क्तानिप्रातरादिसवनानिइंद्रायसंतुइंद्रायैववर्ततुतथामानुषामनुष्याणांतद्विजांसंबंधीनि
रातानिदातव्यानिदिष्टुरोडाशादीनिइंद्रायहिइंद्रायैवसंतुइंद्रंप्रीणयितुंसमर्थानिभवंत्वित्यर्थः।।
।।छ।।अथद्वितीयामृचमाह।।छ।। ।।विश्वेषुहित्वासवनेषुतुंजतेसमानमेकंवृषमण्यवःपृथक्स्वः
सनिष्यवःपृथक्।तंत्वानावंनपर्षणिंशूषस्यधुरिधीमहि।इंद्रंनयज्ञैश्चितयंतआयवस्तोमेभिरिंद्रमा

MEMORIAL

यवः॥७॥ ॥हेइंद्र त्वा त्वां एकं एकमेव संतं विश्वेषु सर्वेषु सवनेषु तद्रूपेषु एकाहाहीनसत्ररूपेषु सर्वे
षु सोमयागेषु यजमानाः त्वं जनेत्वरयंति हविरादीनि तदृशो कीदृशं त्वां समानं सर्वेषामेकरूपं की
दृशायजमानाः वृषमण्यवः अनिमतवर्षणाय त्वामेव मन्यमानाः पृथक् विपश्च स्वस्वयागे किमिछं
तः स्वः स्वर्गं सुखविशेषं वा मनुष्यवः संनजकामाः पृथक् त्वं जनते पृथगेव त्वरयंति त्वं जति ह्वानायः
शिल्पतित्वं जतेइति तन्नामसुपागात्।तंतादृशा वा त्वांवृषस्य वलस्य सेनारूपस्य धुरिवहने त
त्वया यधीमहि स्थापयाम।यद्वा वृषस्य अस्मदीयशारीरबलस्य धुरि धीमहि वृषमिति बल
नाम वृषं सह इति तन्नामसुपागत्।तत्र दृष्टांतः।पर्षाणां नावं न पारस्य संतरणं शरयिता वा फ ७८
लस्य नावमिव तां यथा पारवहने स्थापयंति।परे तीरकर्मसमाप्तेः छंदसि वनवसने रिनूत्र

स्यपः॥वृषोदरादि पि पन्ने रोणादिकः संनित्यत्यवो वा।कीदृशा वयं आयवो मनुष्याः यजमानाः यज्ञैः
साधनै इंद्रं न चितयंतः परमेश्वरमिव त्वांचेतयंतः परमेश्वरबुद्ध्या ध्यायंत इत्यर्थः।यद्वा नशब्द ए
वकारार्थः इंद्रमेव त्वां जानंतः तथा स्तोमेभिः स्तोत्रैः इंद्र इंद्रमेव आयवो गच्छंतो वयं धीमहि दधाते
लिङि छांदसः शपो लुक॥८॥ अथ तृतीया॥९॥ ॥विलातनस्ते मिथुना अवस्यवो व्रजस्य सा॥
तागव्यस्य निःसृजः सक्षंत इंद्र निःसृजः।यद्वयं ताह्वाजना स्वर्थं तां समूहसि आविष्करिक्रहृष
णं सनाजुवं वज्रमिंद्र सचाजुवं॥९॥ ॥हेइंद्र त्वा त्वा सुहृत्य मिथुनाः सपत्नी सहिता यजमानाः
विनतास्तयज्ञं वितन्वते।यद्वा याज्ञपायव्रतादिना आत्मानमुपक्षपयंति।तस्य उपक्षपयेछांदसे लि
टि इरीयारेइ तिरनावः किमर्थं गव्यस्य व्रजस्य मातागवां संबंधिनः भूपस्यलाने निमित्नन्तेस

तिनचसर्वत्राग्निहोत्रादिनित्यवाक्येषुकारीचित्रादिकाम्यवाक्येषुयस्योदयंयस्यगृहानित्य
त्यानैमित्तिकवाक्येषुपुरुषस्यैवार्थित्वादेःसद्भावात्तस्यैवाधिकारःस्त्रियास्तुसत्यर्थित्वेध्यय
नाभावेनविद्वत्तायाअभावात्अतएवसामर्थ्याभावात्तुनास्त्यधिकारइतिवाच्यंयद्यपिस्त्रि
यानास्तिपृथगधिकारःतथापिपूर्वमीमांसायांषष्ठेअधिकाराध्यायेतृतीयचतुर्थाभ्यामधि
करणाभ्यांअस्त्येवस्त्रियाअधिकारःसचपत्यासहेतिप्रपंचितत्वात्जायापतीअग्निमादधी
यातामित्याद्यभिधानात्स्मृतिषुचनास्तिस्त्रीणांपृथग्यज्ञोनव्रतमितिपृथगधिकारस्यैवनिवा
रितत्वादस्त्येवस्त्रियाःपत्यासहाधिकारःअथपुनर्वैपिदेवंपत्न्यैप्रदायवाचयेदितिसूत्रका ७५
रवचनात्पत्न्यवाक्तइत्यादिविधिषुच अजमस्तावत्पमित्यादिमंत्रविधानाद्यत्रवचनमस्तित

त्रास्त्येवमंत्रेविकारःकिंहिवचनंनअपनीतिवचनस्याभिनारइतिज्ञायात्तस्मात्मिथुनायज्ञंततस्त
इत्येतदुक्तंकीदृशास्तेअस्यवृःइडायात्मनेस्वस्तिमिच्छंतःनिःसृजःनिःशेषेणहविस्त्यजंतःसच्चं
तःसच्छतिगत्यर्थःवांसंतजमानाःपुनःसएवविशेष्यंते।निःसृजःफलप्रतिबंधकंपापंनिर्गमयं
तःकस्तवविशेषइतिनिरुच्यते।यत्यस्मात्कारणात्गव्यंतागामात्मनइच्छंतोगोत्राद्यास्तुपत्रा
त्मनःक्रतवांतोपिप्रत्ययइत्ववादेशःस्वयंतास्वयंयंतोगंतुस्तुकत्कोक्षजनाद्दोजायापतिरू
पौजनौसमूहसिसंयुक्तंयोरेवाभिमतंस्वर्गादिकंप्रापयसियद्वासम्यगनुष्ठितंवंताविस्मृतं
सश्विनोपिअतःपत्नीसहितामनुतिष्ठंतीत्यर्थः।किंचहेइंद्रत्वंतर्पणंवर्षिकंकामानांसचात्
वंमादेवोत्पन्नंवयाविनाहृतंतथासचातुर्वर्णात्तुवधादिव्याप्तामर्थेनसादेवोत्पन्नंवइंअवि

करिक्रन्आविष्कुर्वन्प्रकटयन्वर्तमानइतिशेषः॥छ॥ ॥चतुर्थ्यृचमाह॥छ॥ विदुष्टेअस्यवीर्य
स्यपूरवःपुरोयदिंद्रशारदीरवातिरः।सासहानोअवातिरः।शासस्तमिंद्रमर्त्यमयज्युंशवसस्पते।
महीममुष्णाःपृथिवीमिमाअपोमंदसानइमाअपः॥छ॥ ॥हेइंद्रतेवीर्यस्यतवसंबंधिनोअ
स्यवीर्यस्यमाहात्म्यमितिशेषः।विदुष्टइत्यत्रयुष्मत्तत्ततक्षुष्विकर्मणिषष्ठीवक्ष्यमाणमेत
त्वीर्यंविदुःयेपूरवोमनुष्याःयजमानाःस्तवमहत्त्वंजानास्त्वामिवजयंतितेविदुः।यद्वाअ
स्यवीर्यस्यमाहात्म्यमितिशेषः।विदुष्टइत्यत्रयुष्मत्तत्ततक्षुष्विनिविसर्जनीयस्यषत्वं।वीर्य
मेवशिष्यते।हेइंद्रस्ययस्मात्कारणात्शारदीःसंवत्सरसंबंधिनीःसंवत्सरपर्यंतंप्राकार ७८
परिवाहिनीःदृढीकृताःपुरःशत्रूणांपुरःअवातिरःनाशयः।अवपूर्वस्तिरतिर्नाशस्यअ

२

वपूर्वस्तिरतिनाशनार्थः।किंकुर्वन्सासहानःतत्रत्यान्निवसन्धनाद्यपहारेणपीडयन्।सासहे
र्यङ्लुगंतात्ताच्छीलिकश्चानश्।अवातिरः।किंचहेइंद्रतंमर्त्यंमरणधर्माणंअयज्युंअयष्टारंय
ज्ञविघ्नकारिणंराक्षसादिंशासः।निगृहीतवानसि।हेशवसस्पतेबलस्यपालकेंद्रत्वंमहीमह
तींपृथिवीमिमाअपश्चमंडूकनद्यात्मकान्यादकानिचअमुष्णाःअमाउपहृतवानसिअसुरे
स्थैर्वायज्ञवद्द्विषिभिराक्रांतान्भूमिंतत्संबंधिनीरपश्चतेषांपुराणिनिघ्नन्अपहृतवानसीत्य
र्थः।किंकुर्वन्नेत्याह।मंदसानःहृष्यन्नेवइमाअपःइमानिअपकार्याणिव्रीह्याद्यन्नानिअ
मुष्णाःजहृवानसि॥छ॥ अथपंचमी॥छ॥ ॥आदित्तेअस्यवीर्यस्यचर्किरन्मदेषुवृषन्नुशिजो
यदाविथसखीयतोयदाविथ।चकर्थकारमेभ्यःपृतनासुप्रवंतवे।तेअन्यामन्यांनद्यंसनिष्णत

श्रवस्यंतः सनिष्णत ॥ब॥ ॥हे इंद्र आत् अत एव हेतो ते वीर्यस्य तव संबंधिने वीर्याय दपिष्टद्वये च
किरन् पुनः पुनः सोमं विकिरंति किरतेर्यङ्लुगंताच्छत्प्रत्ययेन रूपः सवेषु सवनेषु वितरंति यजमानाः
अत इत्यकं उत इत्याह । मदेषु वृषन् सोमजनितमदेषु सत्सु हे कामानां वर्षक उशिजः त्वां
कामयमाना यजमानान् यद्यतः कारणादाविथ रक्षसि किंच सखीयतस्तव सखित्वमात्म
न इच्छतोस्मान् यद्यस्मादाविथ तर्पयसि । अवितमनेन प्रीणयसि अत एव चर्किरन् किंच हे इंद्र ए
भ्यो यजमानेभ्यः कारं वा स्तुतिं हननादि लक्षणं च कथं करोषि करोतेः कर्मणि बहुलं कर्षात्मित इत्यं
तोदात्तत्वं । उत्रेति तदुच्यते । पृतनासु संग्रामेषु किमर्थं प्रवंतवे प्रकर्षेण वनितुं संभक्तुं यु ७७
द्धाय धीराः संजजंते । वनतेस्तुमर्थे तवेन प्रत्ययः । तादौ चेति गतेः प्रकृतिस्वरत्वं किंच ते तव संया

३

सवासि नः । त्वं यन्यामन्यं अन्यां स्वान्यां अन्यामन्यां प्रतिकर्म व्यतिहारे सर्वनाम्नो द्विर्वचनं नद्यं नदिं संनोषंस
मृद्धं पुनर्दिसमृद्धोभ्द्र्वरूपित्वं वा धि वा छांदसो यणादेशः सनिष्णत संभजंते । सनेर्लेटि सिब्बहुलमिति
सिपि इट् व्यत्ययेन पुनः श्नाप्रत्ययः । आत्मनेपदेष्वनत इत्यादेशो आच्यस्तयोरात इत्याकारलोपः छांद
सः टेरेवाभावः तत्र यथा श्रवस्यंतो अन्नमिच्छंतः जयाल्लब्धमन्नं काचंतः सनिमेतत्संभजंते ॥ब॥ अथ
षष्ठी ॥ब॥ ॥उत नो अस्या उषसो जुषेत ह्यर्कस्य बोधि हविषो हवीमभिः स्वर्षाता हवीमभिः ॥
यदिंद्र हंतवे मृधो वृषा वज्रिं चिकेतसि । आ मे अस्य वेधसो नवीयसो मन्म श्रुधि नवीयसः ॥ब॥ ॥
अयमिंद्रो नोस्माकं संबंधिनी अस्या उषसः कर्मणि पधीएनासुपसनुत्याहा संबंधिन उषःकालं
उत नो जुषेत अपिना वा सेवेत उपसं वास्माकं अयमिंद्रो यज्ञं गच्छेदित्यर्थः हि शरणार्थः गत्वा च अर्कम्

हविषः पूर्वकर्मणि षष्ठी। अर्चनसाधनं हविः। हावीमन्निः एवं प्रकारविशेषैः दत्तं हविः। उतो बोधि अपि
नामनावकमसत्। किंच स्वर्षाता स्वर्गस्य लाभविशेषस्य वा संभजनस्थाने यज्ञे हावीमन्निमाह्वाति
राकृतो न वेति शेषः। अस्मान्निराकृतः मन उपसद्य एवागत्य हविः स्वीकरोषीत्यर्थः। अस्मादिदं वचन
यद्यस्मात्कारणात् हे वज्रिन् वज्रयुक्तेंद्र मृधः हिंसकान् शत्रून् हंतुं वृषा वर्षिता सन् कामानां
विकेनसि अवबुध्यास किं तज्ज्ञाने जोहोत्यादिकः लेड्युडागमः। नान्यस्ता चिपातीत्यत्र छंदसि ब
हुलमिति वचनात् लघूपधगुणाभावः। अन्यस्तानामादिरित्याद्युदात्तत्वं। तस्मात् मः हे इंद्र मे
मम नमननीयं स्तोत्रं आ अवधि मर्वतः शृणु कीदृशस्य मे वेधसः मेधाविनः। वीयामानवतरस्य दीक्षि ७८
तसंस्कारैः संस्कृतत्वात् नवीयस्त्वं पुनर्विशेष्यते नवीयसः अतिशयेन नवतः असाधारणस्तुतिम

३९

तः अत्र यजमानविषाणोस्तकर्तृकं स्तोत्रमोवविशिष्टं भवति॥ ७॥ अथ सप्तमीमृचमाह॥ ७॥ ॥
वेतमिंद्र वावृधानो अस्मयुरमित्रयंतं तुविजात मर्त्यं वज्रेण शूर मर्त्यं जहि यो नो अघायति शृणु
घ सुश्रवस्तमः रिष्टं न यामन्नप भूतु दुर्मतिर्विश्वापभूतु दुर्मतिः॥ ७॥ ॥हे इंद्र तुविजात अस्मा
स्तुत्या बहुलाभवमापन्नः शूर विक्रांत त्वं वावृधानः अत्यर्थं वर्द्धमानः अस्मयुः अस्मान् का
मयमानस्त्वं अमित्रयंतं अस्मासु शत्रुत्वमाचरंतं मर्त्यं वज्रेण जहि हंते जहि इति ज आदेशः तस्य
असिद्धवदत्राभादित्यासिद्धत्वात् हेर्लुक् न। इत्यंकं कमित्याह यो मर्त्यो नो अस्माकं अघायति
अघं पापं दुःखं वा इच्छति तं जहि। अश्वाघस्यात्स्यादित्यात्वं। किंच हे सुश्रवस्तमः अतिशयेना
शोभनश्रवाः शृणु घ शृणु वयास्मद्वाक्यं कीदृशं नदति रुं तच्यते हे इंद्र त्वत्प्रसादात् दुर्मतिः

अस्मान्निंद्यां मा पय दुष्टा बुद्धिः अपहंतु अपगता न भवतु छांदसः त्वापोल्लुक् कस्तु वो स्तिउ। तिगुण
प्रतिषेधः न केवलं हिंसारूपा अपि तु विद्या सर्वापि क्रोधपरिवादादिरूपा अपहंतु। तत्र दृष्टां
तः॥ यामन् यामनि अध्वनि रिष्टं च अध्वनः श्रमेण हिंसितं परिश्रांतं यथा दुर्मतिः चोरादि विष
या बाधते तद्वत् मान् बाधमा दुर्मतिः अपगच्छतु। यद्वा यामति मार्गे यज्ञादिरूपे रिष्टं अस्तु
रुतं हिंसादिरूपं विघ्नं परिहरामि तद्वत्॥ ६॥ द्वितीयस्य प्रथमे विंशो वर्गः॥ ६॥ ॥
त्वया वयमिति षडृचं षष्ठं सूक्तं पारुच्छेपं आत्यष्टमैंद्रं युवं तमिंद्रापर्वतं त्वया वयं षळ्यवंत
मिंद्रापर्वतो इंद्रश्च इत्यनुक्रमणिका विनियोगो लैंगिकः॥ ६॥ ॥ तत्र त्वया वयमित्येषा प्रथ ७७
मामृचमाह॥ ६॥ ॥ त्वया वयं मघवन् पूर्व्ये धन इंद्रत्वोताः सासह्याम पृतन्यतो वनुयाम वनु

ष्यतः॥ नेदिष्ठे अस्मिन्नहन्यधि वोचा नु सुन्वते। अस्मिन्यज्ञे विचयेमा भरे कृतं वाजयंतो भरे कृतं॥ ६॥ ॥ हे म
घवन् मखवः सोस्थं तद्धिंद्र त्वया साधनेन युक्ता वयं अतएवेंद्र त्वोताः अतिप्रबलेनेंद्रेण त्वया रहिताः संतः
प्रत्ययेश्वेति वादेशः छांदसः मात्वं पृतन्यतः पृतनां आत्मन इच्छतः बलसेनायुक्तान् शत्रून् सः सह्या
म अभिभवेम तथा वनुष्यतः अस्मद्धाराय गच्छतः शत्रून् वनुयाम तेषामागमनात् पूर्वमपि मयं संन
जतं। किंच नेदिष्ठे अत्यंतसंनिहिते अस्मिन् अहनि अधि वक्षु उक्ते अद्यतने निसुन्वते यजमानाय
तदर्थं अधि वोच तं हविः प्रदं यजमानं यज्ञं वा तु हि प्रं अधिवं ब्रूहि लोटि व्यत्ययेन अवचं हे इंद्र वयं
यजमाना नरे संग्रामे कृतं जयस्य कर्तारं त्वां उद्दिश्य तज्जयार्थं वाजयंतः हविर्लक्षणान्नमुपा
रतः विचरंतः विचयेम स्तोत्रादिकं हविरादिकं वा व चिते चर्त्यय येन शपा तुनः कीदृशं त्वां भरे देवा

नांसंग्रामेअसुरजयेमेदेवानांसम्यक्नरणोवान्नतकर्त्तारिंनरश्तिसंग्रामनामन्ननेवार्हरतेवैनिया
स्का॥७॥अथद्वितीया॥८॥ ॥स्वर्जेषिनरआप्रस्यवक्तन्कषर्बुधःस्वस्मिंत्रेजसिक्राणस्यस्वस्मि
न्नजसि।अहन्निंद्रोयथाविदेशीक्षीशीक्षोपवाच्यः।अस्मत्रातेमध्यक्तंभरातयोनद्रानद्रस्य
रानयः॥८॥ ॥अयमिंद्रःस्वर्जेषस्वर्गगमनसेनसाधनेचरेसंग्रामेयुद्धेत्रातिभरव्यनहत
स्यद्वाविमोउरुषोलोकेस्वर्यमंडलंनेदिनाविश्वादिस्मृतिषुप्रसिद्धः।आप्रस्यआपनशीलस्य
न्नात्तुवधायश्तस्ततोव्यात्तस्यअणादिकोश्वरस्यचर्मनिमार्गस्नेस्वस्तिस्मिन्नृस्ततेत्रंजसित्रनि
व्यक्तिमतिकपटादिविरहितेभनःसएवत्राघ्यते।स्वस्मिंत्रेजसिस्वकीयेसित्रेंजसिभारवमहति ८०
संग्रामे।यद्वास्वस्मिंत्रेजसित्रात्रोस्वयमेवअप्रछन्नआगते।सति।अहन्निहंतिकस्यसंग्रा

८१

मश्तितङ्च्यते।आप्रस्यआपनशीलस्यआसमंतादिंद्रस्यप्राणयत्तवर्त्तषर्बुधःउषःकालेअउष्ठानायप्र
बुध्यमानस्यकाणस्ययागंजवाणस्यकरोतेश्रातरिछांदसः।त्रापोभक्।अमयजमानस्यशत्रून्नहन्
हिनस्ति।अतःकारणात्।अयमिंद्रःशीक्षाशीक्षोपवाच्यःसर्वेषांशरसाप्रणाम्यः।स्तुत्यःशीर्षछंदसिउ
दात्तनिवृत्तिस्वरेणोदात्तत्वंनित्यवीप्सायाःइतिद्विर्भावः।तत्रदृष्टांतः।यथाविदेसर्वज्ञायशिरसा
प्रणामतिक्रियतेस्तूयतेचतादृशेनमित्यर्थः।यद्वायद्वाविदेषेनप्रकारेणहंतव्यंशत्रुंजानासितं
तंप्रहंसिवित्तेर्व्यत्ययेनात्मनेपदंभरूपव्यत्ययःलोपस्त्वात्मनेपदेष्वितिलोपः।अथवायथाविदे
पर्यविंदसेलनसेशत्रुंतंतंमारयसि।अतःकारणात्स्तुत्यइत्यर्थः।अस्मिन्पक्षेछांदसोविकरण
स्यभक्पूर्ववत्तल्लोपः।किंचहेइंद्रतेरातयनेसंबंधीनिधनानिदानानिअस्मत्रात्रअस्मास्ववसध्य

कृसहएकोद्योगेनसंभुनवंतुसहइवदिंचतेत्वग्गित्यादिनाक्विन्सहस्यसध्रिरितिसध्र्यादेशः॥अ
ड्डिसध्र्यारंतोदात्तनिपातनंस्वरनिवृत्त्यर्थमितिसचाऽंत्रेतोदात्तः॥उदात्तस्वरितयोर्यणइतिस्व
रितः॥किंचनइस्यस्तुत्यस्यरातयःअस्मासुदत्तानिदानादिनिइंद्रस्येतिस्थिराणिसंतु॥७॥ ॥
अथतृतीया॥७॥ ॥नत्तुत्रयःअत्रथातेअस्तुकनंयस्मिन्यज्ञेवारमकृएवतक्षयमृतस्यवारसि
क्षयं॥विनद्वोचेरधद्दितांतःपश्यंतिरश्मिभिः॥सघाविदेअन्विंद्रोगवेषणोबंधुक्षिद्भ्योगवेषणः
॥७॥ ॥२६॥नतुखलुप्रसिद्धंहविर्लक्षणमन्नंअस्तुकस्त्रंआज्यादिसंयोगेनदृशंदीप्तंअस्तुचेदं
स्मिकर्मणएतद्रूपंतेतवप्रवृत्तंअत्रथातेतवस्वंनवतितथाद्यतनमपिसर्वदात्वामेवयजतइति
नावःअत्रपूर्वविधेत्यादिनाइवार्थेथाल्॥लित्स्वरःकीदृशंतदितिउच्यतेयज्ञेयागेयस्मिन्हवि

षिदातव्येसतिवारंवरणीयंक्षयंस्थानंवेदिलक्षणंअकृएवतउर्वतिक्षविजःकस्तवविशेषइतिचेदु
च्यते॥ऋतस्यसत्यफलस्ययज्ञस्यनिवासस्थानंसंनक्रोसियद्वाऋतमित्युदकनामतस्यक्षयंस्थानं
प्राप्तासिवृष्टिप्रदोसीत्यर्थः॥अथवाऋतस्यादित्यस्यक्षयंस्थानंधुलोकाख्यंवारसिजेयमानंगम
यितासितत्रादृशंवक्ष्यमाणकर्मविवोचेतिब्रूहिअधअतःकारणात्द्दितांतःद्दिवोपेतयोर्द्या
वापृथिव्योर्मध्येअंतस्थिरश्मिभिरादित्यकिरणैःपश्यंतिमेघंनिर्विघ्ररश्मिद्वाराप्रवर्षणरूपं
कर्मसर्वेजनाःप्रत्यक्षतःपश्यंतिअस्मद्दत्तंहविरादित्यप्रापयित्वातद्रश्मिद्वारावृष्टिंजनयसीति
तत्तामावेर्दृश्यतइत्यर्थः॥इदानींपरोक्षतयास्तौतिसघसखिंद्रःगवेषणःउकस्यापवेषणशी
लःतथाबंधुक्षिद्भ्यःहविःप्रदानादिबंधुभावंप्राप्तवद्भ्योयजमानेभ्यःगवेषणःगवांप्रसिद्धानांएष

णाकर्त्ताइषेवाजजकाकर्त्तरिल्फिट्यद्वागवेषमार्गेणेइर्ष्ववत्ल्फट्यजमानफलस्यमृगयितेत्य
र्थः।अत उक्तक्रमेणैवकर्त्तासन्विदेविंदतेउदकप्राप्तिप्रकारंजानाति॥८॥अथचतुर्थ॥८॥
॥ ॥नूइत्थातेपूर्वथाचप्रवाच्यंयदंगिरोभ्योवृणोरपव्रजमिंद्रशिक्षन्नपव्रजं।ऐभ्यःसमान्या
दिशास्मभ्यंजेषियोत्सिच।सुन्वद्भ्योरंधयाकंचिदव्रतंहृणायंतंचिदव्रतं॥८॥ ॥हेइंद्रतेतव
संबंधिकर्मइत्थाइत्थमुक्तप्रकारंवक्ष्यमाणंरूपंवापूर्वथापूर्वमिवपूर्वेयथाभवत्तथाप्रवाच्यंस
र्वैःस्तोतव्यंतद्धिदानीतनमपिस्तुत्यंनूइत्थेत्यत्रईषाअक्षादित्वात्प्रकृतिभावःकीदृशंतदि
तितदुच्यतेयत्त्वंअंगिरोभ्यःएतन्नामोत्पन्नेभ्योमहर्षिभ्यःतेषामर्थायव्रजंअंतरिक्षेगच्छंतंमेघंअ
पावृणोःअपवृतवानसिमेघभेत्त्वाद्यवृष्टिमुत्पादितवानसिव्रजइतिमेघनामव्रजःचरुइति

तन्नामसुपाठात्।किंचहेइंद्रअंगिरोगवांसमूहंअपअयष्टंभ्योपकृत्यनेभ्यएवांगिरोभ्यःशिक्षन्वितरन्नुद्घाटितवा
नसि।यद्वापणिनिरपहृतंबिलेस्थितंगवांव्रजमपहर्तुमपावृणोः।अपहृतद्वारमकरोः।किंचहेइंद्र
एभ्यउक्तेभ्यऋषिभ्यःसमान्यादिशासमानयारीत्यातेभ्योयथाददासितद्वत्अस्मभ्यमपिजेषिध
नंसंग्रामंवाजयतदर्थंयुध्यस्वचछांदसोविकरणस्यलुक्करणंव्यत्ययेनपरस्मैपदं।किंचत्वंसुन्व
द्भ्यःत्वदर्थमभिषवंकुर्वद्भ्योमह्यंकंचिदव्रतंसर्वमपिअव्रतंयज्ञानंयागविरोधिनंरंधयबाधयमद
धीनंकुर्वित्यर्थः।नकेवलमयज्ञानंकिंतुहृणायंतंचिदव्रतंचिदित्यपकर्षेत्यत्रअस्मासुरोषं
कुर्वंतंयमेवायष्टारंस्वयंरोषवंतंवायद्वाहृणायंतंचित्रोषवंतमपिअव्रतंकर्माणं।पुनर्दृनन
नंसमर्थंकुर्वंतंधयाहृणीङरोषेकण्वादिव्यत्ययेनाकारः॥८॥अथपंचमीमृचमाह॥८॥ ॥

संयज्ञनाक्रतुभिःशूरइंद्रयद्दनेहितेतरुषंतश्रवस्यवःप्रयक्षंतश्रवस्यवः।तस्माआयुःप्रजावदिद्बाधे
अर्चंत्योजसा।इंद्रउक्यंदिधिषंतधीतयोदेवांअच्छानधीतयः॥८॥ ॥यतूयइंद्रःशूरःविक्रांतःसं
न्नजनान्सर्वान्प्राणिनःक्रतुभिःप्रज्ञाभिःसमीक्षयत्सम्यगीक्षयतितत्तद्विषयान्अंतर्या
मिरूपेणसर्वेषांबुद्धिष्ठितःतेविषयान्दर्शयतीत्यर्थः।यद्वाक्रतुभिःकर्मभिःस्तुत्तदुच्च
तरूपेनिमित्तभूतैःतत्तत्फलैर्योजयतिएवंप्रेरयतिसतिश्रवस्यवोन्नमिच्छंतोयजमानाःधनेग
वादिरूपेहितेअन्निमत्तेसतियद्वाहिते।धनेअन्निप्रेनेसतितरुषंतहिंसंतिशत्रून्तरुष्यतिवध
कर्माछांदसोलुङिव्यत्ययेनत्रेरङ्तरातेर्वालङ्उत्कारसिप्शपस्त्वयोर्विकरणः तंबीत्यर्थः।अं
तःकारणान्श्रवस्यवोन्नंहविर्लक्षणंइंद्रायात्मनेवाइच्छंतःसंतःप्रयच्छंतप्रकर्षेणयजंतेछांद ४२

५४

सोलुङिव्यत्ययेनक्तः।किंचतस्माइतत्तस्मैधामिद्रायेंद्रायैवआयुर्हविर्लक्षणमन्नंप्रजावत्पुत्रा
दिसहितंभवतितैःसहितंदद्यायइतिइत्यर्थः।किंचयजमानाःओजसास्वकीयेनबलेनयुक्ताःबाध
शत्रूणांबाधनेनिमित्तभूतेसतिबाधितुंवास्तस्यार्थेतावेकेकेन्यत्वनइतिकेन्प्रत्ययः।पापंअर्चं
तिपूजयंतियद्वातस्माइतियजमानायैवबाधबलेनिमित्तभूतेसतिबाधइतिबलनामसुबाधः
तविषीतितन्नामसुपाठात्।प्रजावत्पुत्राद्युपेतमायुःअर्चंतुलब्धुंओजसाबलेनयुक्ताअर्चं
तिइंद्रंपूजयंतिऋत्विजइतिशेषः।किंचधीतयःकर्मवंतोयजमानाःइंद्रेइंद्रसमीपंगतायांबोध
इतिवत्तत्सामीप्यलक्षणातेइंद्रलोकइत्यर्थः।तत्रउक्यंउकःनिवासस्थानंस्वार्थेयत्दधिषंत
धारयंतिधिशपक्षेअत्रधारणार्थःजौहोत्यादिकःव्यत्यायनंतादेशः।तएवपुनर्विशेष्यंतेधीत

यः स्वनं साधनं कर्मवंतः सं नो देवां अछान देवानानित्थं रथ्येनवा नुमिवत्तकां दिधिषंनेत्यन्वयः। अवि
वाक्ये हनिमान् सयत् हन नक्षणानंतरं नक्षत्रेषु दृश्यमानेषु अध्वर्युप्रस्तोतारः सर्वे युवंतमित्येतां
जपेयुः गार्हपत्ये जुह्वती निरवंदेवस्त्रितं युवंतमिंद्रापर्वता पुरोयुधेति जपेत इति ॥६॥ सेषा षष्ठी
॥६॥ ॥युवं तमिंद्रापर्वता पुरोयुधा यो नः पृतन्यादप तंतमिद्धतं वज्रेण तंतमिद्धतं। दूरे चत्ता
य छंत्सद्गहनं यदिनक्षत्। अस्माकं शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः॥६॥ ॥हे इंद्र
प्रसिद्धपर्वतः पर्वतान् मेघः तदभिमानी देवः। नो युवां पुरोयुधा संग्रामे पुरतो योद्धारौ नो अस्मा
कं यः शत्रुः पृतन्यात् अस्मान् हंतुं पृतनामात्मन इच्छति तंतमित् सर्वमपि शत्रुं अपहतं नाश ८६
यतं हंतेर्लोधिस्तदात्तोपदेशेत्यनुनासिकलोपः। केन साधनेनेति तदुच्यते नंतमित् सर्वमपि शा

५

त्रुं हतं वज्रेण साधनेन प्राकृतं ईदृक्सामर्थ्यमस्तीति दर्शयति यत् यो वज्रः स्विंगयत्ययः दूरे चत्ताय अत्यंतं दूर
देशे गंताय चातयतेर्वा नाशकर्मणः। नष्टाय दर्शनमप्राप्ताय इत्यर्थः। यसितस्कभितेत्यादौ निपातनादि
ड्भावः तादृशं शत्रुं छत्सन् छंदयति कामयते। हंत्रं छंदतेः कांतिकर्मणः इदं रूपं। किंच गमनं दुरवगा
हस्थानं अनिकविनं रुदयं शत्रुं समीपं वा इनक्षत् तथा प्राप्नोति नक्षगतौ छांदसः इकारोपजनः इनक्ष
तिर्वा क्षत्यंतरं इदानीमिंद्र दानीमिंद्र एव श्रूयते। हे शूर शौर्योपेतं इद्र अस्माकं विरोधिनः शत्रून् वि
श्वानसर्वक्ति किकस्तामिलपरि परिः विश्वतो विश्वैरुपायैः दर्षीष्ट दारयसि किंच दर्मा शत्रूणां दा
रकः दारयतेरन्येभ्योपि दृश्यंत इति मनिन् णिलोपः उदात्तनिवृत्तिस्वरेण मनिन् उदात्तत्वं स्वछांद
सः। यद्वाहन्यपद्यादिवाम्नितां रूस्वइति रूस्ववां तव इवोक्तो वज्रः विश्वतः सर्वान् शत्रून् सार्वरूपा

यिवर्दिपीष्टदारयति।यद्वादर्मशित्रूणांदारकःइंद्रोदृढोदर्षणप्टकाम्रेनदारयतिशात्रून्॥९॥इतिद्वि
तीयस्यप्रथमेएकविंशोवर्गः॥९॥ ॥उतेभ्रुनामीतिनवर्चंसप्तमंसूक्तंपाशुच्छेपमिंद्रंआद्या
त्रिष्टुप्अंतित्रयंत्याद्यास्तिस्रोनुष्टुभःपिशंगरूष्टिमित्येषगायत्रीअबर्महइत्येषानंतिधा
नादत्युष्टिः।अत्रानुक्रमणिका।उतेभ्रसप्ताद्यौत्रिष्टुप्तिस्रोनुष्टुभोगायत्रीधृतिरिति।अस्य
सूक्तस्यविनियोगमाहशौनकः।उतेभ्रुनामीतिसूक्तेसप्तर्चंस्तुप्रकीर्तिताःताजपन्नप्रय
तोनित्यमिष्टान्कामानसमश्नुते।ताजपन्नहंतिरक्षांसिसपत्नांश्चनिहंतिनति॥९॥तत्रप्रथ
मा॥१॥ ॥उतेभ्रुनामिरोदसीरुतेनद्रुहोदहामिसंमहीरनिंद्राःअभिष्ठ्वगयत्रहता ८५
अमित्रावैलस्थानंपरिष्ट्याअशेरन्॥१॥ ॥हेइंद्रकृतेनबहुदेवेनयज्ञेनवज्रेणोनेरो

दसीद्यावापृथिव्यौभुनामिलोकद्वयहिंसकानांनाशायपूर्णांवामेपद्मेमेनेनपावयामि।किंचलोकेअनि
द्राइंद्रविरहितानामाश्रयभूतामहीःसर्वाअतएवद्रुहोद्रोहिणामाधारभूतत्वात्स्वयमपिरूतवात्
दोग्ध्रीःसंदहामिसंत्यकरेणयादहामि।भुनःसएवशिष्यते।यत्रयाभूमिषुअमित्राःशत्रवअनि
ताहत्वाहताःसर्वतःप्राप्ताःअस्मनिर्यातिनावाङ्गतिगतिकर्माछांदसोधातुःतेसर्वेनिहताःहिंसि
ताःविरुद्धहिंसार्थःउदित्वात्यस्यविनाषेतीटप्रतिषेधःहिंसिताःसंतःअशेरनशायनंप्राप्ताःशेतेर्य
त्यायनपरास्मैपदंशीङोरुड्वाड्सर्वधातुकेगुणःवैलस्थानंबिलस्थानंबिलप्राष्टागर्तसमा
नार्थःसचगर्तःश्मशानवचनःअतोयमपिश्मशानवाचीअथवाबिलसंबंधिस्थाननागलोकःन
त्रवाअशेरन्यद्वाविलम्हेपइतिधातुःयन्नर्थेकःस्वार्थिकोणतत्रशवाःछिपंतइतिवैलस्थानंश्म

शानेंतत्रत्वयाहताःभूमिंवैश्मशानवच्छवाःसर्वत्रशेरतेतान्दहामीत्यर्थः॥छ॥अथद्वितीया॥छ॥ ॥
अभिव्लग्याचिदद्रिवःशीर्षायातुमतीनां।छिंद्धिवटूरिणापदामहावटूरिणापदा॥छ॥ ॥अद्रि
वः।वैरिणांनत्तकयद्वाअद्रेर्मेघस्यादर्तारिंद्रत्वंयातुमतीनांहिंसानहेतीनांसेनानांयद्वायातना
साधनान्यायुधानियान्तिनहेतीनांअथवायातवारच्चांसितनहेतीनांसेनानांकर्माणिषष्ठीशत्रू
णांसेनाःअभिव्लग्याचित्अभितःआप्लिग्यछिंधिचूर्णययद्वानासांसंबंधीनियथादीनिछिंधिकेन ८६
साधनेनेतितदुच्यतेवटूरिणापदावेष्टनशीलेनसर्वव्याप्तेनत्वदीयपादेनअतिविस्तृतेनेत्यर्थः।य
द्वावटूरिणापदावेष्टनशीलेनहस्तिनःसंबंधिपादेनऐरावतपादेनेत्यर्थः।नकेवलेनायनकेन ८६
पादेनेत्याहमहावटूरिणापदामहावेष्टनवतास्वीयेनैरावतसंबंधिनापादेनछिंधिचूर्णयेवट

वेष्टनेखर्जिपिंज्यादिभ्यऊरजखावित्यूरच्प्रत्ययःअतइनिठनावितिनिः॥छ॥अथतृतीया॥छ॥ ॥
अवासांमघवञ्जहिशर्धोयातुमतीनां।वैलस्थानकेअर्मकेमहावैलस्थेअर्मके॥छ॥ ॥हेइंद्र
मघवन्धनवन्आसांयातुमतीनांयातनासाधनान्यायुधानियान्तिनहेतीनांयातुधानवतां
वासेनानांशर्धोबलंअवजहिचूर्णयतथात्वंचअमीकउस्मितंशावैरणीयेहैलस्थानकेउस्मि
तेस्वैक्लिन्नत्वेश्मशानेपलायतिशेषः।यद्वावैलस्थानकेविलसंबंधिउस्मितेस्थानेअंधका
रावृतेअधोलोकेस्थापयेतिशेषः।नतुयत्रक्वचित्तच्चेनेत्याहमहावैलस्थेसर्वैर्गंतव्येमहाश्म
शानेनागलोकेवापुनःकीदृशेअर्मकेउस्मितेगतास्तुनिस्तरणीये॥छ॥अथचतुर्थी॥छ॥ ॥
यासांतिस्रःपंचाशतोभिव्लंगैरपावपः।तत्सुतेमनायतितकत्सुतेमनायति॥छ॥ ॥हेइंद्रया

सां इ वेक्ति मंत्रोक्तलक्षणानां सेनानां तिसृः पंचदशः त्रिगुणित पंचाशत्संख्या माधवतं अभिव्लंग्य अ
भिगमनेः व्लंग गतिर्गतिकर्मस्विति उक्तं अभिगम्य अपावपः नाशितवानसि हे इंद्र तत्राष्टशतं शतेनावधादि
रूपं कर्म स्तुमनायति स्तुष्टु मंनावयतीत्यर्थः। किंच हे इंद्र तेन तव अथ्यद्वितात्तु सेनाजयरूपं महदपि
तकदिति स्तुमनायति अन्यत्स्वमिदमिति स्तुष्टु मन्यते॥छ॥ अथ पंचमी॥छ॥ ॥पिशंगभृष्टिमंभृ
णं पिशाचिमिंद्र संमृण। सर्वं रक्षो निबर्हय॥छ॥ ॥हे इंद्र पिशंगभृष्टिं ईषद्रक्तवर्णं अंभृणं अ
तिनयंकरं वाक्षायमाणं अमणशब्दं गतात् पंचाद्यविद्धादस्तानलोपश्छेयद्वा महांतं अतिप्रवृ
द्धमित्यर्थः। अंभृण इति महन्नाम सुपाठात् अंभृणः मा भिन इति तत्र पाठात् उक्तविधं पिशाचिं
पिशाचविशेषं जरामित्येके संमृण सम्यक् हिंसय न केवलं एतमेकं किंतु सर्वं रक्षः रक्षणनिमित्तं ७

तं राक्षसादिकं निबर्हय निःशेषय बृह हिंसायां चौरादिकः नामयधकर्मेतन्नु नितोशयति निबर्हयतीति
तन्नोक्तत्वात्। दशरात्रस्य षष्ठेहनि अग्रगशास्त्रे पैंद्रस्तृचस्यावर्मह इंद्रेत्यादिके प्रथमा द्वितीये षष्ठस्य
तिखंडे सूत्रितं अवर्मह इंद्र वृषन्निंद्रेति॥छ॥ सैषा षष्ठी॥छ॥ ॥अवर्मह इंद्र दादृहि श्रुधी नः शु
शोच हि द्यौः क्षा न भीषां अद्रिवो घृणान्न भीषां अद्रिवः॥छ॥ शुष्मिंतमो हि शुष्मिभिर्वधैरुग्रेभिरीय
से अपूरुषघ्नो अप्रतीत शूर सत्वभिः त्रिसप्तैः शूर सत्वभिः॥छ॥ ॥हे इंद्र महः महतो मघस्य कर्म
णा षष्ठी महांतं जलधारिणं मेघं महांतं दृत्रं ता अवः अवस्तात् अवाङ्मुखं शर्वाधारत्यादिना अरि
त्ययोवादेशाध अम्नरूधरवरित्किन्नयथाछंदसीति रफः दादृहि विदारय किंच नः अस्मदीयं स्तु
तिं शृणु अरिमेघः तद्वानिंद्राहि यस्मात्कारणात् द्यौः द्युलोकानामयं दयं तः शुशोच तिदृष्टकन्ताये

नह्विराधभावादितिभावः।किंचतुविनच्छेतिच्छनामाह्वायंतेनिवसत्यस्यामितिच्छाः।च्छैजैषेच्छये।अ
धिकरणेक्विप्।च्छासर्वनिवासाश्रयत्वमितिनिवसायथालोषहृष्टभावात्।मस्यादित्वोपेनीत्याशास्त
तिनद्वतु।लोकद्वयमपिदृष्टभावेनशोचतइत्यर्थः।अस्वरपक्षेलोकद्वयमाहृत्यप्रवर्द्धमानंधत्त
महसद्मानेद्यावापृथिव्योशोचतइत्यर्थः।मस्मात्प्रधातिपूर्वत्रान्वयः।नोनादृष्टांतः।हेअडि
वःप्राप्तृणांनच्छकयद्वाअडिर्वज्रः।तेननद्वतुहेइंद्रघृणात्नीमानदीप्तान्।अत्र्यमर्त्निंतिरातु
ष्टुनीत्यत्वष्टुनीत्याद्वर्यंयथाद्यावापृथिव्योच्चनद्वतु।अत्रेनिदासममाकुः।सर्वजगतिमर्दांध
कारेणाहतेमतिदेवावित्याभिंत्रार्थितवंतः।मच्चवज्ररूपेणद्यावापृथिवीभ्यांमकाशांत्तेम। ८८
विदस्यत्तुपपद्यतनंदृष्ट्वाद्यावापृथिव्योर्बिभ्यतुरिति।मचानेत्वष्टुर्बिभ्यतुरित्यादिश्रुतिना

वगंतव्यःयद्वाहृणाःकेवलोग्निःतस्माद्यथानीतस्त्वद्वतुमाचनीतिरेजेतांरोदसीइत्यादिश्रुतिनोवगंत
व्यः।ताहृशीनीनिष्टप्रदानेनपरिहरेत्यर्थः।हेइंद्रत्वंशुष्मीनिर्बलैःशुष्मितमोहित्र्यतिशायेनबल
वान्खलुअतःकारणात्उग्रेभिःउग्रैर्सैःअतिक्रूरैःनद्यस्तदुपायेसहितस्त्वंईयसेनाशातृग्मेघा
वागच्छसिईंडुगतौविवादिकत्वात्श्यनयद्वाशुष्मिनिर्बाधैरितिसंबंधःहेशूरअविक्रांतवनिरभ्र
तीतअवसानैःरक्षःप्रन्टतिनिरभ्रतिगतयुद्धेवात्तुनिरनाक्रांतयत्वासवनिःप्राणिनिरस्तुतमन
स्कैरनधिगतअधुरूपन्नापौरुषोपेतानांयजमानसमर्थानामहनत्वं।त्रिसप्तैःसत्वनिःसप्तनिः
सप्तनिर्वासत्वनिरनुचारोरूपेनःमतूईयसइत्यन्वयः।प्रातःसवनेब्राह्मणाछंसिनःप्रस्थितयाज्या
याःपुरस्ताद्धनोनिर्दत्येपात्रेद्गणीयातत्रैवखंडेस्तुतितं।वनोतिहित्वद्वयंपरीणसोमोषुवो

Dr. BHAU DAJI MEMORIAL

अस्मद्दन्तितानिपांसयेति॥७॥नामेतांसप्तमी॥७॥   ॥वनोतिहिसुन्वन्क्षयंपरीणसःसुन्वानोहि
ष्मायजत्यवद्विषोदेवानामवद्विषः।सुन्वानइत्सिषासतिसहस्रावाज्यवृतः।सुन्वानायेंद्रोददात्या
भुवंरयिंददात्याभुवं॥७॥   ॥हेइंद्रसुन्वन्त्वामुद्दिश्याभिषवंकुर्वन्यजमानःक्षयंपरीणसो
मोभुवोअस्मद्दन्तितासार्वैर्वस्तव्यंगंतव्यंवावहनोगृहंनिहितत्प्रसादात्संभजतेहिःप्रसिध्यर्थः
किंचसुन्वानोहिसोमयागंकुर्वाणएवापरीणसःपरितोनद्धान्संबद्धान्द्विषोद्वेष्टॄन्नवयज
तिनाशयतिनाकेवलंयागद्वेषिणःदेवानांद्विषोप्यवजयति।किंचसुन्वानइत्अन्तिषवोपल
क्षितंयागंकुर्वाणःहेइंद्रत्वत्प्रसादात्वाजीवाजवान्अन्नवान्अवृतःपरैरनाक्रांतःसन्स ८९
हस्रान्यपरिमितानिगवादिधनानिसिषासतिसाधयितुंसंभक्तुंइच्छति।सनेःशनेःशनिसनी

५

वंतद्धेतिविकल्पेनाद्दिस्नावेजनसनखनेत्यात्वं।केनेदंलभ्यतइतितत्राहसुन्वानायइंद्रमुद्दिश्यसो
मयागंकुर्वाणस्ययजमानस्यवाअयमिंद्रःआभुवंसमंतात्भवनशीलंअतिसमृद्धंरयिंगवादि
रूपंधनंददातिप्रयच्छतीति।तस्मात्सुन्वानःसिषासतीत्यर्थः॥७॥द्वितीयस्यप्रथमेद्वाविंशोवर्गः॥७॥
॥ ॥इतिश्रीसायणाचार्यविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येद्वितीयाष्टकेप्रथ
मेमंडलेएकोनविंशोनुवाकः॥७॥   ॥विंशेनुवाकेषट्सूक्तानितत्रात्वाजुवइतिसप्तर्चंप्रथमंसू
क्तंपारुच्छेपमात्यष्टं।त्वंनोवायवित्यंत्याष्टिःचतुःषष्ट्यक्षरायथंत्विष्यमाणत्वादिदमुत्तरंचवायु
देवत्यंअत्रानुक्रमणिका।आत्वाकन्त्यायवंत्वंत्याष्टिरितिविनियोगोलैंगिकः॥७॥तत्रप्रथमा॥
॥७॥   ॥आत्वाजुवोरारहाणाअभिप्रयोवायोवहंत्विहपूर्वपीतयेसोमस्यपूर्वपीतये।ऊर्ध्वाते

अनुसूनृतामनस्तिष्ठतुजानती॥नियुत्वतारथेनायाहिदावनेवायोमखस्यदावने॥१॥ ॥
हेवायोत्वांजुवःगमनशीलाःरारहाणाःशीघ्रगामिनःबलवंतोवासमर्थानियुत्संज्ञकाअ
श्वाःरहिगतौ।लिटःकानच्छांदसमभ्यासिकलोपः।इहअस्मिन्यज्ञेवहंतुप्रापयंतु।किमर्थंपू
र्वपीतयेपूर्वस्यानायतुनः।किमर्थंपूर्वपीतयेइतरदेवेभ्यःअग्रपानायमरुद्वृधादित्वात्।पूर्व
पदांतोदात्तत्वं।किंचहेवायोतेतवसंबंधिनःसूनृताप्रियसत्यात्मिकास्तुतिरूपाअस्मदीया
वाक्तिष्ठतुआश्रित्यसर्वदावर्तनात्हर्षयत्वित्यर्थः।सूनृतेतिवाङ्नामसूनृताब्रह्मेतितन्नाम
सुपठितत्वात्।जानतीतथाजानतीतवगुणान्विशेषेणअवगच्छंतीसोमपानार्थंस्तुत्य ९०
र्थंचहेवायोमखस्ययज्ञस्यदावनेदातव्यायहविषेतत्स्वीकारायतुनः।किमर्थंदावनेअस्म

५१

भ्यअभिमतदानाय।उभयत्रददातेःकर्मणिनावेवक्रमेणौणादिकोविनः।छांदसोउलोपश्चलोपः।नियुत्वता
येननियुद्भिर्युक्तेनरथेनायाहिआगच्छ॥१॥अथद्वितीयामृचमाह॥१॥ ॥मंदंतुत्वामंदिनोवाय
विंदवोस्मत्क्राणासःसुकृताअभिद्यवोगोभिःक्राणाअभिद्यवः।यद्धक्राणाइरध्यैदक्षंसचंतऊतयः।
सध्रीचीनानियुतोदावनेधियउपब्रुवतईंधियः॥१॥ ॥हेवायोत्वांअस्मत्अस्माकंसंबंधि
नःइंदवःक्लेदयितारःसोमाःमदंतुमादयंतुव्यत्ययेनपरस्मैपदं।कीदृशाःसोमाःमंदिनोमाद
यितारःक्राणासःकुर्वाणाःस्वकार्यंहर्षादिकंसुकृताःअभिषवदशापवित्रशोधनग्रहणादिभिः
सुष्ठुकृताःअभिद्यवःअभितोद्योतयंतःगोभिर्वाग्भिर्मंत्ररूपाभिःक्राणाःक्रियमाणाःहूयमानाः
यद्वागोभिर्गंतृभिःआहवनीयंप्रत्यानेतृभिःप्राणैःहूयमानाःकरोतेःशानच्छांदसःशलोपःक

तथाअनियुवःअनियुवःअनिगंतारःहेवायोवायत्कारणात्तुशब्दप्रसिद्धोदत्तंअस्मद्यागादशंअति
गंतुमस्माद्वंतंतसमर्द्दयितारमात्वांनियत्एतत्संज्ञकाःस्ववाश्वाःदावानदानायद्विःस्वीकारा
तिनिमित्तंधियःकर्माण्युद्दिश्यसचंतेआत्वांसंगच्छंतेयागदेशंवा॥किमर्थंइरध्यैप्रापयितुंवाईर
गतोस्मर्थेत्वाध्येप्रत्ययःऋस्वश्छांदसः।इरध्यतिःपरिचरणकर्माइरध्यतीतिध्वेमेतितन्नामसूक्त
वान्कीदृश्यस्ताःक्षाणाःस्वव्यापारेरय्वादिकंऊर्वाणाःक्षाणाःऊ।ऊर्वाणाइतियास्कःजंत
युः।रक्षणवंतःऊतीतियुक्तावातथापत्रीवीनाःत्वयापदृांचंत्यःमहस्यमधिविनाशांतेरितिस्वा
र्यरिवयन्त्ययेनांतोदान्तःकिंचधियःकर्मवंतःबुद्धिमंतोवाअजिराधुरिवोढ्वेवहिष्ठयजमा
नावाउपऋच्छतेउपेत्यअवंतिस्वान्निमतंविज्ञापयंतिवा॥२॥अथतृतीयामृचमाह॥३॥ ॥

वायुर्युंक्तेरोहितावायुररुणावायूरथेअजिराधुरिवोढवेवहिष्ठाधुरिवोढवे।प्रबोधयापुरंधिंजारआस
सतीमिव।प्रचक्षयरोदसीवासयोषसःश्रवसेवासयोषसः॥३॥ ॥अयंवायुःरोहितोरोहितवर्णौ
वश्वौधुरिधारणप्रदेशेरथस्याग्रभागेयद्वानारवहतेयुंक्तेकचियोजयतितथाकचिदरुणा
अरुणवर्णौधुरियुंक्तेतथाअजिराअजिरौगमनशीलौवर्णविशेषःयुक्तोकदाचिदेकोयद्वैतद्
नयत्रसंबध्यते।किमर्थंयुक्तइतितदाह।वाह्निवेधुरंवोढुंनारवाहनायकिंचवहिष्ठान्वहिष्ठौअ
अतिशयेनवोढारावाश्वौवोढुंशक्नुतस्तिष्ठति।उरिष्टेमयस्लिनिरलोपःदित्वादिकमपिद्वावानिव
र्तंतद्विर्वचनस्याकारः।धुरिवोढुवेमहज्जारंवोढुमहतिनावोवाढव्येमतिष्ठनःउनर्वायुर्हेअणांअ
होयोजनवचनंचअतिशीघ्रंआगच्छतीतिज्ञापनार्थंइदानीप्रत्यक्षेणाह।हेवायोपुरंधिंबहुप्र

ऽस्मामथ्यिजमानमितिगम्यते।पुरंधिर्बहुधीरितियास्कः।तं प्रबोधय रथेनशीघ्रमागत्य प्रज्ञाप
य हविस्वीकारायेतिभावः।अत्र दृष्टांतः।जारः पारदारिकः आसमंतात्यागमनध्यानेन ईषत्स्वपंतीं पु
रंधिमिव प्रलष्टशरीरधारिणींयोषितमिवतांयथास्वसंकेतेनप्रबोधयकिंचतदर्थं।रोदसी
द्यावापृथिव्यौ प्रचक्षय प्रकर्षेण प्रख्यापय प्रकाशयेत्यर्थः।तत्प्रकाशार्थं उषसोवास्त्वयं उषसःका
शनमपित्यथावत्प्राप्य प्रतानंकुर्वित्यर्थः।पुनस्तादर्थ्येप्रार्थ्यते।श्रवसेश्रवइत्यन्ननामनवस्तु
रूपान्नस्वीकारायउषसोवासय॥४॥अथचतुर्थीमृचमाह॥४॥ ॥तुभ्यमुषासःशुचयःप
रावतिभद्रावस्त्रातन्वतेदंसुरश्मिषुचित्रानव्येषुरश्मिषु।तुभ्यंधेनुःसबर्दुघाविश्वावसूनिदो ९२
हते।अजनयोमरुतोवक्षणाभ्योदिवआवक्षणाभ्यः॥४॥ ॥हेवायोतुभ्यंत्वदर्थंउषासःउष

५३

सःश्वेत्किरीत्यात्वयाप्रकाशिताशुचयःशुद्धादीप्तावापरावति।अत्यंतेदूरदेशेअत्यंतरिक्षेदंसुदंसद्
मकर्मवस्तुयद्वागृहनामैतत्।अत्यंतजोपस्थांदमः।गृहवदाच्छादकेषुरश्मिषुस्वकीयेषु।तेःभद्राभं
दनीयानिकल्याणानिवस्त्राणिआच्छादनयोग्यानिवस्त्राणितन्वतेविस्तारयंतियद्वाउपमा।दंसुयाग
गृहेषुदेवयजनेषुरश्मिषुहोमायप्रदीप्तानिज्वालावस्तुआगतायतुभ्यंभद्रावस्त्रातन्वतेअग्नि
ज्वालाएववस्त्राणिचित्राणिविस्तारयंतीत्यर्थः।उषःकालेअग्नीनांप्रज्वाल्यमानत्वात्ताएववस्त्रा
णीत्युपचर्यंतेनकेवलंसाधारणानिवस्त्राणिनित्यादनव्येषुनूतनेषुस्तूयमानेषुवास्तुतौ
अवौयतूर्वानोयिप्रत्ययइत्यवादेशः।एतेनावइत्याच्छादकेच।रश्मिषुचित्राणिनानावर्णयुक्ता
निआश्चर्यभूतानितन्वतेउषःकालेरश्मीनांनानावर्णत्वादितिभावः।अग्निज्वालेतिपक्षेज्वालानांका

नीकारानी आदिरूपेण नानावर्णत्वाच्चित्रत्वं ॥ किंच हे वायो उच्यंतदर्थं त्वद्यागार्थमेवाधत्तुष्टुनारि
नाम्नीणायित्री गौर्जातावेकवचनं सबर्दुघोमवरित्यमृतनामतस्य दोग्ध्री दुहः कघश्चेतिकर्मणि
ती विश्वावसूनि सर्वाणि धनन्याज्यादिरूपाणि दोहते स्वयमेव दुग्धे प्रीणयतीत्यर्थः कर्मकर्त
रिन दुहस्नुनमां उः नियमस्य नावस्थां दम्भ आपोखुगनावः कस्तव विशेष इति चेत उच्यते हे वायो दि
वदीन्नादंतरिक्षात्मरुतः एतन्नामकान्मेवं विशीर्यंष्टुग्धुत्यादकान् वदंशास्तान् देवानयजं जं
नयसि किमर्थमिति न उच्यते वक्षणाभ्यः प्रवहणेभ्यः प्रवहणशीलाभ्यो ऽद्भ्यः वृष्टिलक्षणाभ्यत
थावक्षणाभ्यः नदीनामेतन्नवक्षणाः सजाता इति नन्नामस्तुपाठात् नासामर्थाय ॥ ७ ॥ ॥ ९३
अथ पंचमी ॥ त्वं युक्तामःउ च यक्षुरण्य वोमदे ऽन्याइषणंन त्वर्णयपामिषंतदूर्णा ॥ लांस

DR BHAU DAJI

५८

रीदमानोन गमीद्वैतक्कवीये ॥ त्वं विश्वस्मात्भुवनात्पासि धर्मणाऽसुर्यात्पासि धर्मणा ॥ ५ ॥ ॥ हे वायो उ
च्यंवदर्थं अत्राक्रामोदीप्ताश्चयः शुद्धाः सोमस्य पातारो त्वं तं शुद्धान्नवति ॥ किंत्व वक्तव्यंतेषां शुद्धत्वे
तुरण्यवः त्वरणायुक्ताः त्वां प्राप्तुं उयाउ हूर्षतिजस्त सोमाः मदेष्विनवदेष्विनिमित्तभूतेषु नुवर्णान
रणावतियागेऽयणं तत्र आहवनीयं प्रतिगच्छंति इच्छंति वा व्यत्ययेनात्मनेपदं शमं मोक्षोविकाणोर विं
त्वर्णामिवस्यंतउदकं इच्छं स्कत्यादपित्वं अग्रोह्रूयमानस्याहुतेरादित्यद्वाराहष्टुत्पादकत्वात्
यद्वा यजमानस्याहुतेरादित्यद्वारा दृष्टुत्पादकत्वात् यद्वा यजमानास्त्वाकछ्रियाजुहुतीनाः अपां
वर्षणमिच्छंति किंच हे वायो नगं न जनीयं त्वाम् मारीतु सरणावानु अत्यंतनीतः दममानउपक्षीण
यज्ञविद्यातकः पयोव्रतादिनियमैर्वा यजमानः तक्कवीये तस्करेणां यज्ञे विद्यातिनां अन्यत्र गम

नायईद्यस्तौतिईडस्तुतौ।अदादित्वाच्छपोलुक्।यतस्त्वंविश्वस्माद्भुवनात्सर्वलोकान्ऋतजातान्
वालोकत्रसंबंधिनोनयान्धर्मणा।अस्मदीयरुचिषांधारणेनपासिपासिकिंचअसुर्यान्अस्
रसंबंधिनोऽयान्विशेषेणयासिधर्मणाअस्मद्धारणेनपोषणेनवायुक्तःसन्यतएवंकरोषिअ
तास्तोतीत्यर्थः॥५॥अथषष्ठी॥६॥ ॥त्वंनोवायवेषामपूर्व्यःसोमानांप्रथमःपीतिमर्हसिसुता
नांपीतिमर्हसिउतोविहुत्मतीनांविशांववर्जुषीणां।विश्वाइत्तेधेनवोदुह्रआशिरंघृतंदुह्रत
आशिरं॥६॥ ॥हेवायोत्वंअपूर्व्यःनविद्यतेपूर्वंयस्मात्तत्यानमपूर्व्यंनदर्हतीत्यपूर्व्यः
तादृशःअतएवप्रथमःइतरदेवेभ्यःपूर्वभूतःसन्सोमानांपीतिंपानंअर्हसित्राग्नोषियत्रयत्र ९४
निषवोस्तितत्रसर्वत्रनियमेनपिबसीत्यर्थः।पूर्वत्रापस्याभिप्रायेणइदानींतुसर्वत्रसोमवति

५५

यागेअस्यपानमस्तीतिज्ञापयितुंपृथगभिधानंनकेवलंसोमपानपात्रंअतोऽपिसुविद्युत्मतीनां
विशेषेणहोमवतीनांआह्वानयतीनांवाजुहोतेःसंपदादिलक्षणेनावेक्ष्यतनोमत्वपडीपा
ववर्जुषीणांअननिमतपापंवर्जयंतीनांवर्जयतेर्लिटःक्वसुडीपसंप्रसारणत्वानिविशांत्वि
ग्यजमानरूपाणांप्रजानांसंबंधिरुविःस्वीकरोषीतिशेषः।यस्मात्तेषांयक्षणांविश्वाइत्धेनवःस
र्वाअपिगावःत्वेतदर्थंआशिश्रणद्रव्यंक्षीरंदुह्रेदुह्रंतिस्वयमेवकर्तरिलडस्तुनमादिडितियग
भावःलोपस्तआत्मनेपदेष्वितितलोप।बहुलंछंदसीतिरुट्।तथाआशिरंदुह्रेतिस्वयमेवक
र्तरिलङस्तुनमाडितियगभावःलोपस्तआत्मनेपदेष्वितितलोपःबहुलंछंदसीतिघृतं।उपस्त
रणाभिघारणाद्यात्मयाणायोग्यंकरणंद्रव्यंदुह्रते॥६॥द्वितीयस्यप्रथमेत्रयोदशोवर्गः॥६॥

स्तीर्णंबर्हिरितिनवर्चंसूक्तंपारुच्छेपंआत्यष्टंसर्वत्रतुराद्याद्वायुदेवत्यंआवांरथइत्यादितृचंचामैंद्रंअ
ष्टमीनवम्यावष्टौ।अत्रानुक्रमणिका।स्तीर्णंनवचतुर्थ्याद्याःपांचद्यश्चोपांत्येअष्टीइति।सूक्तस्य
विशेषविनियोगोलैंगिकः।दशरात्रस्यषष्ठेहनिप्रउगशस्त्रेआद्यौतृचौप्राकृतयोर्वायव्यैं
द्रवायव्योःस्थानेविनियुक्तौषष्ठस्यप्रातःसवनेइतिखंडेसूत्रितं।स्तीर्णंबर्हिरितिद्वाविति॥१॥
तत्रप्रथमा॥१॥ ॥स्तीर्णंबर्हिरुपनोयाहिवीतयेसहस्रेणनियुतानियुत्वतेशतिनीभिर्नियु
त्वते।तुभ्यंहिपूर्वपीतयेदेवादेवाययेमिरे।प्रतेसुतासोमधुमंतोअस्थिरन्मदायक्रत्वेअस्थिर
न्॥१॥ ॥हेवायोनोस्मदीयंयज्ञार्थंस्तीर्णंआस्तृतंबर्हिरभिलक्ष्यउपयाहिउपागच्छ।किमर्थं ७५
वीतयेहविषांभक्षणाय।केनसाधनेनेतितदुच्यतेसहस्रेणसहस्रसंख्याकेननियुताजातावे

५९

कवचनंनियुतइतिवायोरश्वानांनामधेयं।नियुतोवायोरितिनिरुक्तउक्तत्वात्।तथाशतिनीभिःशत
संख्योपेताभिर्नियुद्भिःआगच्छेतिशेषः।यद्वासहस्रेणनियुताशतिनीभिश्चनियुद्भिर्नियुत्वानतद्व
तेहविर्दीयतइतिशेषः।यद्वातुभ्यमित्यनेनसंबंधः।उक्तसंख्याकाभिर्नियुद्भिस्तद्वतेवायवेतुभ्यंनम
नायतुभ्यं।उइतिचेत्याद्युदात्तत्वं।पूर्वपूर्वपीतयेइतरदेवेभ्यःपूर्वपानाययेमिरेयमितवंतः।यद्वा
स्तोतारऋत्विजःदेवायतुभ्यंयेमिरेआहवनीयंप्रतिसोमंनियमितवंतः।अयंपिबामधूनांसुतं
वायोइत्यादिमंत्रांतरप्रसिद्धिद्योतनार्थोहिशब्दः।किंचैतत्त्वदर्थंसुताः।अभिषुताःमधुमंतोमा
धुर्योपेताःसोमाःमदायत्वन्मोदायअस्थिरन्तिष्ठंति।किंचक्रत्वेकर्मणस्सिध्यर्थंअस्थिरन्स्थि
रीभूतास्तिष्ठंतिअतस्त्वंपिबेतिशेषः।तिष्ठतेश्छांदसेलुङिव्यत्ययेनझस्यरन्।स्थाघ्वोरिच्चेतिसिचःकित्वं।

धातोरिवं चरुस्वारंगादिनिमित्तोलोपः॥४॥ अथ द्वितीया॥४॥ ॥तुभ्यायं सोमः परिपूतो अ
द्रिभिः स्पार्हा वसानः परिकोशमर्षति शुक्रा वसानो अर्षति। तवायं भाग आयुषु सोमो देवेषु हू
यते। वह वायो नियुतो याह्यस्मयुर्जुषाणो याह्यस्मयुः॥४॥ ॥हे वायो तुभ्यं त्वदर्थं तुभ्यं
तुभ्यमिति चतुर्थ्यालुक्। अयं सोमः हूयमानः कोशं कोशस्थानीयं ग्रहं अर्षति गच्छति प्राप्नोति।
कीदृशः सोमः अद्रिभिः परिपूतः। अभिषवसाधनैः अपगतऋजीषत्वेन शोधितः। यद्वा अद्रि
भिरभिषुतः दशापवित्रशोधनेन ग्रहणेन वा शोधितः। तथा स्पार्हा स्पृहणीयानि तेजांसि वसानः पि
धानः। किंच शुक्रा निर्मलानि दीप्तानि वा तेजांसि वसानः सोमः अर्षति प्राप्नोति। ऋजीषगतो व्य ७९
त्ययेन शप्। हे वायो आयुषु मनुष्येषु यष्टृत्वेन स्थितो ना भागो भजनीयः सोमः तदर्थं हूं देवेषु मध्ये

५२।

हूयते। त्वत्समीपीनरेषु देवेषु यज्ञः सोमस्तव भागः अतः त्वया मंत्रैर्हूयत इत्यर्थः। किंच योऽयं तं सो
मं अस्मयुः अस्मानिच्छन्नमवथ्र्योषुः त्वं नियुतो वह नियुत्संज्ञकानश्वान् देवेनाय त्रापयन्त
नः परं याहि दिवं प्रतिगच्छ तथा जुर्वन् अस्मान्नियुक्तः सन् तृप्यन् अस्मान् कामयमानो वा क्व
चिच्छादासत्यालापेक्षा छंदसीत्यः जुषाणः प्रीयमाणो याहि गच्छ॥४॥ अथ तृतीयाष्टमा ह॥४॥
आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुपयाहि वीतये वायो हव्यानि वीतये। तवायं भाग
ऋत्वियः सरश्मिः सूर्ये सचा। अध्वर्युभिर्भरमाणा अयंसत॥४॥ ॥हे वायो त्वं
नो अध्वरं अस्मत्संबंधिनं यज्ञं शतिनीभिर्नियुक्तिर्भिः सहस्रिणीभिः निश्वतानिः त्वदीयैरश्वैर्नो अस्मद्यज्ञ
मुपयाहि उपागच्छ। किमर्थं वीतये त्वदन्निमतकामयेत्वस्तत्र यत्रागत्य च हव्यानि वशतो या मा

मादिहविर्लक्षणायान्नाय प्रातमद्भाश्वैरश्वैरतित्वाधुमागच्छेत्यर्थः॥ किंचायंतवभागोभजनीयःसोमःऋ
त्वियःप्राप्तकालःप्रदानावसरंप्राप्तःऋतुशब्देनप्रदानकालोपलक्ष्यते छंदसिघसितिघस्सितिचेति
पदसंज्ञायाबाधाद्गुणाभावयण॥ किंचसोमःसूर्येउदितेसूर्यरश्मिभिःसहसरश्मिर्भवति सम
नदीभिर्भवतियद्वातैःसहितोनवभिरश्मिर्भवति अतःप्राप्तकालइत्यर्थः॥ किंचसोमाः अध्वर्यु
भिःसमस्ताध्वर्युभिःतेषांदशत्वाद्बहुवचनंतैर्भरमाणाःध्रियमाणाःअयंसतनियताअभवन्
किंचहेवायोतेसोमाःशुक्राःअयंसतअत्यंतदीप्ताउद्यताःअतस्तेषांभक्षणायागहीत्यर्थः॥३॥
अथचतुर्थी॥४॥ ॥आवांरथोनियुत्वान्वक्षदवसेअभिप्रयांसिसुधितानिवीतयेवायोहव्या ९७
निवीतये॥पिबतंमध्वोअंधसःपूर्वपेयंहिवांहितं॥वायवाचंद्रेणराधसागतमिंद्रश्चराधसागतं॥४॥

केवलंवायुंस्तुत्वाथासक्तत्वादिंद्रवायूस्तौति हेवायोत्वांइंद्रंचवांयुवांरथःयुवयोःसंबंधीरथःनियुत्वान्
नियुद्भिरश्वैस्तद्वान्आवक्षत्देवयजनंप्रतियुवामावहतु वहेर्लेट्यडागमःसिब्बहुलमितिसि(प्)
यद्यपिनियुतोवायोरेवरथस्योचिताःतथापिद्व्यासक्तदेवतात्वात्सहैवागमनादिकार्यमप्युक्तं
तिकिमर्थंअवसेगमनायरक्षणायवा उतनवाकिमर्थंप्रयांसिअन्नानिसोमलक्षणानिसुष्ठुहि
तानिवीतयेतेषांभक्षणायतथाहव्यानिवीतयेइतरेषांसवनीयपुरोडाशादीनांखादनाय वेतः
क्तिन्मंत्रेवृषेत्यादिनातस्योदात्तत्वं किंचमध्वःमधुररसस्यअंधसःअन्नस्यसोमरूपस्यकर्मणिषष्ठी
मधुरंसोमंपिबतंयतःपूर्वपेयंइतरदेवेभ्यःपूर्वपानंयुवयोःयुवयोर्हितंपातेर्याचोयदितियत्ईद्यति
तीकारःअनिमंतंअतःप्रथमंपिबतमित्यर्थः॥ यद्यपींद्रादपिवायोःपूर्वपानंत्वंहिपूर्वपानसिदेवद

ध्रिषेपूर्वपेयामित्यादिषुसर्वत्रप्रदृष्टंतथापींद्रस्येतरदेवेभ्यःपूर्वंवायुनासहपानंचइंद्रश्चतुरीयार्थवादनब्राह्मणेदेवावैसोमस्यराज्ञोयपेयेनसमपादयन्नित्यत्रप्रतिपादितंकिंचागमनसमयेहेवायोत्वमिंद्रश्चचंद्रेणअस्मदाह्लादकेनहिरण्येनगोधसोगवादिरूपेणधनेनचसहगतसंगछतं।वमेर्लेटिश्चांदसःशपोलुक्।अंतदात्तोपदेशेत्यत्रनामिकलोपः।छुरिचमंत्रेघसेतिश्लुक्॥७॥अथपंचमी॥७॥ ॥आवांधियोवद्त्स्करधरांउपेममिंदुंमर्मृज्जंतवाजिनमाशुमत्यंनवाजिनेषांपिबतमस्मयूआनोगंतमिहोत्या॥इंद्रवायूसुतानामद्रिभिर्युवंमदायवाजदायुवं॥७॥ ॥हेइंद्रवायूवांयुष्मानुधियःकर्माणिस्तोत्रादिलक्षणानिअध्वरानुपःअस्मदीयान्यज्ञान्जुष्मीस्तत्यवद्त्स्कःअतिशयेनवर्त्तयंतिप्रवर्त्तयंतिकिंचयुष्मदर्थंवाजिनंयरूणायइंद्र ५८

DR BHAU DAJI
डाक्टर भाऊ दाजी ...

५९

णाकलशाद्धहन्यत्रानिगमनदंतंआशुंअतिशीघ्रगामिनंअत्यंसततंगंतारंवाजिनंवजनवंतगश्वमिवयथास्वेदाद्यपनयनेनसंमार्जयंतिनद्वत्।किंचहेइंद्रवायूतेषामध्वर्यूणांसंबंधिनःशोधितान्सोमानपिबतंपानंकुरुतंदंतंर्थनोस्माकंयज्ञंप्रतिइहइदानींजत्यास्मद्रक्षणेनसहआगतंआगछतंकिंचाहेइंद्रवायूयुवांअद्रिभिर्ग्रावभिःसुतानामभिषुतानांश्वर्वनूकर्मणिषष्टी॥तानपिबतमितिशेषः॥किमर्थंमदायहर्षायमोदायवायाता॥युवांवाजदावाजस्यादातारौअतःपिबतमित्यन्वयः॥७॥द्वितीयस्यप्रथमेचतुर्विंशोवर्गः॥७॥अथषष्ठी॥७॥ ॥इमेवांसोमाअप्स्वासुताइहाध्वर्युभिर्भरमाणाअयंसतवायोशुक्रात्रयंसत।एतेवामभ्यसृक्षततिरःपवित्रमाशवः॥युवायवोतिरोमाण्यव्यया॥सोमासोअत्यव्यया॥७॥ ॥हेवायोवांयुवयोःतववेंद्रस्यचसु

न्तः। अध अस्मदीयेषु कर्मसु नू उ इदमित्यादिना विनक्ति रुद्रान्तत्वं। इह अस्मिन्नन्निषद्य स्था
नेषु अध्वर्युभिर्भरमाणा ह्रियमाणा गृहीता होतुं वाञ्छ्यमाणं कर्मणि कर्तृप्रत्ययः। सं तत्र
यं सत आगच्छतं युवयोर्नेतारो भवंति। किं च न एव सोमाः शुक्राः शुभ्राः दीप्ता अयं सता नियतान्न भवं
ति किं चैते आशवः व्यापकाः सोमाः वां युवां प्रणीयंते मिति शेषः। तिरः पवित्रं तिर्यं स्रुतं सोमान्त
र्द्धायकं। वाजसामयं पवित्रं अत्यसृजत अतिसृज्यालस्त्वं तत्सृष्टा भवंति सृजेः कर्मणि लुङि
लीङ् सिचा चात्मनेपदेष्विति सिचः किद्भावाद्गुणाभावः अमागमाभावश्च। किं च युवां वयः युवां का
मयमाना सोमासः सोमा अत्ययः अत्यध्ययान्यत्र छिन्नानि रोमाणि पवित्रसंबंधीन्यविरोमाणि ९९
यद्वा अत्ययः अविमय्यानि मकारोऽपपते। तादृशानि रोमाणि अतिक्रम्य पात्रात् गच्छंतीति शे

षः। उ नस्त एवाव्राव्यंते अति अतिशायेन अव्ययाव्ययरहिताः सोमासः सोमाः संसृजंतेति शेषः॥६॥
अथ सप्तमी॥७॥ ॥अति वायो ससतो याहि शश्वतो यत्र ग्रावा वदति तत्र गच्छतं गृहमिंद्रश्च ग
च्छतं। वि सूनृता ददृशे रीयते घृतमा पूर्णया नियुता याथो अध्वरमिंद्रश्च याथो अध्वरं॥७॥ ॥
हे वायो त्वं ससतः आलस्यादिना निद्रां कुर्वतः शश्वतः बहून् यजमानानतियाहि शश्वदिति बहुनाम शश्व
त्। विश्वमिति तन्नामसु पाठात्। अतिक्रम्य उपेत्य अस्मद्यज्ञं यागगृहं गच्छ इंद्रश्च तथा करोतु कं देश
मिति तमाह यत्र ग्रावा वदति यस्मिन् देशे अभिषवार्थः पाषाणध्वनिः श्रूयते तत्र गच्छतं देशं प्रत्या
गच्छतं उ नस्थानमेव विशिष्यते। सूनृता प्रियसत्यात्मिका स्तुतिरूपा वाक् यत्र विददृशे विशेषेण द
श्यते इत्यर्थः। तत्रागच्छतं यत्र च गच्छतं अत्यंतं दीप्तमाज्यं होमार्थं गृहीतं यत्र गच्छति आहवनीयं प्र

तिनीयानेति।उ अवग्राव्णोदिवादित्वात्श्यन्।तत्रगच्छतंगमनप्रकारएवविशेष्यते।पूर्णयासंपूर्णयाउष्टांग
यानियुताजातावेकवचनंनियुज्यात्याध्वरंअस्मदीयंयज्ञंआयाथःआभिमुख्येनप्रयाथः।किंचहे
वायोत्वंइंद्रश्चयुवांअध्वरंअस्मदीयंयागंयाथः।यथासाहेवगच्छतंतथास्माभिरर्पितहविर्गृही
तमित्यर्थः॥७॥अथाष्टमी॥८॥ ॥अत्राहतद्वहेथेमध्वआहुतिंयमश्वत्थमुपतिष्ठंतजायवो
स्मेतेसंतुजायवः।साकंगावःसुवतेपच्यतेयवोनतेवायउपदस्यंतिधेनवोनापदस्यंतिधेनवः॥
॥८॥ ॥हेइंद्रवायूअत्राहअस्मिन्नेवयागेअनेतिविनिग्रहार्थीयः।मध्वोमधुरस्यमधुमद
शस्यवाततस्यआहुतिंप्रदेयद्रव्यंवाहयेधारयंतसोमंअश्वत्थंपर्वतादिव्याप्तिप्रदेशोस्थितंजाय १००
वोजेतारोयजमानाःउपतिष्ठंतिचसाध्यर्थ।किंचअस्मेअस्माकंसंबंधिनोजायवःकर्मनिर्वाहि

२

रःऋत्विजःतुसमर्थनवंतुयज्ञंनिर्वहंत्वित्यर्थः।यद्वातेप्रसिद्धाःप्रयागजराजाजायवःजेतारऋत्वि
जःअस्मेसंतुनान्यस्यअत्रवहेथेइत्यकोत्रविशेषइतितत्राह।हेइंद्रवायूअस्मिन्यज्ञेगावःधेनवः
साकंसहैवसुवतेयुष्मदर्थमेवक्षीरमुत्पादयंतिदोग्ध्रीर्भवंतीत्यर्थः।यद्वागावःसाकंसहैवसुव
तेअपत्यमुत्पादयंतिवद्दोहनार्थंअदादिकःउदात्तस्यात्तदात्वेधातुस्वरः।किंचयवजातावेक
वचनंउपलक्षणंमनन्।यवादिभिःपुरोडाशादिकंपच्यतइत्यर्थः।किंचहेवायोइंद्रश्चयतोगा
वःएवंसुवतेअतस्त्वदर्थधेनवः।नोपदस्यंतिनोपक्षीणाभवंतिरोगादिनानशानभवंतिनकेव
लमनुपक्षीणाःकिंतुधेनवःयुष्मत्क्षीणयित्र्योगावःनापदस्यंतिचौराद्युपद्रवैरुपक्षीणानभवं
वंति॥८॥अथनवमी॥९॥ ॥इमेयेतेसुवायोबाह्वोजसोंऽतर्नदीतेपतयंत्युक्षणोमहिव्राधंत

उक्षणः॥ ध्वचिध्ये अनानावो जीराश्चिदं गिरौकसः। सूर्यस्येव रश्मयो दुर्नियंतवो हस्तयो दुर्नियंतवः
॥७॥ ॥हे सुवायो शोभनफल प्रद वायु देवते नव स्वश्च ता इमे पुरतो दृश्यमाना ये श्वाः संति ते
नदीधावा पृथिव्यो अंतः नायारंतराजे नं त्वां पतयंति पातयंति गमयंति यद्यानेन त्वं संबंधिनो श्वाः
पतयंति यद्य देशं गच्छंति पतनगतौ चौरादिरदंतः कीदृशास्ते वाह्वोजसः बाहुत्र त्वष्टबलवंतः उ
पलक्षणामेतत् सर्वांगबला इत्यर्थः। किंच उक्षणः सेक्तारः युवान इत्यर्थः महिमन्तः अतिप्रवृ
तं बाधंतः वर्द्धमानाः तथा उक्षणा उक्षणो नम्र दृशा इत्यर्थः। वाषष्टवस्यिनिगमश्रुतिंदीघस्नाव
किंच धनवन् ध्वनिउकनिर्गमनोपादानत्तमेअं वरिक्ते पिनिराजंबे अनाशरक्तिनः अव्याप्न १२
वान् आकारो विजंबमक्तवर्णाणः इत्यर्थः। अतएव जीराश्चित् विछक्ष्टः इजायां आस्यंते चिप्रगतयः

पञ्चात्मनाशवइत्यंनेन सहसमञ्चयार्थः विछक्ष्टः आकाशमार्गे अक्षणाः शीघ्रगतपश्चेत्यर्थः। किंच
अंगिरौकसः गिरा उकृच्छानां यषांनात्तिनेता दृशाः तस्मनादिनात्तिनिमज्जमाना इत्यर्थश्छांदस
स्तृतीयाया लुकानदेव स्यदृश्यंति सूर्यस्य रश्मय इव दुर्नियंतवः दुःखेन नियंतव्याः ते यथा क्षणोनदृ
शासिंगाया अनुवर्तिबहुवश्वनद्वदंते अपीत्यर्थः। इवेंनिर्राह्यैवमुक्तं इदानीं हस्तेनात्रतियाह्यैव
माह। हस्तयो न दुर्नियंतवः। उताभ्यामपि हस्ताभ्यां दुःखेन नियंतव्याः देवयजनगमनाय शीघ्रगामि
न इत्यर्थः॥७॥ इति द्वितीयस्य प्रथमे पंचविंशो वर्गः॥५॥ ॥अ सुज्येष्ठमिति मन्त्रचं चनीयं सूक्तं।
ऋषिश्चान्यस्मादिति परिभाषया कक्षीवानृषिः। अश्विष्टिः छंदः उनीदवानामित्यात्रिष्टुप् अत्रत्रि
ष्टुवंत परिभाषानाश्रीयते सर्वमाश्वष्टमिति विशेषपरिभाषाया बाधितत्वात् मित्रावरुणौ देवता।

अंत्यमोस्तुतन्मित्रलिंगोक्तदेवतातथाचानुक्रांतं।प्रस्तुमप्तामैत्रावरुणंत्वंत्येलिंगोक्तदेवते।अंत्या
त्रिष्टुप्।उक्तोविनियोगः।आद्यत्रयोगादिदमादिकेद्वसूक्तेमैत्रावरुणदेवताकेविनियोगोलैंगिकः॥७॥तत्रप्रथ
मा॥७॥ ॥प्रसुज्येष्ठंनिचिराभ्यांबृहन्नमोहव्यंमतिंभरतामृळयद्भ्यांस्वादिष्ठंमृळयद्भ्यां।तासंम्रा
जाघृतासुतीयज्ञेयज्ञउपस्तुता।अथैनोःक्षत्रंनकुतश्चनाधृषेदेवत्वंनूचिदाधृषे॥७॥ ॥हेऋ
त्विजः।मित्रावरुणाभ्यांज्येष्ठंप्रशस्यंश्रेष्ठंबृहत्प्रभूतमतिप्रवृद्धंनमः।नमः।नमस्कारोपलक्षितंहविर्लक्ष
णमन्नंवाभरतसंपादयत।नमइत्यन्ननाम।नमः।आयुरितितन्नामसुपाठात्।किंचहव्यंहव्यां
मतिंतत्प्रकाशनविषयांबुद्धिंभरत।यद्वामतिंस्तुत्यंहव्यंहविर्भरत।इदंवत्रयुगोऽशोधनीयमन्नंइद १०२
नीतुसोमाज्यादिरूपंहविरितिविवेकः।कीदृशाभ्यांताभ्यांनिचिराभ्यांनितरांचिरकालाभ्यांनि

त्याभ्यामित्यर्थः।प्रवाहरूपेणेतिभावः।किंचमृळयद्भ्यांसुखयद्भ्यांहविःस्वीकारेणस्वयंमृडित्वायजमानमपिसुख
यद्भ्यांतथास्वादिष्ठंस्वादुतरंमृळयद्भ्यांहविःसुखयद्भ्यांभक्तयद्भ्यामित्यर्थः।कस्तयोर्विशेषइतितत्राह।ता
तौमित्रावरुणौसंम्राजासम्यग्राजमानौराजानौ।किंच।मोरारिजिमःकावितिमसोमकारस्यघृतासुतीघृत
माहूयतेआदीयतेयाभ्यांतौ।तादृशौ।यद्वाघृतमुदकंवृष्टिलक्षणंप्रसूयतेसर्वत्रानुज्ञायतेयाभ्यांतौ
एतयोरहोरात्राभिमानिदेवत्वादहोरात्रिद्वारावृष्ट्यादकत्वात्।अहोरात्रेवैमित्रावरुणावहोरा
त्राभ्यांखलुवैपर्जन्योवर्षतीतिश्रुतेः।वृष्ट्युत्पादकत्वंप्रसिद्धं।किंचतौयज्ञेयज्ञेसर्वेष्वपिय
ज्ञेषुउपस्तुतासर्वैर्ऋत्विग्भिःस्तूयमानौ।गतिरनंतरइतिगतेः।प्रकृतिस्वरत्वं।अथअपिचएनोः।एनयोः
संज्ञापूर्वकस्यविधेरनित्यत्वाद्दीर्घेचेतिगुणाभावो।अनोगुणइतिपूर्वत्वं।क्षत्रंबलंकुतश्चनअस्मा

दपिचशत्रोःशत्रुमादेःप्रकाशात्कस्मादप्युपायाद्धानाद्वेषेआधर्षितुंनाशक्यंनभवतिस्तत्यार्थे
तावकेनेतिकेनप्रत्ययःकिंचतयोर्देवत्वंरचितदेवनावोविनाक्षेपेआधर्षणायोग्यः।यद्वाशर्वाणि
ववेदादीनीमपिन्द्रविदितिइशाणनवयोरितियास्केनोक्तत्वात्।आक्षेपेनकेनाप्याधर्षणीयोनभ
ति।एतयोर्बलंमाधृष्यंकिंतुतदेवत्वमितिभावः॥१॥अथद्वितीया॥१॥ ॥अदर्शिगातुरुरवे
वरीयसीपंथाऋतस्यसमयंस्तरश्मिभिश्चक्षुर्भगस्यरश्मिभिः।द्युक्षंमित्रस्यसादनमर्यम्णोव
रुणस्यच।अथादधातेबृहदुक्थ्यंवयउपस्तुत्यंबृहद्वयः॥१॥ ॥गातुर्गमनशीलावरीयसी
उरुतराउषाःउरवेविस्तीर्णाययथास्यागमनादित्यायपारायत्रदर्शिसावेदृष्टत्वात्।तथाऋतस्य
गमनशीलस्यादित्यस्यपंथामार्गः।आकाशलक्षणःरश्मिभिःसमयंस्तप्रकाशेःसंगतोभूत्नग

स्य।सर्वैस्स्वस्वइच्छयदर्शनायसमर्थोभनिभवतीत्यर्थः।तद्देवस्यद्युक्षीक्रियतेमित्रस्यप्रकाशकारित्वात्।
सर्वजनंमित्रस्यसदनंगृहंद्युक्षंनरश्मिदीप्तानांनिवासस्थानंरश्मिभिःसपर्यस्तसंगतोभूत्तथार्यम्णः
एतन्नामकस्यदेवस्यउदात्तनिहृत्तिस्वरेणविभक्तेरुदात्तत्वं।द्युक्षंसदनरश्मिभिःसमयंस्तकिंचव
रुणस्यतमोनिवारकस्यैतन्नामकस्यदेवस्यसदनंतथाभूतयद्यपिसूर्यस्यैकत्वेपिउपाधिभेदेनने
दात्स्थयक्त्रुक्तिस्तथायद्यपित्रिनिरपिप्रकाशमप्यंतरिक्षमेकंतथापिप्रकाशकानांभेदात्त्रि
धात्ऽयतेउदयानंतरंकर्मविधानायप्रकाशोभवदित्यर्थः।अथअनःकारणान्उदितत्वादेवउक्थ्यं
स्तुत्यंबृहत्प्रकाशानांभेदात्त्रिभूतंवयःहविर्लक्षणमन्नंचदधाथे॥१॥अथतृतीयामृचमाह॥१॥
ज्योतिष्मतीमदितिंधारयत्क्षितिंस्वर्वतीमासचेतेदिवेदिवेजागृवांसादिवेदिवे।ज्योतिष्मत्क्षत्र

मासाते आदित्या दानुनस्पती। मित्रस्तयोर्वरुणो यातयज्जनोऽर्यमा यातयज्जनः॥३॥ ॥अयं य
जमानः ज्योतिष्मतीं आहवनीयाग्नेस्तेजोयुक्तां अदितिं अदीनां मंडलविस्तृणां क्षितिं अग्नेर्निवा
सयोग्यां उत्तरवेदिलक्षणां आधारयत् धारयति स्वयं तत्रवानित्यर्थः। एतावती वै पृथिवी या
वती वेदिरिति श्रुतेः। तथा स्वर्वतीं यज्ञनिष्पत्तिद्वारा स्वर्गवतीं ईदृशीं तां आसवेथे मित्रावरुणौ
संगतौ नवतः न केवलमेतस्मिन्नेवाहनि किं तर्हि दिवे दिवे सर्वेष्वहःसु उ कीदृशौ तौ दिवे दिवे प्रति
दिनं जागृवांसा प्रबोधं कुर्वाणौ यज्ञं गंतुं अनलसावित्यर्थः। किं च वेदिमागत्य ज्योतिष्मत्
आज्यादिस्वीकारेणातिशयेन तेजोयुक्तं क्षत्रं बलं आशाते अश्नुवाते व्याप्नुतः। आशाते इति छां ९४
दसो लिटि अनित्यमागमशासनमिति वचनात् नुडभावः। लिटि वा छांदसः आपः शुः। कीदृशाविति

तावाह आदित्या अदितेः पुत्रौ दानुनस्पती दानस्य आज्यादिप्रदानस्य स्वामिनौ अभिमतदानस्य पालयि
तारौ वा। षष्ठ्याः पतिपुत्रेति संहितायां सत्वं मित्रश्च वरुणश्च तावुभौ देवौ अर्यमा राजा खलु देव तयोः मित्रा
वरुणयोः यातयज्जनः येन तयोरेव संबंधात् अनयोर्मध्ये स्थितः तं यातयज्जनः स्वस्वव्यापारे नियोजितस
र्वजनः मित्रावरुणौ अहोरात्रदेवौ अर्यमा उ तयोरेव सामर्थ्यात् सर्वप्राणिनः प्रेरयतीत्यर्थः। किं च या
तयज्जनः यातयति लोकं यदीयाज्ञया प्रेष्याः स तादृशः यद्वा यात्यमानान् नरके निपात्यमानान् जनाः
प्राणिनः अयष्टारो येन स तादृशः कर्मसाक्षित्वात् स्वस्वकर्मानुरोधेन प्राणिनः स्वस्थाने यातयतीत्य
र्थः। तादृशः अर्यमा मित्रावरुणयोरधीनो वर्तत इति शेषः॥३॥ अथ चतुर्थीमृचमाह॥३॥ ॥
अयं मित्राय वरुणाय शंतमः सोमो भूत्ववपानेष्वाभगो देवो देवेष्वाभगः। तं देवासो जुषेरत विश्वे अ

ध्यमज्जोषसः। तथा राजाना करथो यदीमहे ऋतावाना यदीमहे॥ठ॥ ॥अयमस्मा निर्हूयमानः
सोमः मित्रावरुणाय च शंतमः पीयमानः सन् सुखतमो ऽस्तु न वस्थ्यां देमः श्रापो ऽस्तु कृत्स्तु वा
स्तिडीति गुणना वः अवपानेषु अवाप्सु रवचम सपानेषु विषयेषु आसवेतः नगोन्तजनीयः अ
न्यां किंचदेवः दीप्यमानः देवेषु मित्रावरुणाभ्यां वा रक्षितर देवेषु ते आनगेः आनजनीयः यक्ष
देवेषु स्तोतृषु यजमानेषु मध्ये देवः दीप्यमानः तथा आनगः नैरेवा सर्वतो नजनीयः किंच तं सो
मं विश्वे सर्वे देवासो देवाः अद्यास्मिन् ऋनिषु परत से वां करथः जुरुतं सेवते इत्यर्थः व्यत्ययन
शपयद्यस्मात् कारणात् यदीमहे याचामि देवान् याचामहे इजागतो द्विवादिकः छांदसो विक १०५
रणास्य लुक् तस्माज्जुषेरत तथा ऋतावानृतवंतौ वा मित्रावरुणौ ईमहे अनिमत फलं तयोः या

नं वा याचामहे॥ठ॥ अथ पंचमीं॥ठ॥ ॥यो मित्राय वरुणायाविधज्जनोनर्वाणं तं परि पातो अंहसो
अत्रः सर्वत्र प्रसिद्धं सत्रं सर्वत्र श्रूयमाणं कात्र्विवानो स्मभ्यं धासमथः। धत्तं दधातेर्लेट्यडागमः। सिसिक्षू जसि
निमिषां तथा दृहन्तां महान्तां अतिप्रवृत्तं सत्त्वं बलं धासमथः। तएव विज्ञेयप्युते। येनात्र बलेन विश्वहा सर्वेषण्
दः सुक्तष्टीः उत्रादिरूपाः प्रजाः अतितनत नाम अतितो विस्तारयाम। तेनोतेर्लोटि छांदसो विकरणस्य लुः
आडुत्तमस्येत्याडागमः तस्य छंदस्युभयथेति आर्द्धधातुकत्वात् अस्फत्वाच्छदात्र वा नावेक्षा उस्वरः स्त
ष्टय इति मनुष्यनाम। स्तष्टयः चर्षणय इति तन्नामसु पाठात्। किंच। पनाय्यं स्तुत्यं ओजः शारीरबलं अस्मे अ
स्मासु समस्यगित्वतं। प्रवर्द्धयतमित्यर्थः। इन्वतिर्व्याप्तिवचनः। इन्वतिर्नक्षतिरिति तन्नामसु पाठात्॥छ॥
इति द्वितीयस्य तृतीये तृतीयो वर्गः॥छ॥ ॥किमुश्रेष्ठमिति चतुर्दशर्चं पंचमं सूक्तं दीर्घतमस आर्भवं २७
अंत्या त्रिष्टुप् शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः। अनुक्रांतं च किमुश्रेष्ठः स्वल्पनार्भवं त्रिष्टुबंतमिति। ११

सूत्रं दशरात्रे षष्ठेऽहनि वैश्वदेवशस्त्रे आर्भवं निविद्धानं द्विप्रतीकं तत्र किमुश्रेष्ठ इत्येतदंत्यवर्जं प्रतीकं सूत्रं श्वेतिरवं
उस्यवितं किमुश्रेष्ठ उपनो वाजा इति त्रयोदशार्भवं चतस्र इति॥छ॥ तत्र प्रथमामृचमाह॥छ॥ ॥किमुश्रेष्ठः
किं यविष्ठो न आजगन् किमीयते दूत्यं कद्यदूचिम। न निंदिम चमसं यो महाकुलोऽग्ने भ्रातर्द्रुण इद्भूतिमूदिम॥
॥छ॥ ॥ऋभवो नाम सुधन्वनः पुत्राः त्रयः ऋभुर्विभ्वा वाज इति ते च मनुष्याः संतः सुकर्मणा देवत्वं प्राप्य
कदाचित्कर्मकाले सोमपानाय प्रवृत्ताः तान् प्रति देवैः प्रेरितोग्निः परस्परसमानरूपान् दृष्ट्वा स्वयमपि तदा
कारं धृत्वा तेषु मध्ये स्वयं चतुर्थः सन् यागं प्रवृत्तः। ते च ऋभवः आगतं तं समानं समानरूपं अवलोक्य विवे
क्तुमसमर्थाः परस्परमेवं संदिहते। अयं किमुश्रेष्ठः किंवा खलु अस्मत्तोयं प्रशस्यतमः वयसा ज्येष्ठः सोस्माना
जगन् आजगाम आङ्पूर्वस्य गमेर्लङि छांदसः शपः श्लुः। हल्ङ्यादिलोपे मो नो धातोरिति नत्वं। अजगन्निति गतिक

मध्यगतत्वज्ञगत्त्रितिनत्वामस्तुपाठात्।किंयविष्ठःकिंवास्माकंयुवतमः।अस्मत्तःकनीयान्अजगन्वानः।
किंवाइत्थंइतकर्मदेवसंबंधिइयतेगच्छतिदोवःप्रेरितोइतोस्मानागतोवा।इतस्यनागकर्मणाइतियत्।।
यद्वाविमयदेतद्भ्रमः।तत्कथंनिश्चेतव्यमित्यर्थः।वयंतावत्त्रयएवइदानींत्ववारःसमानरूपावत्नामदे
तस्मादयमधिकःकिंतुश्रेष्ठइतिविचिकित्सा।।एवंसंदिह्यकथंचित्त्वतोन्यंनिश्चित्यतंप्रत्यापरोक्षेणाक्रव
तेदेवप्रेवातःप्राच्छवद्वागारैःप्रातायथाबलात्स्वकीयनागंस्वीकरोतितद्वत्समानरूपमाश्रित्यब
लात्चमसपानायप्रवृत्तइतिप्रातरित्युक्तेदेतादृशाश्वेचमसंननिंदिमअधिकःसमागमइतिपानेम
त्त्वानमसंनइपयामः।।दिक्तिश्मायांछंदसिवेतिवक्तव्यमितिद्विर्वचनाभावः।अइष्यवेकारणमाद। २०
यश्वमसोमहाकुलःमहाकुलोत्पन्नःवद्वानिर्मितत्वात्तूवद्यतिचवष्टायास्वंतन्यानजइतिश्वतःका १२

रणात्तद्गुणःकिंकारेप्रवृत्तितिप्राह्यःततश्वतश्चेतत्राष्ट्रःदारुविकारचमसस्यन्यूनतांप्राप्तिंजदिमब्रूमः।विदेश्छांदसे
लिटिवचिस्वपीतिसंप्रसारणं।कादिनियमादिट्।अथहितीमृच।।७।। ।।एकंचमसंचतुरःकृणोतनतद्वो
देवाअब्रुवंतद्वआगमं।सौधन्वनायद्येवाकरिष्यथसाकंदेवैर्यज्ञियासोभविष्यथ।।७।। ।।एवंदृष्ट्वाग्निः
तान्प्रत्यकवाचाहसौधन्वनाःसुधन्वनःपुत्राःयूयंएकंचमसंचत्वारंसंपादितंपूर्वमेकमेसंतंचमसंचतुरःकृ
णोतन।चतुःसंख्याकान्कुरुत।चतुरश्चमसीत्यंनोदात्तत्वंश्रवंवत्तनुपयथाउपरितनेष्येष्ठश्वादाचमसा
द्दाकरेतीत्यपञ्चम्यकनिष्ठआहचतुरस्करतीतिचतुष्टुंनिर्द्धारितं।नकेवलमहमेवब्रवीमि।किंतुवायु
ष्मान्त्रनितनूउक्तंचतुष्टाकरणरूपंकर्मउत्तरत्रवक्ष्यमाणंअश्वरथादिकरणरूपंचकर्मदेवाइज्ञाद
यःअक्रवन्।देवत्वेप्राप्त्यपायत्वेनतत्तादृशंकर्मवक्तुमहमागमंप्राप्तोस्मि।यस्मादेवंतस्माद्यूयंयद्य

वा करिष्यथ। यद्येवं तच्चतुःप्रकारं कर्तुं शक्नुथ। तथा चेत् देवैः साकं सह यज्ञियासो भविष्यथ इति निरुक्तमि
त्यर्थः॥ १॥ अथ तृतीया॥ १॥ ॥ अग्निं दूतं प्रति यदब्रवीतनाश्वः कर्त्वो रथ उतेह कर्त्वः। धेनुः कर्त्वा युव
शा कर्त्वा द्वा तानि भ्रातरनु वः कृत्व्येमसि॥ १॥ ॥ हे आगतदेव अग्निं अंगनादिगुणविशिष्टं दूतं दूतक
र्मप्राप्नवंतं वां प्रति यत् यत्कार्यं अब्रवीतन अब्रुवन् व्यत्ययेन मध्यमः पूर्ववत् तनप्। किमिति अश्वः
कर्त्वः एकस्मादश्वात् अपरं कर्तव्यमित्यर्थः। अश्वादश्वमतक्षतेति वक्ष्यमाणत्वात् कृत्यार्थे तवैके
निति त्वन्प्रत्ययः उत अपि च रथः कर्त्वः कर्तव्यः धेनुः कर्त्वा चर्मरहिता मृता गौः नित्यदोग्ध्री युवतिना
कार्या इत्यर्थः निश्चर्मणो गामरिणीत धीतिभिरिति वक्ष्यमाणत्वात्। तथा द्वौ द्वौ पितरौ जीर्णौ संतौ २९०
पुनर्युवशा युवानौ त्वाया। यौवनोपेतौ कर्त्वा कर्तव्यौ। हे भ्रातरः युष्माकं देवानां निरुक्ता १३

निकर्माणि त्वा अनुपश्चात् वयं कृत्व्या कर्मणा एमसि एमः आनिमुख्येन प्राप्नुमः इण्गतौ। इदंतो मसिः। यद्वा
अपरे इदं वाक्यं देवैः नवो यूयं आगत। अग्निं दूतं प्रति यदब्रवीतन। यत्कार्यं वक्ष्यमाणरूपं कर्तव्यत्वेन वदथ अं
गीकुरुथ तानि सर्वाणि संपाद्य हे भ्रातरः वयं कृत्व्या कर्मणा एमसीति ब्रूयेति अपिराह॥ १॥ अथ चतुर्थी॥ १॥
॥ ॥ चकृवांस ऋभवस्तदपृच्छत क्वेदभूद्यः स्य दूतो न आजगन्। यदावाख्यच्चमसांचतुरः कृतानादित्त्वष्टा ग्नाः
स्वंतर्न्यानजे॥ १॥ ॥ हे ऋभवः न कार्यं यथा चकृवांसः कृतवंतो यूयं अपृच्छत। पृष्टवंतः कुरुत। करोतेर्लिटः क्व
सुः। अत्र यद्यपि ऋभुरिति त्रयाणां मध्ये एकस्य नाम तथापि तस्य प्राथम्याच्छत्रिणो गच्छंतीतिवत् सर्वेष्वृभव
उच्यंते। किमिति स्यः स दूतः क्वेदभूत् क्व अगतः स इत्थं कं कं इत्याह। यः यो दूतो नोऽस्मान् आजगन् आगमत् प्रा
पः एवं तं समनियदा यं त्वष्टा चतुरः कृतान् चमसान् अवाख्यत् अनिपश्यत् निरवाख्यत् ततः उ इति अस्पतिव क्रियं वा

नीतिऽशरणादेशः।आत्अनंतरमेवत्वष्टातस्यचमम्योत्पादकंएतन्नामकोदेवः।प्राभुस्त्रीभुमोनाभाऽइतिस्त्री
णामितिनिरुक्तंअंतर्मध्येध्यानजेन्यक्तोऽहत्स्त्रियमात्मानमत्यतेत्यर्थः।अजेजिटितस्मात्तुद।छांदसो
नामिकलोपः।।६।।अथपंचमी।।७।। ।।हनामेनांऽइतित्वष्टायदब्रवीत्त्वममंयेदेवपानमनिंदिषुः।अन्या
नामानित्तावतेस्तुतेमचांअन्यैरेनाकन्याउनामनिस्परत्।।७।। ।।एतान्वक्ष्यमाणान्हनामेतियद्य
दात्रब्रवीत्त्वष्टाश्रज्ञार्थंबिकुवचनंएतछब्दस्यप्रकृतपरामर्शत्वात्ऋत्विजांप्रकृतत्वात्तेषांहननप्रसं
क्तिंदर्शयति।यदेवपानंदेवैःपातव्यंचमसंयेऽत्रतयोऽनिंदिषुःनिंदांअकुर्वन्देवयोग्यं।त्वाष्ट्रंचमसंम
नुष्यात्तनवःस्वीकृत्यचतुर्धायनजनन्।तान्हनामेतियदाब्रवीदित्यर्थः।तदाप्रभृतिमनुष्याःसुतेअभि २१
षुतसोमेपानायप्रस्तुतेमतिमचाभहपरस्परंअन्यानामानिअन्यानिदोत्रवैधर्षुनाद्रादीनित्तत्वते १५

DR. BHAU DAJI MEMORIAL

ऊर्वेतिश्र्वनामप्रछाद्यापङ्क्वकालेअध्वर्युउपक्क्यस्वहोनरूपक्कयस्तेत्येवमन्यैरेवनामभिः।आत्मानंवष्ट्रा
वधनीत्याप्रख्यापयंतीत्यर्थः।श्रवमन्यानिकथंप्रसक्तानीत्यतआह।एतन्नरान्कन्यास्वोत्पादयित्रीमातात्र
न्यैरेवनामभिःस्परत्।प्रीणयति।स्पृप्रीतिबलनयोःलेट्युडागमः।।७।।इतिद्वितीयस्यतृतीयेचतुर्थोवर्गः।।७।।
।। ।।अथषष्ठी।।७।। ।।इंद्रोहरीयुयुजेअश्विनारथंबृहस्पतिर्विश्वरूपामुपाजत।ऋभुर्विश्वावाजोदेवां
अगछतस्वपसोयज्ञियंनागामेतन।।७।। ।।इदंमृष्टानांक्रमेणविनियोगमाह।इंद्रोहरीयुयुजेएतन्नामा
नावश्वौरथेयोजितवान्।तथाश्विनाअश्विनौरथंयोजितवंतौ।तथाबृहस्पतिःबृहतोमंत्रस्यपाजयिता।एतन्ना
मकोदेवोविश्वरूपांनानारूपोपेतांगांउपजेतउपागमतस्वीकृतवानित्यर्थः।यद्यप्यत्रागौरितिविशेषोन
श्रुतःतथापिश्र्वंधेनुःकर्वेत्युक्तत्वात्।पुरस्ताच्चये।धेनुंविश्वजुवंविश्वरूपामितिवक्ष्यमाणत्वाच्चविन

रूपागौरित्येवाध्यवसीयते।अतएवविश्वरूपामितितस्याश्वयंक्षिरितिकेचनव्याचक्षतेनदृशातुयुष्मत्संपा
दितानिरथादीनींद्रादयःस्वनावत्वेनाकल्पयन्।तस्मादृभुर्विभ्वावाजश्चदेवानिंद्रादीनागच्छतगवाच्
हेस्वपसःशोभनानाश्वरथादिकर्मवंतोयूयंयज्ञियंयज्ञार्हंयज्ञसंबंधिनंभागंसोमरूपंदेवत्वंप्राप्ताःसेवनी
यं।एतेनप्राकृतकर्मसामर्थ्येनहविर्भुजोभवतेत्यर्थः।इत्येवमृषिमाह।।६।।अथसप्तमी।।७।। ।।निश्चर्म
णोगामरिणीतधीतिभिर्याजरंतायुवशाताकृणोतन।सौधन्वनाअश्वादश्वमतक्षतयुक्त्वारथमुपदेवाँअ
यातन।।७।। ।।हेसौधन्वनायूयंनिश्चर्मणःमृतायागोःसकाशादुत्कृत्ताच्चर्मणःगांनूतनांनिरिरिणीतनि
रगमयतस्तुत्यादितिवंतः।स्थातेनचर्मणासंवीतांतत्सहचारीमन्यांधेनुंसृजतवेत्यर्थः।यद्यपिपूर्वमेवाश्वा २११
दीनांविनियोगउक्तः।तथापितेषामत्यंतदुःखसंपादत्वज्ञापनायपुनरत्राह।नकेवलंगोकरणमेवाश्व ५

पित्र्याजरंतायेजीर्णावपितरौतनौयुवशायुवानौतरुणौतनअकुरुत।किंचअश्वादश्वंएकेनविद्यमानेनाश्वेनाश्वांतरमतक्ष
तं।अयत्नेनसंपादितवंतः।यस्मादेवंतक्षणवंतस्तस्माद्यूयंयुष्मदीयेयुक्त्वारथेयोजयित्वादेवानिंद्रादीनपायातनदेवसमी
पंप्राप्नुत।।७।।अथाष्टमी।।८।। ।।इदमुदकंपिबतेत्यब्रवीतनेदंवाघापिबतामुंजनेजनं।सौधन्वनायदितन्नेवहर्
यथतृतीयेघासवनेमादयाध्वै।।८।। ।।इदानीमृषिर्दैवीरुक्समर्थनात्संबोध्ययूयमृत्वनेवमुक्तवंतास्थेत्य
नुवादयति।हेसौधन्वनाःपुत्राःयूयंइदमुदकंसोमलक्षणंपिबतइत्यब्रवीतन।इत्युक्तवंतः।ब्रवीतेर्लङिमध्यम
मबहुवचनस्यतस्यतनबादेशः।पित्वाद्ब्रुवईट्।एतत्प्रातःसवनिकाभिप्रायंवा।अथवाइदंमुंजनेजनंमुंजपा
त्रामपर्वतःसोमोत्पत्तिस्थानंततआहृतत्वात्तेनमुंजतृणेनशोधितंअपगततृणमित्यर्थः।इदंसोमरसरूपमु
दकं।पिबतेत्यब्रवीतन।एतन्माध्यंदिनसवनाभिप्रायं।हेऋभवोयूयंतत्तृतीयसवनसंबंधिसोमपानकार्यंन

वर्द्धयन्नेवकामयथा।वर्द्धयंतिःकांतिकर्मा।वर्द्धयंतिःउत्पादित्विनकर्मसुपाठात्।तृतीयेसवनेउमादयाधेवस्थयंध्य
त्रानवथा।स्तनवोदेवाःसोमस्यमत्त्वितितृतीयसवनेनेषांसोमपानमङ्गावात्।एवंभूयमवरत्तुक्कवंतःअथ
वाज्ञन्मृभितिस्यैवदेवाक्यं।हेसौधन्वना।यूयंदेवत्वंप्राप्यदेवयजनंप्रतिसोमपानायरथेनागत्यश्रांतानश्वान्
प्रातःसवनइन्द्रस्वदकंसोमलक्षणंपिबतेत्यब्रवीतत।तत्रयदिनेच्छथइदंवाक्यंजनेजनंसुजेनइषितंवाजिनं
पिबतेत्यब्रवीतत।पश्चात्तद्द्वयंपदिनेवर्द्धयथारेत्रश्वाधूयंतृतीयेसवनेमादयाध्वंतत्रापिवाजिनःप्रचारा
न्॥७॥अथनवमी॥७॥ ॥आपोभूयिष्ठाइत्येकोअब्रवीदग्निर्भूयिष्ठइत्यन्योअब्रवीत्।वधर्यंतीवहुभ्य:
एकोअब्रवीहतावदंतश्चमसांअपिंशत॥७॥ ॥चमसचतुष्टयीकरणकालेकिमितिसत्यंवदंतोव्य २१२
त्तिनितदाह।एकस्त्रयाणांमध्ये।आपोभूयिष्ठाइत्यब्रवीत्।नह्युदकाद्व्यतिरिक्तंलोकोपकारकंतत्वांत १६

रमस्ति।आपोभूयिष्ठाभिस्तृचमवादीत्।अपामेवश्रेष्ठत्वमपएवससर्जादावित्यादिश्रुतत्वात्।तथान्योग्निर्भूयि
ष्ठइत्यब्रवीत्।अंतरंवात्यंवदाह्यपाकजुद्धजरणादिव्यापारेणअग्नेरेवजगन्निर्वाहकत्वात्।अग्नेरेवभूयिष्ठमि
त्यनमन्यः।तथावर्द्धयंतीवधरितिस्फांतोपिवहुभ्यनामवधः।अर्कइतितन्नामसुपाठात्।नदिष्ठनिष्ट्यादकायेति
वर्द्धयंतीमेघपंक्तिरुच्यते।यद्यपीयंस्ववधार्यवज्ञंस्वयमेवनापेक्षते।तथापिवज्ञ्यर्थवज्ञेपामप्यमानत्वात्।नदिष्ठंनीत्क
पवर्यते।यद्वावहुभ्यस्तेषामर्थायवधर्यंतीवधमात्मनःछंतीभूमिंप्रादुसरेफोयज्ञनः।तामेवेकःवहुभ्यःसंवादित्य:
श्रेष्ठनमामब्रवीत्।उदकस्यापिमेघकारणत्वात्।एवमृतान्नतानिउक्तरूपाणियथार्थानिवक्यानिवदंत्यःपरस्प
रंकुर्वंतःचमसान्अपिंशपेत्यस्तुचादृश्याचक्षाणायास्कः।स्तनवउरुत्वांतीनिवर्तनेननवंतीनिवर्तीत्यकु
वान्॥अथदशमी॥७॥ ॥श्रोणामेकउदकंगामवाजतिमांसमेकःपिंशतिसूनयाभृतं।आनिम्रुचःशकृदेको

अपानरक्षितिस्तुत्रेभ्यः पितरावपावतुः ॥७॥ ॥अत्र अनवएवत्त विग्रहेण स्थित्वा सर्वत्र यज्ञं निर्वहंतीत्याह । गो
गां गोणं वा छंदसीति परस्पानाव । गोणं वर्ह्य दकं रुधिरं एकः अत्तु धुम मध्ये अत्विक् गामवा जनि बाह्य भूमिं
प्रतिगमयति रक्षो नागत्वेन स्थापयति । तथा एको मांसं स्तनया छेदन साधनेन स्वधितिना आन्त तं कृदय जिह्वा
वक्ष आद्याकारेण आकृतं संपादितं मांसं पिंशानि अवयवं करोति स्वधितिनाम तत्र दयवान्वितं जतीत्यर्थः ।
अथैको निस्तुचः त्रिःशोषेण छिन्नान् मांसान् वासत् उद्दिष्टं जरस्वणां ऊवध्यनामकं अपानरत् अपाहर
न्निरसनाय एवम् अत्विग्रूपेण स्थितेभ्यः ऋतेभ्यः ऋरुत्वाहेभ्यः ऋरुस्थानीयेभ्यः तुभ्यः सर्वे ऋतु स्थितेषु पित
रायज्ञपालयितारौ जायापती किंस्विदुपावतुः किं तु रवन्तु प्राप्नुतः । अवतेः प्राप्त्यर्था छांदसो जिदू सर्वे तिरेवा २१३
तु स्थितमितितयोर्न किंचित्कृत्यमस्तीत्यर्थः । अथवा अयमर्थः । एकस्तेषामन्यतमः स्थाणीं पंगुकां गां उदकं प्र १७

स्यवगमयति अपरः स्तनया मा सविक्रयिण्या कृतं संपादितं मांसं पिंशानि पित्रोः अपरश्चानिस्तुचः कस्तमयादवांगेव
चास्तङ्गो द्धरीयं रुरनि एवमृत्तु निस्तुस्थितेम तिकिंस्विन्नू एतस्मात्परिचरणाद्दन्यसुत्रेभ्यः शाशा ऋडुपावत्तु उ
पगच्छतामिति ॥७॥ इति द्वितीयस्य तृतीये पंचमो वर्गः ॥७॥ ॥अथैकादशी ॥७॥ ॥उद्दस्त्वस्मा अन्नणोत
नाष्टणं निवस्त्वपस्त्वपस्ययानरः । अगोह्यस्य यदसस्तना गृहे तदद्येदमृभवो नानुगच्छथ ॥७॥ ॥ऋराण
प्रसिद्धास्तु धन्वनः ऋत्वान्कर्मणा देवत्वं प्राप्तवतो अस्तून् स्तुवा वेद प्रसिध्याश्चर्यरश्मिरूपान्स्तूनिदा
नीं स्तौति । तथा च यास्को निरुक्ते ऋराणप्रक्रियासिद्धान्तू रतनवऊध्यानि रुच्यते उदादरणत्वेन दिङ्गीयामी
त्यनाभुदास्फुस्यादित्यरश्मयोत्पूनवउच्यंतइस्फुस्कातस्मिन्नर्थएतास्मचघदीजहारारेस्तनवःऊरुप्रप्र
नंनासमानाः अतेनादित्येनत्नासमानावाक्तेनोदकेनउदकार्यस्त्वत्पत्रावारश्मीनाभरुनासमानवं

प्रमिदं। तथा आदित्याद्उत्पन्निरपि उदकार्थं नवनमपि रश्मीनां घर्मकाले रश्मिगतं सारमादाय पुनर्वर्षका
ले प्रर्षतीति प्रमिदं आदित्याज्जायते वृष्टिरिति वा स्वात्। तथा विधानरः प्रकाशनात् वृष्टिरुदकानादत्तीति गोशू
यं उदस्तुत्यत्वेन प्रदेशो प्रमेघादिषु दृष्टं गोत्रा हियवाद्रिरूपं। त्वास्येपा निजानाय उपकारार्थं अन्नाणो
तनन्तराणवंतः छत्रपमगच्छं दमिधत्वर्यश्चेति तथा निवस्तु प्रणवदेनो उ अस्माएव अपउदकान्युत्तरणो
नन। अजर्वन्। किंस्विन्नोगार्थं नेत्याह। स्वपत्यथा शोनन कर्मच्छया शोननं कार्मेनिःस्तनमितियजमानाः
स्तुवंतितनदिच्छयेत्यर्थः। किंच सूर्यं अगोह्यस्य अयाह्यस्यादित्यस्य गृहे मं उत्तयत् यावत्कालं अमसस्तन
स्तुप्तवंतः छरात्रो निर्वापाराम्निष्ठथा। पमस्वप्ने। अस्माद्वे दृष्टिर्वर्षनस्य तनवादृशः अदादित्राछपोऽउ २४
क। तन्नावंतं कालं अद्याद निरुदांऽदानी नानुगच्छथ अत्र सम्मर्त्यन गच्छथ। यांवंतं कालं रात्रौ स्वर्ये हनि १९

रस्थवत्र्। धनावंतमेवकालमेतद्यपि नानुगच्छथेत्यर्थः। यद्वा अगोपनीयस्य तस्य गृहे अंतस्थितेयत् यावंतं कालं अ
सस्तन वृष्टिमद्वास्वापमकुरुतन तावंतं कालं अद्येदानीं वर्षसमये इदं मस्यानिवर्तन वृष्टिप्रवाहरूपं कर्म
नानुगच्छथ अत्र तु स्थत्यन प्राप्नुथ यावंतं कालं विवर्षथ तावंतमेव कालं प्रवर्षयथेत्यर्थः॥ग॥ अथ द्वादशी॥ग॥
संमील्य यद्भुवना पर्यसर्पत क्व स्वित्तात्या पितरा व आसतुः। अशपत यः करस्नं व आददे यः प्राब्रवीत्प्रो तस्मा अ
ब्रवीतन॥ग॥ ॥हे ऋभवो रश्मयो यूयं यत् यदा भुवनानि जातानि संमील्य संमीलनं छादनं जलधरपट
लेनाच्छाद्य पर्यसर्पत परितः सर्पणं अकुरुथ वर्षथेत्यर्थः। तात्या तानि ते जायमाने वृष्टि उदके यद्वा तात्या नाम वर्षा
मुत्ताद्नस्य प्रत्ययोदकारस्याविचा। अथवा पित्र विशेषणं तात्या नकाली ते पितरौ जगतः पालको स्वर्या
चंद्रमसौ वा क्व स्विदासतुः अन रक्षतुतिष्ठतः अभ्रेर्लिटि व्यत्ययेन ऋतावानावः यद्वा अमतेर्गत्यर्थस्य लिटि

तद्रूपं अस्य गात्रा विनाशेन प्रवर्षयेत्यर्थः। किंच इह शान् वो युष्मान् यः कोपि वृष्टिप्रतिबंधकारी राक्षसमा
दिः करस्नौ स्वं बाहू नामेनत् करस्नो बाहू इत्युक्तत्वात्। अवच्चकारांतं युष्मदीयं हस्तं आददे गृह्णातु प्र
निरोधं करोति। तमशपतनाशयथ। यश्च प्राब्रवीत्। प्रकर्षेण वाचा निरुंधनास्मे। शाप्नेवाब्रवीत् तनं प्रक
र्षेण नर्मनादिशाद्वं जरुथं। यद्वा योन्दनं स्तौति तं प्रकर्षेण स्तुते इत्यर्थः॥ छ॥ अथ त्रयोदशी॥ छ॥ ॥ सुषुप्वां
स ऋभवस्तदपृच्छतागोह्य क इदं नो अबूबुधत्। श्वानं बस्तो बोधयितारमब्रवीत् संवत्सर इदमद्या व्यख्यत॥
छ॥ ॥ हे ऋभवः रत्नमात्मकाः यूयं तु सुषुप्वांसः आदित्यमंडले स्वपंतो वर्षणाय। स्वपेर्लिटः क्वसुः तनूमा
दित्यं न द्राक्ष्म अपृच्छ यथ पृष्टवंतं जरुथ। किं तदितिचेत् उच्यते इदं गाह्य अकनचित् गोपनीय आदित्य स्वामिन् ना २१५
स्मदीयमिदं कर्म वर्षण रूपं को अबूबुधत् बाधयति प्रेरयति साहाय्यं करोति बुधेर्ण्यंतात् लुङि चङि रूपं ब १९५

न्नः सर्वस्य व्यसयिता आदित्यः वसेरौणादिकस्न प्रत्ययः। बवयोरभेदात्। बस्तं बोधयितारं प्रेरयितारं श्वानमब्रवीत्। अं
तरिक्षश्वसंतं वायुं प्रावादीत्। असौ युष्मान् प्रेरयतीति। अथ वायुसहायेन वर्षतो ऽसूर्यं संवत्सरे पूर्णे अद्येदानीं
इदं जगत् व्यख्यत विविधं प्रकाशितवंतः। पूर्वं सूर्याचंद्रमसौ यथा दृश्येते तथा वर्षित्वेदानीं वर्षकालेतीते विश्वं
जगद्व्यक्तं कुरुथेत्यर्थः। ख्यातेर्लुङि अस्यतिवक्तिख्यातीत्यङ्॥ छ॥ अथ चतुर्दशी॥ छ॥ ॥ दिवा यांति मरुतो भू
म्याग्निरयं वातो अंतरिक्षेण याति। अद्भिर्याति वरुणः समुद्रैर्युष्मां इच्छंतः शवसो नपातः॥ छ॥ ॥ हे शवसो वृष्टि
कार्यस्य बलस्य नपातो न पातयितारो नवः युष्मान् इच्छंतः दृष्टकूल चिकीर्षया युष्मानेवेच्छंतः सर्वे दिवा आयां
ति कस्मादिति तदुच्यते मरुतः दृष्टकूलादेः दिवाक्रजो कादंतरिक्षान यांति आगच्छंति। मावेकावज्ञतिविद्क्ते
रुदात्तत्वं। भूम्याभूमेः सकाशादग्निर्याति आगच्छति अयं वातः सर्वदा संचारी वायुः अंतरिक्षेण पाति अंतरिक्षाद

यांति। तथा वरुण आवरको जलाभिमानी देवः मरुद्भिः मरुद्गणैः सह स्तवनादिरहितान्यत्र आयांति। यद्वा एष वृष्टिस्वाराज्या
यागता एते देवाः स्वतकार्याः संतः अनर्थभावान् कामयमानाः स्वदेशं प्रतियांतीत्यर्थः॥१॥ इति द्वितीयस्य तृती
यपञ्चे वर्गः॥३॥ मानो मित्र इति द्वाविंशत्यृचं पंचमं सूक्तं दैर्घतमसं त्रैष्टुभम्। याषष्ठी जगत्यौ शिष्टास्त्रिष्टुभः। अश्व
स्य स्तूयमानत्वाद्यातेनोच्यते सा देवतेति न्यायेनाश्वो देवता। अत्रानुक्रमणिका॥ मानो द्व्यधिकाश्वस्तुतिस्तृ
यापष्ठ्यौ जगत्याविति। अश्वमेधस्य मध्यमेऽहन्यभिगुषप्ते अध्रिगो नामी धमितिशिष्टा अस्मात्पुरस्तात्पङ्क्तिंश
तिरस्य वंक्रय इत्यस्मात्पुरस्तादेतत्सूक्तमापैवेतच्चाणि सूत्यानि न वंनी निरुंडे सूत्रितं। अध्रिगोनामीध
मितिशिष्टा षड्विंशतिरस्य वंक्रय इति वामनो मित्रः न्यावपनेति॥१॥ तत्र प्रथमा॥ ॥मा नो मित्रो वरुणो अर्यमा २५
युरिंद्र ऋभुक्षा मरुतः परिख्यन्॥ यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि॥१॥ ॥नोऽस्मान् अश्वं स्तोतुं प्रवृत्तान् २०

मित्रादयो देवाः मा परिख्यन् परिख्यानं मा अवर्जं परिख्यानं नाम निंदा महानुभावं देवजातिम संतुष्टा नराः स्तुवंत
निमां त्रवर्जं ख्यातेर्माङि लुङि अस्यति वक्तीत्यादिना अङ्। अहरभिमानी देवो मित्रः रात्र्यभिमानी वरुणः अ
र्यमा तयोरंतकालाभिमानी आदित्यः आयुः सततगंता वायुः वकारलोपो वा। इंद्रः प्रसिद्धः ऋभुक्षा देवानां नि
वासनृतः प्रजापतिः यद्वैतन्महन्नामेंद्र विषणं ऋभुक्षा उक्षा इति तन्नामसु पाठात्॥ निंदायाः प्रसिंगं किं दर्शयति
यत् यस्मात् वाजिनो वेजनवतो बलवतो वा देवजातस्य बहुदेवतास्वरूपेणोत्पन्नस्य उषादीनामस्य शिर आ
द्यवयवत्वानावः उषा वा अश्वस्य मेध्यस्य शिर इति आदिश्रुतेः। यद्वा देवेभ्यो जातस्य गंधर्वेभ्य उत्पन्नत्वात् स
प्तेः सर्पणशीलस्य अश्वनामैतत् एवंविधस्याश्वस्य महानुभावस्य वीर्याणि वीरकर्माणि सामर्थ्यानि विदथे वेद
नसाधने यज्ञे प्रवक्ष्यामः प्रकर्षेण ब्रूमः। अतो मा परिख्यन् अस्मानन्नं त्वित्यर्थः॥१॥ अथ द्वितीया॥१॥ ॥

यत्त्रिशिरारेत्नसाशाद्धतस्यरातिंगृह्णीतांउत्तवतोनयंतिउग्राइ॒ज्ञोमेध्यहिश्वरूपइंद्राश्वस्तोःप्रियमप्येतिपाथः॥ब॥
निर्ज्ञानिर्णिनिरूपनामनिषिक्तेवत्रिरीतिरेक्तःरिक्थमितिचतन्नामस्वक्तत्वात्उनयन्त्रमलयोत्तिप्यते॥रूप
वताहिरण्यवताश्वानरणेनशाद्वनस्यसर्वतोवेष्टितस्याश्वस्यउत्तवतःउरस्तात्कृतीतां।गृहीतांरानिंदातव्यांदाते
स्येतेनगृहीतामजांजयंतिन्तित्विजःउग्राइ॒उहुश्रवास्यागमनःमेध्यतहन्यमानःसीजहिंसायांअस्माद्धहुगंता
त्कर्मणिव्यत्ययेनशाचायद्वातस्यशशात्तुकराणांमेमेशादंक्षवर्तिविश्वरूपबहुवसोपितःस्वलयोवत्तस्तस्मात्नामे
वानेकवर्णइत्यर्थः।एवंरूपोत्वंइंद्राश्वस्तोःइंद्रमिहःपूषापोषकोदेवोनिःतयोःप्रियंआप्येयःत्स्वमयीवरस्क
त्कत्वात्अग्नेःप्रियत्वंमवेपीइस्येतीइस्यप्रियत्वंएवंरूपंपाथोन्नमप्येतिप्राप्नोतु॥ग॥अथतृतीया॥ब॥ ॥ २७
एषच्छागःपुरोअश्वेनवाजिनाश्वस्तोनागोनीयतेविश्वदेव्यः।अभिप्रियंयत्पुरोडाशमर्वतात्वष्टेदेनंसौश्रवसाय २१

जिन्वति॥ग॥एषच्छागःशृंगरहितोजःअश्वेनवाजिनाशीघ्रव्यापकेनसहपूष्णःपोषकस्याग्नेर्भागोनऊनीयःविश्वदेव्यःसर्व
देवार्हःअग्नेःसर्वदेवात्मकत्वात्॥तद्दर्त्तत्वेनसर्वदेवप्रियत्वं।एवंविधोजःपुरःपुरस्तान्नीयतेप्राप्यतेयत्यस्माद्देवं
क्रियतेतस्मात्प्रियंप्रीणयितारंपुरोडाशंपुरस्ताद्दातव्यमेनमजंत्वष्टासर्वस्योत्पादकोदेवःत्वष्टारूपाणिविकरोति
निरुक्तेःसर्वव्यापकोसिर्वाउनेत्वष्टुर्विन्यउरितिरूक्तत्वात्अश्वरणिसंबंधोसरेवेतिगम्यते।अर्वताअरणवताश्वेनस
हसौश्रवसायदेवानांज्ञानायततिमितंअभिजिन्वतिप्रीतिहेतुकंकरोति॥ग॥अथचतुर्थी॥ग॥ ॥यद्धविष्य
मृतुशोदेवयानंत्रिर्मानुषाःपर्यश्वंनयंति॥अत्रापूष्णःप्रथमोभागएतियज्ञंदेवेभ्यःप्रतिवेदयन्नजः॥ग॥ ॥हविष्यं
हविर्योग्यंदेवयानंदेवानांप्रापणीयमश्वंयन्नयदामानुषाःऋत्विजःऋतुशःऋतावृतौकालेकालेत्रिःपरिणयं
तिपर्याग्निकुर्वंतीत्यर्थः।अत्राश्मिन्समयेतत्रचितनयेतिदीर्घः।पूष्णःपोषकस्याग्नेर्भागोजःप्रथमःएतिपुरोगामी

सन्गच्छति॥किंकुर्वन्यज्ञंदेवेभ्यःप्रतिवेदयन्प्रख्यापयन्॥४॥अथपंचमी॥५॥ ॥होताध्वर्युरावयाअग्निमिंधोग्रा
वग्राभउतशंस्तासुविप्रः॥तेनयज्ञेनस्वरंकृतेनस्विष्टेनवक्षणाआपृणध्वं॥५॥ ॥होतादेवानामाह्वाताएतन्नाम
कऋत्विक्अध्वर्युरध्वरयुःअध्वरस्यनेतासोधिश्चावयाःआभिमुख्येनहविषांगमयिताअध्वर्योर्विशेषणमेतत्।
आङ्पूर्वाद्दधातेरसत्पूर्वपदप्रकृतिस्वरत्वंचयद्वाआभिमुख्येनावयष्टाप्रतिप्रस्थातोच्यते।अवेर्यजइतिविन्।
अवाप्योरुपसर्गयोरित्यल्लोपः।अग्निमिंधोग्नीत्ग्रावग्राभ्योरिंधइतिकुक।ग्रावग्राभःश्वावकूःस्तुत्यागृह्णातीतिग्रा
वस्तुत्कर्मण्यण्।उतअपिचशंस्ताप्रशास्तासुविप्रइतिमेधाविनामसुशोभनमेधोपेतोब्रह्मोच्यते।ब्रह्मात्वोवद
तिजातविद्यामित्यत्रब्रह्मैकोजातेजातेविद्यांवदतिब्रह्मासर्वविद्यःसर्वंवेदितुमर्हतीत्युक्तत्वात्।ब्रह्मैववस्तुवि २।८
प्रशब्देनाभिधेयः।सचात्रलाक्षणिकोपलक्षकः।एतेसर्वेतेनप्रसिद्धेनस्वरंकृतत्वातेनसुष्ठुअरणीयंकृतेनस्वलं २२

कृतेनवाउच्चारसौष्ठवादिनासुष्ठुसंपादितेनस्विष्टेनसुष्ठुइष्टेनयज्ञेनवक्षणाःअग्नितोहुतंउत्थाद्दीनप्रवहणास्व
भावाःप्रसिद्धानदीर्वाआपृणध्वंसर्वतःपूरयतयज्ञंसम्यक्कृत्वानिर्वर्त्यफलंसाधयतेत्यर्थः॥५॥इतिद्वितीयस्यतृती
येसप्तमोवर्गः॥७॥अथषष्ठी॥६॥ ॥यूपव्रस्काउतयेयूपवाहाश्चषालंयेअश्वयूपायतक्षति।येचार्वतेपचनंसंभ
रंत्युतोतेषामभिगूर्तिर्नइन्वतु॥६॥ ॥यूपव्रस्काःयूपार्थंवृक्षस्यव्रश्चनकर्तारःछेत्तारःउतयेचयूपवाहाःछि
न्नस्यवोढारःयेचचषालंयूपस्योपरिस्थाप्यंयूपायनागंचषालंसमाहुः॥येअश्वयूपायअश्वबंधनयूपायतक्ष
तीतिवचनव्यत्ययः॥साधुसंपादयंति।येचार्वतेअरणवतेअश्वायपचनंपाकसाधनंकाष्ठोखादिकंसंभरंति।
उतोअपिचनोस्मभ्यंबंधिनांतेषामभिगूर्तिःअभिगूर्तिःसंकल्पःसर्वथाकरणीयमितिबुद्धिःइन्वतुव्याप्नोतु।इन्व
तिर्व्याप्तिवचनः।इन्वतिनक्षइतितद्वचनेषुपाठात्।यद्वातेषामभिगूर्तिर्नोस्मानिन्वतुयागंसाधुपारंप्रापय

वनेनयोजयन्तीत्यर्थः॥ठ॥अथसप्तमी॥ठ॥ ॥उपप्रागात्सुमन्मेधायिमन्मदेवानामाशाउपवीतपृष्ठः॥अन्वेनंवि
प्राऋषयोमदंतिदेवानांपुष्टेचकृमासुबंधुं॥ठ॥ ॥मन्ममननीयंफलंसुमत्उपप्रागात्उपप्रैतुसुमत्स्वय
मित्यर्थइतियास्कः॥यद्वास्वयमेवमादयितृतमेमयिअधायिधी॥नयेफलन्नतोस्यआगतः॥सर्वमयाधृतइत्यर्थः॥
किमर्थंवीतपृष्ठःसाधुपोषणेनप्राप्तपार्श्वाद्भागकांतिपृष्ठोवाअत्यंतंदृप्तइत्यर्थः॥नाहशोयंदेवानामाशाःइ
यितुंउपगच्छतु॥यागार्थमेनंसुबंधुंशोभनमश्वंदेवानामाशास्यमानानांपुष्टेपोषणायचकृमकुर्मः॥तंचधी
मेधाविनऋत्विजःऋषयोतींद्रियद्रष्टारःअन्येवाविप्राःऋषयश्चात्तुमदंतिअनुमोदंतांसम्यक्कृतमितिपरि
तुष्यंतु॥ठ॥अथाष्टमी॥ठ॥ ॥यद्वाजिनोदामसंदानमर्वतोयाशीर्षण्यारशनारज्जुरस्य॥यद्वाघास्यप्रभृत २१९
मास्येउतृणंसर्वाताते अपिदेवेष्वस्तु॥ठ॥ ॥वाजिनोगमनवतोश्वस्ययद्दामग्रीवाबद्धारज्जुःयच्चसंदानंसम्य २३

गवच्छेदकंबंधकंनंदामाप्ति॥याचास्यशीर्षण्याशिरसिबद्धारशनारज्जुरस्ति॥शिरःशब्दाद्वेछंदसीतियत्॥येचन्नद्भि
नइतिशीर्षभावःनिःस्वरितः॥यद्वाअस्याश्वस्यास्येमुखेप्रभृतंप्रकृतंप्रक्षिप्तंतृणमस्ति॥यद्वाशब्दोवार्थेसचप्रसिद्ध्यर्थः॥
सर्वासर्वाणितानिसर्वाण्यपितेअश्वतेनवसंबंधीनिदेवेष्वस्तुदेवेषुमध्येनवंतुदेवत्वंप्राप्नुवंतुवा॥वचनव्यत्य
यःअत्रोपयुक्तानांसर्वेषांदेवत्वंकिमश्वस्यतन्त्राभिनिर्वाशासनीया॥ठ॥अथनवमी॥ठ॥ ॥यदश्वस्यक्रविषोमक्षि
काशयद्वास्वरौस्वधितौरिप्तमस्ति॥यद्धस्तयोःशमितुर्यन्नखेषुसर्वाताते अपिदेवेष्वस्तु॥ठ॥ ॥अश्वस्यतदवनृत
स्यक्रविषःआममांसस्यपतत्यदंगंमक्षिकाआशनत्कयता अशनोजने॥यद्वाकर्मणिषष्ठी॥अश्वस्ययत्मांसं
नत्कयतिवा॥अथवास्वरोपश्चंजनकालेयत्परिप्तंलिप्तमस्तिस्वरुणापशुमनक्तीतिश्रुतेः॥अथवास्वधितोस्व
दनकालेवअवदानकालेयल्लिप्तमस्तिशामितुर्हस्तयोर्लिप्तमस्तिविशसनकालेयच्चनखेषुलिप्तंतासर्वानानि

म्वाणि ॥ हे अश्व तेन व संबंधीनि देवेषु देवेषु मेनोपाथयित्नवंतु ॥छ॥ अथ दशमी ॥छ॥ ॥ यदूवध्यमुदरस्यापवा
नि यत् आमस्य क्रविशो गंधो अस्ति । सुकृता तत् शमितारः कृण्वंतु उत मेधं शृतपाकं पचंतु ॥छ॥ ॥ उदरस्य संबंधि यदू
वध्यं शीघ्रजीर्णं पुरीषमपवाति अपगच्छति यश्चामस्या मपक्वस्य क्रमिषो मांसस्य गंधोस्ति । तेशोस्ति पाक
स्य समये यत्किंचिदूवध्यं अपक्वस्य च तेशोस्ति तत्सर्वं शमितारो विशसनकर्त्तारः सुकृता तान् एवं तु सुकृतं तत्कुर्व
परिहितं कुर्वंतु उत अपि च मेधं मेध्यं पश्ववयवं शृतपाकं देवयोग्यपाकोपेतं यथा भवति तथा पचंतु पिरमत्त
यादियोग्यमतिपक्वमीषत्पक्वं च मा कुर्वंत्वित्यर्थः ॥छ॥ द्वितीयस्य तृतीये ष्टमो वर्गः ॥छ॥ अथैकादशी ॥छ॥
यत्ते गात्रादग्निना पच्यमानादभिशूलं निहतस्यावधावति ॥ मा तद्भूम्यामाश्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो २२०
रातमस्तु ॥छ॥ ॥ हे अश्व तेन वाग्निना पच्यमानात् गात्रात् यदूष्मरूपं रसो वा यत्किंचिदवधावति निहतस्य २४

DR. BHAU DAJI MEMORIAL

निःशेषेण हतस्य तव यदंगं रसरूपं शूलमभिलक्ष्यावधावति निर्गच्छति तत्तु तद्भूम्यां माश्रिषत् आश्लिष्टं मा भूत्
अपि च उपादित्वादू । पाकसमये तथा मा तृणेषु विशसनसमये दर्भेषु माश्रिषत् मा पतत्तु न हि तत्पतितं तु
गच्छति निवेत उच्यते तेन तत् ता हृतं उशद्भ्यः तन्नृ हविः कामयमानेभ्यो देवेभ्यो रातं दत्तमस्तु ॥छ॥ अथ द्वितीया ॥छ॥
ये वाजिनं परिपश्यंति पक्वं य ईमाहुः सुरभिर्निर्हरेति । ये चार्वतो मांसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इ
न्वतु ॥छ॥ ॥ पक्वं वाजिनमश्वं अश्वावयवं परिपश्यंति परितः पावनबुध्या हंतं ये ईयि व्रिनं सुरभिः शोभनगं
धो अतो निर्हर । किंचिदप्यस्मभ्यं देहीत्याहुः । यद्वा निःशेषेण देवेभ्यो हरेत्याहुः । यतः सुरभिः अतो देवयोग्य
मिति किंच ये चार्वतो मांसभिक्षामुपासते ये नराः अश्वावयवस्य हुतशिष्टमांसयाचनामुपासते कांक्षंते ।
अतो अपि च तेषां तु क्रविधानामभिगूर्तिः अभितः उद्यमनं नोस्मानिन्वतु व्याप्नोतु यथा वाभिरक्षतु पा

ष्ट एवं स्पृहयंति। तथा यज्ञो निर्वहयत्वित्यर्थः। यद्वा मंत्रो देवपरो व्याख्येयः। ये देवा वाजिनं पक्वं परिपश्यंति करा
द्राष्यतीति विचिंवंति ईड्गाय च स्पुरंति ईमेनं निर्हरेति शोभनोऽस्मभ्यं देहीत्याहुः। ये चार्वतो मांसस्य भिक्षामु
पासते तेषामभिगूर्तिर्न इन्वतु तेषां उद्यमः सफलो न भवत्वित्यर्थः॥ग॥ अथ त्रयोदशी॥ग॥ ॥यन्नीक्षणं मांस्प
चन्या उखायाः पात्राणि यूष्ण आसेचनानि ऊष्मण्यापिधाना चरूणामंकाः सूनाः परिभूषंत्यश्वं॥ग॥ ॥
मांस्पचन्याः मांसपचन्याः पचनेऽधिकरणे ल्युट्॥ मांसस्य पचि युड्वजोरित्यंत्यलोपः। उखायाः स्थाल्याः नीक्ष
णं पाकपरीक्षासाधनं काष्ठं तथा यानि पात्राणि यूष्णो रसस्य क्षयितस्य आसेचनानि आसेचनसाधनानि तथा
ऊष्मण्या ऊष्मनिवारणार्हाणि पात्राणि। तथा चरूणां पात्राणां मांसपूर्णानां अपिधाना पिधानानि तत्साधना २३१
नि साधनानि तथा अंकाः रूढ्याद्यवयवांकनसाधनाः वेतसशाखाः सूनाः अवदानसाधनाः स्वधित्यादयः २५

एवम् अश्वं अश्वावयवं परिभूषंति परितो भूषयंति स्वस्वव्यापारेण साधयंतीत्यर्थः। भूष अलंकारे भौवादिकः॥ग॥
अथ चतुर्दशी॥ग॥ ॥निक्रमणं निषदनं विवर्तनं यच्च पड्बीशमर्वतः। यच्च पपौ यच्च घासिं जघास सर्वा ता ते अ
पि देवेष्वस्तु॥ग॥ ॥यत् निक्रमणं निरंतरं क्रमते यत्र तन्निक्रमणं स्थानं नितरां सीदतीत्यत्रेति निषदनं निव
र्तनं विविधवर्तनं स्थलतो लुंठनं यत्र तत्स्थलं वर्तनाधिकरणे ल्युट् यच्चार्वतोऽश्वस्य पड्बीशं पादबंधनं वटतंतुं अदे
शं सर्वत्र देवार्थत्वात् अश्वस्य रोमादीनामपि निरर्थकत्वाभावात् तत्स्थानमपि स्वीक्रियते। यद्वा क्रिया परा
वगंतव्या आलंबनमस्य पेनिष्पदेत्। यो निक्रमणादयश्चेष्टाः संतितास्त्यर्थः। यच्च पपौ यदुदकमपिबत् यच्च
घासिं अदनीयं तृणादिकं जघास भक्षितवान्। हे अश्व ते तव ता तानि सर्वाणि क्रमणादीनि देवेष्वस्तु संतु
देवान् प्राप्नुवंतु तान्यपि निरर्थकानि मा भूवन्नित्यर्थः॥ग॥ अथ पंचदशी॥ग॥ ॥मा त्वाग्निर्ध्वनयीद्धूमगं

धिर्मोखाभ्राजंत्यभिविक्तजघ्रिः॥इष्टंवीतमभिगूर्तंवषट्कृतंतंदेवासःप्रतिगृभ्णंत्यश्वं॥१॥ ॥हेअश्वत्वात्वां
धूमगंधिःधूमेनयुक्तोग्निःमाध्वनयीत्॥ध्वनिंशब्दंमाकार्षीदित्यर्थः॥अश्वस्यशब्देनप्रायश्चित्तविधानात्
यद्वादह्यमानावयववत्त्वात्त्वांधूमगंधिरग्निर्माध्वनयीत्॥ध्वनोर्मतिनांउनंगस्यात्नोनयतीत्यादिनाच
वृद्धिनिषेधः॥स्यंतच्छणोतिवृद्ध्यभावः॥किंचभ्राजंतीत्यंताग्निसंयोगेनदीप्तातथास्थालीमाभिविक्तअभितो
माचीचलत्ततोपातिशयेनमानीनशादित्यर्थः॥ओविजीभयचलनयोः॥छांदसोविकरणस्यलुक्॥जुडि
ताकृतोकृतीतिसलोपः॥स्थालीविशेषणमेतत्जघ्रिःजिघ्रंतीतापेनघ्राणंगंधोपादानेआदृगमहनजनइतिकिन्प्र
त्ययः॥तत्तादृशमश्वंइष्टंहोतुमिष्टंवीतंहोमायानीतंअभिगूर्तंअभिमुख्येनप्रदानायानोद्यतं॥ २२२
यद्वाइष्टंप्रयाजैराप्रीतंवीतंपर्यग्निकृतंअभिगूर्तंयेयजामहइत्यागूर्युक्तंवषट्कृतंवषट्कारेणदेवसं॥ २८

स्कृतंएवंभूतंतंदेवासोदेवाःप्रतिगृभ्णंति॥१॥द्वितीयस्यतृतीयेनवमोवर्गः॥१॥अथषोडशी॥१॥ ॥यदश्वाय
वासउपस्तृणंत्यधीवासंयाहिरण्यान्यस्मै॥संदानमर्वंतंपड्वीशंप्रियादेवेष्वायामयंति॥१॥ ॥अश्वायसंज्ञप्य
मानायअधीवासंउपर्याच्छादनयोग्यंवासउपस्तृणंतिसर्वतआच्छादयंति॥स्तृञ्आच्छादनेक्र्यादिकः
तथास्माअश्वायहिरण्यानियागानिसौवर्णराजतकांस्यानिकल्पयंति॥तथाअर्वंतंषष्ठ्यर्थेद्वितीया॥अ
र्वतोश्वस्यसंदानंशिरोबंधनंपड्वीशंपादेशंप्रविष्टंपादबंधनंएतानिप्रियादेवानांप्रियकराणिचाला
लेबध्नास्थापितानिदेवेष्वायामयंति॥१॥अथसप्तदशी॥१॥ ॥यत्तेसादेमहसाशूकृतस्यपार्ष्ण्यावाक
शयावातुतोद॥स्रुचेवताहविषोअध्वरेषुसर्वाताते ब्रह्मणासूदयामि॥१॥ ॥महसाबलेनशूकृतस्य
शब्दानुकरणमेतत्शूकारंकुर्वतःतेतवसादेसदनेगमनेनिमित्तभूतेसतिसदेर्नाविधकर्षणात्वनःस्यं

नोदत्तत्वंदर्पतोगमनंकुर्वन्स्वत्कारंकुर्वतस्तेत्वांपार्ष्ण्याकशायावातुतोदव्यथयतितानिसर्वाणि
अध्वरेषुयागेषुब्रह्मणामंत्रेणसूदयामिक्षरामिआहुतित्वेनकल्पयामीत्यर्थः।तत्रदृष्टांतःअध्वरेषुया
गेषुहविषःहविराज्यादिकंस्रुचेवस्रुचायथासूदयतितद्वत्॥ढ॥अष्टौयाद्दशी॥ढ॥ ॥चतुस्त्रिंशद्वाजिनो
देवबंधोर्वंक्रीरश्वस्यस्वधितिःसमेति॥अच्छिद्रागात्रावयुनाकृणोतपरुष्परुरनुघुष्याविशस्त॥ढ॥ ॥
वाजिनोऽश्वस्यदेवबंधोःदेवानांप्रियस्यचतुस्त्रिंशद्वंक्रीःएतत्संख्याकान्यपार्श्वास्थीनिस्वधितिःछेदन
साधनोसिःसमेतिसम्यग्गच्छतिछेदनाय।इतरेषामजादीनांषड्विंशतिरेव।षड्विंशतिरस्यवंक्रयइतिप्रै
षात्।हेविषंशासनस्यकर्तः अस्याश्वस्यगात्राणिशरीरावयवान्अच्छिद्राणियथाभवंतितथावयुना २२३
वयुनानिप्रज्ञातानिमयमितिप्रज्ञानामवयुनंअनिरयेतितन्नामस्यक्तत्वात्कृणोतकुरुततप्रनत्र २७

नथनाश्वेतितवादेशःरुदयजिह्वावक्षःप्रभृतीनिप्रज्ञायमध्येछिन्नानिमाकुरुतेत्यर्थः।तदर्थंपरुःप्रतिपर्वप्र
निरुद्याद्यवयवंअनुघुष्यशब्दमवद्यमितिनिमंशाष्टौववविशाध्यविशसनानं।कुरुतशासहिंसायांछांदसः।
शपोलुक्।गात्रंगात्रमस्यानूनंकृणुतादितिप्रैषात्॥ढ॥अथैकोनविंशी॥ढ॥ ॥एकस्त्वष्टुरश्वस्या
विशस्ताद्वायंताराभवतस्तथऋतुः॥यातेगात्राणामृतुथाकृणोमितातापिंडानांप्रजुहोम्यग्नौ॥ढ॥
त्वष्टुरस्यदीप्तस्याश्वस्यविशस्ताविशसनस्यकर्ताएकःएकएवतस्मकःऋतुःएतदुपलक्षितःकाला
त्मातस्यैवसर्वेषामपिपर्यवसितत्वात्।यद्वाऋतुःनिःशंकविशासनायगंताशामिता।तथाद्वायंता
गेनियमयितारौअहोरात्रेदेवौद्यावापृथिव्यौवाऋत्विजौनावेतत्तथऋतुरित्यत्रतत्यकइतिप्रत्य
तिन्नावाक्रम्वत्वंच।हेअश्वतेतवगात्राणांमध्येयानिहृदयाद्यवयवानिऋतुथाकालेकृणोमिछि

नघ्निंसंपादयामिपिंडानांमध्येतानितानिप्रज्ञातान्यवधानाग्नौप्रजुहोमिप्रकर्षेणहुतंकरोमि॥छ॥अथ
विंशी॥छ॥ ॥मात्वातपत्प्रियआत्मापियंतंमास्वधितिस्तन्वआतिष्ठिपत्ते।मातेगृध्नुरविशस्तातिहाय
छिद्रागात्राण्यसिनामिथूकः॥छ॥ ॥हेअश्वत्वात्वांअपियंतंदेवान्प्रतियंतंप्रियआत्मानोगायत
न्वःतवप्रियतरोदेहोमातपत्तप्तंमाकार्षीत्वयोमजनिताव्यथामाभूदित्यर्थः।स्वधितिःशस्त्रंतेतव
तन्वःतनोःअंगानिमातिष्ठिपत्त्वयिचिरंमाछितानिमाकार्षीत्।स्थापयतेर्लुङिणिचिष्ठतेरिदितीत्वं।
तथातेतवगात्राणिगृध्नुःकेवलमांसंसदृणोअविशस्ताविशसनेअकुशलःशमिताअतिहाय
न्यूनातिरेकभावेनतत्तदंगमतिक्रम्यमध्येमिथुमिथ्याव्यर्थंअसिनाछिद्राछिद्राणितिर्यक्कृति २२४
त्तानिमाकःमाकार्षीत्।करोतेर्लुङिमंत्रेघसेतिच्लेर्लुक्गुणःहल्ङ्याब्भ्यइतितलोपः॥छ॥ ॥ २८

अथैकविंशी॥छ॥ ॥नवाउएतन्म्रियसेनरिष्यसिदेवांइदेषिपथिभिःसुगेभिः।हरीतेयुंजापृषतीअभूतामुपास्था
द्वाजीधुरिरासभस्य॥छ॥ ॥नवाउनैवखलुएतन्म्रियसेवाशब्दएवकारार्थःउइत्ययमवधारणेनैवेदानीमितरा
श्ववन्मृतोनभवसि।देवत्वप्राप्तेर्वक्ष्यमाणत्वात्।अतएवनरिष्यसिनहिंस्यसे।व्यर्थहिंसायाअभावात्
ननुप्रत्यक्षतोऽवयवनिरवयवनाशःदृश्यतेकथमेवमुच्यतइतिउच्यते।सुगेभिःशोभनगमनसाधनैर्मा
र्गैर्देवयानलक्षणैःदेवानिदेषिदेवानेवप्राप्नोषिअतोयुक्तैवोक्तिःसाधनैरिभिरित्याह।तेत्वांवोढुंहरीएत
न्नामानाविंद्रस्याश्वौतेतवयुंजारथेयुक्तावभूतांनविघ्नतः।आश्वंशंसारूपत्वाद्भूतार्थनिर्देशः।हरीइं
द्रस्येतिनिरुक्तं॥तथापृषत्यौमरुतांवाहनभूतौयुंजाअभूतांयुक्तौनविघ्यथःपृषत्योमरुतामितिचनि
रुक्तं।युजेर्न्नीतिगित्यादिनाक्विन्युजेरसमासइतिनुम्।सुपांसुलुगित्याकारः।तथारासभस्यअश्विवाह

नस्यएतन्नामकस्याश्वस्यधुरिस्थानेवर्त्तमानःकश्चिद्वाजीअश्वःउपास्यति।देवत्वंगच्छतस्तवगमनायइंद्रादयःस्व
स्ववाहनानिप्रेषयंतीत्यर्थः।यद्वातत्रदेवत्वमापन्नंत्वांतानितानिवाहनानिवहंति।उपाकरणकालेअ
श्वप्रापावर्त्तनेयद्यश्वोनक्रुयात्तद्देषानिमित्तकीयजमानवाचनार्थानिवति।तथाचसूत्रितं॥सुगव्यंनोवाजी
स्वश्व्यमितियजमानंवाचयेदिति॥१॥मेषास्वक्तेद्वाविंशी॥१॥ ॥सुगव्यंनोवाजीस्वश्व्यंपुंसःपुत्राँउतविश्वा
पुषंरयिं॥अनागास्त्वंनोअदितिःकृणोतुक्षत्रंनोअश्वोवनतांहविष्मान्॥१॥ ॥वाजीअश्वःआजन्यमा
नोनोस्माकंसुगव्यंशोभनेनगोसमूहेनयुक्तंरयिधनंयुक्तंविश्वापुरुपंरयिंविश्वस्यपोषकंधनंकरोतुकृ
णोत्वश्वलगोरथादितिसमूहार्थेयत्छांदसमुत्तरपदाद्युदात्तत्वं।यथासमूहिकस्याद्यःप्रसंगेसर्वत्रगो
रजादिप्रत्ययप्रसंगइतियत्।तदंतस्याद्युदात्तत्वंछंदसीत्युत्तरपदाद्युदात्तत्वं।तथास्वश्व्यंशोभनाश्वस २७

MEMORIAL
DR BHAU DAJI
२३५

मूहयुक्तंतथापुंसःपुत्रान्पुत्रशब्दश्चीपुमत्यसाधारणअतःपुमपत्यानीत्यर्थः।यद्वापुंसोबंधादीन्पुत्रान्पुरुत्र
त्तकानात्मजान्स्त्र्यपत्यानिपुपपत्यानिचेत्यर्थः।उतअपिचविश्वापुषंरयंविश्वपोषणसमर्थंधनं।किंचनोस्मा
न्अदितिअदीनोश्वःअनागास्त्वंकृणोतुसर्वतोनिष्पापत्वंकरोतु।उक्तानांफलानांन्यूनातिरेकजनितपा
पत्वयानावअसंनवात्पापत्वंप्रार्थ्यते।किंचहविष्मान्हविर्भिस्तावचवोपेतोश्वोनोस्माकंक्षत्रंबलंक्षात्रं
तेजोवनतांसंभजनांकुरुतां॥१॥द्वितीयस्यतृतीयेदशमोवर्गः॥१॥ ॥यदक्रंदइतित्रयोदशर्चंसप्तमंसू
क्तंदैर्घतमसमत्रैष्टुभंअश्वस्यस्तूयमानत्वात्तद्देवत्यंयदक्रंदःसप्तोनेत्यनुक्रमणिका।आश्वमेधिकेमध्यमे
हनिउपाकरणायावस्थितमश्वमाश्वानिरेकादशानिस्तोत्यप्रणवन्निति।तत्रप्रथमा॥१॥ ॥यदक्रंदःप्रथ
मंजायमानउद्यन्समुद्रादुतवापुरीषात्॥श्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यंमहिजातंतेअर्वन्॥१॥

हेअर्वन्अरणकुशलाश्वतेनवजातंजन्मजननंउपस्तुत्यंउपेत्यसर्वैस्तोव्यंस्तोतेरेतिस्तुशास्वितिक्यप्ततस्तुक्
कथंस्तुत्यत्वमितिउच्यतेयद्यस्मात्समुद्रात्।अंतरिक्षनामैतत्उदकसमुंदनापादानाद्यक्षगंधर्वादि
संमोदनाधिकरणाद्वांतरिक्षात्प्रमंथेद्ववंजायमानःउत्पन्नःयद्वासमुद्रआदित्यःसमुंदनाद्दृष्ट्यातस्मा
द्वाजायमानःसूरादश्वंवसवोनिरतष्टेतिवक्ष्यमाणत्वात्।उतवाअथवाउरीषात्सर्वकामानांपूरका
दुदकात्प्रथमंजायमानःसतादृशस्त्वंयद्यस्मात्अक्रंदःमहाशब्दमकरोःयजमानमनुग्रहीतुं।किंच
तेपक्षापतनसाधनौपक्षौश्येनस्यपक्षाविवतौयथाशीघ्रपतनसाधनौतादृशावित्यर्थः।।नवबाहूइव
तौयथावेगवंतौतादृशावित्यर्थः।।यस्मादेवंतस्मात्तेजन्मस्तुत्यमित्यर्थः।।ग।।अथद्वितीया।।ग।। ।।यमे २२९
नदत्तंत्रितएनमायुनगिंद्रएणांप्रथमोअध्यतिष्ठत्।गंधर्वोअस्यरशनामगृभ्णात्सूरादश्वंवसवोनिरतष्ट ३०

श।।ग।। ।।यमेननियामकेनाग्निनादत्तमेवमश्वंत्रितःपृथिव्यादिषुत्रिषुस्थानेषुवर्तमानस्त्रीणितमोवावायुःअयु
नक्ययेयोजितवान्।किंचैनमश्वंइंद्रःप्रथमःप्रतमःप्रकृष्टतमःप्रथमइतिमुख्यनामैतत्अध्यतिष्ठत्अधिष्ठितवान्।
अस्यगंधर्वःसोमःसोमेनममयाविष्टकइतिवक्ष्यमाणत्वात्।सचास्याश्वस्यरशनानियमनरज्जुमगृभ्णा
त्अग्रहीत्।ईदृशोश्वःकुतःसमुत्पन्नइतिचेत्।उच्यतेहेवसवःरश्मयोयूयंसूरादादित्यादश्वंएवंमहानुभा
वानिरतष्टनिरोपेणसाधुसंपादितवंतः।यद्वावसुशब्देनोक्ताएवयमादयःपरामृश्यंते।हेवसवःस्वस्व
व्यापारेणसर्वस्याच्छादयितारोयूयंसूरादादित्यादश्वंमेननिरतिष्टअतक्षतनिरित्येषसमित्येतस्यस्थाने
तक्षतिकरोतिकर्मासच=क्रियासामान्यवचनःअन्नोविस्ताहारणेवर्ततेसम्यग्धारितवंतइत्यर्थः।तष्टे
र्लङिछांदसःशपोलुक्स्कोःसंयोगाद्योरितिकलोपः।।ग।।अथतृतीयामृचमाह।। ।।असियमोअस्या

दित्योअर्वन्नसित्रितोगुह्येनव्रतेन॥असिसोमेनसमयाविपृक्तआहुस्तेत्रीणिदिविबंधनानि॥छ॥ ॥हेअर्वन्
त्वंयमोसिनियमितासियमेनदत्तत्वात्तच्छब्दव्यपदेशः।तथाआदित्योसिसूरान्निरतष्टेत्युक्तत्वात्॥
तथागुह्येनव्रतेनगोपनीयेनदुर्दिनरूपेणवाकर्मणासर्वत्रव्याप्तिरूपेणेत्यर्थः।तेनत्रितःत्रिषुस्थाने
षुतायमानोवायुरसित्रितएनमायुनगित्युक्तत्वात्तद्रूपत्वं।अथवागुह्येनव्रतेनगोपनीयेनकर्म
णायोगादिसाधनरूपेणत्रितःत्रितएतन्नामकऋषिरसि।किंचहेअश्वत्वंसोमेनसमयासहविपृ
क्तःवीत्येषसमित्येतस्मिन्नर्थेसंपृक्तोसितेनगृहीतत्वात्।हेअश्वैवंरूपतेतवदिविद्युलोकेआदित्ये
वावर्तमानस्यत्रीणिबंधनानिउत्पत्तिकारणान्याहुःऋगादिवःवसवआदित्याद्युस्थानंचेतित्रीणि २२७
॥छ॥अथचतुर्थ॥छ॥ ॥त्रीणितआहुर्दिविबंधनानित्रीण्यप्सुत्रीण्यंतःसमुद्रे।उतेवमेवरुणःछंत्स्य ३१

वंयत्रातआहुःपरमंजनित्रं॥छ॥ ॥पूर्वंदिवित्रीणिबंधनानीत्युक्तं।इदानीमन्यत्रापिबंधनानीत्याह।हेअ
र्वन्नेतेतवदिविसंबंधनानित्रीण्याहुः।तानिपूर्वमुक्तानि।अप्सुअप्सुजीवित्वात्लोकोप्यप्शब्देनाभिधीयते
पृथिव्यांत्रीणिबंधनान्याहुः।अन्नस्थानंबीजमितित्रीणि।तथासमुद्रेअंतःसमुद्रमध्येसमुद्द्रवणादपादाना
त्समुद्रमंतरिक्षेतस्मिन्त्रीणिवृष्ट्युत्पत्तिनिमित्तानिमेघोविद्युत्स्तनितमितित्रीणि।उतेवइवशब्दश्चार्थेअपि
चहेअश्ववरुणःपापस्यवारकःफलस्यावर्जयितावात्वंमेमह्यंछंत्सिकथयसि।किंकथयसीतिचेदुच्यते
तेनवपरमंजनित्रंनिरतिशायंजन्मजनेर्णादिकस्त्रप्रत्ययः।यत्रयेषुत्रिषुउक्तेषुस्थानेष्वाहुःकथयंति
यद्वायत्रयस्मिन्नादित्येपरमंजनित्रमाहुःसूरादश्वंवसवोनिरतष्टेत्युक्तत्वात्।तादृशंप्रशस्यंजन्मयज्ञ
साधनभावेनकथयसीत्यर्थः॥छ॥अथपंचमी॥छ॥ ॥इमातेवाजिन्नवमार्जनानीमाशफानांसनितुर्निधा

ना॥ अत्रातेभद्रारशनाअपश्यमृतस्ययाअपिरक्षंतिगोपाः॥७॥ ॥हेवाजिन्नश्वतेसंबंधीन्यवमार्जनान्येगंसंशो
धकानिछानानीमाइमानिघ्रुक्तानिघ्रलोकादीनि किंचसनितुर्यागस्यसंनकमनमेवाइमानिशफानांनिधा
नानिस्थानानिसंचारप्रदेशाइत्यर्थः। किंचात्रैवतेतवभद्राःभंदनीयाःकल्याणरशनाःसीवादिषुसंयुक्ताः
रज्जुरत्रापश्यंएषूक्तेषुस्थानेषुपश्यं। रशनाविशेष्यंतेयागोपागोपयिन्योरशनाःऋतस्यसत्यस्ततस्ययज्ञ
साधनस्यवाश्वस्यकर्मणिषष्ठीरक्षतमनिरक्षंतिअनितःपालयंति। ताअपश्यंदृष्टवानस्मि। यद्वाइमातेतवमार्जना
निअंगप्रत्यंगसाधकाद्रुदकानिइमानिसनितुस्तवशफानांनिधानानिदेवयजनरूपसंचारप्रदेशावा
अत्रास्मिन्देवयस्थानेयारशनाःगोपास्तवपालयितारोराजपुरुषाःऋत्विजोवारक्षतस्यसंबंधिन्योअनिरक्षं २२९
निताअपश्यं॥७॥ द्वितीयस्याष्टनीयेएकादशोवर्गः॥७॥ ॥अथषष्ठी॥ ॥आत्मानंतेमनसारादजानामवोदि ३२

वापतयंतंपतंगं। शिरोअपश्यंपथिभिःसुगेभिररेणुभिर्जेहमानंपतत्रि॥७॥ ॥हेअश्वतेतवआत्मानंशरीरंमनसा
अस्मदीयेनप्रत्यष्टगमनवताचेतसाआरात्अनिकृष्टस्थितंअजानांजानामिअतिव्याप्तंनावयामीत्यर्थः। कथं
अवःअवस्तात्सामर्थ्याद्भूमेःभूमिभारन्यदिवाअंतरिक्षेणमार्गेणपतंगमादित्यंपतयंतंगच्छंतंव्याप्नुवंतं। य
द्वायतोदिवअंतरिक्षेणमार्गेणदिविवाएतयंतंगच्छंतंपतंगमादित्यंअवःआवःव्याप्नोषिअतोव्याप्तंजाना
मि। किंचशिरसापश्यंतवशिरएवंपश्यामि। कथंसुगेभिःशोभनसाधनैःअरेणुभिःअपापैःपथिभिर्मार्गैःआ
दित्यमंडलादित्यपरिहृतैःसत्यलोकमार्गैरित्यर्थः। तत्रप्रतिबंधाभावान्मार्गाणासुकरूपत्वं। तथाविधैस्तैः
येहमानंउपर्युपरिव्याप्नुवत्पतत्रिपतनवत्। शिरोअपश्यंनावयामिएवंलोकत्रयव्याप्तंनावयामीत्यर्थः।
यद्वातेआत्मानमेवंनावयामिमनसादिवाद्योतनात्मकेनांतरिक्षमार्गेणदिवःसकाशाद्वाअनःअवस्तात्

अर्वाङ्शुखंपतयंतंयागदेशंप्रतिव्याकुर्वत्अतएवपतंगंपतनशीलंअधःपतदादित्यसदृशंवाएवंतवाशि
रोनावयामीत्यर्थः।शिरश्चैवमपश्यंउक्तरूपेदेवयजनमार्गेजिहिमानंयज्ञदेशंव्याकुर्वत्।पतत्रिशीघ्रगा
मिशिरःपश्यामियद्यपिआत्मशब्देनशिरस्कंशरीरमुक्तंतथापिदेहात्पूर्वंशिरसोदृश्यमानत्वात्पृथग
निधीयते॥७॥अथसप्तमी॥७॥ ॥अत्रातेरूपमुत्तममपश्यंजिगीषमाणमिषआपदेगोः।यदातेमर्तोअ
नुभोगमानळादिद्ग्रसिष्ठओषधीरजीगः॥७॥ ॥एवंगमनानंतरंहेअश्वतेतवोत्तमंउक्तरूपेणोत्कृष्टतमंरूपं
अत्रास्मिन्यागदेशेअपश्यंपश्यामिकीदृशंगोःभूम्याःपादस्थानेदेवयजनप्रदेशेआजिधावनस्थानेवा
इषःकर्माणिषष्ठीइषंइष्यमाणमन्नंअन्नानिवाआसर्वतोजिगीषमाणंगंतुमिच्छंतंहेअश्वतेतवमर्तोमि २२ए
नुष्योनोगंनोभक्ष्यमन्नंअवान्ट्नचअतिर्गतिकर्मअनुक्रमेणसमीपंगमयति।आदित्अनंतरंतदा ३३

मीमेवतदनुग्रहार्थंश्रेष्ठेनरूपेणदीयमानंस्वल्पंनन्नंअनुग्रहात्स्वीकरोषीत्यर्थः॥७॥अथाष्टमीमृच
माह॥७॥ ॥अनुत्वारथोअनुमर्योअर्वन्ननुगावोनुभगःकनीनां।अनुव्रातासस्तवसख्यमीयुरनुदेवा
ममिरेवीर्यंते॥७॥ ॥इदानीमस्यलोकस्यापिमुख्यइतिप्रतिपादयति।हेअर्वन्गमनशीलाश्व
त्वात्वामनुअनुसृत्यरथोगच्छतिततःपुरतोश्वस्यगमनात्तथामर्योमर्त्यःत्वात्वामनुजात्येकवचनं।
अनुगावःगावोपित्वामनुगच्छंतितथाकनीनांकन्यकानांस्त्रीणांभगोभाग्यंसौंदर्यंत्वद्गमनमनुतथाव्रा
तासोव्राताःसंघात्मकाःअन्येअश्वसदृशाःवस्वादिदेवगणावात्वामनुअनुसृत्यतवसख्यमीयुःस
खित्वंगच्छंति।देवाऋत्विजःद्योतमानादेवावात्वामनुसृत्यतेवीर्यंवीरकर्मममिरेस्तुत्यामांतिअतः
सर्वोपित्वामनुसरःत्वंतुसर्वस्यश्रेष्ठइत्यर्थः॥७॥अथनवमीमृचमाह॥७॥ ॥हिरण्यशृंगोयोअस्य

पादामनोजवाअवरइंद्रआसीत्।देवाइदस्यहविरद्यमायंन्योअर्वंतंप्रथमोअध्यतिष्ठत्॥४॥ ॥
अयमश्वोहिरण्यशृंगः।हिरण्मयशृंगोवाउन्नतशिरस्कः।हृदयरमणशृंगस्थानीयशिरोरुहावा
अस्यपादाअयअयोमयाःअयःपिंडसदृशाइत्यर्थः।तथामनोजवाःमनोवेगाः।अथवैतदिंद्रविशे
षणं।शदृशस्याश्वस्यसामर्थ्यंप्रतिमनोवेगइंद्रोप्यवरोनिकृष्टआसीत्।किंचास्याश्वस्यहविरद्यंहवि
षोअदनंभक्षणंस्वार्थिकोयत्।अदनयोग्यंहविर्वाअपेत्यदेवाःसर्वेदेवाःआयन्प्राप्ताः।यइंद्रोअ
र्वंतंप्रथमःप्रथमभावीसन्अध्यतिष्ठत्अधिष्ठितवान्स्वहविष्टेनस्वकीयत्वेनवाश्रितवानित्यर्थः। २३०
इंद्रएणंप्रथमोअध्यतिष्ठदितिह्युक्तं॥४॥अथदशमीमृचमाह॥४॥ ॥ईर्मांतासःसिनीलिकमध्य ३४
मासःसंशूरणासोदिव्यासोअत्याः।हंसाइवश्रेणिशोयतंतेयदाक्षिषुर्दिव्यमज्ममश्वाः॥४॥ ॥अत्रा

श्वसमूहस्तुतिद्वारेणायंस्तूयते।ईर्मांतासःईरिताःअंतायेषांतेतथोक्ताःविरलांताइत्यर्थः।सिलिकमध्यमा
सःसंसृताःसंगतामध्यप्रदेशायेषांतेतथोक्ताः।मध्येनिविडाइत्यर्थः।तथासिलिकमध्यमासःसंस्टतःसं
गतःसंलग्नोमध्यभागोयेषांतेतादृशाः।पुष्टत्वात्प्रौढपृष्ठाःसंलग्नमध्याश्चेत्यर्थः।ऊधनछरोनागावाप
स्त्युसिलिकमध्यमाइत्यक्तं।समित्ययमुपसर्गोयतंतइत्याख्यातेनसंबंधयितव्यः।शूरणासःविक्रम
शीलाःदिव्यासोदिविभवाःअत्याअतनशीलाः।यद्यप्ययमश्वनामतथाप्यश्वशब्दस्यत्वक्षमाणत्वादयं
यौगिकोवगंतव्यः।शदृशाअश्वाःश्रेणिशःएकव्यापाराणांबहूनांसमूहःश्रेणिरुच्यते।श्रेःप्रधावनाय
श्रेणिशःपंक्तीभूयसंयज्जंतेसम्यक्प्रयत्नंकुर्वंति।तत्रदृष्टांतःहंसाइवतेयथाश्रेणीभूत्वाईर्मांतासइ
त्याद्युक्तरूपाःसंतःअंतरिक्षेगमनायप्रयतंते।तद्वत्कदाउच्यते।यद्यदाअश्वाःदिव्यंअज्मंगमनंगं

MEMORIAL

तव्यंवामार्गमाप्तिभुव्याप्नुवंतितदा। अयंमंत्रोयास्केनैवंव्याख्यातः ईर्मांतासःसमीरितांताः पृथ्वंतावा
सिलिकमध्यमाःसंसृतमध्यमाः शीर्षमध्यमावापिशिरआदित्योभवति। यदनुशेतेसर्वाणिभूतानि
मध्येचैषांतिष्ठतीदमपीतरच्छिरएतस्मादेवसमाश्रितान्येतदिंद्रियाणिभवंतिसंशूरणासोदिव्यासो
अत्याःशूरःशवतेर्गतिकर्मणोदिव्यादिविजाअत्याअतनाः हंसाइवश्रेणिशः हंसाहंतेर्घ्नंत्यध्वानंश्रे
णिशइतिश्रेणिश्रयतेःसमाश्रिताभवतियदाक्षिषुर्यदापुर्दिव्यमज्ममज्मनिमाजिमश्वाइति॥७॥ ॥
॥इतिद्वितीयस्यतृतीयेद्वादशोवर्गः॥७॥ ॥अथैकादशीमृचमाह॥७॥ ॥तवशरीरंपतयिष्ण्वर्वंतव २३१
चित्तंवातइवध्रजीमान्। तवशृंगाणिविष्ठितापुरुत्राऽरण्येषुजर्भुराणाचरंति॥७॥ ॥हेअर्वन्नतवशरी ३५
रंपतयिष्णुपतनशीलंव्याप्तइत्यर्थः। तथातवचित्तंमनोवातइवध्रजीमान्शीघ्रगमनवायुरिवतद्वत्

शीघ्रगमनानुकूलमित्यर्थः। किंचतवशृंगाणिशिरसोनिर्गताःशृंगस्थानीयाःकेशाःपुरुत्रापुरुषुबहुषु
प्रदेशेषुविष्ठिताविष्ठितानिविविधंस्थिता। किंचतेएवारण्येषुजर्भुराणामनोहराणिस्फुरमाणानिवाऽर
ण्येषुताःकेशाश्चरंति। यद्यत्राश्वस्यशृंगाभावात्तदुत्पन्नानानितेजांसिपरिकल्प्यंते। आश्वमेधिकेमध्य
मेह्नितिअभिगुप्रेषेमानोमित्रइतिसूक्तानंतरमुपप्रागाच्छसनमितिद्वेऋचौशंसनीयेसूत्रितंचउपप्रा
गाच्छसनमितिद्वेइति॥७॥सैषाद्वादशीमृचमाह॥७॥ ॥उपप्रागाच्छसनंवाज्यर्वादेवद्रीचामनसादीध्या
नः। अजःपुरोनीयतेनाभिरस्यानुपश्चात्कवयोयंतिरेभाः॥७॥ ॥अयमर्वाअरणकुशलोवाजीअश्व
शसनंस्थानंउपप्रागात्उपप्रैत। किंकुर्वन्देवद्रीचामनसादेवान्गच्छता। मनसादीध्यानोध्यायन्कदा
देवानस्मदवयवेनार्चामिदेवत्वंप्राप्नोमीतिवामनमित्यायन्। किंचास्यपुरःपुरस्तान्नाभिर्नद्धनंबंधु

इत्यर्थः।यद्वास्यबंधनस्थानीयः अवियुक्तत्वात्।एवंभूतोऽजः पुरोनीयते पुरतः प्राप्यते अनुरस्य पश्चा
त्।अनंतरं।अत्र यद्यप्यनयोः पर्यवसितोर्थ एक एव।तथाप्यज्ञात्वेनानंतर्यत्वप्रकटनाय पदद्वयं।य
द्वा अन्वेति क्रियया संबध्यते।कवयः अनूचानाः रेभाः स्तोतार ऋत्विजो यंति गच्छंति।ये वा अनूचानास्ते
कवय इति श्रुतेः।यद्वा कवय इति मेधाविनाम।कवमनीषीति तन्नामसु पठितत्वात्।रेभ इति स्तोतृना
मा।रेभः जरितेति।अत्र पागात्॥६॥ अथ त्रयोदशीमृचमाह॥६॥ ॥उप प्रागात्परमं यत्सधस्थमर्वाँ अच्छा
पितरं मातरं च।अद्या देवाञ्जुष्टतमो हि गम्या अथाशास्ते दाशुषे वार्याणि॥६॥ ॥अर्वा निरण्क्तशालो २२२
यमश्वः उप प्रागात् उपगच्छति।किं।यत् परमं उत्कृष्टं सधस्थं सहस्थानं स्तुतिभिरेकत्र निवासयोग्यं स्व ३६
र्गाख्यं यदस्ति तत्।किमर्थं पितरं मातरं च अच्छ आभिमुख्येन प्राप्तुं इच्छया।अद्यास्मिन्काले जुष्टतमः प्रीतत

मः स्वर्गं प्राप्नोमीति हर्षयुक्त इत्यर्थः।एवंभूतो देवान् गम्याः गच्छेः देवान्।हिशब्दः यज्ञ उपयुक्तस्य पशोः स्व
र्गप्राप्तेः सगम्योऽनुसखामहृथ्य इत्यादिमंत्रांतरे प्रसिद्धिद्योतनार्थः।अथ अनंतरं यजमानस्य आशास्ते क
स्मै दाशुषे हविर्दत्तवते स्वस्मै वा अङ्गनानि वार्याणि वरणीयानि धनानि यद्वा पुरुषव्यत्ययः।आशास्ते प्रार्थय
यजमानार्थं॥६॥ ॥इति द्वितीयस्य तृतीये त्रयोदशो वर्गः॥६॥ ॥६॥ ॥अस्य वामस्येति द्विपंचाशदृच
मष्टमं सूक्तं दीर्घतमसः।अत्रेयमनुक्रमणिका।अस्य द्विपंचाशत् अल्पस्तवत्वेन संशयोत्थापनप्रश्नप्रतिवाक्या
न्यत्र प्रायेण ब्रह्मज्ञानमोक्षाच्चरप्रशंसा च पंचपादं साकंजानां यजा यत्रेयं सशिक्लैर्ऽभमाद्गभनगोरीरिति जग
त्यः एतदंतं वैश्वदेवं तस्याः समुद्रा इति वाचः सखुद्धा आपोत्तरं सा प्रस्तारपंक्तिः शकमयमिति शाकधूम उक्त्वा
णां ष्टाभ्रिमिति सोमस्त्रयः केशिन इत्यग्निः सूर्यो वायुश्च केशिनश्चत्वारि वाग्वाच इंद्रं मित्रं सौर्यो द्वादशेति सं

वत्सरसंस्थं कालचक्रवर्णनं यस्ते सरस्वत्यै यज्ञेन साध्येभ्यः परानुष्टुप् गौरी पर्जन्याग्निदेवता वा त्या सरस्व
ते सूर्याय वेति। अत्र स्तुत्या बहुत्वेन स्तुतिभागस्याल्पीयस्त्वादिदं सूक्तमल्पस्तवनं। न सूक्तांतवरबहुस्त
वनं। इदमेव वैलक्षण्यं तुशब्देन द्योत्यते अस्मिन्सूक्ते प्रायेण संशयोत्थापनाद्यो बह्वोर्थः प्रतिपाद्यते।
अचिकित्वांश्चिकितुष इत्यनया संशय उत्थाप्यते। पृच्छामि त्वेत्यत्र प्रश्नः प्रतीयते। इयं वेदिरित्यत्र प्रतिव
चनं य ईं चकारेति ज्ञानं प्रतिपाद्यते। अपश्यं गोपामित्यादिना ब्रह्मसाक्षात्काररूपस्य प्रशंसा। अक्षर
नीत्यक्षरं ब्रह्म। द्वा सुपर्णेत्यादिना तस्य प्रशंसा। पंचपादं साकंजानां सप्तथं यद्गायत्रे अधि। अयं स शिङ्क्ते २३३
सप्तार्धगर्भा गौरीर्मिमायेति षड्जगत्यः। समानमेतदित्यनुष्टुप्। तस्याः समुद्रा इति प्रस्तारपंक्तिः। तल्ल ३७
क्षणं छंदोग्ये सूत्रितं। प्रस्तारपंक्तिः पुरत इति। पुरतः स्थितौ द्वादशाक्षरौ जागतौ पादौ ततोऽष्टाक्ष

रौ गायत्रौ सा प्रस्तारपंक्तिरिति सूत्रार्थः॥ ॥ अनुक्रमण्यामप्युक्तं आद्यौ चेत्प्रस्तारपंक्तिरिति। शिष्टा अ
नादेशपरिभाषया त्रिष्टुभः। गौरीर्मिमायेत्येतदंतानां विश्वेदेवा देवता। तस्याः समुद्रा इत्यस्याः पूर्वा
र्धस्य वाग्देवता उत्तरार्धस्यापः। शकमयमित्यस्याः पूर्वार्धस्य शकधूमः। उक्षाणं पृश्निमित्यत्रार्धस्य
सोमो देवता। त्रयः केशिन इत्यस्या अग्निसूर्यवायवः। चत्वारि वागित्येषा वाग्देवता। इंद्रं मित्रं वरुणं
कृष्णं नियानमित्येते सूर्यदेवते। द्वादश प्रधय इत्यस्याः संवत्सरात्मा कालो देवता। यस्ते स्तन इत्यस्याः स
रस्वती। यज्ञेनेत्यस्याः साध्या देवता। समानमेतदित्यस्याः सूर्यः पर्जन्यो वा देवता। दिव्यं सुपर्णमित्यस्याः
सरस्वान्सूर्यो देवता वा। उक्तः सूक्तस्य विनियोगः। शौनक आह। स्तेयं कृत्वा द्विजो मोहात्त्रिरात्रोपोषितः
शुचिः। सूक्तं जप्त्वास्य वामीयं क्षिप्रं मुच्येत किल्बिषादिति। महाव्रते वैश्वदेवशस्त्रे वैश्वदेवं निविद्धानं

प्रतीकं तत्रास्य वामस्येत्यादिकमेकचत्वारिंशदृचं प्रथमं प्रतीकं पंचमारण्यके सूत्रितं। अस्य वा
मस्य पलितस्य होतुरिति सलिलस्य दैर्घतमस एकचत्वारिंशतमिति॥ ॥ तत्र प्रथमामृचमाह॥ ॥
॥ ॥अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः। तृतीयो भ्राता घृतपृष्ठो अस्यात्राप
श्यं विश्पतिं सप्तपुत्रं॥ ॥ ॥अत्र द्वितीयपादेन छदिष्कृतेः प्रथमपादे प्रतिविशेषणं योग्यक्रियार्थं
संबंधोपच्छिद्यो ध्याहार्यः। योयं दिवि द्योतते तस्यास्य पलितस्य पालयितुः प्रकाशवृष्ट्यादिप्रदानेन पाल
कस्य तथा योऽयं दिवि द्योतते तस्यास्य होतुः ह्वातव्यस्य आह्वानार्हस्यादित्यस्य मध्यमो मध्यमस्थानो २३८
मध्यभवो वायुरुच्यते। आदित्यापेक्षयास्य मध्यमत्वं स चाश्नः सर्वत्र व्याप्तः न हि वायुरहितः कश्चित्प्र ३९
देशोस्ति तादृशो भ्राता नास्ति भ्रातृस्थानीयो भवति यथा लोके भ्राता पितृधनस्य भागं हरति तद्वत् मध्यस्था

नमंतरिक्षलोकं हरति निवाहवृष्टिरश्मिनिराकृतानां भौमानां रसानां हरणाद्भ्रातेत्युच्यते। पितृणां धान
नस्याजितं न वा भर्तव्यो भवतीति वा भ्राता। मध्यमो वायुरपि वृष्ट्यर्थं रसैर्भर्तव्यो भवति किं च घृतपृष्ठः घृत
माहुतिलक्षणं पृष्ठे यस्य तादृशो भ्राता तस्य तृतीयोऽस्ति भवति। त्रयाणां स्मरणास्तृतीयः उक्तोभयापेक्षया
भ्रातृत्वं तृतीयत्वं प्रतिपादितप्रकारेणात्रापि द्रष्टव्यं। रात्रौ सवितुस्तेजो भागस्य हरणात् दिवा स्वकीयतेजसो भा
गस्य। तदर्थमेव भर्तव्यत्वाद्वा भ्रातृत्वं प्रतिपादितप्रकारेणापि द्रष्टव्यं अत्र एषु भ्रातृषु मध्ये शुरो देशे वा
विश्पतिं विशां प्रजानां पालयितारं सप्तपुत्रं सर्पणरश्मिपुत्रोपेतं। ऐतिहासिकपक्षे अदितिः पुत्रकामेति
प्रसूते मित्रावरुणादित्रिपुत्रेषु अस्यादित्यस्य सप्तमपुत्रत्वं। ईदृशं महानुभावमादित्यमपश्यं अपरोक्षं भा
वनया मत्वेन साक्षात्करोमीत्यर्थः। तथा हि इं सोमो योसौ सोहमिति श्रुतिः। एवं वा अस्य वामस्य विश्वस्य

ऊरित्रिःस्रष्टुरित्यर्थः।पलितस्यपालयितुःस्वसृष्टजगत्पालनशीलस्यहोतुरादातुःस्वस्मिन्नुपसंहर्तुरित्य
र्थः।परमेश्वरस्यसृष्ट्यादिकर्तृत्वंश्रुतिस्मृतिपुराणादिषुप्रसिद्धं।तस्यतादृशस्यपरमेश्वरस्यभ्रातातोतनश्रा
गहारीतदंशभूतस्तत्रात्मामध्यमः।सर्वत्रमध्येवर्तमानोस्तिजगद्धारकत्वेनवर्तते।सचाश्नःव्यापनशी
लः।वायुनावैगौतमसूत्रेणायंचलोकःसर्वाणिचभूतानिसदृशानीतिश्रुतेः।वक्ष्यमाणविराडपेक्षया
वामध्यमत्वं।किंचास्यपरमेश्वरस्यतृतीयःघृतपृष्ठःघृतमित्युदकनाम।तेनतत्कार्यंशरीरमुच्यते।तादृ
वपृष्ठंस्पर्शकिंवायस्यसतादृशः।पृष्ठंस्पृशतेरितिनिरुक्तं।यद्वाप्रदीप्तपृष्ठः।पृष्ठशब्दःकृत्स्नशरीरोपल २३५
क्षकः।प्रकाशितशरीराभिमानीत्यर्थः।अन्वयंसूक्ष्मशरीराभिमानीसूत्रात्मवदस्पर्शनाविषयोभव ३१५
ति।अत्रएषुमध्येविश्पतिंविशांप्रजानांपतिंउपलक्षणमेतत्।सर्वस्यपतिमित्यर्थः।अपश्यंपश्ययं

साक्षात्करोमीत्यर्थः।अयमर्थःस्वाधीनमायोजगत्कारणभूतःपरमेश्वरएकः।ततउत्पन्नौस्थूलसूक्ष्मश
रीराभिमानिनौद्वौविराट्सूत्रात्मानौ।तेषुमध्येद्वयोःसाक्षात्कारेणमोक्षाभावात्सृष्ट्यादिकारणंप
रमेश्वरंज्ञेयत्वेनप्रसिद्धंश्रवणमनननादिसाधनेनसाक्षात्करोमीत्यर्थः।एवमुत्तरत्राप्यध्यात्मपरतयायो
जयितुंशक्यं।तथापिस्वरसत्वाभावाद्ग्रंथविस्तरभयाच्चनलिख्यते।यत्रद्वासुपर्णेत्यादौस्फुटमाध्या
त्मिकोर्थःप्रतीयतेतत्रतत्रप्रतिपादयामः।अयंमंत्रोयास्केनव्याख्यातः।अस्यवामस्यवननीयस्य
पलितस्यपालयितुरित्यादिनातद्व्याख्यानमत्रानुसंधेयं।।१।।अथद्वितीयामृचमाह।।ब।। ।।सप्त
युंजंतिरथमेकचक्रमेकोअश्वोवहतिसप्तनामा।त्रिनाभिचक्रमजरमनर्वंयत्रेमाविश्वाभुवनाधित
स्थुः।।१।। ।।एकचक्रंएकरथांगोपेतंयद्यपित्रीणिचक्राणितथापितेषामेकरूपत्वाद्एकचक्रमि

त्कच्यते।रथंरंहणस्वभावंसूर्यस्यसंबंधिनंसप्तएतत्संख्याकाअश्वायुंजंतिअनुबध्नंतिवहंत्यहोरात्रनि
र्वहायकिंचस्तुतःसप्तनेत्याह।एकोअश्वःसप्तनामाएकएवसप्ताभिधानःसप्तधानमनप्रकारोवाए
कएववायुःसप्तरूपंभूत्वावहतीत्यर्थः।वाय्वधीनत्वादंतरिक्षसंचारस्यएकचक्रमित्युक्तंकीदृशंत
दित्यतआह।त्रिनाभिवलयत्रयमध्यस्थितनाभिस्थानीयच्छिद्रत्रयोपेतंअजरंअमरणधर्मकं।अन
र्वंअशिथिलंपुनस्तदेवविशिष्यते।यत्रयस्मिन्चक्रेइमाविश्वाभुवनाइमानिप्रसिद्धानिसर्वाणिभूत २३९
जातानिअधिआश्रित्यतस्थुःतिष्ठंति।यद्वाएकचक्रंएकचारिणंअसहायेनसंचरंतंआदित्यमंडलंस ५०
प्तयुंजंति।सर्पणस्वभावासप्तसंख्यावारश्मयःसप्तप्रकारकार्याःअसाधारणाःपरस्परविलक्षणाः
षडृतवःएकःसाधारणइत्येवं।अथवामासद्वयात्मकाःषड्अपरोधिकमासात्मकइत्येवंसप्तर्तवा

DR. CHAKRAVARTI MEMORIAL

युंजंति।एतस्यकार्यंनिर्वहंतीत्यर्थः।साचैकःअसहायःअश्वोव्यापनशीलआदित्यःसप्तनामासप्तरसा
नांसंनमयितारोरश्मयोयस्यतादृशःसप्तऋषिभिःस्तूयमानोवाआदित्योवहतिधारयतिभ्रामयतीत्य
र्थः।किंत्रिनाभिचक्रंतिस्रोनाभिस्थानीयाःसवत्सावात्रयऋतवोयस्यतत्तादृशं।केतेग्रीष्मवर्षाहेमंता
ख्याःयद्वाभूतभविष्यद्वर्तमानाख्यास्त्रयःकालास्त्रिनाभयः।तद्विशिष्टंचक्रंचक्रवत्पुनःपुनःपरिभ्रमम
णंसंवत्सराख्यंचक्रंअजरंमरणरहितंनहिकदाचिदपिकालोम्रियते।अनादिनिधनःकालइतिस्मृतेः
अनर्वंअप्रतिहतंईदृशंसंवत्सराख्यंचक्रंनानाकालावयवोपेतंअयमादित्यःपुनरावर्तयति।संवत्स
रादर्वाचीनानांतावत्तेवांतर्भावात्।ततोयुगादीनांतदावृत्तिसाध्यत्वात्संवत्सरस्यचक्रत्वेननिरूपणंपु
नःकीदृशंतत्।यत्रयस्मिन्चक्रेइमाविश्वाभुवनाइमानिसर्वाणिभूतान्यधितस्थुःआश्रित्यतिष्ठंतिकाला

धीनत्वात्सर्वस्यस्थितेरीदृशस्यकालस्यप्रकारणभूतपरमेश्वरपरिज्ञानेनमोक्षसद्भावात्तज्ज्ञानमो
क्षाक्षरप्रशंसाचेत्यनुक्रमण्यामुक्तं।अयमपिमंत्रोयास्केनसप्तयुंजंतिरथमेकचक्रमेकचारिण
मित्यादिनाव्याख्यातः।तत्राप्यनुसंधेयं॥ब॥अथतृतीयामृचमाह॥ग॥ ॥इमंरथमधियेसप्ततस्थुः
सप्तचक्रंसप्तवहंत्यश्वाः।सप्तस्वसारोअभिसंनवंतेयत्रगवांनिहितासप्तनाम॥ब॥ ॥इममुक्तस्वरू
पमादित्यमंडलंसंवत्सराख्यंवारथंयेसप्तरश्मयोअधितस्थुरधिष्ठिताःसंवत्सरपक्षेअयनर्तुमासपक्ष
दिवसरात्रिमुहूर्ताख्याःसप्तवयवाअधितिष्ठंति।कीदृशंरथंचक्रसप्तचक्रंचक्रनाच्चरणात्क्रमणाद्वा २३७
चक्राणिरश्मयःतेसप्तयस्यरथस्यतादृशमुभयरथंद्विविधंसर्वोक्ताअधिष्ठिताः।अश्वाव्यापनशीलाःस ४१
प्तवहंतिनिर्वहंतिचतादृशंरथंसप्तस्वसारःस्वयंसरणाःस्वरादित्यस्तेनसारिताःपरस्परंसंसृष्टतावा

सप्तसंख्याकारश्मयस्तएवअश्वअभिसंनवंतेआभिमुख्येनसंगच्छंतेअसाधारणाःपरस्परविलक्षणाका
र्यःषड्ऋतवःसर्वधारणएकइतिसप्तत्वंयद्वोक्तरूपामासद्वयात्मकाःषड्त्रयोदशमासात्मकःसप्तमइ
तिसप्तत्वं।कीदृशोरथइतितदुच्यते।यत्रयस्मिन्नुभयविधगवांवाचांरश्मिनिरूपाणांसप्तसप्तविधानिना
मनमनानिसप्तस्वरूपाणिनिहितानिसप्तस्वरोपेतःसामभिःस्तुत्यंरथमित्यर्थः।यद्वागवामुदकानांस
प्तसर्पणस्वभावानिनामनमनानियत्रयासुस्वस्थानिहितानिहिताःसप्तस्वसारःपरस्परंसंसृष्टता
देवनद्यःअभिसंनवंति॥ब॥अथचतुर्थीमृचमाह॥ग॥ ॥कोददर्शप्रथमंजायमानमस्थन्वंतंयदनस्था
बिभर्ति।भूम्याअसुरसृगात्माक्वस्वित्कोविद्वांसमुपगात्प्रष्टुमेतत्॥ग॥ ॥एवंप्रपंचस्यकालायत्ततांप्र
तिपाद्यतस्यकारणभूतस्यपरमेश्वरस्याविषयत्वमाह।कोददर्शकोद्रष्टुंशक्नुयात्।कदाप्रथमंसृष्टेः

सर्वं अव्याकृतावस्थायामित्यर्थः॥ किं जायमानं प्रथमभावविकारमापन्नं उत्पद्यमानं प्रपंचमित्यर्थः॥ दुर्ज्ञे
यत्वेत्याह। यद्यस्मात् अस्थन्वंतं अस्थिमंतं शरीरं उपलक्षणमेतत् कार्यभावमापन्नमित्यर्थः॥ अ
नस्था अस्थिरहिता अशरीरा सांख्यप्रसिद्धा प्रकृतिः वेदांतप्रसिद्धा ईश्वराधिष्ठाना माया बिभर्ति गर्भवदंतर्धा
रयति अव्याकृतावस्थायां अनस्थः अशरीरः परमेश्वरो मायाशबलितः सन् इदं जगन्निर्मितवान् देहादि
सहितस्य कस्यचिदभावात् को ददर्श इदानीं मनो नित्यं आत्मा च नित्यः तत्संयोगात् कश्चिदात्मा ज्ञा
नातीति चेत्सोऽपि न संभवतीत्यत आह। भूम्याः संबंधि पार्थिवं स्थूलशरीरं असुः प्राणः तदुपलक्षितं सू २३८
क्ष्मशरीरं असृक् शोणितं एतत्सप्तधातूपलक्षितं यद्यपि शरीरं पंचभूतात्मकं तथापि भूतद्वयस्य प्रत्य ४२
क्षत्वात् तदपेक्षयोक्तं। आत्मा तैः संबद्धः चेतनः क्वस्वित् कुत्रास्ति न कदापि अस्तीत्यर्थः। नान्यत्किंचनमि

षदिति श्रुतेः॥ विद्वांसं जगत्कारणविषयज्ञानवंतं अन्यं गुर्वादिं एतत्कारणं प्रष्टुं कः शिष्यः अल्पमतिरुपगा
त् उपगच्छति। नादृशो देहेंद्रियसंघातरूप आत्मा तस्मिन्समये कुत्रास्ति प्रतिष्ठा प्रतिवक्ता चोत्तावपि नास्ती
त्यर्थः। नतु तद्द्वितीयमस्ति ततोन्यद्विभक्तं यत्पश्येदिति श्रुतेः॥ यद्वा प्रथमं प्रथमभाविनं जगत्कारण
भूतं को ददर्श कः साक्षात्करोति जायमानमस्थन्वंतं मनुष्यं अनस्थिकः परमेश्वरः शरीरं अशरीरः यद्य
स्माद्बिभर्ति ईश्वरः पितृकार्यत्वादिति भावः। शिष्टं समानं॥४॥ अथ पंचमीमृचमाह॥४॥ ॥पाकः पृच्छामि
मनसाविजानन्देवानामेना निहिता पदानि। वत्से बष्कयेधि सप्त तंतून्वि तत्निरे कवय ओतवा उ॥४॥ ॥
पाकः पक्तव्यः अपक्वमतिरहं मनसा संस्कृतेन अविजानन् अतिगहनं तत्त्वं विशेषेण ज्ञातुमशक्नुवन्
पृच्छामि प्रश्नं करोमि। अज्ञाने कारणमाह। एना एनानि पदानि संदेहास्पदानि तत्त्वानि देवानां निहितानि

देवानामपिगूढानीत्यर्थः। यद्वादेवानांपदानितत्वानिनिहितगोपयित्वास्थापितानि। अतःपृच्छामित
त्वज्ञानोपयोगायेतिशेषः। तानिकानीतिउच्यते। वत्सेसर्वस्यनिवासभूतेबष्कयेबडितिसत्यनामतत्क
षतानिबद्धआदित्यः। यद्वाबष्कयोनामैकहायनावत्सः। पुनरपिपिवत्सशब्दस्यपृथक्निर्देशात्तद्व
ष्कयशब्देनतत्कालमात्रंवक्ष्यते। तस्मिन्नादित्येअधिअधिकंसप्ततंतून्तायमानान्सप्तसोमसंस्थान्
कवयोमेधाविनोयजमानाः उतवैजगद्रूपनिर्यक्ततंदृत्वेतुंविततन्निरेविततवंतियद्वासप्ततंतवःसप्त
छंदांसितानिवितत्नंति। किमर्थंओतावेसप्तसोमसंस्थारूपतिर्यक्ततुसंतानयज्ञोनिर्माणायेत्यर्थः
यज्ञानांस्थितिःसूर्याधीनत्वादितिभावः॥ ईदृशंतत्त्वपृच्छामीत्यर्थः॥छ॥ ॥इतिद्वितीयस्यतृतीयेचतुर्द ४२
शोवर्गः॥छ॥ ॥अथषष्ठीमृचमाह॥छ॥ ॥अचिकित्वांश्चिकितुषश्चिदत्रकवीन्पृच्छामिविद्मनेनवि

द्वान्। वियस्तस्तंभषळिमारजांस्यजस्यरूपेकिमपिस्विदेकं॥छ॥ ॥अत्रचिकित्वान्देवतामत्वनजानन्न
हंचिकितुषःविशेषेणतत्त्वंजानतःकवीन्क्रांतदर्शिनःअधिगतपरमार्थान्अत्रअस्मिन्तत्वविषयेपृ
च्छामि। किमर्थंविद्मनेनेवेदनायपरमार्थज्ञानायकिंज्ञानन्नेवपरान्बाधार्थंनत्याइविद्मान्पृच्छामिअ
पितुयज्ञादेवयःपरमेश्वरःतस्तंभस्तंभितवान्नियमितवान्अथयआत्मासेतुर्विधृतिरेषांलोकानामसं
भेदायेतिश्रुतेः। किंइमाइमानिषट्रजांसिलोकान्रंजनात्मकान्लोकारजांस्युच्यंतइतिनिरुक्तं। य
द्यपिलोकाःसप्ततथापिसत्यलोकस्यकर्मिणांसर्वेषांसाधारणत्वाभावात्षडित्युक्तं। तत्रषड्वोक्ताःसप्त
मःकिमितिननिर्दिष्टइतिउच्यते। अजस्यजननादिरहितस्यचतुर्मुखस्यब्रह्मणःरूपेस्वरूपेएकंसत्यलो
काख्यंपुनरावृत्तिरहितंस्थानंकिमपिस्वित्किंस्विदेवतत्नूनकेनाप्यधिगंतुंशक्यमित्यर्थः। केचिद्देवोपा

साकेरर्चिरादिमार्गेणगंतव्यत्वादितिभावः।यद्वाषड्रजांसिविलक्षणाःषट्तत्वः।तान्यस्तंभवत्तत्वं।अजस्य
गमनशीलस्यजन्मरहितस्यवादित्यस्यरूपेरूप्यमाणेदृश्यमानेमंडलेएकमद्वितीयंकिमपिस्विद्यत्किं
स्विद्यत्किंचिदवाङ्मनसगम्यंतत्त्वमस्तितत्पृच्छामि।यएषोंतरादित्येहिरण्मयःपुरुषोदृश्यतइत्यादि
श्रुतिप्रतिपादितंतत्त्वमित्यर्थः।अथवाषडिमानिरजांसित्रिविधान्स्थूलोकांश्चयःस्तस्तंभतिस्त्रोभूमीर्
यत्रीरुतद्यूनितिनिगमः।तस्याजस्यपरब्रह्मणःरूपेनानाविधाकारिणिजगतिकिमपिस्विदेकमेका
त्मकमस्तीतिप्रश्नः।अविशेषनास्तिनामत्रमेकरूपमस्तीत्युत्तरविवक्षयाप्रश्नः।अस्तीत्येवोपलब्धव्य
मितिश्रुतेः॥६॥अथसप्तमीमृचमाह॥ ॥इहब्रवीतुयईमंगवेदास्यवामस्यनिहितंपदंवेः।शी ४४
र्ष्णःक्षीरंदुह्रतेगावोअस्यवव्रिंवसानाउदकंपदापुः॥७॥ ॥इहब्रवीत्विदानींइमंतद्वक्ष्यमाणंतत्वं

गच्छिप्रंअविचारेब्रवीतुकः।योवेदसः।कीदृशंतत्।अस्यपुरतोदृश्यमानस्यवामस्यवननीयस्यवेर्गंतुरा
दित्यस्यपदंसर्वैर्गंतव्यंस्वरूपंनिहितंगूढंवर्तते।किंचास्यादित्यस्यशीर्ष्णः।शिरोवदुन्नतस्यसर्वेषा
मुत्कृष्टस्यवागावः।केचनवर्षकालीनारश्मयःक्षीरमुदकंदुह्रते।दुहंतिवव्रिंरूपनामैतत्।रूपंवसा
नाःआच्छादयंतः।अतिविस्तरेणतेजसातपंतः।केचनास्यगावोरश्मयःउदकंस्वस्पृष्टंपदास्पृष्टेनैवमा
र्गेणअपुःपिबंतिभूमिंनिरुदकांकुर्वंतीत्यर्थः।तस्यस्वरूपंब्रवीत्वित्यन्वयः॥७॥अथाष्टमीमृचमाह॥
॥ ॥मातापितरमृतआबभाजधीत्यग्रेमनसासंहिजग्मे।साबीभत्सुर्गर्भरसानिविद्धानमस्वंतइदु
पवाकमीयुः॥८॥ ॥मातासर्वस्यनिर्मात्रीपृथिवीपितरंपालकंद्युलोकंतत्स्थितंद्युलोकस्थंआदि
त्यमित्यर्थः।नमाबभाजआभजनेकिमर्थंऋतेउदकेयज्ञेवानिमित्तभूतेसतिकेनद्वारेणधीतीधीत्या

कर्मणायागादिरूपेणास्वकीयेनाज्यसोमादिहविषातर्प्पयतीत्यर्थः॥ अथेततः द्वंपिताचमनसाअस्य
मभिप्रायवताचेतसासंजग्मेद्विसंश्लिष्टोवर्त्ततेखलु॥ दृष्टिमकरोदित्यर्थः॥ अनंतरंसामातावीभत्सुःग
र्भबंधनेछाग्वतीगर्भरसनागर्भरसेनगर्भोत्पत्तिनिमित्तेनरसेनानिविद्धानितरांविद्धासीत्॥ यद्वागर्भेर
सः अषध्याद्धत्यादनसमर्थमुदकंयस्याःसाताहृशीत्वदकेनात्यंतंक्लिन्नानिविद्धात्सषीबलैर्ईलमुखेनि
नरांविदारितानवतिबीजवापार्थं अत्रायंअमाधियकोवननयोषित्अपुत्यार्थंस्वपतियुवानांयोतिम
चतस्यामनुरागयुक्तःसंगतोभवतिसाचांतर्वतीसतीउत्तानजनयतीतितद्वत्रापि अनंतरंनमस्वंत
ःस्वभाविन्नादिप्रियंग्वाद्यन्नवंतएवमुपवाकं॥ उपेत्यवचनंपरस्परंसम्यगनिह्वानिसस्यानातिवचन
मायुःआप्नुवंति॥ यद्वाहविर्लक्षणान्नवंतःउपेत्यवचनंप्रैषादिरूपमीयुःदृष्टोसत्यांसस्यादिद्वारायागा

४५

डाक्टर भाऊदाजी स्मारक
Dr. BHAU DAJI MEMORIAL

आप्नुवात्अग्नेमिथुनासोअत्रसप्तशतानिविंशतिश्चतस्थुः॥११॥ ॥इतस्योत्पादकस्यसत्यात्मकस्यवा
आदित्यस्यचक्रंपुनःपुनःक्रमणशीलंमंडलाख्यंरथचक्रंवावर्वर्त्तिपुनःपुनर्वर्त्ततेसंचरति॥ कुत्रद्यां
परिद्युलोकस्यांतस्तिस्यपरितः॥ कीदृशंतन्द्वादशारंद्वादशसंख्याकमेषादिराश्यात्मिकैर्वाअरैःरथां
गावयवैर्युक्तं॥ किंचतन्चक्रंनहिजरायानैवखलुजरायैवभवति॥ हेअग्नेसर्वदागमनयुक्तादित्य
यद्वाअग्नेरेवस्थानत्रयेतत्तदात्मनावर्त्तमानत्वादसावप्यग्निरित्युच्यते॥ अत्रास्मिन्त्वदीयेचक्रेमिथु
नासःस्त्रीसरूपेणपरस्परंमिथुनभूताःसप्तशतानिविंशतिश्चविंशत्यकत्तरस्यसप्तशतसंख्याकाःपुत्राः
उत्रवउत्पद्यमानाःप्राणिनांदुःखात्रातारोवाअहोरात्ररूपास्तस्थुःतिष्ठंतिनिष्पद्यंते॥ षष्ट्यधिकशत
त्रयसंख्याकान्यहानिनावत्यएवरात्रयइत्येवतद्विभागःसप्तचवैशतानिविंशतिश्चसंवत्सरस्याहो

रात्राः स एषोहः समान इत्यारण्यकं ॥छ॥ अथ द्वादशीमृचमाह ॥छ॥ ॥पंचपादं पितरं द्वादशाकृतिं
दिव आहुः परे अर्द्धे पुरीषिणं ॥ अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितं ॥छ॥ ॥पंच
पादं पंचसंख्यात्मकपादोपेतं एतत् हेमंतशिशिरयोरेकत्वाभिप्रायं पितरं सर्वस्य प्राणयितारं द्वादशा
कृतिं द्वादशमासा एवाकृतयो यस्य तादृशं पुरीषिणं ह्यक्रदकेन तद्वंतं प्राणयितारं वा पुरीषमित्युदक
नाम उक्तलक्षणं संवत्सरचक्रं दिवो द्युलोकस्य परे अर्द्धे त्रास्थ्यात्राच्छूर्ध्वं परस्मिन्नर्द्धे तस्थिवक्षणेव
स्थित आदित्य इत्यर्थः । तस्मिन्नर्पितमाहुः एतदुत्तरस्थितिमात्राप्यनुपपद्यते । यद्यत्रार्पितं तदधीनं अतः सं
वत्सरं पर्यायेनमाहुरित्यर्थः । अथ अपि च अन्ये केचन वेदवादिन एवमाहुः किमिति उपरे उपरमंते ४३
स्मिन्नुपरताः प्राणिनोत्रेति वा परः संवत्सरः तस्मिन् कीदृशे सप्तचक्रे सप्तादित्यरश्मयः स्वद्वारेण च

ऽनुतिष्ठेय इत्यर्थः ॥छ॥ अथ नवमीमृचमाह ॥छ॥ ॥युक्ता मातासीद्धुरि दक्षिणाया अतिष्ठद्गर्भो वृजनीष्वं
तः अमीमेद्वत्सो अनु गामपश्यद्विश्वरूप्यं त्रिषु योजनेषु ॥छ॥ ॥माता निर्मिमीयं तस्मिन्भूतानीति माता
द्यौः दक्षिणायाः अभिमतस्य रणसमर्थायाः पृथिव्याः धुरि निर्वहणे युक्तासीत् वर्षणाय समर्थाभूदित्यर्थः
कथमिति तदुच्यते । गर्भो गर्भस्थानीय उदकसंघो वृजनीषु उदकवत्सु मेघपंक्तिषु तन्मध्ये अतिष्ठत् तिष्ठ
ति । अनंतरं वत्सः पुत्रस्थानीय उदकसंघः त्रिषु योजनेषु मेघरश्मिवायुषु संयुक्तेषु सत्सु अमीमेत् वर्ष
णसमयं राक्ष्यति । अनंतरं विश्वरूप्यं विश्वरूपवतीं गामपश्यत् । अनुक्रमेण पश्यति वर्षतीत्यर्थः । यद्वा
त्रिषु योजनेषु सत्सु वत्सो मेघो वर्षणाय गां भूमिं प्रत्यमीमेत् । अनंतरं सर्वजनो नुक्रमेण विश्वरूप्यं सस्या
दिभिर्नानारूपवतीं भूमिमपश्यत् पश्यति ॥छ॥ अथ दशमीमृचमाह ॥छ॥ ॥तिस्रो मातॄस्त्रीन्पितॄन्बिभ्रदे

कऊर्ध्वस्तस्थौनेमवग्लापयंति।मंत्रयंतेदिवोअमुष्यपृष्ठेविश्वविदंवाचमविश्वमिन्वां॥छ॥ ॥एकत्र
धानभूतःअसहायोवाउत्तमस्थानीयआदित्यःसंवत्सराख्यःकालोवातिस्रोमातॄःसस्यदृष्ट्याधकत्वादयि
त्रीःक्षित्यादिलोकत्रयाणीत्यर्थः।तथात्रीन्पितॄन्जगतांपालयितॄन्लोकत्रयाभिमानिनोग्निवायुसूर्याख्या
न्ऊर्ध्वस्तस्थौउन्नतःअत्यंतंदीर्घस्तिष्ठतिभूतभविष्यदाद्यात्मनासूर्यपक्षेसर्वेभ्यउन्नतःईंतमेनंनावग्ला
पयंतिग्लानिंनकुर्वंतिमहिकालआदित्योवातेनपराभूतयंतिदिविपृष्ठेद्युलोकस्योपरिअंतरिक्षेमं
त्रयंतेगुप्तंपरस्परंभाषंतेदेवाः।किंविश्वमिदंविश्ववेदनसमर्थांविश्ववेदनायांवाअविश्वमिन्वांअसर्व
व्यापिनींवाचंगर्जितलक्षणांअमुष्यआदित्यसंबंधिनींमंत्रयंतइत्यर्थः॥छ॥ ॥इतिद्वितीयस्यतृतीये ४६
पंचदशोवर्गः॥छ॥ ॥अथैकादशीमृचमाह॥छ॥ ॥द्वादशारंनहितज्जरायववर्तिचक्रंपरिद्यामृतस्य॥

क्स्थानीयायस्यसतथोक्तः।पक्षाअयनर्तुमासपक्षाहोरात्रिमुहूर्त्तानिमग्नसप्तचक्राणिपुनःपुनःक्र
ममाणानियस्यसतादृशेषडरेषडृतवएवअराःनाभौप्रत्यूताःसंबद्धायस्यतथोक्तलक्षणेसंवत्सरा
रथेविचक्षणंविविधदर्शनकरमादित्यंअर्पितमाहुः।एतदुक्तंभवतिअमुमादित्यंदक्षिणोत्तररूपाभि
क्रमतेस्तात्रमंदाग्निवस्यचकालाधीनत्वात्तदधीनमाहुः।अन्येतुसंवत्सराद्यात्मकस्यकालस्यसू
र्यगमनागमनसाध्यत्वात्तदायत्तत्वामाहुरिति॥छ॥अथत्रयोदशीमृचमाह॥छ॥ ॥पंचारेचक्रेपरि
वर्त्तमानेतस्मिन्नातस्थुर्भुवनानिविश्वा।तस्यनाक्षस्तप्यतेभूरिभारःसनादेवनशीर्यतेसनाभिः॥छ॥ ॥
पंचारेपंचर्तुरूपैरारैःयुक्तेचक्रेसंवत्सरात्मकेपरिवर्त्तमानेसंवत्सरपरिवत्सरादिरूपेणपुनःपुन
रावर्त्तमानेसतितस्मिन्कालचक्रेविश्वाभुवनानिसर्वाणिभूतजातानिवर्त्तंतइत्यर्थः।किंचतस्यचक्र

स्यमध्येवर्त्तमानःअक्षोऽरिनारःसकलभुवनवहनेनविप्रकृतभारोपिनप्यतेपीड्यते।किंचसनादेव
सनातनएवसनाभिःसनामसनाभिकःसर्वदैकरूपनाभिरसौनशीर्यतेनभिद्यते।यथालौकिकरथाक्षो
भारेणभग्नोभवतिअक्षघातेनचनाभिर्विहृताभवतिनतद्वदस्यापिनास्तीत्यर्थः॥१३॥अथचतुर्दशीमृचमाह॥
॥१४॥ ॥सनेमिचक्रमजरंविवावृतउत्तानायांदशयुक्तावहंति।सूर्यस्यचक्षूरजसैत्यावृतंतस्मिन्नार्पि
ताभुवनानिविश्वा॥१४॥ ॥सनेमिसमानेनेमिएकप्रकारबहिर्वलयंअक्षीणनेमिचक्रंसंवत्सराख्यंअ
जरंसनातनमपिजरारहितंविवावृतेपुनःपुनर्विशेषेणावर्त्तते।उत्तानायांऊर्ध्वतानायांइषायांउपरिविस्
तृतायांवादशइंद्रादयःपंचलोकपालाःनिषादपंचमाश्चत्वारोब्राह्मणादयोवर्णाःमिलित्वादशसंख्याका ५८
युक्ताःस्वस्वव्यापारयुक्तावहंतिजगन्निर्वहंतीत्यर्थः।तन्निर्वाहार्थत्वात्कालस्य।किंचसूर्यस्यादित्यस्य

चक्षुःख्यानस्वभावंसर्वस्यचक्षुस्थानीयंवामंडलंचक्षुःख्यातेर्वात्विष्टेर्वेतिनिरुक्तं।रजसावृष्टउदकेनआ
वृतंव्याप्तंएतिगच्छति।उदकंरजउच्यतइतियास्कः।तादृशेमंडलेविश्वाभुवनानिसर्वाणिभूतजातानिआ
र्पिताआर्पितानितदधीनत्वात्तेषां॥१४॥अथपंचदशीमृचमाह॥१५॥ ॥साकंजानांसप्तथमाहुरेकजंषलि
द्यमाऋषयोदेवजाइति।तेषामिष्टानिविहितानिधामशस्थात्रेरेजंतेविकृतानिरूपशः॥१५॥ ॥साकं
जानांएकस्मादादित्यात्सहोत्पन्नानांसप्तानामृतूनांमध्येसप्तथंसप्तमम्भूतंथइत्छंदसीतिथट्।एकजं
एकेनोत्पन्नमाहुःकालतत्त्वविदः।चैत्रादीनांद्वादशानांमासानांद्वयद्वयमेतेनवसंताद्याःषडृतवोभ
वंति।अधिकमासेनैकउत्पद्यतेसप्तमर्त्तुः।नचतादृशोमासएवनास्तीतिमंतव्यं।अस्तित्रयोदशोमासइ
त्याहुरितिश्रुतेः।तदेवोच्यते।षलिद्यमाःइत्थष्टएवकारार्थःषडेवऋतवोमासद्वयरूपाःऋषयोगंतारः

तेचदेवजाःदेवादादित्याज्जाताःइत्येवमाहुःसप्तमाधारस्यत्रयोदशस्यमासस्यदेवाभावः।निःसूर्योधि
कोमासोमंडलंनपतेरविरितित्यादिस्मृतेः।तस्मात्षडेवदेवजाःअदेवजएकःतेषामृतूनांस्वरूपाणि
इष्टानिसर्वलोकाभिमतानिधामशःतत्तत्स्थानेविहितानिपृथक्पृथक्स्थापितानिचरूपशःरूपभेदे
नविकृतानिविविधाकृतियुक्तानि।सचरूपभेदस्तैत्तिरीयैराम्नातःसरसमहवहंतायप्रायछद्यवंयप्रभो
येत्यादिभिःस्थात्रेअधिष्ठात्रेतदर्थायरेजंतेचलंतिजगद्व्यवहारायपुनःपुनरावर्त्तंतइत्यर्थः॥ब॥ ॥इति
द्वितीयस्यतृतीयेषोडशोवर्गः॥ब॥ ॥अथषोडशीमृचमाह॥ब॥ ॥स्त्रियःसतीस्ताँउमेपुंसआहुःप
श्यदक्षण्वान्नविचेतदंधः।कविर्यःपुत्रःसइमाचिकेतयस्ताविजानात्सपितुष्पितासत्॥ब॥ ॥सेमदी ५९
याःयादृशीधितयःस्त्रियःसंस्त्यानवत्यायोषितःसतीःसत्यःयोषिद्वदुदकरूपगर्भधारणात्स्त्रीत्वंएषांरश्मीनां

आविष्टलिंगत्वात्स्त्रीलिंगतातान्उतानरश्मीनेवपुंसआहुः।प्रभूतवृष्ट्युदकसेक्तृत्वतथारूपःस्थूलदृ
ष्टिःनविचेतत्नविचेतयति।नजानाति।किंचयःकविःक्रांतदर्शीपुत्रःस्त्रीपुरुषरूपाणांरश्मीनांतत्रस्था
नीयःपुरुजगतांत्रातावृष्ट्युदकलक्षणोस्तिसःसईमएवपुत्रःयद्वाईएनमर्थंस्त्रीणांसतीनांपश्यत्पुरु
षभावंआचिकेतसर्वतोजानाति।पुत्रोस्थितंपुत्रएवजानातिनान्यःयःकश्चित्ज्ञातानिविजानात्स्त्रीपुरु
षरूपाणिजानीयात्पितुःपितासत्पितावृष्ट्याजगत्पालकोरश्मिसमूहःतस्यापिपिताआदित्यःस
भवतिआदित्यएवभवतीत्यर्थः।यद्वालौकिकोग्निरयंयस्तानिजानातिसएवंभवति।स्वयंपितुःपुत्रःस
न्नपिस्वपुत्रापेक्षयापिताचभवति।पुत्रपौत्रादिमस्हितःचिरकालजीवीभवति।इत्यधिदेवतमथाध्या
त्मंयाइदानींस्त्रियःसतीःस्त्रीत्वंप्राप्ताआहुःलौकिकाःतांउतानेवमेमहत्पुंसःपुरुषानाहुःप्रतिपा

दर्यंतितत्वज्ञाः।कथमन्यस्यान्यभावः।उच्यते।एकस्यैवनिरस्तसमस्तोपाधिकस्यात्मनस्तद्देहावस्था
नमात्रेणतत्तद्व्यपदेशोपपत्तेः।श्रूयतेहि।त्वंस्त्रीत्वंपुमानसित्वंकुमारउतवाकुमारीत्यादि।स्त्रीत्वंचोपाध्या
पि।वस्तुतोनास्तीत्युक्तंभवतिश्रुतिर्निरूपितदृग्भावंबोधयति।नैवस्त्रीनपुमानेषनैवचायंनपुंसकः।यद्य
च्छरीरमादत्तेतेनतेनसरक्ष्यतइतिद्वितीयःपादः।इत्थंवित्।किंच।अत्रवयसाअल्पोपियःकविःक्रांतप्रज्ञो
ज्ञानीस्यात्सईमिममर्थंसविचिकेतजानाति।एवमुक्तलक्षणस्यपरमात्मनः।तातानिस्त्रीत्वपुंस्त्वादी
नि।विजानात्।अप्राधिकानिजानीयात्।सपितुःस्वोत्पादकस्यापिज्ञानरहितस्यपितासत्।पितृवत्पूज्यो
भवति।उक्तमर्थमभिप्रेत्यतांडकब्राह्मणं।शिशुर्वाआंगिरसोमंत्रकृतांमंत्रकृदासीत्सपितॄन्पुत्रका ५०
इत्यामंत्रयतेत्युपक्रम्यतेदेवानपृच्छंततेदेवाअब्रुवन्नेषवावपितायोमंत्रकृदितिमंत्रद्रष्टुरेवंकिल

नत्ववित्पितुःपितासदितिकिमाश्चर्यमित्यभिप्रायः।ब।अथसप्तदशीमृचमाह।।ब।। ।।अवःपरेणपरए
नावरेणपदावत्संबिभ्रतीगौरुदस्थात्।साकद्रीचीकंस्विदर्धंपरागात्क्वस्वित्सूतेनहियूथेअंतः।।ब।। ।
अत्राग्नौहूयमानाहुतिर्गोरूपेणस्तूयते।गौःगोपागमनशीलैषाआहुतिर्संस्थेनंपोष्यंवत्सस्थानीयम
ग्निं।अवः।अवस्तात्।अधोदेशेपरेणपदापादद्वयेनस्थाणवावयवेनाक्लिष्यबिभ्रतीधारयंती।तथापरःउपर
स्तात्उपरिदेशेएना।अनेनावरेणचपदापादद्वयेनाक्लिष्यतमेववत्संबिभ्रती।उदस्थात्स्वर्गंप्रत्युत्तिष्ठति
अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठतइतिस्मृतेः।अथैवंसतवतीसाआहुतिःकद्रीचीक्वगतेत्यनिश्च
यगमना।आदित्यंप्राप्तवतीत्यर्थः।किंस्वित्कंफलभाजंपुरुषंप्रति।अर्धमार्गमागत्ययद्वाअर्धंदेहंपरा
गात्परागच्छति।आगत्यचक्वस्वित्सूतेकुत्रप्रदेशेफलमुत्पादयति।नहुनरगोवदियंयूथेअंतःसजातीय

DR BHAU DAJI MEMORIAL

गोमध्येस्थितेसाधारण्येनयत्रक्वचिन्नस्थितेअपितुकस्मिंश्चिदनुष्ठातरि।अतःसमहान्कोनुखल्विति।य
द्वाआदित्यरश्मिसमूहएवगोरूपेणस्तूयते॥गोःउक्तलक्षणारश्मिरूपागौर्वत्संवत्सवद्रक्षणीयंय
जमानंउत्क्रमेणबिभ्रतीउदस्थात्।अथतथाभूत्वासाकद्रीचीअदृश्यगमनासतीकंस्विदर्द्धंअ
र्द्धस्थानभाजंवाकंस्वित्पुरुषमादित्यंपरागात्।अप्रतिनिमित्तागतानन्नयंत्येताःसूर्यस्यरश्मयोयत्रदे
वानांपरितोकाधिककइतिश्रुतेः।तथाभूत्वाचक्वस्वित्स्थितेकस्मिन्निन्द्रादिलोकेनजायतेनसर्वत्रशिष्टंसमा
नं॥ठ॥अथाष्टादशीमृचमाह॥ठ॥ ॥अवःपरेणपितरंयोअस्यानुवेदपरएनावरेण।कवीयमानःकइ
हप्रवोचद्देवंमनःकुतोअधिप्रजातं॥ठ॥ ॥अवःअवस्तादवस्थितंअस्यपितरंएतल्लोकपालकमग्निंपरे ५१
णादित्येनसहयोनुवेदअनुक्रमेणजानातितथापरःपरस्तादवस्थितमादित्यमस्यपितरंपालकं।सातीमम

वल्लोकंवृष्ट्यादिनापालयतितादृशंआदित्यंएनाअनेनावरेणाग्निनासहयोनुवेद।अग्न्यादित्योपतिष्ठ
रेणोपास्तेयद्वाअग्निर्भूतरजस्तमस्कोउद्बुद्धसत्वोअतएवस्वाधीनमायौवेताववेकत्वेनबोधिगच्छतिसमता
दृशःपुरुषःकवीयमानःकविवदाचरन्क्रांतदर्शित्वमात्मनःख्यापयन्कइहास्मिन्लोकेप्रवोचत्प्र
ब्रवीति।किंचदेवंद्योतमानंदेवविषयमलौकिकंवामनःकुतःकस्माद्दृष्टविशेषाद्धिआधिक्येनप्र
जातंउत्पन्नंउभयमपिदुर्लभमित्यर्थः॥ठ॥अथैकोनविंशीमृचमाह॥ब॥ ॥येअर्वाञ्चस्तांउपराचआ
हुर्येपरांचस्तांउअर्वचिआहुः।इन्द्रश्चयाचक्रथुःसोमतानिधुरानयुक्तारजसोवहन्ति॥ठ॥ ॥येसूर्यस्य
सोमयोश्चक्रेवर्त्तमानारश्मयोयदुदयश्चतत्परिभ्रमणवशेनअर्वांचःअर्वागंचनाःअधोमुखाःसं
तिताउतानेवपराचआहुःपराङ्मुखांचनानाहुःकालविदःतथाप्रथमंयेपराञ्चंपरागंचनाः

तांउतानेवअर्वांचिआङ्कः।हेसोमत्वंइंद्रःपरमेश्वरःइरांइमिंद्दश्याधारकआदिकआदित्यः।यद्वाद्वा
दशादित्यानांमध्यइंद्रोयेकःविवस्वदिंद्रःयुक्ताइत्यक्तत्वादयमर्पीद्रःसचयुवांम्यायानिमंडलपरि
क्रमणानिरजसोरंजनात्मकस्यलोकस्यकर्मणिषष्ठीलोकंवहंतिनिर्वहंति।तत्रदृष्टांतः।धुराशकटा
दौधुरियुक्ताःसंबद्धाअश्वादयोयथाधुरंवहंतितद्वत्।यद्वैतवस्तर्वाद्विदृष्टांतितांधुरायुक्ताःधुरिस्थि
तंवक्रमपिक्षरशब्देनोच्यते।तत्रयुक्ताःसमर्पिताःपुरुषाःतत्परिक्रमणवशेनार्वाचिःपरांचोप्यर्वाचो
भवंतितद्वत्॥७॥अथविंशीमृचमाह॥ ॥द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते।त
योरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीति॥७॥ ॥अत्रलौकिकपक्षिद्वयदृष्टांतेनजीव ५२
परमात्मानौस्तूयते।यथालोकेद्वौसुपर्णौसुपतनौशोभनौगमनौसयुजासमानसंयोगौसखा

यासमानख्यानौसमानंवृक्षंपरिषस्वजातेएकमेववृक्षंपरिषस्वजातेआश्रयतः।तयोरन्यःएकःपिप्पलं
पक्वंस्वादुतरमत्ति।अपरःअन्यःअनश्नन्अभिचाकशीति।अभिपश्यतितद्वत्।द्वौसुपर्णस्थानीयौक्षेत्र
ज्ञपरमात्मानौसयुजासमानयोगौयोगोनामसंबंधःसचतादात्म्यलक्षणःसएवात्माजीवात्मनःस्व
रूपंयस्यपरमात्मनःसस्तदात्माएवमन्यस्यापिसएवात्मापरमात्मनःस्वरूपंयस्यजीवात्मनःएकमे
कस्वरूपावित्यर्थः।अनेनभास्करमतानुसारिणेअतिरेकिनाभोजीवात्मापरमात्मनोनान्यःसचप
रमात्माजीवादन्योनाजीवाश्रयणादितिमतंतंनिरस्तंभवति।ननुसंबंधोद्दिष्टःसचपक्षिणोरेवभेद
मपेक्षते।अतःकथमैकात्म्यमितिनऔपाधिकभेदंवास्तुभेदंचापेक्ष्यप्रवृत्तः।अतएवसखायासमा
नख्यानौ।नन्वेकस्ययादृशंख्यानंयस्येतिव्यक्त्यस्यानेदःस्फुटंप्रतिभाति।कथंतादात्म्यमुच्यतइति

नवक्तव्यं।नात्रपरयावित्यरुच्यते।एकरूपाप्रकाशावित्यर्थः।अतउपपन्नमैकात्म्यं।अनेनवास्तु
नेदोपिनिरस्तः।समानंवृक्षंपरिषस्वजातेइत्यत्रयथाश्रयांतराभावादुभयोरेकाश्रयत्वमभ्युपगं
तव्यं।नद्वासयुजासखायावित्यत्रयत्राप्येकयोग्यख्याने।आश्रयणीयेवृक्षेच्यतइतिवृक्षोदेहःसवो
भयोःसमानं।एकएवजीवस्यभोगार्थत्वात्।परमात्मनासृष्टैर्महाभूतैरारब्धत्वात्तस्योपलब्धिस्था
नत्वाच्चोभयोरपिसमानं।तादृशंसमानंवृक्षंपरिषस्वजातेपरिष्वजतः।आश्रयतः।नचजीवस्यवस्तुत
ईश्वरत्वेकथंजीवबुद्ध्यासंसारशोकाविनिवार्यंतयोर्भेदइत्यत्राह।तथाचाथर्वणिकाअमुमंत्रमा
म्नायस्यसंदेहनिवर्त्तकमुत्तरंमंत्रमेवमामनंति।समानेवृक्षेपुरुषोनिमग्नोऽनीशयाशोचतिमुह्य ५२
मानः।जुष्टंयदापश्यत्यन्यमीशमस्यमहिमानमितिवीतशोकइति।अस्यायमर्थः।एकएवशरीरेवृक्षे

पुरुषः।परमात्मानिमग्नोनिरूढःसन्स्वयमपीश्वरोप्यनीशात्वबुध्यामुह्यमानोमूढःसन्शोचतिसंसारे
चरंकर्त्तासुखीदुःखीतिजननमरणेअनुभवतियदातुजुष्टंनित्यतमं।अन्यंसंसारशोकातीतंईशंपरमे
श्वरंपश्यतिस्वानन्यतयासाक्षात्करोतितदावीतशोकःदेहाद्व्यतिरिक्तःस्वस्वरूपसाक्षात्कारेणा
गततापत्रयःसन्।अस्यमहिमानमितिनिरस्तसमस्तोपाधिकस्यपरमेश्वरस्यमहिमानंसर्वात्मस
र्वज्ञत्वामहिमानमिति।एतिप्राप्नोतिनचतज्ज्ञावानाप्नोतितन्महिमाप्राप्यते।अतस्तद्रूपोभवतीत्य
र्थः।तस्माद्वस्तुतएकएवभेदस्तुमोहकृतइतिप्रसिद्धं।अनुभवदशायांलौकिकबुध्याभेदमभ्युपप
गम्योच्यते।तयोरन्याजीवात्माभिप्पलंकर्म्मफलंस्वादुस्वतमत्तिभुंक्तेयस्ययदुपार्जितंतत्तस्यस्वादु
भूतं।अन्यः।परमात्मा।अनश्नन्।आत्मकामत्वेनाभुंजानःस्पृहयाअभावात्।आत्मकामास्पृहेतिश्रुतेः।

तस्मादवास्तवभेदस्तु उपाधिकृतयोरन्यइत्युक्तंवस्तुतस्त्वनीशयाशोचतिमुह्यमानइत्युक्तत्वादभेदए
वानाहशः परमात्मास्वात्मन्यध्यस्तंजगद्रसादिवेनेछते। अत्रद्वौद्वौप्रतिष्ठौसुज्ञातौधर्मकर्त्तारौवि
त्यादिनिरुक्तगतं। अस्यमंत्रस्यव्याख्यानमनुसंधेयं॥ ७॥ ॥इतिद्वितीयस्यतृतीयेसप्तदशोवर्गः॥ ७॥
॥ ॥अथैकविंशीमृचमाह॥ ७॥ ॥यत्रासुपर्णाअमृतस्यभागमनिमेषंविदथाभिस्वरंति। इनोविश्व
स्यभुवनस्यगोपाःसमाधीरःपाकमत्राविवेश॥ ७॥ ॥यत्रादित्यमंडलेसुपर्णाःसुपतनाःशोभनग
मनारश्मयः। अमृतस्योदकस्यभागंभजनीयमंशंआदाअनिमेषंअनवतरंविदथावेदनेनज्ञाने
नअस्माभिरेवंकर्त्तव्यमितिबुध्वाअभिस्वरंतिअभिशापयंति। यश्चविश्वस्यभुवनस्यभूतजातस्य ५४
इनःस्वामीतथातस्यैवगोपाःगोपायितारक्षितायमादित्यपरमेश्वरःधीरोधीमान्प्राण्यनुग्रहबुद्धि

युक्तःसन्मामांपाकंपक्तव्यंअपिपक्वप्रज्ञंअत्रास्मिन्स्वकीयमंडलेआविवेशप्रवेशयतिअत्रास्म
दीयेदेहेवानियामकतयाप्रविष्टइत्यधिदैवपक्षे। अथाध्यात्मपक्षेयत्रयस्मिन्नात्मनिसुपर्णाःशोभ
नपतनानिस्वस्वविषयग्रहणायगमनकुशलानीन्द्रियाणिचक्षुरादीनिअमृतस्यभागंअत्रविषया
वच्छिन्नचैतन्यममृतमित्युच्यतेतस्यभागंभजनीयंस्वस्वांशंअनिमेषंमेषरहितंअनारतंविदथावे
दनेनवृत्त्यावच्छिन्नचैतन्योपलब्धानिअभिस्वरंतिअभिप्रयंतिआवरणापगमनेनस्फारयंति। किं
चयस्त्विनःस्वाम्यस्यदेहस्यविश्वस्यभुवनस्यगोपाःगोपायितारक्षितायक्षाविश्वस्यभुवनस्यभूतजा
तस्यस्वामीअस्यदेवस्यगोपाःअनेनतत्वंपदार्थयोरेकत्वंप्रतिपादितंभवति। सपरमेश्वरोधीरःसामा
धिनिष्टवसर्वदाअविक्रियःमामांपाकंपरिपक्वमनस्कंयागदानादिकौनाअपगतरजस्तमपक्वत्वेन

दर्पणवदतिनिर्मलसत्वेद्धिक्रमनस्कंमांआविवेशउक्तरूपेचित्तेतादृशंवस्तुस्फुरतीत्यर्थः।यद्वाप
रिपक्कमनाआह।सर्वमज्ञानदशायांमदईश्वरोस्तीत्यविद्वान्ततःपरमस्तिकश्चित्सर्वज्ञःसर्वेश्वरःसत्य
ज्ञानादिलक्षणइतिनिश्चित्यपश्चाद्गुरुशास्त्राभ्यांसएवाहमस्मीतिमत्वाएवंपारंपर्येणावगत्यासं
भावनाविपरीतभावनंव्यक्तस्यभावनयासाक्षात्कृत्यपरिशिष्टःपरमात्माभूतमित्यर्थः।अयमेवसमा
धारःपाकमत्राविवेशेत्यनेनोच्यतेनत्वनवच्छिन्नस्यपरमात्मनःसर्वत्रव्याप्तत्वाद्प्राप्तिरेवनोपपद्यते।
सत्यंअत्रप्राप्तिर्द्विविधाप्राप्तिरप्राप्तिश्चेतिप्राप्तस्यापिकंठचामीकरन्यायेनावरणाज्ञानहानद्वारेण
प्राप्तिरुपपद्यते।अस्यमंत्रस्ययन्निरुक्तं।यत्रसुपर्णाःसुपतनाआदित्यरश्मयइत्यादिकंतद्द्रष्टव्यं। ५५
।७।।अथद्वाविंशीमृचमाह।।७।। ।।यस्मिन्वृक्षेमध्वदःसुपर्णानिविशंतेसुवतेचाधिविश्वेतस्येदाऊः

पिप्पलंस्वाद्वग्रेतन्नोन्नशद्यःपितरंनवेद।।७।। ।।अत्रवृक्षत्वरूपककल्पनाअधिदेवअध्यात्ममा
त्मानंचप्रशंसंति।यस्मिन्नादित्येवृक्षेवृक्षवत्सर्वफलाश्रयभूतेमध्वदःमध्वित्युदकनामतद्ददंतीति
मध्वदःउदकस्यात्मारःसुपर्णाःसुपतनारश्मयोनिविशंतिप्रविशंतिरात्रौसुवतेचपुनरुदयकालेप्र
काशंजनयंतिचयस्मादादित्यात्।कुत्रअधिविश्वेविश्वस्योपरितस्यादित्यवृक्षस्यपिप्पलंपालकंफ
लंस्वादुरसवद्अग्रेउपरिउपासंनेनतरंआऊःकथयंतितत्वविदः।यद्वासर्वस्याद्यपरिवत्त नआऊः
ईदृशंपितरंजगतःपालयितारंयोनरोनवेदनोपास्तेसतन्नोन्नशत्नशतिर्गतिकमतिन्फलंनप्राप्नो
ति।वेदित्तुस्तुअग्रेपिप्पलमाऊरित्यर्थः।इत्यधिदैवपक्षे।अथाध्यात्मपक्षे।यस्मिन्परमात्मनिवृक्षेवृक्ष
वज्जमनादिरक्षितेअविक्रियेसुपर्णाःशोभनगमनानींद्रियाणिमध्वदःमधुनोज्ञानस्यात्ताणितज्ज्ञानेन

डाक्टर भाऊ दाजी स्मारक पुस्तकालय
DR. BHAU DAJI MEMORIAL

मोक्षीत्यर्थः। निविशंते स्वापकाले स्वस्वविषयेभ्यः प्रतिनिमित्तानि आत्मनि हृत्याली यंते पुनः प्रबो
धकाले अपि विश्वे विश्वस्योपरि भुवते च उद्यंति स्वस्वविषयान् लभंत इतीत्यर्थः। तस्य परमात्मनः पिप्
लं पालकं सारं अक्षरकं स्वादु आस्वादनीयं अमृतत्वलक्षणं ज्ञानं यत्फलास्वादने पुनः क्षुत्तृष्णाशोकमोहज
रामरणादयो न भवंति। तद्धि स्वादूत्तमं। इतरस्वर्गादिफलानि पुनर्जननान्यापादकत्वादापातस्वादूनि त
त्फलं अज्ञे स्वरूपज्ञानोत्तरकालमाहुः। यः पुमान् पितरं पालकं ज्ञानफलं तत्फलाधारमात्मानं वा न वे
द न जानाति गुरुशास्त्रात् तत्फलं नो नशाद न प्राप्नोति। अत आत्मानं यो वेद स एतन्मोक्षफलं प्राप्नोतीत्य
र्थः। यदा चर्मवदाकाशमित्यादिश्रुतिर्ज्ञानात् अन्योपायस्यामृतत्वप्राप्तिं निवारयति। ब्रह्मवेद ब्रह्मै ५६
व भवतीत्यादिका तु ज्ञानप्राप्तिमाह। तस्मादीदृशं परमेश्वरं विदित्वा मुक्तो भवामीत्यर्थः॥ ३॥ अथत्र

योविंशीमृचमाह॥३॥ ॥यद्गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत। यद्वा जगज्जगत्या
हितं पदं य इत्तद्विदुस्ते अमृतत्वमानशुः॥३॥ ॥गायत्रे अधि गायत्रमाहितं प्राथम्यात् सर्वेस्तुत्यत्वाच्च
गायत्री छंदः तदीयं स्थानं गायत्रं अधि उपरि तिगायत्रमाग्नेयं पदं आहितं। प्रथमस्पृष्टत्वात् गायति गायतेः
वव्युत्पत्त्या च प्रजापतेर्मुखाद्गायत्र्यासहोत्पन्नत्वादग्न्यादिरपि गायत्र्यः। गायत्रोऽग्निरिति श्रुतेः। तस्यां
वा अग्निस्थापित इति यदस्ति तथा त्रैष्टुभाद् द्वितीयत्वाद् वृष्टिपर्जन्यविघ्नरूपत्रिस्तोमयुक्तादंतरिक्षा
त् त्रैष्टुभं स्तोमयुक्त ऊर्ध्वायस्तिर्यग्लक्षणस्तोमयत्रोपेतं वायु निरतक्षत साधु संपादितवंतो देवा इ
ति यदस्ति वा अथवा जगति सर्वं गतं यदुद्धृतं तमेवादृती पद्य ते द्युलोके च जगत्गमनशीलं आदित्या
ख्यं पदमाहितमिति यदस्ति तदिदं त्रिषुस्थानेषु त्रयाणामग्न्यादीनां पदाधानं य इत्तद्एव न रा विदुर्ज्ञा

नंतितएवामृतत्वमानशुःअमरणरूपंपदंप्राप्नुवंतिइत्यधिलोकं।अथाधियज्ञंगायत्रेप्रातःसवनेत्र्य
क्षिरपरिगायत्रंछंदःपदमाप्तिमितियरात्रैष्टुभात्माध्यंदिनात्सवनात्त्रैष्टुभंछंदोनिरतक्षत।तत्र
आप्तिमितियावत्वाकिंचेत्यर्थः।जगतीतृतीयसवनेजगद्जागतंपदमाप्तिमितियत्।तत्राष्टशं
सवनत्रयेषुछंदस्त्रयस्थानंयेनराविदुःयजमानाविद्वांसंतितेअमृतत्वंज्ञानात्उपासनद्वारेणमोक्षमा
नशुःआप्नुवंति।अथवागायत्रेप्रातःसवनेत्रिषुस्थानेषुछंदस्त्रयपरिमाणात्सवनान्यपितत्रछंदःश
ब्देनोच्यंते।गायत्रंप्रातःसवनं।त्रैष्टुभंमाध्यंदिनंसवनंजागतंतृतीयसवनमितिश्रुतेः।तादृशप्रातःसव
नेत्र्यक्षिरपरिगायत्रंअष्टाक्षरात्मकंआहावप्रतिगररूपंगायत्रंपदमाप्तिं।तद्यथाहोताशोंसावोमि ५७
तित्र्यक्षरेण।तद्यथाशोंसादैवोमितिपंचाक्षरेणाध्वर्युःप्रतिगृह्णातितन्मिलित्वाष्टाक्षरंसंपद्यतेतद्वाष्टा

क्षरंगायत्रीसहस्रांतस्यापिपादस्याष्टाक्षरत्वात्इदमेकंप्रातःसवनरूपेगायत्रपदप्रतिष्ठापनं।तथास
वनांतेपिशंसनानंतरमुक्थंवाचीतिचतुरक्षरमाह।उक्थशाइनिचतुरक्षरमध्वर्युः।तदष्टाक्षरंसंपद्यते
एतदेकंपरंगायत्रेणगायत्रस्थापनं।तथात्रैष्टुभात्माध्यंदिनसवनात्त्रैष्टुभंआहावप्रतिगररूपंपदं
निरतक्षतत्क्षत्विजः।तथामाध्यंदिनसवनेहोताध्वर्योशोंसावोमित्याक्षयतेषडक्षरेणअध्वर्युश्वशोंसा
मोदैवोमितिपंचाक्षरेणप्रतिगृह्णातितन्मिलित्वैकादशाक्षरंसंपद्यते।इदमेकंमाध्यंदिनसवनादौत्रै
ष्टुभेत्रैष्टुभादानं।तथासवनांतेपिशंशसनानंतरंउक्थंवाचिइंद्रायेतिसप्ताक्षरमाह।अध्वर्युश्चोक्थ
शाइनिचतुरक्षरेणप्रतिगृणातितन्मिलित्वैकादशाक्षरंसंपद्यते।इदमपरंत्रैष्टुभेत्रैष्टुभस्थापनं।तथा
तृतीयसवनेहोताध्वर्योशोशोंसावोमितिसप्ताक्षरेणाक्षयते।शोंसामोदैवोमितिपंचाक्षरेणाध्वर्युः

प्रतिगरणानितन्मिलित्वाषोडशाक्षरंभवतितदिदंप्रथमंजागतेऽजागतपदस्थापनं।तथापश्चादपिशंस
नानंतरमारुह्यउक्थंवाचीन्द्रायदेवेभ्यइतिएतदेवैकादशाक्षरंभवति।अध्वर्युःशोंसामित्येकाक्षरेणप्रतिगरणा
नितदुभयंमिलित्वाषोडशाक्षरंभवति।तदिदमपरंजागतेऽजागतपदस्थानं।एवंत्रिष्टुछंदःसुत्रिष्टुगाय
त्र्यादिसवनेषुगायत्र्यादिछंदस्त्रयपदप्रतिष्ठापनं।एतत्सर्वमितरेयब्राह्मणेयंदेवविशःकल्पयितव्या
इतिखंडेविस्पष्टमाम्नातं।तत्राद्यगाछंदसिछंदस्थापनंयज्ञच्छिद्रंयएवंजानंतितएवामृतत्वमानशुः
प्राप्नुवंत्यनुष्ठानद्वाराएवमज्ञानंतोऽनुष्ठानेनापिफलंनप्राप्नुवंतीत्यर्थः।तस्यसाकल्याभावादिति
भावः।।६।।अथचतुर्विंशीमृचमाह।।६।। ।।गायत्रेणप्रतिमिमीतेअर्कमर्केणसामत्रैष्टुभेनवाकं। ५८
वाकेनवाकंद्विपदाचतुष्पदाक्षरेणमिमतेसप्तवाणीः।।६।। ।।गायत्रेणगायत्रंछंदसाअर्कंअर्च्यं

साधनमंत्रंप्रतिमिमीतेप्रत्येकंपरिछिनत्ति।अर्कोमंत्रोभवतियदेनेनार्चंतीतिनिरुक्तं।प्रतिमंत्रंगायत्रेणछं
दसोपनिबद्धंकरोतिउपलक्षणमेतदन्येषांछंदसां।यद्वेतरेषांछंदसामस्यैवचतुःचतुरक्षराधिकोनतत्तच्छं
दोभिःप्रतिमिमीतइत्यर्थः।यद्वाप्रतिशब्दःसमित्येतस्मिन्नर्थेछंदोभिर्मंत्रान्सम्मितंकरोतीत्यर्थः।अर्केण
उक्तलक्षणेनमंत्रेणसामगायत्ररथंतरसंज्ञकंसामप्रतिमिमीतेनन्वेकंसामऋचेक्रियतइतितिसृष्वेकं
सामविहितंअनेकैःसामेतिवक्तव्यंकथमुच्यतेअर्केणेतिनवस्तुतएकंसामैकस्यामृच्यव्यूढंयस्मा
द्योन्यांतदुत्तरयोर्गायतीत्यतिदेशतःप्राप्तंतिसृषुगानंअतःएकवचनविरुद्धं।त्रैष्टुभेनवाकंअत्र
त्रिष्टुबुपादानमितरछंदःप्रदर्शनार्थंअथवाअनादेशेसर्वत्रत्रिष्टुभोग्रहणात्प्राप्तुर्यानिप्रायेणोद्द
मुक्तंत्रैष्टुभेनद्विवारत्रिवारावृत्तेनहवचरूपंवाकंवक्तव्यंएकैकंछदप्रतिमिमीतेअथवाकंसूक्तं

एतावद्भिस्त्रिष्टुब्त्रिरूपनिबद्धमिदंसूक्तमितिताहशेनवाकेनवाकंसर्वंअनुवाकंवामिमीते।कीहशेनवा
केनेतिसविशेष्यते।द्विपदाचतुष्पदापादद्वयबद्धविशेषेणछंदोनिबद्धमंत्ररूपेणचतुष्पदापादचतुष्टयो
पेतेनअनुष्टुबादिमंत्ररूपेणेतिद्रष्टव्यं।निद्विपदाभिःवर्गःईयते।निश्चतुष्पदाभिरुपेतोवर्गःइयंद्विपद
रूपैर्वाकिंश्चपरिमितोनुवाकश्चतिसूक्तपक्षएतावद्भिःसूक्तैरयंअनुवाकमितिकिंवाक्षरेणअक्षरेण
वसप्तवाणी।वागधिष्ठितानिछंदांसिसंमिमतेनिर्माणंकुर्वंतिअष्टाक्षराएगायत्रीएकादशाक्षरात्रिष्टु
ब्द्वादशाक्षराजगतीअक्षरैःपादाःपरिमीयंतेपरिमितैःपादैःछंदांसिततःपादानांछंदसांचअक्षरं
मूलमितितथाचसर्वसूक्तानुवाकादीनांचारंमूलमित्यक्षरप्रशंसा॥ब॥अथपंचविंशीमृचमाह॥ब॥ ५९
॥ ॥जगतासिंधुंदिव्यस्तभायद्रथंतरेसूर्यंपर्यपश्यत्।गायत्रस्यसमिधस्तिस्रआहुस्ततोमह्नाप्र
रिरिचेमहित्वा॥ब॥ ॥जगतीछंदस्काऋक्तत्पन्नंसामजगत्तेनब्रह्मासृष्टिकालेसिंधुंस्पंदनशीलंउद
कस्यस्पंदकंवादित्यंदिविद्युलोकेअस्तभायत्स्तंभितवान्जागतोवाएषयएषतपतीतिश्रुतेः।रथंत
रेएतन्नामकेसाम्निस्तंभितंसूर्यंपर्यपश्यत्परिदृष्टवान्प्रजापतिःतदाधारभूतायामृचिस्वर्दृशमितिसू
र्यप्रतिपादकदर्शनात्।असौवाएषस्वर्दृगितिश्रुतेः।अतएवतत्रसूर्यदर्शनंविधीयतेरथंतरेप्रस्तूय
मानेसंमीलयेत्स्वर्दृशंप्रतिवीक्षेतेतिसामब्राह्मणेन।गायत्रस्यगायत्र्यामुत्पन्नस्यसाम्नःसमिधःस
मिंधनानितिस्रोविभक्तीराहुःपादत्रयमाहुरित्यर्थः।अथवातिस्रऋचआहुः।ततोहेतोर्मह्नाबलेनम
हित्वामहित्वेनप्ररिरिचेप्ररिरिच्यतेअन्यानिसामानिअथकश्चनिर्मितवान्।यद्वागायत्रशब्दःछंदोवाचीत
स्यतिस्रोभूतयःआहुःक्रमेणाष्टाक्षरैकादशाक्षरद्वादशाक्षरैर्गायत्रीत्रिष्टुब्जगत्यात्मिका।यस्मादेवंतत

त्तस्माद्गायत्रीछंदसांकनिष्ठासतीमह्नाबत्त्वेनमहत्त्वेनपरिच्छिन्नेसर्वाणिछंदांस्यतिक्रामतियेनैवबले
नसममात्रवतीतादृशोनेवंभवति॥छ॥ ॥इतिद्वितीयस्यतृतीयेषोडशोवर्गः॥छ॥ ॥प्रवर्ग्येघर्म
धुगाह्वानकालेउपह्वयइत्यादिकेद्वेऋचौउपह्वयेसुदुघांधेनुमेतामितिद्वेइतिसूत्रितत्वात्॥छ॥ ॥
सैषाषड्विंशीमृचमाह॥छ॥ ॥उपह्वयेसुदुघांधेनुमेतांसुहस्तोगोधुगुतदोहदेनां।श्रेष्ठंसवंसवि
तासाविषन्नोऽभीद्धोघर्मस्तदुषुप्रवोचं॥छ॥ ॥अहंहोताउपह्वयेउपेत्याह्वयामिकिं।एतांधेनुंआग
च्छंतीम्हारेणप्रीणयित्रीं।गांप्रवर्ग्यार्थां।पुनःकीदृशींसुदुघांसुष्टुदोग्ध्रीं।उतअपिचएनांउक्तलक्षणांगां
सुहस्तःशोभनहस्तःदोहनकुशलःगोधुक्गोदोग्धाअध्वर्युःदोहत्दोग्धियस्मादेवंतस्मात्उपह्वयइ
त्यर्थः।तदर्थंसवितासर्वस्यानुज्ञापकःपरमेश्वरोनोस्मदीयंश्रेष्ठंप्रशस्यंसवंसोमयागंक्षीरंवासावि

६०

MEMORIAL

षत्अनुजानातु।कथमेतत्।तच्छब्दश्रुतेर्यच्छब्दाध्याहारः।यत्यस्मात्घर्मःप्रवर्ग्यःयद्वाघर्मइत्युपपत्तेर्घर्मस्य
घर्मत्वमितितन्नितरीयकंतत्तादृशोनीद्धःअपिदीप्तःतदुशब्दएवकारार्थःतस्मादेवकारणात्सुप्रवोचं
सुष्टुब्रवीमि।उपह्वयइतीयच्छ।एतांपुरतोदृश्यमानांधेनुंदृष्ट्वाप्रीणयित्रींमेघलक्षणांधेनुंउपह्वयेआह्व
यामिवर्षदोहाय।किंचैनांधेनुंसुहस्तःशोभनहस्तःदोहनकुशलःगोधुक्गोदोग्धाआदित्योवावायुर्वादो
हत्दोग्धितदधीनत्वाद्वर्षणस्य।किंचतदर्थंसविताप्रेरकःपरमेश्वरोस्मदर्थंअस्मदुपभोगाय।उपदृष्टम
भिप्रेत्यसावियसत्अनुजानातुप्रतिबंधंमाकरोत्वित्यर्थः।किमितीदमुच्यतइतिउच्यते।घर्मः।ग्रीष्मःअवर्ष
णजनितःतस्यशोषःअभीद्धःअवृद्धःतदुषुप्रवोचं।तस्मादेवकारणाद्ब्रवीतेर्लुङि।वच्यादेशेअस्यतिवक्ती
त्यादिनाअङेरड्।छांदसोडभावः॥छ॥अथसप्तविंशीमृचमाह॥छ॥ ॥हिंकृण्वतीवसुपत्नीवसूनांवत्समि

च्छंतीमनसाभ्यागात्।दुहामश्विभ्यांपयोअघ्न्येयंसावर्द्धतांमहतेसौभगाय॥७॥ ॥यथास्तनागौःहिं
कृण्वतीवत्सप्रतिहिंकारंकुर्वतीवसूनांवसुपत्नीक्षीरदधिआज्यादिरूपधनानांसर्वदापालयित्रीदृष्टि
दृत्निभ्यांवसुनःपालयित्रीत्वं।तस्येताधिक्यंचप्रतिपाद्यते।पुनःकीदृशीमनसावत्समिच्छंतीईदृशीसा
अभ्यागात्अभ्यागमत्इयंआगता।अघ्न्यागोनामैतत्अहननीयागौः।अश्विभ्यांनासत्याभ्यामर्थायपयःक्षी
रंदुहांदुग्धां।सातादृशीमहतेसौभगायप्रवृद्धायसौभाग्यायवर्द्धतांप्रवृद्धाभवतु।यद्वास्मैसौभगायक्षी
रंवर्द्धयतां।अत्रापिदृष्टिपरत्वेनयथायोगंयोज्यं।हिंकृण्वतीवर्षणायशब्दयंतीवसूनांगोसस्यादिधनानां
वसूनांवसुपत्नीतेषामेवपालयित्रीवत्संलोकंवत्सवत्पोषणीयंमनसाइच्छंतीप्राणपितृंअभ्यागात्अभि ८१
गच्छतिमेघरूपामाता।अघ्न्याअहंतव्याप्रत्यक्षनक्षत्रेत्यर्थः।परउदकंअश्विभ्यांव्याप्तंस्थावरजंगमाभ्यांअ

र्थाययद्वाअश्विनोवाय्वादित्यौताभ्यांसकाशात्दुहांदुग्धां।ततोदृष्टेर्मोचयिता।रोशिष्टमवशिष्टंप्रव
र्थ्येअनिष्टावदोहनसमायवत्सेमातुःसकाशादपनीयमानेगौरमीमेदित्येषास्तृतितंच।गौरमिमेदनु
वत्संमिषंतंनमस्येउपसीदतेति॥७॥सैषाष्टाविंशीमृचमाह॥७॥ ॥गौरमीमेदनुवत्संमिषंतंमूर्द्धानं
हिङ्ङकृणोन्मातवाउ।सृक्वाणंघर्ममभिवावशानामिमातिमायुंपयतेपयोभिः॥७॥ ॥गौर्धेनुःमि
षंतंनिमिलिताक्षंवत्समनुप्राप्यअमीमेत्।शब्दंकरोतिमीमयतिःशब्दकर्मा।यद्वाउक्तंवत्समनुआत्मानंप्रापि
पति।किंचतस्यवत्सस्यमूर्द्धानंमातावेमातुंनिर्मातुंलेहनेनशोधयितुंशब्दंवधारणेहिङ्ङकरोत्हिंका
रमकरोत्करोति।किंचसृक्वाणंवत्सस्यशब्दवदनःप्रांतंफेनस्यप्रस्नावकंघर्मंक्षीरस्यक्षरणशीलंवत्संप्र
तिजल्पयावावशानाभृशंकामयमानावायुंशब्दंमिमातिनिर्मातिकरोतिताहृशीसतीपयोभिःप्यातेःक्षीरैः

पयतेप्यायनेप्यायनंकरोतिवत्सं॥अत्रापिमेघपरतयायोजनीयं॥एवमाहूतामेघरूपागौर्धेनुःमिषंतंदृ
ष्टिरूपंस्त्रीराभावेननिमीलिताक्षंलोकाख्यंवत्संअनुअनुसृत्याभीमेत्गर्जनशब्दंवर्षणचिह्नरूपंक
रोति॥मूर्द्धस्थानीयांद्युम्निमिमातिवायुनिमज्जिमेवमस्यादियुक्तंकर्त्तुंहिङ्कृणोतिहिंकाररूपंशब्दमकरो
त्सृतिनादनामवाद्युनरुक्तः॥किंचसृक्काणंफलस्यस्रष्टारंधर्मंदीप्तंउत्तमनिवावशानाअभिमुख्ये
नकामयमानापयोभिरुदकैःपयतेप्यायनेआप्यायनंकरोति॥ब॥अथैकोनत्रिंशीमृचमाह॥ब॥ ॥
अयंसशिंक्तेयेनगौरभीवृतामिमातिमायुंध्वसनावधिश्रिता॥साचित्तिभिर्निहिचकारमर्त्यंविद्युद्भवंतीः
प्रतिवव्रिमौहत॥ब॥ ॥सोयंवत्सःशिंक्तेअव्यक्तध्वनिंकरोति॥येनवत्सेनगौर्माताअभीवृताआगत्या ६२
भितोवेष्टिताभवति॥किंचसागौर्मायुंशब्दंमिमातिनिर्मिमातिध्रुवस्थिताध्वसनावधिश्रिताध्वसनस्थाने

गवांनिवासआश्रयधिष्ठिता॥साताहशी॥चित्तिभिःप्रज्ञानैस्तत्पूर्वकैःकर्मभिर्वामर्त्यंनिचकारहि॥नीचैःक
रोति॥ज्ञानविशिष्टामनुष्याःयथाबालकस्याञ्जनस्तनपानादिस्नेहंकुर्वंतितथाप्यतिप्रायमियंकरोतीत्य
र्थः॥किंचविद्युद्भवंतीवङ्क्लारमयाविद्योतमानावव्रिंस्वकीयंरूपंवव्रिरितिरूपनामरूपंप्रत्यौहतप्र
काशयतियद्वावत्सस्नेहातिशयस्वरूपंविद्युद्भवंती॥विद्युदिवशीघ्रप्रदर्शिनीऽहत॥अयमेकार्थः॥अर्थांत
रंच॥शाकपूणिर्नामनिरुक्ताचार्यःसकलमंत्रदेवताजानामीत्यभिमानितवान्॥उद्भूयस्यतत्त्वरूपस्य
स्वरूपमसौजानातिकिलैनंव्याप्नोऽस्यामीतिमनसिकृत्वादंसिघ्राभयलिंगाप्रादुरासीत्॥अथतस्यपुर
तःस्वतनाभ्रबुबुधेबुबुत्सयाचतांस्वरूपेपप्रच्छजानामितवरूपेप्रदर्शयेतिसवायंसशिंक्तइत्येषामहदे
वतानत्रप्रतीयमानंमदस्वरूपमित्युपदिदेश॥कथमंत्रोभयलिंगत्वंवस्तुतउभयलिंगत्वेकथंदेवाते

कथमितिउच्यते।अत्रोभयलिंगत्वंतुयथासंभवति।स्त्रीपुंल्लिंगद्वयेनमध्यमोत्तमलिंगद्वयेनचतत्कथं
अयंसयेनेतिपुंल्लिंगवाचिनाशब्दत्रयेणमेघःप्रतीयते।अधिश्रितासत्यादिनास्त्रीलिंगवाचकेनमाध्य
मिकावाक्।अतउभयलिंगत्वंतथाविधभ्रुवंतीतांतंमध्यमलिंगंतत्रमेघस्तनितयोर्माध्यमिकयोःप्र
तीतेः।कथासतीवज्रिमोदततइत्यत्रत्वंत्रवर्षेणपृथिवींपृच्छाद्यतस्यारसंप्रत्यादत्तइत्ययमार्थविवक्षि
तः।सचादित्यव्यापारइत्युत्तरलिंगत्वंनहिद्विस्तुतइत्युभयलिंगत्वप्रतीतेः।उभेअपिदेवतेयल्लिंगेमाव
देतेतिन्यायात्।अतःकथमेकदेवतासिद्धिरिति।अयंसयेनेत्येतेषांव्यत्ययाश्रयणेनसर्वदेवतानाम
धिष्ठात्मिकायाःएकत्वश्रवणेनवासर्वफलकर्त्रात्मिनएकत्वाश्रवणेनवादेवतैक्योपपत्तेः।अनेनम ६२
ध्यमोत्तमभेदेनोभयलिंगत्वपक्षेपिदेवतैक्यमुक्तंभवति।अतएकैववामद्रूपात्मादेवतेत्युक्तंवा

द्युस्तुतोदेवतैक्यं।अधिष्ठात्रधिष्ठानभेदेनभेदश्चनविरुध्यते।अयंसशिंक्तेइयंसामाध्यमिकायावा
चोधिष्ठात्रीदेवताशिंक्ते।अव्यक्तंध्वनिंकरोति।येनगौरभीवृतागौरितिवाङ्नामसमाध्यमिकावाक्यया
भिवृता।अभितोव्याप्ता।अधिश्रितेत्यर्थः।सेयंशिंक्ते।अथवा।अयंसशिंक्तइतिनेवमाध्यमिकावाक्नि
र्दिश्यते।अपितुमेघः।तस्यावाविशिंजानायासएवशिंक्तइत्युपपत्तयतिमंत्राः।क्रोशंतीतिवत्।अयंसमे
घःत्राष्ट्रंकरोतियेनमाध्यमिकावागभिव्याप्ताशब्देनप्रकारएवोच्यतेमिमातिमायुंस्तनितलक्षणंशब्दं
करोति।अथवायंत्रघोपमामिमीतेस्वतेजःसर्वत्रप्रक्षिपतीतिमायुरादित्यःतमुवादिदीप्तंकरोतीत्य
र्थः।अथवासामर्थ्यादात्मानमादित्यसदृशंनिर्मिमीते।उत्तरस्थितःधूमसनावधिश्रितामाइदृशाचित्तिभिः
कर्मनामैतत्स्वकर्मभिःदृष्टिरूपैःमर्त्यंमरणधर्माणंस्थावरजंगमरूपंजगन्निचिकारनीचैःकरोति

मनुष्यान्प्राणतान्करोति।ओषध्यादिकंफलनावनतंकरोति।अथवाचित्तिनिर्द्योतनलक्षणैःकर्मभिः
विकृतविकृतोमापद्यमानाप्रतिवव्रिमोऽहंतवव्रिरितिरूपनामऽहरतिरत्रसामर्थ्यादुपसंहारवाचीप्र
त्युपसंहरति।पुनरादत्ते।रश्मिद्वाराहृष्टिसृदकंपुनर्धर्मकालेआदत्ते।एकस्यैवज्योतिषस्त्रेधाकरणाद्वि
कृतः।सूर्यरश्मिभावउपपद्यतेतत्रअरुणवत्त्रेधाभुवैकमितिवक्ष्यमाणत्वात्स्तनितस्यविकृतभावो
मेघविकृतत्वस्तनितानामतदानिप्रायेणइदंशरीरंजीवावस्थायां।अनेनदेहस्यासारतादेहस्यानित्यत्वं
चप्रतिपाद्यते॥छ॥अथत्रिंशीमृचमाह॥छ॥ ॥अनच्छयेतुरगातुजीवमेजद्ध्रुवंमध्यआपस्त्यानां।जी
वोमृतस्यचरतिस्वधाभिरमर्त्योमर्त्येनासयोनिः॥छ॥ ॥अनत्प्राणनंकुर्वज्जीवनंजीवनेवतुर ६४
गातुस्वव्यापाराय।इणगमनं।सत्वरंजतनत्ङायेशरतवर्त्तते।पश्चात्प्राणगमनंतरउक्तविलक्षणसद

ध्रुवमविचलितंमत्रपस्त्यानांगृहाणांमध्येस्थाणुवत्तिष्ठति।आकारःशरणंवा।अथजीवस्यवैलक्षण्यमा
ह।मृतस्यसंबंधस्यशरीरस्यसंबंधाज्जीवःमर्त्येनमरणधर्मकेनशरीरेणसयोनिःसर्वसमानोत्पत्तिस्थान
कः।यद्यपिजीवस्यनजन्मास्तितथापिवपुषस्तस्यजावात्तत्संबंधनोपचर्यात्।तदेवाह।अमर्त्यःअम
रणस्वभावजीवःपीतंवावकिलेदंम्रियतेनजीवोम्रियतइतिश्रुतेः।उक्तस्वभावोजीवःस्वधाभिश्चरतिभु
ज्यतेस्वधाकारस्यवर्कदत्तेरान्नैश्चरतिवर्त्ततइत्यर्थः॥छ॥ ॥इतिद्वितीयस्यतृतीयेएकोनविंशोवर्गः॥छ॥
॥ ॥प्रवर्ग्येनिष्टवेअपश्यंगोपामित्येकाविनियुक्तास्त्रत्तिंच।अपश्यंगोपामनिपद्यमानंस्त्रवकेऽमसो
ति॥छ॥सैषासूक्तेएकत्रिंशीमृचमाह॥छ॥ ॥अपश्यंगोपामनिपद्यमानमाचपराचपथिभिश्चरंतं।सस
ध्रीचीःसविषूचीर्वसानआवरीवर्त्तिभुवनेष्वंतः॥छ॥ ॥अहंगोपांसर्वस्यलोकस्यवृष्टिप्रकाशादिनागो

पयितारं अनिपद्यमानं कदाचिदप्यविषण्णं तथा पथिभिः विचित्रैर्मार्गैरंतरिक्षरूपैराचरंतं च पराच-
रंतमयप्रवृत्त्या मध्याह्नमागच्छंतं मध्याह्नप्रवृत्त्या सायं पराङ्मुखं गच्छंतं एवं महानुभावमादित्यं अपश्यं
याथात्म्येन पश्येयं। किंच स आदित्यः सध्रीचीः सहांचंतीः विषूचीः विष्वगंचंतीः रात्रावपि चंद्रसोमादिदीप्ती-
नां प्रकाशयित्रीः त्विषो वसानः आच्छादयन् वस्ते वर्तते भुवनेषु भुवनानेकदेशेषु लंकादिप्रदेशेषु अंतर्मध्ये आवरी-
वर्ति उदयास्तमयं कुर्वन् भुवनः पुनरावर्तनेन मपश्यं तदित्यर्थः। एष ये वै गोपा एष हीदं सर्वं गोपायतीत्याद्य-
स्य ब्राह्मणं। अपश्यं गोपामित्याह असौ वा आदित्यो गोपाः स हीमाः प्रजाः गोपायतीत्यादि तैत्तिरीयकं
चात्र द्रष्टव्यं॥ब॥ अथ द्वात्रिंशीमृचमाह॥ग॥ ॥य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मा- ८५
त्। स मातुर्योना परिवीतो अंतर्बहुप्रजा निर्ऋतिमा विवेश॥ग॥ ॥अत्र गर्भवासक्लेशः सर्वकजननप्र-

DR BHAU DAJI

तिपादनेन तत्परिहाराय आत्मा ज्ञातव्य इत्यर्थः प्रतिपाद्यते। यः पुमान् पुत्रार्थी ईं एनं गर्भं चकार करोति वि-
ह्नपतिर्वा तत्कारणं इतस्य विश्लेषप्रकारेण न सः पुमानस्य तत्त्वं वेद कर्मणि षष्ठी वा एनं गर्भं न जानाति।
कथं इतः कथा वा केन प्रयोजनेनेति सर्वात्मना न जानातीत्यर्थः। यश्च मातुरुदरस्थः सुदरस्थ इत्यन्यथानु-
पपत्त्या पत्युमानेन वा दर्शयति। स तस्मात् पुंसः सकाशात् साद्धिरुगिन्नु हिरुगित्यंतर्हितनामसु पठितः एव-
कारार्थः नु निश्चये अत्यंतमंतर्हित एव खलु। यद्वा अयं संसारावस्थायां ईं एनं ऋषिवाणिज्या वेदाध्यय-
नादि किंचकारस्याग एतन्न वेद। लोकांतरे जन्मांतरे वा। तथा य ईं एनं ददर्श गिरा नदीसमुद्रबंधादि-
कं ददर्श जीवनसमाय तस्मात् दृष्टात् हिरुगिन्नु पृथगेव अत्रानुवृत्तं सर्वं जन्मांतरे लोकांतरे वानुभव-
तीत्यर्थः। स तादृशो मातुर्जनन्या योना योनौ अंतः परिवीतः उल्बजरायुभ्यां परितो वेष्टितः सन् बहुज-

म्भनाक्।अथवाउत्पन्नःसन्स्वयमप्यमत्योत्पादनेनबहुप्रजाःएवंगर्भेदुःखभूतंभवनंनिर्ऋत्यभिधा
नंप्रदुःखमनुभवतियावदस्वरूपभूतात्मज्ञानंअतस्तत्परिहारायात्माज्ञातव्यइत्युक्तंभवति।एवमात्म
विदामभिप्रेतोर्थः।नैरुक्तानांतुमतेयईंचकारमध्यस्थानोवायुःमेघोवाएतद्वृष्ट्युदकंकरोतिसोस्यत
त्वमितिशेषःअथवाएतत्कर्मनजानातितयोरचेतनत्वादितिभावः।यस्तुईंएतद्ददर्शपश्यतितस्मादपि
हिरुक्अंतर्हितंप्राणिकर्मवशेनकालेवर्षितापरमेश्वरआदित्यात्मानिर्ऋतइत्यर्थः।यईंहिरुक्अंत
र्हितंइमंएतद्ददर्शपश्यतिसवृष्टिलक्षणःअत्रोमातुर्मिमातुरंतरिक्षस्ययोनौयोनिवदुत्पत्त्याधारभूतेअंत
रिक्षेउभयोरप्यंतरिक्षनामत्वात्समान्यविशेषभावोद्रष्टव्यः।अंतरिक्षैकदेशेयोन्यामंतर्मध्येबहुप्र ६६
जाःबहुप्रजान्नानःबहुप्राणोपकारीअथवा।जनित्राउत्पत्तिरित्यर्थः।बहूनांधाराणांसंस्पनिष्पादनकारे

णप्राणिनांवाजनयितासन्निर्ऋतिंनिरमाणसाधनांभूमिमाविवेशप्रविशतीप्राप्नोतीत्यर्थः।।३।।अ
थत्रयस्त्रिंशीमृचमाह।।३।। ।।द्यौर्मेपिताजनितानाभिरत्रबंधुर्मेमातापृथिवीमहीयं।उत्तानयोश्चम्वो
र्योनिरंतरत्रापितादुहितुर्गर्भमाधात्।।३।। ।।दीर्घतमाब्रवीतिमेममद्यौर्द्युलोकःपितापालकःन
केवलंपालकत्वमात्रंअपितुजनिताजनयिताउत्पादयितातत्रोपपत्तिमाह।।नाभिरत्रनाभिभूतोभ
मोरसोत्रतिष्ठति।तिशेषःततश्चान्नंजायतेअन्नाद्रेतःरेतसोमनुष्यइत्येवंपारंपर्येणजननसंबंधिनो
द्युलोकरसस्यात्रसद्भावात्।अनेनैवाभिप्रायेणजनितेत्युच्यतेअतएवबंधुःबंधिकातथेयंमहीमह
तीपृथिवीमेमातामातृस्थानीयास्वोद्भूतौषध्यादितिमात्रीत्यर्थः।किंचउत्तानयोःऊर्ध्वतानयोःचम्वोः
सर्वस्यअत्योर्नंगसाधनयोर्द्यावापृथिव्योरंतर्मध्येयोनिःसर्वभूतनिर्माणाश्रयमंतरिक्षंवर्ततइतिशे

षः।अत्रास्मिन्नंतरिक्षे पितापालको लोको अधिष्ठात्रधिष्ठानयोरभेदेनादित्यो द्यौरुच्यते सरस्वरश्मिभिः।अथ
वा इंद्रः पर्जन्यो वा दुहितुः पृश्नेर्निहितायाः भूम्याः गर्भं सर्वोत्पादनसमर्थं वृष्ट्युदकलक्षणं आधात् सर्व
तं करोति॥ग॥आश्वमेधिके मध्ये हनि ब्रह्माद्या होत्रादयः पृच्छामि त्वेत्यनया यजमानं पृच्छेयुः।तथादस्र
त्रितं एकैकशो यजमानं पृच्छति पृच्छामि त्वा परमंतं पृथिव्या इति॥ग॥सेषाचतुस्त्रिंशीमृचमाह॥ब॥ ॥
॥पृच्छामि त्वा परमंतं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः।पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः
परमं व्योम॥ब॥ ॥हे यजमान त्वा त्वां पृच्छामि प्रश्नं करोमि किं पृथिव्याः परमंतं उत्कृष्टं काष्ठां यत्र सर्वा
पृथिवी समाप्यते तत्।पृच्छामि तथा त्वामन्यत् पृच्छामि किं तदिति उच्यते।यत्र भुवनस्य भूतजातस्य नाभिः ६७
संनाहो बंधनं यत्र सर्वं संनद्धं भवति तमित्यर्थः।किं च त्वां वृष्णो वर्षकस्याश्वस्य व्याप्तस्य आदित्यस्य अ

सो वा आदित्यो वृषाश्व इति तैत्तिरीयकं।तस्य रेतः रेतोवत्कारणं तत्किमिति पृच्छामि।तथा वाचः सर्वस्य वा
ग्जातस्य परमं निरतिशयं व्योम स्थानं सर्वस्य वचसः कारणं एतत् प्रश्नचतुष्टयं पृच्छामि।अथैवं पृष्टो य
जमान इयं वेदिरित्यनया प्रतिब्रूयात्।इयं वेदिः परो अंतः पृथिव्या इति प्रत्याह तिस्त्रित्वात्॥ग॥सैषापंच
त्रिंशीमृचमाह॥ब॥ ॥इयं वेदिः परो अंतः पृथिव्या अयं यज्ञो भुवनस्य नाभिः।अयं सोमो वृष्णो अश्वस्य
रेतो ब्रह्मायं वाचः परमं व्योम॥ब॥ ॥पृथिव्याः प्रथनवत्या भूम्याः परो अंतः परमंतं पर्यवसानमियं वे
दिः नहि वेद्यतिरिक्ता भूमिरस्ति एतावती वै पृथिवी यावती वेदिरिति श्रुतेः।तथा अयं यज्ञो भुवनस्य भूत
जातस्य नाभिः संनहनं तत्र वृष्ट्यादि सर्वफलोत्पत्तेः सर्वप्राणिनां बंधकत्वात्।अयं वृष्णो वर्षकस्यादि
त्यस्य रेतः अयं सोमो रसात्मकः आसोढृतः सोमरसः आदित्यं प्राप्य वृष्ट्यादिफलं जनयति अयं ब्रह्मा अस्य

पतिरेववाचोमंत्रादिरूपायाःपरमंव्योमउत्कृष्टंरक्षकंस्थानंतत्रैवोत्पन्नेस्तत्रैवपर्यवसानाच्च॥छ॥ ॥
॥इतिद्वितीयस्यतृतीयेविंशोवर्गः॥छ॥ ॥छ॥ ॥अथषट्त्रिंशीमृचमाह॥छ॥ ॥सप्तार्धगर्भाभुवनस्य
रेतोविष्णोस्तिष्ठंतिप्रदिशाविधर्मणि।तेधीतिभिर्मनसातेविपश्चितःपरिभुवःपरिभवंतिविश्वतः॥छ॥ ॥
सप्तसर्पणस्वभावाःसप्तसंख्यावारश्मयःअर्धगर्भाःसंवत्सरस्यार्धगर्भगर्भस्थानीयमुदकंधारयमाणाः
यद्वाब्रह्मांडस्यार्धमध्येनस्थितागर्भवद्वर्तमानाःभुवनस्यलोकस्यरेतःसारवृष्टिप्रदत्वेनरेतोभूताःतादृ
शारश्मयोविष्णोर्व्यापकस्यादित्यस्यविधर्मणिजगद्धारणव्यापारेप्रदेशेनतिष्ठंतिवर्तंते।किंचधीतिभिः
प्रज्ञाभिर्मनसाजगदुपकारःकर्तव्यइतिबुद्ध्याचविश्वतःसर्वतः।द्वितीयार्थेतसिः।विश्वंपरिभवंतिपरितो ६९
भावयंतिकृत्स्नंजगद्व्याप्नुवंतीत्यर्थः।यस्मादेवंतस्माद्भूतेनवएवविपश्चितोबुद्धियुक्ताःपरिभुवःसर्वत्रव्या

प्ताश्चयेचसप्तार्धगर्भाःसप्तमहदहंकारोपंचतन्मात्राणीतिमिलित्वासप्तसंख्याकानितत्त्वानिअर्धगर्भाः
विकृतिरूपाःविकाराश्रयायाःशेषप्रकृतौप्रकृतिविकृतेरुदासीनस्यात्मनोत्पन्नत्वादर्धांशेनप्रपंचाका
रेणपरिमाणाद्गर्भाःपुरुषांशस्याविक्रियत्वादितिभावः।अतएवतेषांप्रतिविकृतित्वंयस्मादेवंतस्माद्भु
वनस्यरेतःकारणंकारणभूतानितान्येवविष्णोर्व्याप्तस्यपुरुषस्यविधर्मणिप्रदेशाप्रदेशेनतिष्ठंतिइत
रस्समानं॥छ॥अथसप्तत्रिंशीमृचमाह॥छ॥ ॥नविजानामियदिवेदमस्मिनिण्यःसंनद्धोमनसाचरामि।
यदामागन्प्रथमजाऋतस्यादिद्वाचोअश्नुवेभागमस्याः॥छ॥ ॥अयंयदिवेदयदपीदंविश्वंअस्मिन्कृ
त्स्नप्रपंचोपादानमेवास्मिन्नामरूपांशंपरमार्थंत्यक्त्वासर्वत्रानुगतोस्तिनातिप्रियमितियोयंसच्चिदानंदाका
रोस्मिसोमदस्मीतिनविजानामिविविच्यनाज्ञासिषंपरंशास्त्रजनितमिदमहमस्मीतिज्ञानंजातअविवेक

मित्यर्थः।कार्यकारणयोरभेदात्।तस्यप्रपंचस्यापिब्रह्मानन्यत्वेनब्रह्मैकत्वावगमेप्रपंचजातमपिस्व
स्वरूपमेवभवति।इदंसर्वंयदयमात्माब्रह्मैवेदंसर्वंआत्मैवेदंसर्वंसईक्षतबहुस्यांप्रजायेयेत्यादि
श्रुतिभ्यः।एकविज्ञानेनसर्वविज्ञानप्रतिज्ञानात्।तदनन्यत्वमारंभणशब्दादिभ्यइत्याद्युपपत्तिभि
श्चप्रपंचस्यब्रह्मानन्यत्वंसिद्धं।यद्वाइवशब्दउपमार्थः।यदिवायदापरोक्षज्ञानंसार्वकात्म्यरूपमा
नुभविकमस्तितदितत्क्षदेवाहमस्मिइदंसर्वमहमस्मीतिज्ञानमेजातंअपित्वेतद्दार्ष्टांतिकवत्त
मानुभविकंसर्वात्म्यंयदस्तितन्नविजानामिनप्राप्तोस्मिशास्त्रजनितंसर्वात्म्यंअज्ञातंनत्वानुभावि
कमित्यर्थः।तत्रकारणमाह।यतोहंनिण्यःअंतर्हितनामेतत्।अंतर्हितःगूढःचित्तःचित्तप्रत्यक्षप्र ८५
णताभावेनपरिच्छिन्नइत्यर्थः।तत्रोपपत्तिमाह।सन्नद्धःअविद्याकामकर्मभिःसम्यक्बद्धोवेष्टितःअ

तएवमनसायुक्तःभावनासहितेनमुनाबहिर्मुखेनविक्षिप्तेनचेतसायुक्तःसंचरामिसंचरे।अथवामनसा
संनद्धश्चरामिइंद्रियेपरवशएवसन्संसारदुःखमनुभवामिनसार्वात्म्यंजानामीतिपरिदेवयतेया
स्कोपीमंपरिदेवनाहंत्वेनोदाजहार।अथापिपरिदेवनाकस्मात्विद्वान्नविजानामियदिवेदम
स्मीतिबहिर्मुखचेतसास्वरूपापरिज्ञानजनितंदुःखमन्यत्रश्रूयतेपरविश्वानिव्यवरणात्स्वयंभूस्तस्मा
पराङ्पश्यतिनांतरात्मन्निति।कर्हिकादेतद्भवतीत्याह।यदामाआगन्।आगमिष्यत्तदाकिंतदितिउ
च्यते।तस्यपरमार्थस्यपरस्यब्रह्मणःप्रथमजाःप्रथमोन्मेषःप्रथमोत्पन्नःचित्तप्रत्यक्षप्रमाणजनितो
नुभावःसयदामामाप्नोति।आदित्।अनंतरमेव।अव्यवधानेनअस्यावाचः।एकात्म्यप्रतिपादिकायाउ
पनिषद्भागःयदिवेदमस्मीत्यक्तायावाचोभागंभजनीयंशब्दब्रह्मणाव्याप्तव्यंपरब्रह्मपदंअश्नुवेप्राप्नो

मिचित्तस्यपरिस्फुरत्वतांपरित्यज्यांतर्मुखीभवितेवाड्भ्रंपातौदासायदास्यात्।नदानीमेवस्वरूपंद्रष्टुंसु
शाकंनवतिपश्चाद्विलंबाभावात्यथागिरिशिखरात्पतन्पाषाणोविलंबेनपततिनह्यत्चित्तप्रत्यङ्मु
खत्वस्यदुःशाकत्वमपितत्रैवश्रूयते।कश्चिद्धीरःप्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्निति॥७॥
॥अथाष्टत्रिंशीमृचमाह॥७॥ ॥अपाङ्प्राङेतिस्वधयागृभीतोमर्त्योमर्त्येनासयोनिः।ताशश्वंताविषू
चीनावियंतांन्य१न्यंचिक्युर्ननिचिक्युरन्यं॥७॥ ॥अमर्त्यःअमरणधर्मायमात्मामर्त्येनमरणधर्मणा
भूतात्मनादेहेनसयोनिःसमानस्थानत्वपरिच्छेदकोदेहोस्तितत्रसर्वत्रसोप्यमपितिष्ठन्नित्यर्थः।यद्वास
मानोत्पत्तिःउत्पत्तिमत्सरूपासेनस्वस्मिन्नप्युत्पत्तिरुपचर्यते।एवंभूतःसन्स्वधयाअन्नोपलक्षितत ३०
त्वभोगेनगृभीतः।यद्वास्वधाशब्देनान्नमयंशरीरंलक्ष्यतेतेनगृहीतःसन्अपाङेतिअशुक्लंकर्मकृत्वा।अधोग

डाक्टर भाऊ दाजी ... DR BHAU DAJI MEMORIAL

त्यतिप्राङेतिऊर्ध्वंस्वर्गादिलोकंप्राप्नोति।परमात्मैवसूक्ष्मशरीरोपाधिकःसन्नानाविधकर्मकृत्वातद्भोगा
यकर्मसंज्ञाललब्धाशरीरत्रयेणसंबद्धोलोकांतरेषुसंचरंति।स्थूलसूक्ष्मोभयशरीरपरिग्रहेणलोकेगुण
त्रयान्वितःसन्परिभ्रमतितथाचश्रूयतेगुणान्वयोयःफलकर्मकर्त्ताकृतस्यतस्यैवसचोपभोक्ता।सवि
श्वरूपस्त्रिगुणस्त्रिवर्त्माप्राणाधिपःसंचरतिस्वकर्मभिरिति।इदानीमुभयप्राधान्येनाह।ताशश्वंताल
कर्त्तात्मानोशश्वंताअविभागेनसर्वदावर्त्तमानोसर्वदासूक्ष्मशरीरपक्षेसर्वदासरूपावत्उपपद्यते।
विषूचीनाइहलोकेसर्वत्रवियन्तोगमंतानत्तत्फलोपभोगायसर्वत्रलोकांतरेषुगच्छंतोवर्त्तते।
तत्रनराःअन्यभूतात्मानंनिचिक्युःनितरांविशेषेणपश्यंतिजानंतिअन्यपरंदेहस्वच्छायातिरिक्तंनि
निचिक्युःनजानंतिकेचनपामरादेहव्यतिरिक्तंनजानंति।केचनविवेकिनःकर्तृत्वभोक्तृत्वोपेतोदे

ज्ञातिरिक्तः कश्चिदस्तीत्यनुमिमते तेन केपि देहत्रयव्यतिरिक्तमात्मानं जानंति अतो दुर्लभमात्मज्ञानमित्य
र्थः ॥ ७ ॥ अथैकोनचत्वारिंशीमृचमाह ॥ ७ ॥ ॥ ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः । यस्तं
न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥ ७ ॥ ॥ पूर्वमंत्रे देहात्मजीवात्मानावुक्तौ तयोरन्यस्य
जीवात्मनः पारमार्थिकरूपमस्तीति तदत्रोच्यते । ऋचो अक्षरे अत्र ऋक्शब्देन ऋक्प्रधानत्वात् सांगाः परवि
द्यात्मकाश्चत्वारो वेदा उच्यंते । ऋगादीनामपरविद्यात्वं मुंडके श्रूयते द्वे विद्ये वेदितव्ये इति प्रतिज्ञाय तत्राप
रा ऋग्वेदो यजुर्वेदः सामवेद इत्यादिना तस्याः संबंधिन्यक्षरे अद्रेश्यादिगुणके क्षरणरहिते अनश्वरे नि
त्ये सर्वत्रव्याप्ते ब्रह्मणि अक्षरशब्दस्य ब्रह्मवाचकत्वमेतद्वै तदक्षरस्य प्रशासने गार्गि इत्यादिना तदक्षरमधिग ७१
म्यते येनाक्षरं पुरुषं वेद सत्यमित्यादिश्रुतिषु प्रसिद्धं । ऋगक्षरयोः प्रतिपाद्यप्रतिपादकभावः संबंधः सर्वे

र्वेदाः खलु ब्रह्माधिगम्यते । तं त्वौपनिषदं पुरुषं पृच्छामि इत्यादिश्रुतेः । ननूपनिषद्भागानां तथात्वे इत
रेषां कथं ब्रह्मविषयत्वमिति उच्यते यद्यपीतरभागानां योगादिविषयत्वं तथापि बुद्धिशुद्धिफलत्वात् तद्द्वारा
वेदसाधनत्वेन ब्रह्मविषया भविष्यंति वेदानुवचनेन ब्राह्मणा विविदिषंतीत्यादिश्रुतेः । तदेव विशेष्यते
परमे उत्कृष्टे निरतिशये व्योमन् व्योमनि व्योमसदृशे अलेपत्वनिरूपत्वव्यापित्वादिसादृश्येन व्योमेत्यु
क्तं यद्वा विशेषेण सर्वस्य रक्षके निरधिष्ठानकस्यचिदस्तित्वाभावात्तस्य सर्वस्याधिष्ठानत्वेन रक्षकत्वात् ।
तादृशे तत्त्वे सर्वमध्यस्तमित्यर्थः । पुनस्तदेव विशेष्यते । यस्मिन्परमात्मनि विश्वे सर्वे देवा अधि निषेदुः
छंति२ निषीदंति आश्रित्य नि तस्मिन् । यथोक्तलक्षणे वस्तुनि ऋगुपलक्षिताः सर्वे सांगा वेदाः पर्यवसिता इत्यर्थः ॥
यो मर्त्यः तत्तादृशं देवादीनां स्वरूपलाभास्पदं तत्त्ववेदस्तात्पर्यप्रतिपाद्यं वस्तु न वेद न जानाति सम

र्थः।ऋचायस्वेत्तिकेनऋगादिवेदाध्ज्ञातेनकिंकरिष्यतिवेदनसाधनेनवेदेनवेद्यमविदित्वाकिंसाधयतीत्य
र्थः।प्रयोजनाभावात्सर्वस्यापिवेदस्यनैःफल्यादितिभावः।अथवायोऽक्षरमविदित्वाकर्मणांकर्त्ताभव
तियागादीनानुष्ठाभतेनकिंचिदपिकर्मकृतंफलंननवतिइत्यर्थः।य इत्‌एवंतत्त्वंविदुर्जानंतित
इमेसमासतेतएवमेज्ञातारःसमासतेसम्यक्तिष्ठंतिपुनरावृत्त्यास्वस्वरूपेवस्थानंसमासतेयद्वाएतेवि
दुरितियेजानंत्येवनानुतिष्ठंतिऽष्टदृष्टोवधारणे।तइमेतएवसमासतेगवामयनादिसत्त्रसंवत्सरसत्रप
र्यंतानिसम्यगुपयांतिसाद्गुण्यार्थेसमशब्दःसत्त्रादधिकानांयागानामभावात्तेषामपिफलमेतत्ज्ञातेनैवप्रा
प्तंभवतीत्यर्थः।कर्तॄणांबहुत्वात्बहुवचननिर्देशः।अन्येत्वन्यथावर्णयंति।ऋचऋगर्चनीयमादित्यमं ७२
डलंऋगादिमयंवाऋग्भिःसर्वाक्षदिविदेवआदित्योएषएतन्मंडलंतपतितत्रताऋचइत्यादिश्रुतेः।त

स्यसंबंधिनिअक्षरेपरमेव्योमन्निति उक्तलक्षणेयएषोंतरादित्येहिरण्मयःपुरुषोदृश्यतइत्यादिश्रुतेःफलक
स्वरूपेयस्मिन्सर्वेदेवाद्योतमानारश्मयोनिषेदुःवर्तंतेयःतन्नवेदसकेवलयाऋचाकिंकरिष्यतिये
ज्ञानंभावयंतितएवविद्वांसःसमासतेभूम्यांसुखेनरोगादिरहिताःभोगिनःसंतश्चिरकालंजीवंति।अ
परेप्रकांतरेणप्रतिपादयंति।ऋचोअक्षरेऋगुपलक्षितस्यसर्ववेदसंबन्यक्षरेप्रणवरूपेउंकारेअविना
शिनिसर्ववेदेषुव्यापेवाप्रणवस्यसर्ववेदसारत्वंब्राह्मणेश्रूयते।सतान्वेदानभ्यातपत्तेभ्योभितप्तेभ्यस्त्र
योवर्णाअजायंताकारउकारमकारइतितानेकधासमभवत्तदेतदोमितीतिपरमेनिरतिशयेनप्रण
वादधिकंकिंचिन्मंत्रजातमस्ति।त्रिकालातीतस्यब्रह्मणःप्रतिपादकत्वात्।यच्चान्यत्त्रिकालातीतंतद
प्योंकारएवओमितिप्रतिपद्यतेएताद्वयजुस्त्रयीविद्यांप्रत्येषावागेतत्परममक्षरमित्यादिश्रुतेः।यस्मिन्नवि

स्थसर्वेदेवाअधिनिषेदुःप्राणस्यसर्वमंत्रात्मकत्वात्मंत्रेषुसर्वेदेवतानांनिवासात्।सर्वदेवनिवा
सत्वंब्रह्माधिष्ठानत्वात्।ब्रह्मणिसर्वदेवानांनिवासात्।शिष्टंविशिष्टं।अयमंत्रोनिरुक्तेव्याख्यातः।अ
परेत्वपरथावर्णयंति।ऋचः।ऋगर्चनीयोजीवः।तस्यसंबंधिनिअक्षरेअविनाशेव्याप्तेवापरमात्मनीत्य
र्थः।अतएवजीवापत्त्यापरमेउत्कृष्टेनिरुपाधिकेव्योमन्विशेषेणसर्वाधिष्ठानत्वेनरक्षकेव्योमसदृ
शेवायस्मिन्परमात्मनिदेवागमनवंतोव्यवहरंतोवाइंद्रियसंज्ञकाविश्वेसर्वेपिअधिनिषेदुःनिषीदं
तिआश्रित्यवर्तंतेयस्तन्नवेदजानातिउपाध्यंशपरित्यागेनदेवस्वरूपमितिनपश्यंतिसऋचाजनःकिं
मृचाकरिष्यतिकेवलेनजीवेनजीवभावेनकिंफलंआप्स्यतिजननमरणादिक्लेशस्यात्यागादिति ७३
भावः।यइत्तद्विदुस्तइत्यादिसिद्धं॥छ॥ ॥अग्निहोत्रार्थधेनुर्यदिक्रंसितंशब्दंकुर्यात्तदानीमस्य

वसादित्यानयायवसादिकंप्रयच्छेत्तथाचसूत्रितंवाश्यमानायैयवसंप्रयच्छेत्सूयवसाद्भगवतीहि
भूयाइतित्रवर्ग्येनिष्टवएषेवपरिधानीयासूत्रितंचसूयवसाद्भगवतीहिभूयाइतिपरिदध्यादिति॥छ॥ ॥
।सैषाचत्वारिंशीऋक्समाप्ता॥छ॥ ॥सूयवसाद्भगवतीहिभूयाअथोवयंभगवंतःस्याम।अद्धितृणमघ्न्येवि
श्वदानींपिबशुद्धमुदकमाचरंती॥छ॥ ॥हेअघ्न्येगोनामएतत्अहननीयेहेगोस्त्वंसूयवसात्शोभ
नवयसस्यतृणादिकस्यात्त्रीभक्षयित्रीभगवतीभगइतिधननामसर्वैर्भजनीयत्वात्तत्क्षीरादिधनवतीभूयाः
नवत्स्वरणःप्रसिद्धोवालोकेयवसादिभक्षणेनक्षीरादिसमृद्धिःप्रसिद्धा।अथोअनंतरमेववयंयजमा
नाअपिभगवताप्रभूतेनधनेननद्वंतःस्याम।अथैकवारंस्वर्गमुक्तं।इदानींसर्वदाकर्तव्यमितिप्रार्थया
तेविश्वदानीविश्वकालेसर्वदातृणमद्धिभक्षयआचरंतीसर्वतोनिर्गच्छंतीशुद्धंनिर्मलमुदकंपिब।अयं

मंत्रोयास्केनेवंव्याख्यातः॥सूयवसादिनीभगवतीहिभवाथेदानींवयंभगवंतःस्यामाद्धितृणमघ्न्येस
र्वदापिबचशुद्धमुदकमाचरंतीति॥७॥ ॥इतिद्वितीयस्यतृतीयेएकोनविंशोवर्गः॥७॥ ॥अथैकच
त्वारिंशीमृचमाह॥७॥ ॥गौरीर्मिमायसलिलानितक्षत्येकपदीद्विपदीसाचतुष्पदी।अष्टापदी
नवपदीबभूवुषीसहस्राक्षरापरमेव्योमन्॥७॥ ॥गौरीःगरणशीलामाध्यमिकावाक्सुलोपाभाव
श्छांदसः।मिमायशब्दयति।किंकुर्वतीसलिलानिवृष्ट्युदकानितक्षतीसम्यक्संपादयित्रीएकपदीएकप
दोपेताएकाधिष्ठानामेघवर्त्मानागमनसाधनेनवायुनाएकपदीवाद्विपदीमेघांतरिक्षात्माद्व्यधिष्ठा
नाएकांतरेवाद्वितीयःतथासाचतुष्पदीपादचतुष्टयोपेतादिक्चतुष्टयाधिष्ठानाअथाष्टपदीवदिगपेक्ष १५
याष्टपादोपेताअष्टाधिष्ठानानवपदीउपरिदिगपेक्षयासूर्येणवानवदिगधिष्ठानावभूवुषीएवंभूता

भवतेश्छांदसःक्सुःततोऽपिवसोःसंप्रसारणं।किमनयापरिगणनयासहस्राक्षराअपरिमितवचनो
यं।अपरिमितव्याप्तियुक्ताबहुव्यापनशीलोदकवतीत्यर्थः।कुत्रेतितदुच्यते।परमेव्योमन्उदकाश्रयेनो
त्कृष्टतरस्थिते।केचिदेवमाहुः।गौरीःगरणशीलाशब्दब्रह्मात्मिकावाक्।सलिलःपतिष्याणार्थेधातुः।प्रतिष्ठिना
निघंटानिरूपाणितक्षतीतत्तद्वाचकत्वेननिष्पादयंतीएकपदीअव्याकृतत्वेनैकप्रतिष्ठानाएकरूपा
वात्मनाद्विपदीसुप्तिङ्भेदेनपादद्वयवतीचतुष्पदीनामाख्यातोपसर्गनिपातभेदेनअष्टापदीआमं
त्रितसहिताष्टभेदेनाष्टपदीनवपदीबभूवुषीसाव्याप्यैकैरष्टभिर्नवपदीअथवासनाभिकेश्वरःकंठा
दिषुनवसुपदेषुभवंतीपश्चाद्बहुविधाभिव्यक्तिमुपेयुषीपरमेव्योमन्उत्कृष्टहृदयाकाशस्थलाधारे
सहस्राक्षराअनेकाकारेणव्याप्ताअनेकध्वनिप्रकाराभवतीत्यर्थः।अयंमंत्रआचार्येणैवंव्याख्यातः।

गौरीर्मिमायसलिलानितक्षतीऊर्वत्येकपदीमध्यमेनद्विपदीमध्यमेनचादित्येनचचतुष्पदीदिग्भि
रवांतरदिग्भिश्चनवपदीदिग्भिश्चाऽवांतरदिग्भिश्चादित्येनचसहस्राक्षराबहूदकापरमेव्यवनेइति
॥ब॥अथद्विचत्वारिंशीमृचमाह॥ब॥ ॥तस्याःसमुद्राअधिविक्षरंतितेनजीवंतिप्रदिशश्चतस्रः॥ततः
क्षरत्यक्षरंतद्विश्वमुपजीवति॥ब॥ ॥तस्याउक्तायागोःसकाशात्समुद्राःबहूदकसमुदनाधिकर
णाद्रूतामेघाअधिअधिकंप्रवृत्तमुदकंक्षरंतिविविधंक्षरंतितेनोदकेनप्रदिशश्चतस्रःप्रशाखोवीत्य
र्थविदिशश्चतस्रोदिशश्चअथवाप्रकृष्टादिशोमुख्याश्चतस्रःतस्थेषुनाशुंतस्थाःपुरुषाजीवंतिततःप
श्चात्तदक्षरमुदकंक्षरतिसस्यादिकमुत्पादयतीत्यर्थःतत्सस्यादिकंविश्वंजगदुपजीवति॥अयमपि
यास्केनव्याख्यातःतस्याःसमुद्राअधिविक्षरंतिवर्षंतिमेघास्तेनजीवंतिदिगाश्रयाणिभूतानिततःक्ष

Dr BHAU DAJI MEMORIAL

३५

रत्यक्षरमुदकंतत्सर्वाणिभूतान्युपजीवंतीति॥ब॥अथत्रिचत्वारिंशीमृचमाह॥ब॥ ॥शाकमयंधूम
मारादपश्यंविषूवतापरएनावरेणउक्षाणंपृश्निमपचंतवीरास्तानिधर्माणिप्रथमान्यासन्॥ब॥ ॥
शाकमयंशकृन्मयंशुष्कगोमयसंभूतंधूमंआरात्नातिदूरेअवश्यंदृष्टवानस्मिदिवाधूमस्यदूरेदृष्टमा
नत्वात्सएवदर्शनविषयतयोक्तंविषुवताव्याप्तिमताएनाअनेनअवरेणनिकृष्टेनधूमेनपरःपरस्तात्
तत्कारणभूतमयमग्निमपश्यंअहंयजमानइत्यर्थः॥किंचोक्षाणंफलस्यसेक्तारंपृश्निंशुक्लवर्णप्राप्त
तेनेनफलमितिस्वयंप्राप्तंतइतिवापृश्निर्वल्लीरूपःसोमःतंवीराःविविधरणकुशलाऋत्विजःअपचंतअ
वधात्वर्थानाग्नादरेणेत्यडूप्रत्ययःकरोत्यर्थः॥सचक्रियासामान्यवचनअत्रोचितयादनिषवेणसंपा
दितवंतइत्यर्थः॥तानितत्साधनान्यनुष्ठानानिप्रथमानिप्रतपानिप्रकृष्टानिफलपर्यवसानीयानिआ

मंत्रसंपादितान्यन्नवत्।यद्वासोमस्त्वामन्नवद्भक्षयंतिदेवाःस्वशनापचन्यज्ञार्थंतज्ञावोक्ष्मोमेघमासीत्
तुच्यते।तत्परत्वेनवामंत्रोव्याख्येयोविचक्षणैः॥ब॥अथचतुश्चत्वारिंशीमृचमाह॥ब॥ ॥त्रयःकेशि
नऋतुथाविचक्षतेसंवत्सरेवपतएकएषां॥विश्वमेकोअभिचष्टेशचीभिर्ध्राजिरेकस्यददृशेनरूपं॥ब॥
॥ ॥केशस्थानीयप्रकृष्टरश्मियुक्तास्त्रयोग्न्यादित्यवायवःतेचऋतुकालेविचक्षतेविविधंलक्षणंर
मिंपश्यंतितेषांपृथक्पृथक्कार्यमाह॥एषांमध्येएकोग्निःसंवत्सरेतीतेसतिसंवत्सरंवपतेदाहेनकेशस्था
नीयोषधिवनस्पत्यादिकेछेदनंनापितकार्यंकरोति।एकअन्यआदित्योविश्वंसर्वंजगत्शचीभिःस्वकी
येःप्रकाशवृष्ट्यादिकर्मभिरभिचष्टेसर्वतःपश्यति।एकस्यवायोःध्राजिर्गतिर्ददृशेदृश्यतेसावेगःनरूपंप्र अर
त्यक्षत्वात्स्पर्शशब्दध्वनिकंपलिंगंगम्यतइतिनिरुक्तज्ञायविदोवदंति।अयममिमंत्रोयास्केनैवंव्याख्यातः। १६

त्रयःकेशिनऋतुथाविचक्षतेकालेकालेभिविपश्यंतिसंवत्सरेवपतएकएषामित्यग्निःपृथिवींदहतिस
र्वमेकोभिपश्यतिकर्मभिरादित्योगतिरेकस्यदृश्यतेनरूपमिति।वाग्देवतेयंशौचत्वारिवागितित्रिष्टुभानु
वाक्य।चत्वारिवाक्परिमितापदानियज्ञेयनवाचःपदजातमायन्तितिस्तुतिपरत्वात्॥ब॥सैषांपंचचत्वारिंशी
मृचमाह॥ब॥ ॥चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः।गुहात्रीणिनिहितानेंग
यंतितुरीयंवाचोमनुष्यावदंति॥ब॥ ॥वाक्वाचःश्छन्नायापदानिचत्वारिपरिमितापरिमितानिलोकेया
वागस्तिसाचतुर्विधाविभक्तेत्यर्थः।तानिपदानिब्राह्मणावेदविदःमनीषिणोमनसईषिणोमेधाविनोविदु
र्जानंतितेषांमध्येत्रीणिगुहानिहितानिगुहायांनिहितास्थापितानिनेंगयंति।नचेष्टंतेनप्रकाशंतइत्यर्थः।दा
तस्तुरीयंपदंमनुष्यांअज्ञास्ततश्चावदंतिव्यक्तमुच्चारयंतिव्यवहारंतिकानितानिचत्वारीतिअत्रबहवःस्व

स्वमतानुरोधेनबहुधावर्णयंति।सर्वावैदिकवाग्जालस्यसंग्रहभूतत्वाद्भूरादयस्तिस्रोव्याहृत
यः।प्रणवएकइतिवेदत्रयसारत्वात्तासांव्याहृतीनामेवसारसंग्रहभूतत्वादकाराद्यात्मकस्यप्रणवस्य
इतिसप्रणवासुव्याहृतिषुसर्वावाक्परिमितेतिकेचनवेदवादिनोवदंति।अपरेव्याकरणमतानुसारि
णोनामाख्यातोपसर्गनिपातभेदेनक्रियाप्रधानमाख्यातंद्रव्यप्रधानंनामप्रागुपसृज्यंते।आख्यात
पदस्येत्युपसर्गाःउच्चावचेष्वर्थेषुनिपतनान्निपाताः।अपितुचेत्यादिःएतेष्वेवसर्वावाक्परिमितेति
अखंडायाःश्रुत्याम्नायवाचःचतुर्धाव्याकृतत्वात्वाग्वैपराच्यव्याकृतावदत्तामिंद्रोमध्यतोवक्रम्याकरोत्त
स्मादियंव्याकृतावागुद्यतइतिश्रुतेः।अन्येतुयाज्ञिकामंत्रःकल्पोब्राह्मणंचतुर्थीलौकिकेतियाज्ञिकैःस ३३
माख्यातोऽनुष्ठेयार्थप्रकाशादिर्मंत्रविधानप्रतिपादकोवेदभागइतिमंत्रः।कल्प्यतेऽर्द्धमित्यादिनोक्तः

कल्पःमंत्रतात्पर्यार्थप्रकाशकोवेदभागोब्राह्मणं।भागाविषयागामानयेत्यादिरूपाव्यावहारिकी।एवं
वसर्वावाङ्गियमितेतियाज्ञिकाः।ऋग्यजुःसामानिचतुर्थीव्यावहारिकीतिनिरुक्ताःसर्पाणांवयसांक्षुद्र
स्यसरीसृपस्यचचतुर्थीव्यावहारिकीत्यैतिहासिकाःपशुषुतूणवनेषुमृगेष्वात्मनिचेत्यात्मवादिनः।अ
परेमाहकाःप्रकारांतरेणप्रतिपादयंति।परापश्यंतीमध्यमावैखरीतिचत्वारि।एकैवनादात्मकावाक्
मूलाधारादुदितासतीपरेत्युच्यते।नादस्यसूक्ष्मत्वेनदुर्निरूपत्वात्।सैवहृदयगामिनीपश्यंतीत्युच्यते
योगिभिर्दृश्यत्वात्।सैवबुद्धिंगताविवक्षायाप्राप्तामध्यमेत्युच्यते।मध्येहृदयाख्येनीयमानत्वात्
मध्यमा।अथयदासैववक्त्रेस्थितातात्वोष्ठादिव्यापारेणबहिर्निर्गच्छतितदावैखरीत्युच्यते।एवंचत्वारिवा
चःपदानिपरिमितानिमनीषिणोमनसःस्वामिनःस्वाधीनमनस्काब्राह्मणाआख्यानस्यशब्दब्रह्मणःअ

धिगंतारोयोगिनःपरादीनिचत्वारिपदानिविदुर्जानंतितेषुमध्येत्रीणिपरापरादीनिगुहायांनिहितानिहृ
दयेहृदयांतर्वर्तित्वात्।तुरीयंतुपदंवैखरीसंज्ञकंमनुष्याःसर्वेवदंति।व्याकरणप्रसिद्धनामाख्या
तादिपक्षेमनीषिणोब्राह्मणाःप्रकृतिप्रत्ययादिविभागज्ञाःवाक्ययोगविदस्तानिपदानिजानंति।अवाक्
योगविदःपामराःवाचोवाङ्मयस्यतुरीयंचतुर्थंभागंवदंतिव्यवहरंतिअर्थप्रकाशनायप्रयुंजते।अयंमं
त्रोनिरुक्तेव्याख्यातःसोत्राप्यनुसंधेयः।अथापिब्राह्मणंभवतिसावैवाक्सृष्टाचतुर्धाव्यभवदेष्वेवलोके
षुत्रीणिपशुषुतुरीयंयापृथिव्यांसाग्नौसारथंतरेयांतरिक्षेसावायौसावामदेव्येयादिविसादित्येसाबृ
हतिसास्तनयित्नावथपशुषुततोयावागत्यरिच्यततांब्राह्मणेष्वदधुःतस्माद्ब्राह्मणाउभयींवाचंवदंति ३८
याचदेवानांयाचमनुष्याणामिति।७।अथषड्विंशीमृचमाह।७। ।इंद्रंमित्रंवरुणमग्निमाहुर

थोदिव्यःससुपर्णोगरुत्मान्।एकंसद्विप्राबहुधावदंत्यग्निंयमंमातरिश्वानमाहुः।७। ।अमुमादि
त्यमैश्वर्यविशिष्टमिंद्रमाहुःतथामित्रंप्रमीतेर्मरणात्त्रातारंअहरभिमानिनमेतन्नामकंदेवमाहुःव
रुणंपापस्यनिवारणंरात्र्यभिमानिनंदेवमाहुः।तथाग्निंअंगनादिगुणविशिष्टमेतंनामकमाहुःअथोअ
पिचायमेवादित्योदिव्योदिविभवःसुपर्णःसुपतनोगरुत्मान्गरणवान्पक्षवान्चैतन्नामकोयःपक्षा
स्तिसोप्ययमेव।कथमेकस्यनानात्वमित्युच्यते।अमुमेवादित्यमेकमेववस्तुतःसंतंविप्रामेधावि
नःदेवतातत्त्वविदोबहुधावदंतितत्रकार्यकारणेनेंद्राद्यात्मानंवदंति।एकैववामहानात्मादेवतास
सूर्यइत्याचक्षतइत्युक्तत्वात्।किंचायमेववृष्ट्यादिकारणंवैद्युताग्निंयमंनियंतारंमातरिश्वानंअंतरि
क्षेश्वसंतंवायुमाहुः।सूर्यस्यब्रह्मणोनन्यत्वेनसर्वात्मत्वमुक्तंभवति।अत्रयेकेचिदग्निःसर्वादेवता

इत्यादिषु क्रियते। अयमेवाग्निरुत्तरे अपि ज्योतिषी इति मन्त्राग्नेरेव सर्वात्म्यप्रतिपादकोयं मंत्र इति व
दंति तत्पक्षे प्रथमोग्निशब्दस्तादृश्यतममग्निंद्दृशियं आध्यात्मकत्वं प्रथयंति। अयं मंत्रो निरुक्त एवं व्या
ख्यातः। इममेवाग्निं महांतमेकमात्मानं बहुधा मेधाविनो वदंती इंद्रं मित्रं वरुणमग्निं दिव्यं च गरुत्मंतं दि
व्यो दिविजो गरुत्मान् गरणवान् गुर्वात्मा महात्मेति॥छ॥ ॥इति द्वितीयस्य तृतीयः पादः विंशो वर्गः॥छ॥
॥ ॥वर्षकामेष्ट्यां तिस्रः पिंडोदानव्याः। तत्र कृष्णं नियानमिति तृतीयस्यानुवाक्या। कृष्णं नियानं ह
रयः सुपर्णा नियुत्वंतो ग्रामजितो यथा नर इति॥छ॥ ॥सैषा सप्तचत्वारिंशी ऋच्वमाणा॥छ॥ ॥कृष्णं नि
यानं हरयः सुपर्णा अपो वसाना दिवमुत्पतंति। त आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते॥ ७९
॥छ॥ ॥कृष्णं निकृष्टं वर्णं नियानं नियमेन गच्छंतं मेघं हरयः उदकस्य हर्तारः सुपर्णाः शोभनपतना

रश्मयः अपो वसानाः उदकानि वासयंतः मेघेषु आच्छादयंतः इत्यर्थः। अंतर्भावितणिजर्थो वासि कर्म
कर्त्वा। यद्वा कृष्णं नियानं नियमनं रात्रिः देवानां रात्रिर्दक्षिणायनं तस्मिन्नित्यर्थः वर्षकाल इत्यर्थः। ए
वं कुर्वाना दिवं द्युलोकं तदाश्रितमादित्यं वा उद्दिश्य उत्पतंति ऊर्ध्वं गच्छंति। ते रश्मयः ऋतस्य सदनात् उद
कस्य स्थानादादित्यमंडलादाववृत्रन् आवर्तंते अर्वाक् च आगच्छंति। आदित् अनंतरमेव यदा अर्वाक् गच्छं
ति तदानीमेव घृतेनोदकेन पृथिवी व्युद्यते विविधं क्लिद्यते। कृष्णं नियमनं रात्रिरादित्यस्य हरयः सुपर्णा
हरणा आदित्यरश्मय इत्यादि निरुक्तं द्रष्टव्यं॥छ॥ अथाष्टाचत्वारिंशी ऋच्वमाणा॥छ॥ ॥द्वादश प्रधयश्चक्र
मेकं त्रीणि नभ्यानि क उ तच्चिकेत। तस्मिन्साकं त्रिशता न शंकवोर्पिताः षष्टिर्न चलाचलासः॥छ॥ ॥
द्वादश एतत्संख्याकाः प्रधयः परिधयः प्रतिनावर्तनस्थानीयाः द्वादश मासा एकं अद्वितीयं चक्रमणस्वभा

भावसंवत्सराख्यंचक्रंआश्रिताःतथात्रीणित्रिसंख्याकानिनभ्यानिनभ्याश्रयाणिफलकानितत्स्थानी
यानिग्रीष्मवर्षाहेमंताख्यानिआश्रितानि।यथासूर्यरथचक्रस्यद्वादशपरिधयोनाभ्यरित्राणित्रीणिफ
लकानिसंतितद्वत्कालचक्रस्यापिकउक्तोपिमहान्तच्चक्रंचिकेतज्जानाति।तस्मिंश्चक्रेसाकंस
हसंकवोनरथचक्रस्यशंकवइवअत्रपुरस्तादुपचारोपिनशब्दःसामर्थ्यादुपमार्थीयःयस्मिन्नपिसं
वत्सरचक्रेत्रिशताःएतत्संख्याकाःषष्टिर्नतशब्दश्चार्थेषष्टिश्चाराअरिस्थानीयान्यहानिअर्पिताःअर्पिता
निकीदृशानितानिचलाचलासः।एकश्चलशब्दोद्विर्विप्राप्तःचलाःचलनस्वभावानीत्यर्थः।विरवलिप
दिवदीनाअभ्यवक्र्याभ्यासस्येतिद्विर्वचनमागागमश्चततोचक्रषष्टिश्चहावेत्रीणिशतानिसंवत्सर ८०
स्याहानीतिब्राह्मणं।द्वादशप्रधयश्चक्रमेकमिति।मासानांमासामानादित्यादिनिरुक्तं।प्रवर्ग्येनिष्टवेय

स्तेस्तनःइत्येकास्तूत्रितंच।यस्तेस्तनःशशयोयोमयोभूर्गौरिमिमेदनुवत्संमिषंतमिति।एषवसारस्वतेपशौ
हविषोयाज्यास्तूत्रितंच।यस्तेस्तनःशशयोयोमयोभूस्त्वंसोमप्रचिकितोमनीषेतिद्वेइति।ब।सैषकौ
नपंचाशीमृचमाह।ब। ।यस्तेस्तनःशशयोयोमयोभूर्येनविश्वापुष्यसिवार्याणि।योरत्नधावसुविद्यः
सुदत्रःसरस्वतितमिहधातवेकः।ब। ।हेसरस्वतितेतवसंबंधीयस्तनःस्तनवद्धिषुस्थानीयानांप्राणि
नामाप्यायनकारी।लौकिकवैदिकस्तुशब्दरूपस्तनःशशयःशयानःतवदेहेवर्त्तमानःयश्चस्तनोमयोभूः
रसास्वादिनांसुखस्यभावयिता।येनस्तनेनविश्वासर्वाणिवार्याणिवरणीयानिअभिमतरूपाणिधनानि
पुष्यसिनोकृत्यःयस्तेश्चेनोरत्नधाःबहुविधरमणीयरमानांधारयितापश्चवसुविन्वसूनांबासमपिच्च
णांधनानांवेत्तालब्धावेदयितावा।किंचयस्तनःसुदत्रःशोभनदानःसुदत्रःकल्याणदानइतिनिरुक्तंअ

DR. BHAU DAJI

त्रामन्त्रयच्छद्भ्रवणांस्तनस्पातिप्रशस्तत्वज्ञापनार्थंहिददवितादृशंसर्वप्राण्युपकारकंस्तकमंथ
स्तनंइह्यस्मिन्कर्मणिइदानींवाधातवेअस्मान्निवृत्तिंपावंपानायकरुरु ।७। अग्निमंथनेयज्ञेन
यज्ञमित्येषापरिधानीयायज्ञेनयज्ञमयजंतदेवाइतिपरिदध्यादितिस्मृतित्वात् ॥७॥ सैषापंचाशी
मृचमाह ॥७॥ ॥यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन् । तेहनाकंमहिमानःसचंत
यत्रपूर्वेसाध्याःसंतिदेवाः ॥७॥ ॥देवाव्यवहर्त्तारोयजमानायज्ञेननिर्मथ्याग्निनायज्ञंसोमसाधं
मानुवनीयमयजंतसृजितवंतःअनुष्ठायसंयोजितवंतइत्यर्थः । यदग्नावग्निंमथित्वाप्रहरंतितेन
वाग्नयआतिथ्यंक्रियतइतिहितैत्तिरीयकं । तानिधर्माणिअग्निसाधनानिकर्माणिप्रथमानिप्रथमइ
तिमुख्यनामप्रतनानिप्रकृष्टतमान्यासन् । फलप्रसवसमर्थान्यभवन्नित्यर्थः । तेहतेचयजमानाःनाकंना

स्मिन्नकमस्तीतिनाकःस्वर्गःतंमहिमानःमाहात्म्ययुक्ताःसचंतसंगताःकीदृशंनाकंयत्रयस्मिन्नाकेपू
र्वेपूर्वतनाःसाध्याःसाधनाःयज्ञादिसाधनवंतःकर्मदेवाइत्यर्थःतसंतिनिवसंतितंसचंततस्मादिदानी
मपिमनुष्यैरेवंकर्त्तव्यमित्यर्थः । यद्वादेवाइदानींदेवभागमापन्नाःस्वयंयज्ञेनअग्निनापशुभूतेनयज्ञंयष्ट
व्यमग्निंअयजंतसृजितवंतःअग्नेरेवपूर्वंत्रिनिदेनदेवत्वंचपशुत्वंचदृष्टव्यं । अग्निःपशुरासीत्तमालभंतते
नायजंततीतिश्रुतेःशिष्टंपूर्ववत् । यत्रयस्मिन्स्वर्गेनिमित्तभूतेसतिपूर्वेपूर्वतनाःसाध्याःदेवाःसाधनाःछं
दोनिमानिनःआदित्याःअंगिरसश्चसाध्यादेवाउच्यंते । छंदांसिवैसाध्यादेवास्तेअग्नेग्निनाग्निमयजंतते
स्वर्गंलोकमायन्नादित्याश्चैवेहासन्नंगिरसश्चतामग्निनाग्निमयजंततेस्वर्गंलोकमायन्नितिब्राह्मणं । ए
तेदेवाःस्वर्गेसंतिनिवंतिस्वर्गंप्राप्ताइत्यर्थः । यद्वायज्ञेनज्ञानादियज्ञेनयज्ञंविष्णुंअयजंतअर्चयंति । तेना

कं विस्नुलोकं महानुभावाः सचंत समंगछंते । यत्र पूर्वे साध्यादयो देवाः संति तत्स्थानं अग्निनाग्निमयजंत दे
वा इत्यादि निरुक्तमनुसंधेयं ॥छ॥ अथैकपंचाशीऋचमाह ॥छ॥ ॥समानमेतदुदकमुच्चैत्यवचाहभिः ।
भूमिं पर्जन्या जिन्वंति दिवं जिन्वंत्यग्नयः ॥छ॥ ॥एतत्प्रसिद्धमुदकं समानं सएकरूपमित्यर्थः अहभिः
केश्चिद्दिवसैः ग्रीष्मकालीनैरुच्चैति ऊर्ध्वं गछति तथा अहभिः वर्षकालीनैरेव तदुदकं अवचैति अवा
ङ्मुखं गछति स्विवा योगे प्रथमेति प्रथमा विभक्तिर्न निरुच्यते रश्मिनाह्येव भूमिं प्राप्नोति न देवोच्यते । प
र्जन्याः प्रीणयितारो मेघाः भूमिं जिन्वंति उदकं सस्यायेन सस्याद्युत्पादनाद्वारा भूमिष्ठान् प्रीणयंति । तथा
अग्नय आहवनीयाद्यास्तेहुते आत्यादिवं ग्रलोकस्थान् देवान् जिन्वंति प्रीणयंति ॥छ॥ ॥सरस्वद्वना ८२
केपशो दिव्यं सुपर्णमिति वपायाज्या । दिव्यं सुपर्णं वायसं बृहंतं सवा हविधेनर्यायोषणा स्विति सूत्रितत्वा

त् । अत्वारंनणीयायां सरस्वद्याग एषैव याज्या सूत्रितं च । दिव्यं सुपर्णं वायसं बृहंतमा सवं सविन्नुर्यये ति
॥छ॥ सैषा द्विपंचाशीऋचमाह ॥छ॥ ॥दिव्यं सुपर्णं वायसं बृहंतमपां गर्भं दर्शतमोषधीनां । अभीपतो वृ
ष्टिभिस्तर्पयंतं सरस्वंतमवसे जोहवीमि ॥छ॥ ॥दिव्यं दिविभवं सुपर्णं शोभनगमनं वायसं गमनशीलं
बृहंतं महांतं अपां गर्भं वृष्ट्युदकानां गर्भवदुत्पादकं ओषधीनां ओषधीदर्शतं दर्शनाय दर्शयंतमित्यर्थः
यद्वा ओषधीनां गर्भं दर्शतमिति पृथग्विशेषणं । किंच अभी अपतः आनुकूल्येन वृष्टिभिस्तर्पयंतं जगत्प्रीण
यंतं यद्वा अभीपतः अभिगमनवंतः सलिलाधारान् तडागादीन् तर्पयंतं अथवा अभिगंता इं सरस्वंतं उदक
वंतं मरुत्फदकनामकं देवं सूर्यं वा अवसे रक्षणाय जोहवीमि पुनः पुनराह्वयामि ॥छ॥ ॥इति द्वितीय
स्य तृतीये त्रयोविंशो वर्गः ॥छ॥ ॥इति प्रथमे मंडले द्वाविंशो वर्गः ॥छ॥ ॥श्री॥ ॥त्रयोदशोनुवाकेपंच
नुवाकः ॥

दशसूक्तानितत्रकयाशुभेतिपंचदशर्चंप्रथमंसूक्तंत्रैष्टुभं।अत्रानुक्रमणिका।कयापंचोनासंवादस्तृती
याद्ययुजस्त्र्यृचोमरुतामनुवाक्यंअंत्यास्त्रिचोगस्त्यस्यचशिष्टाइंद्रस्यैकादशीचमरुत्वांस्त्विंद्रोदेवतेति।अत्रेंद्रा
गस्त्यमरुतांसंवादःप्रतिपाद्यतेतत्रतृतीया।पंचमीसप्तमीनवमीनांमरुद्वाक्यरूपत्वात्ततएवचर्षययस्य
वाक्यंसएवर्षिरितिन्यायात्।अंत्यस्त्रिचस्यागस्त्यवाक्यत्वात्सएवर्षिःशिष्टायुजाआद्याचैकादशीचें
द्रस्यवाक्यं।अतःसएवर्षिःयत्रयातेनोच्यतेसादेवतेतिसामान्यापवादेनत्वृचस्यमरुत्वद्गुणकइंद्रोदेव
ता।संसवचात्र्विंशाकयोर्मरुत्वतीयशस्त्रेनिविद्धानीयात्।एवंएतत्सूक्तंयदिपर्यायान्मरुत्वतीयइतिखं
डयोःसूत्रितं।कयाशुभेतिचमरुत्वतीयेपुरस्तात्सूक्तस्यसंसेदिति।आग्निप्रविकेपंचमेहनिमरुत्वतीय ८३
एतदेवसूक्तं।पंचमस्यकयाशुभायास्तिग्मशृंगइतिमध्यंदिनेइतिसूत्रितत्वात्महाव्रतेमरुत्वतीयशस्त्रे

एतत्सूक्तं।पंचमारण्यकेकयाशुभासवयवःसनीळामरुत्वइंद्रवृषभोरणायेत्यकृत्वात्।विषुवतिमरुत्व
तीयेएतदेवनिविद्धानीयंत्र्यंशुमेकंकयाशुभेतिचमरुत्वतीयमितिसूत्रितत्वात्।अस्यविनियोगंशौन
कमाह।ज्ञातिपुत्रसुहृन्मित्रैर्यश्चैराज्यंचिकीर्षति।नित्यंसनियतोजप्त्वासूक्तंतुमनसाजपेत्।कयाशु
भेतिपक्षत्र्यंश्रुत्वाचार्यंत्वपह्निजां।श्रुत्वापरस्वस्यंतुगुरोराप्नुयाच्छौनकइति॥१॥तत्रप्रथमामृचमाह॥१॥
॥ ॥कयाशुभासवयसःसनीळाःसमान्यामरुतःसंमिमिक्षुः।कयामतीकुतएतासएतेर्चंतिशुष्मंवृ
षणोवसूया॥१॥ ॥इंद्रवाक्यंमरुतःसवयसःसमानवयस्काःसनीळाःसमानस्थानाएतेमरुतःकया
शुभाकेनापिगुणेनयाशोभनेनयासमान्यासर्वेषामेकरूपयामहत्यायुक्ताःयद्वाशुचित्यदक
नामतत्करूपयाशुभाउदकेनसंमिमिक्षुःलोकंसम्यक्सिंचंतिमिहसमानार्थोमिमिक्षतिधातुःय

ग्रामांबुद्धादिषुप्रवर्त्तमानंसम्मिमिक्षुःतदर्थंएतेमरुतःकयाअतिश्वेययामतीमयाकुतोदेशातएतासः
आगंतारःआगत्यचैतेवृषणोवर्षितारोयुवानइत्यर्थः।तस्याःवस्ययास्तुपांलुगितिपूर्वसवर्णदीर्घः।
वनेछयायद्वावसवोवासयितारोवातेनेवृक्षसोयाजादेशः।शुभ्रमबलंवृष्टिप्रदानजनितंलोकेअर्चंति
पूजयंतिजगतिकुर्वंतियद्वाममबलंवर्द्धयंतीत्यर्थः।मरुतोहैनंनाजहुरितिश्रुतेः।अत्रेदंमरुत्संवा
दरूपेप्रसर्वत्रप्राणजीवात्मपरतया।पियोजनीयं।अत्रापीदोक्तं।।२।।अथद्वितीयामृचमाह।।२।। ।।
कस्यब्रह्माणिजुजुषुर्युवानःकोअध्वरेमरुतआववर्त।श्येनांइवध्रजतोअंतरिक्षेकेनमहामनसारीर
माम।।२।। ।।युवानोनित्यतरुणाःमरुतःनुनावामरुतःकस्यमहानागस्यब्रह्माणिपरिवृढानिस्तवांसि ८४
जुजुषुःसेवंते।कश्चमहानध्वरेस्वकीयेयागेमरुतएतानावर्त्तयागांतरेभ्योनिवर्त्तयंतिदुर्निर्द्देहत्वेदृष्टां

तमाह।अंतरिक्षेध्रजतोगच्छतःश्येनानृशंसनीयगमनातन्नामकान्पक्षिणइवकेनतत्रातिसाधनेनम
हामहतामनसाभननवतास्तोत्रेणारीरमामरमेमहि।अथमरुतइंद्रेणोक्ताःतृतीययानयाप्रतिब्रुवंते
।।२।।अथतृतीयामृचमाह।।२।। ।।कुतस्त्वमिंद्रमाहिनःसन्नेकोयासिसत्पतेकिंतइत्था।संपृच्छसेसम
राणःशुभानैर्वोचेस्तन्नोहरिवोयत्तेअस्मे।।२।। ।।हेइंद्रसत्पतेसतापालकत्वंमाहिनोमहनीयःपूजनी
यःअनुचरैरनुगंतव्यइत्यर्थः।तथाभूतःसन्नपिएकोमहायःसन्कुतोयासिकुतःकारणाद्यासियद्वाकु
त्रयासितेतवइत्थाइच्छंकिंत्वंएवमेवकिंनकोप्यनुचरोस्ति।किंचत्वंसमराणःअस्माभिःसंगच्छमानःसंपृ
छसेसमीचीनंपृच्छसि।हेहरिवःहरिभ्यांतदन्वितइतेतवअस्मेअस्मासुयद्वक्तुमिष्टतममस्तितन्नोस्मभ्यं
शुभानैःशोभमानैर्वचोभिःवाचःब्रूहि।।२।।अथचतुर्थीमृचमाह।।२।। ।।ब्रह्माणिमेमतयःशंसुतासः

शुष्मइयर्तिप्रभृतोमेअद्रिः। आशासतेप्रतिहर्यंत्युक्थेमाहरीवहतस्तानोअच्छ॥ठ॥ ॥अथैवंतैःपृष्टःअ
नयावत्वर्थेंद्रःप्रत्याह हेमरुतः ब्रह्माणिसर्वाणिकर्माणिहवींषिवामेममसुतानितथामतयश्चम
ननयुक्ताःस्तुतयश्चमेममशंसुखकार्यःयद्वामेमतयोबुद्धयःतेष्ववर्त्ततइतिशेषः।तथासुतासोमानिःसुताः
सोमाःमेमदीयाःमदर्थाएवअतोयज्ञंप्रतिगंतव्यमित्यर्थः।किंचमध्येराक्षसादिबाधपरिहारायशुष्मः
बलनामैतत्बलवान्मेमदीयोद्रिःशत्रूणांनाशकोवज्रःप्रभृतःसन्नियच्छतिगच्छत्येवलक्ष्यांप्रतिनचवि
वर्त्तते।नकेवलंहविरादीनामदीयत्वमेवअपितुयजमानाआशासतेमामेवप्रार्थयंते।किंचोक्थाउक्था
निशस्त्राणिमांप्रतिहर्यंतिकामयंतेमामेवशंसंतीत्यर्थः।किंचानोअस्मदीयानिमाहरीइमावश्वौताता ८५
निगंतव्यानिहविरादीनिअच्छअभिप्राप्तुंमांवहतःअभिमतदेशंप्रापयतः।अतएवाहंगच्छामियुष्मा

निरनित्राप्राप्तुंगंतव्यमित्यर्थः।अतोमह्यमंतव्यमितिभावः॥ठ॥अथपंचमीमृचमाह॥ठ॥ ॥अतो
वयमंतमेभिर्युजानाःस्वक्षत्रेभिस्तन्वःशुंभमानाः।महोभिरेतांउपयुज्महेन्विंद्रस्वधामनुहिनोबभूथ॥
॥ठ॥ ॥एवमुक्तामरुतस्तमेवंऊचवंतः।हेइंद्रत्वंयस्मादेवंकरोषिअतःकारणाद्वयमपिअंतमेभिःअंति
कामैरश्वैर्युजानाःयुक्ताःसंतःकीदृशाःस्वक्षत्रेभिःस्वायत्तबलैःकिंचमहोभिस्तेजोभिःतन्वःआत्मशरी
राणिशुंभमानाःदीपयंतःहर्षप्राप्तावाइत्यर्थः।यद्वामहोभिःस्वमहत्त्वेनयुक्तावयंएतान्गंहरन्तुहिप्रभु
पयुज्महेतवसाकंहविरादिस्वीकर्मइत्यर्थः।हेइंद्रत्वमपिनोअस्मत्संबंधिस्वधांउदकंबलंवाअनुबभूथ
हि।अस्मात्सृष्टेदेवजन्यंहविरनुभवसिखलुहिशब्दःपरस्परोपयोगेपिकारनावप्रसिद्धिद्योतनार्थः॥ठ॥
॥ ॥इतिद्वितीयस्यतृतीयेचतुर्विंशोवर्गः॥ठ॥ ॥अथषष्ठीमृचमाह॥ठ॥ ॥क्वस्यावोमरुतःस्वधा

सोहन्मामेकंसमधत्ता अहिहत्ये। अहंह्युग्रस्तविषस्तुविष्मान्विश्वस्यशत्रोरनमंवधस्नैः॥ब॥ ॥स्यसोस्व
धातदुदकंबलंवायुष्माकंसंबंधिकासीत्नैवासीदित्यर्थः। अस्माकमुदकंत्वमनुभवसीतिभूयायत्
यास्वधाएकमसहायंमांअहिहत्ये हत्यर्थमघहननकर्मणि वृत्रवधेवासमधत्तसंहितंकृतसमासीदि
तिसंबंधः असहायस्यकथमितिमतंमेस्यतीत्यतआह। अहंहि अहंखलुउग्रः उद्गूर्णबलस्तविषोव
सवान्तुविष्मान्महत्त्वोपेतोस्मि। यस्मादतिबलोहंतस्माद्विश्वस्यसर्वस्यशत्रोर्मेघस्यशत्रोरेवायं
कर्मणिषष्ठ्यासर्वंशत्रुसंघंवधस्नैःवधरूपैर्नाधानैःवधकौशलैरित्यर्थः॥ब॥ अथसप्तमीमृचमाह॥ब॥
॥ ॥भूरिचकर्थयुज्येभिरस्मेसमानेभिर्वृषभपौंस्येभिः। भूरीणिहिकृणवामाशविष्ठेंद्रक्रत्वामरुतो
यद्वशाम॥ब॥ ॥अथैवमुक्तमिंद्रंमरुतआहुः हेइंद्र वृषभ नवपतिस्त्वं भूरिचकर्थप्रभूतंकृतवानसि। अस

Dr. BHAU DAJI MEMORIAL

८६

त्यमेवतथापिअस्मेअस्माकंसमानेभिःसमानैःयुज्येभिःयौज्यैःपौंस्येभिःपुंसःकर्मभिःसामर्थ्यैरेवचकर्थनत्वं
एकएवेत्यर्थः। हेशविष्ठशवइतिबलनाम हेइंद्रबलवत्तमवयंभूरीणितत्कृतादपिप्रभूतानिकर्माणिकृ
णवाम कृतवंतस्म। हेइंद्र क्रत्वा क्रतुनाकर्मणायत्यद्यत् वृष्ट्यादिकंवशाम कामयामहे तानित्वत्तोधिका
नीत्यर्थः। यतोवयंमरुतः छांदसमनुदात्तत्वंएतेनस्वमहत्त्वंख्यापितंभवतिस्वरोव्यस्तः। अथवाइंद्रस्येदं
वाक्यं हेसमवायद्यस्यैवउग्रहिंवमूयंवसाद्वक्रत्वाकर्माणियद्वशामयद्वृष्टिकर्मकामयामहे तस्मा
दुदकंसमानमेवेत्यर्थः एवंमरुतइतिनिघातस्वरस्येतव्याख्यातं॥ब॥ अथाष्टमीमृचमाह॥ब॥ ॥वधींवृ
त्रंमरुतइंद्रियेणस्वेनभामेनतविषोबभूवान्। अहमेताभनवेविश्वश्चंद्राःसुगाअपश्चकरवज्रबाहुः॥
॥ब॥ ॥इदानीमिंद्रः समानकोपेनतविषोबलवान्भूवान्भूतः संपन्नः कस्मैकमितितदुच्यते। मनाव

मनोरथयिकाविराश्वंद्राःसर्वस्याह्लादकाःसुखाःसुगमनाःसर्वत्रवश्यादिषुगमनशीलाःअपोवृष्ट्युदका
निचकरचकारस्तुतवानस्मियतोहंवज्रबाहुःअनेनसहायनैरपेक्ष्यमुक्तंभवति॥ठ॥अथनवमीमृचमाह
॥ठ॥ ॥अनुत्तमातेमघवन्नकिर्नुनत्वावांअस्तिदेवताविदानःनजायमानोनशतेनजातोयानिकरिष्या
कृणुहिप्रवृद्ध॥ठ॥ ॥इदानींनेमरुतोहर्षेणप्रत्याहुःआइतिस्मरणेस्मृतवंतोवयमिदानींहेमघवन्
नत्वया अनुत्तंअप्रेरितंनकिर्नुनिवास्ति।नुनिश्चयेत्वयायदुक्तंतत्सत्यमित्यर्थःहेदेवत्वावान्त्वत्सदृशोवि
दानःविद्वान्व्यत्ययेनशानच्कृत्योपायवेदितादेवोनास्तिकिंचहेप्रवृद्ध अतिबलजायमानोजातोवाक
श्चिद्देवोमर्त्योवात्वंयानिवृत्रवधादीनिकरिष्याकर्तव्यानिकृणुहिकुरुषेतानिनशातेनव्याप्नोतिनश ८३
नोत्याप्तिकर्माणिनान्यस्त्वच्चेष्टितानुकारानेवेत्यर्थः॥ठ॥अथदशमीमृचमाह॥ठ॥ ॥एकस्यचिन्मेविभ्वस्त्वो

ज्ञोयानुदधृष्वान्कृणवैमनीषा।अहंह्युग्रोमरुतोविदानोयानिच्यवमिंद्रइदीशएषां॥ठ॥ ॥इदानी
मिन्द्रआह।मएकैकस्यचितएकस्यैवकिंतुसर्वत्रगमनशीलमोजोबलमस्तु।यद्वाबलमेकस्यैवास्तुकिमर्थ
मितिचेत्।उच्यतेयानिकर्माणिमनीषामनीषयामनसईषयादधृष्वान्धर्षितवानहंतुतानिप्रंकृणवैकर्तुं
शक्नुवानिहेमरुतःअहंहिअहंखलुउग्रउद्गूर्णबलःविदानःवेदनावान्यानिच्यावयानिवस्तूनिच्यवंअवग
च्छामिएषामहमेवेंद्रइतईश्वरएवसन्नुइशोईश्वरोनवामि।अथवाविदानोयानिच्यवंयान्पदार्थान्गच्छेयं
एषामीषेयतोहमिंद्रःअतःशक्तइत्यर्थः॥ठ॥ ॥इतिद्वितीयस्यतृतीयेपंचविंशोवर्गः॥ठ॥ ॥अथैकाद
शीमृचमाह॥ठ॥ ॥अमंदन्मामरुतःस्तोमोअत्रयन्मेनरःश्रुत्यंब्रह्मचक्र।इंद्रायवृष्णेसुमखायमह्यंसख्ये
सखायस्तन्वेतनूभिः॥ठ॥ ॥इदमपीन्द्रवाक्यंहेमरुतःमामांअत्रास्मिन्नुदकोत्पादनविषयेस्तोमःस्तोमंअ

मदंत।मादयतिमोदयतेवा।हेनरःसखायोयूयंयत्अकृत्यंसार्वैःश्रोतव्यंब्रह्मपरिदृढमेवधारणादिरूपंच
कृतवंतःस्वप्रवृत्तंस्तोत्रंवा।अनुत्तमातईत्यादिकंइंद्रायपरमैश्वर्यगुणकायमह्यंअभिमतवर्षित्रेसु
सुखायशोभनयागायसखायोयुष्माभिःसमानख्यानायतन्भिरनेकशरीररूपेनायमह्यंममतन्वेमदीय
शरीरपोषायनवत्त।यद्वातन्भिःअस्मच्छरीरभूतैःयुष्माभिःकृतंमह्यमेवास्त्वित्यर्थः॥ब॥अथत्रयोदशीमृच
माह॥ब॥ ॥एवेदेतेप्रतिमारोचमानाअनेद्यश्रवएषोदधानाः।संचक्ष्यामरुतश्चंद्रवर्णाअच्छांतमेछद
याथाचनूनं॥ब॥ ॥हेमरुतःएवेत्एवमेवएतेयूयंमांप्रतिरोचमानाःमद्विषयेसंप्रीयमानाःसौख्याप
यंतोवाअनेद्यःअनंतिकस्थंश्रवःकीर्तिंइषंचदधानाःआइतिचार्थेयद्वाअनेद्यइतिश्रवस्यनामप्रशस्य ८८
यशोऽस्मत्तोदधानाःअस्माभिर्वाधारयमाणाःचंद्रवर्णाःचंद्रमितिहिरण्यनाम।सुवर्णवर्णाःयूयंमेमांसं

चक्ष्यसम्यक्प्रकाश्यतत्रननिश्चयंअच्छांतयशोनिराच्छादितवंतःछदयाथआच्छादयथचमांप्रतिसर्वदा
रोचमानाःमय्येवकीर्तिंअन्नंचदधानाःतस्मात्कर्मभिःमामेवस्तुतेत्यर्थः॥ब॥अथत्रयोदशीमृचमाह॥
॥ब॥ ॥कोन्वत्रमरुतोमामहेवःप्रयातनसखीरच्छासखायः।मन्मानिचित्राअपिवातयंतएषांभूतनवे
दामऋतानां॥ब॥ ॥हेमरुतोयुष्मान्अत्रलोकेकोनुखलुमर्त्यःममहेपूजयति।येसखायःसर्वस्यस
खिवत्प्रियकारिणःसंतःसखीन्हविःप्रदानेनसखित्वंप्राप्तान्यजमानान्प्रतिप्रयातनगच्छतहेचित्राःचायनीयाः
यूयंमन्मानिमननीयानिधनानिअपिवातयंतःसंभजमानाःप्रापयंतोभूतनभवतकिंममदीयानांएषांऋतानां
अवितथानांनवेदाःभूतज्ञातारोभवत॥ब॥अथचतुर्दशीमृचमाह॥ब॥ ॥आयद्दुवस्याद्दुवसेनकारुर
स्माञ्चक्रेमान्यस्यमेधा।ओषुवर्तमरुतोविप्रमच्छेमाब्रह्माणिजरितावोअर्चत्॥ब॥ ॥येमरुतोदुवस्या

नयुष्मत्परिचरणीर्हविस्तोत्रात्तेनस्तोत्रेणदुवसेपरिचरणायपर्याप्ताकारुःकर्त्तास्तुतिकुशलामान्य
स्यमाननीयस्यविदुषोमेधाबुद्धिःअस्मानेतिसंप्रत्यर्थे।इदानींननानाचक्रेआभिमुख्येनकरोतिप्राप्नो
नीत्यर्थः।यद्वाषष्ठीबहुवचनइदंरूपं।दुवस्यानापरिचरणार्हाणांदुवसेपरिचरणायेत्यर्थः।अतोहेमरुतो
यूयंविप्रंमेधाविनंयजमानंमामगस्त्यमच्छआभिमुख्येनप्राप्तंसुसुष्ठुओवर्त्त।ओइतिनिपातद्वयसमुदाय
रूपएकोनिपातः।आइत्याभिमुख्येनउओकारोवधारणे।आवर्त्तध्वमेव।किमर्थमेवमितिउच्यते।इमाब्र
ह्माणिइमानिपरिदृढानिकर्माण्येकहविष्यजरिगरितास्तोतावोयुष्मान्अर्चत्अर्चति।यस्मादेवंतस्मादाव
र्त्तध्वमित्यर्थः।।१४।। ।।अथपंचदश्यासूक्तोपक्रममारभ्यप्रवृत्तांस्तुतिंमरुद्भ्योनिवेद्यानिमतमाशास्ते।।१५।। ८९
अथपंचदशीमृचमाह।।१५।। ।।एषवःस्तोमोमरुतइयंगीर्मांदार्यस्यमान्यस्यकारोः।एषायासीष्टतन्वेवयां

विद्यामेषं वृजनं जीरदानुं ॥छ॥ ॥ हे मरुतः एष स्तोमः इदानीं क्रियमाणप्रकारं स्तोत्रं वो युष्मदर्थं युष्मत्
प्राणनायनवत्वित्यर्थः ॥ तथेयं गीः स्तुतिरूपा वागपि वो युष्मदर्थापि यस्मादेवं तस्मान्मांदार्यस्य स्तुतिविशेषै
र्मंदयितृ स्वतिर्मदस्य प्रेरयितुर्वा मान्यस्य वरप्रदानादिना माननीयस्य कारोः स्तोतुः इषा इच्छया आयासी
ष्ट आगच्छत किमर्थं तन्वे शरीराय तनयोषायेत्य विद्याम युष्मास्वागतेषु यज्ञसंहृष्टेष्वादिकारालनेमं ॥छ॥
॥ ॥ इति द्वितीयस्य तृतीये षड्विंशो वर्गः ॥छ॥ ॥छ॥ ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥ पुमर्थांश्च
तुरो देयाद्विद्यातीर्थमहेश्वरः ॥छ॥ ॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभू
पालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयाष्टके ९०
तृतीयोऽध्यायः ॥छ॥ ॥छ॥ ॥ यादृशमिति न्यायान्न मे दोषः ॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥

द्वितीयाष्टकचतुर्थाध्यायभाष्य।

॥ ॥ॐयस्यनिश्वसितंवेदायोवेदेभ्योखिलंजगत्।निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥१॥ ॥
॥इत्थंद्वितीयाष्टकगस्तृतीयोध्यायआदरात्॥व्याख्यातःसायणाचार्येणपुरुषार्थप्रदर्शकः॥१॥
अथचतुर्थोध्यायोव्याख्यातुमारभ्यते॥कयाशुभेत्यस्मिंस्त्रयोविंशेनुवाकेपंचदशसूक्तानि।त
त्रतन्नुवोचामेत्येतद्द्वितीयंसूक्तंपंचदशर्चं।अत्रानुक्रमणिका।तन्वगस्त्योमारुतंद्वित्रिष्टुबंतं।मित्राव
रुणयोर्दीक्षितयोरुर्वशीमप्सरसंदृष्ट्वावासतीवरेकुंभेरेतोपतत्ततोगस्त्यवसिष्ठावजायेतामि
तिसूक्तसंख्यानुवर्त्ततेअन्यस्याःसूक्तसंख्यायाइतिपरिभाषितत्वात्पंचदशर्चत्वंलक्षणेना
गस्त्येनदृष्टत्वात्तस्यार्षंमारुतंहीत्यनुक्तत्वात्तुह्यादिपरिभाषयेदमादिसूक्तत्रयंमरुद्देवताकं।अं
त्येद्वेत्रिष्टुभौशिष्टास्त्रिष्टुबंतपरिभाषयाजगत्यः।विनियोगोलैंगिकः॥१॥तत्रप्रथमामृचमाह॥१॥

॥ ॥तन्नुवोचामरभसायजन्मनेपूर्वंमहित्वंवृषभस्यकेतवे।एधेवयामन्मरुतस्तुविष्वणोयुधेवशक्रा
स्तविषाणिकर्त्तन॥१॥ ॥हेमरुतोवयंयुष्मदीयंतत्तादृशंप्रसिद्धंपूर्वंपुरस्कंपूर्वतनंवामहत्त्वंमाहात्म्यंनु
क्षिप्रंवोचाम।ब्रूमः।किमर्थंरभसायरंहायस्पृष्टुकायजन्मनेवेद्यांप्रादुर्भावायवेद्यांसन्निधानायेत्यर्थः
।तदपिकिमर्थमित्यतआह।वृषभस्यफलस्यवर्षितुर्यज्ञस्यकेतवेप्रज्ञानायवायुप्रेरणेनम्पसगम
नंप्रसिद्धंहेविश्वतःगमनसारंभेणप्रवृत्तधनियुक्ताः।हेशक्राःसर्वमपिकर्त्तुंशक्ताःयूयंयामन्याम
नियागमनप्रस्तुतेसतिएधवाएधानिएधःसंबंधीनितेजांसिवप्रथयेनमहत्त्वेनतविषाणिबलानिसाम
र्थ्यानिकर्त्तनकुरुतस्मइत्यर्थः।तत्रदृष्टांतःयुधेवयुध्येनतत्युद्धनिमित्तंतथातविषाणिकुरुथ।न
हत॥१॥अथद्वितीयामृचमाह॥१॥ ॥नित्यंनसूनुंमधुबिभ्रतउपक्रीळंतिक्रीळाविदथेषुघृष्वयः।न

क्षंतिरुद्राअवसानमस्विनंनमर्द्धंतिस्वतवसोहविष्कृतं॥ब॥ ॥नित्यंनसूनुंऔरसंप्रियंपुत्रमिवमधुमधुरं
हविर्बिभ्रतोधारयंतोमरुतःविदथेषुयागेषुघृष्वयःरक्षःप्रभृतीनांघर्षकाःसंतःक्रीळाःक्रीडनशीलाःउ
पयेत्यक्रीळंतिविहरंति।किंचरुद्राःरुद्रपुत्राःमरुतोपिरुद्राउच्यंते।जन्यजनकयोरभेदोपचारेण।मरु
तांरुद्रपुत्रत्वंपुराणेषुतपसातुष्टोपार्वतीपरमेश्वराभ्यांमरुतःपुत्रत्वेनस्वीचक्रुरितिप्रसिद्धं।नमस्विनंन
मस्कारोपलक्षितस्तोत्रोपेतंहविष्कृतंहविषःकर्तारंप्रदातारंयजमानंअवसारक्षणेनतर्पणेनवानिमि
त्तभूतेननक्षंतिव्याप्नुवंति।किंचस्वतवसःस्वस्वायत्तबलामरुतःयजमानंतंनमर्धंतिनसंग्रामयंति
नक्लेशयंतीत्यर्थः॥ठ॥अथतृतीयामृचमाह॥ब॥ ॥यस्माऊमासोअमृताअरासतरायस्पोषंचहवि २
षादाशुषे।उक्षंत्यस्मैमरुतोहिताइवपुरूरजांसिपयसामयोभुवः॥ब॥ ॥यस्मैयजमानायहविषाद

दाशुषेसोमायहविर्दत्तवतेहविषाप्रातःऊमासःअवितारःअमृताःअमरणधर्माणोमरुतोरायस्पोषंध
नस्यपुष्टिंचचशब्दात्पश्वादिपुष्टिंअरासत।प्रायच्छन्‌रासतिर्दानार्थः।अस्मैयजमानायहिताइवहिताच
रणाःसखायइवसंतोमयोभुवःसुखस्यभावयितारोमारुतोरजांसिलोकान्‌पुरुप्रभूतंयथाभवतितथा
पयसाउदकेनमस्याघ्रत्कम्यर्थंउक्षंतिसिंचंति॥ठ॥अथचतुर्थीमृचमाह॥ब॥ ॥आयेरजांसितविषी
भिरव्यतप्रवएवासःस्वयतासोअध्रजन्‌।भयंतेविश्वाभुवनानिहर्म्याचित्रोवोयामःप्रयतास्वृष्टिषु॥ठ॥
॥ ॥हेमरुतोयुष्मत्संबंधिनएवासःएवारजाविशेषाःतविषीभिःस्वकीयैर्बलैःवृष्टिप्रदानादिरूपैःर
जांसिलोकान्‌आअव्यतसर्वतःआवृण्वंतितेषांवोयुष्माकंएवासोश्वाःस्वयतासःस्वयमेवसारथिनाविने
वयुक्ताःप्राध्रजन्‌प्रकर्षेणगच्छंतिव्याप्नुवंति।किंचयुष्मदागमनात्‌विश्वाभुवनानिसर्वाणिभूतजा

तानिविश्वाहर्म्यासर्वाणिहर्म्याणिचनयंतेबिभ्यतिपतनात्यस्मादेवंतस्मात्वेषयामश्चित्रस्थानीयःआ ४
श्चर्यभूतइत्यर्थः।भीतेःकारणमाह।ऋष्टिषुयुष्मद्धस्तस्थासुइद्धेतिषुयतासुप्रकर्षेणयतासुसतीषु।अ
थवानीतोदृष्टांतः।ऋष्टिषुप्रयतासुसतीषुलुप्तोपमेयं।आयुधेषुप्रयतेषुयथाजनाबिभ्यतितद्वत्।यु
ष्मदागमनाद्बिभ्यतीत्यर्थः॥छ॥अथपंचमीमृचमाह॥छ॥ ॥यत्त्वेषयामानदयंतपर्वतान्दिवोवापृष्ठं
नर्याअचुच्यवुः।विश्वोवोअज्मन्भयतेवनस्पतीरथीयंतीवप्रजिहीतओषधिः॥छ॥ ॥मरुतस्त्वेषयामाः
प्रदीप्तगमनाःयत्यदायूयंपर्वतान्पर्ववतोगिरीन्गह्वराणिशब्दकान्मघान्वानदयंतनादयंतिवा
अथवायदाविद्योतनात्मकस्यांतरिक्षस्यपृष्ठंउपरिभागंनर्यानरेभ्योहिताःअचुच्यवुःगच्छंतितदा ३
वोयुष्मत्संबंधिनिअज्मन्गमनेनिमित्तभूतेसतिविश्वोवनस्पतिर्वनस्यपालयितावृक्षसमूहोभ

यतेबिभेतितथाओषधीप्रियंगुव्रीह्यादिःप्रजिहीतेप्रकर्षेणगतिस्वसंस्थानात्इतस्ततश्चलतीत्यर्थः
।तत्रदृष्टांतः।रथीयंतीवरथमात्मनइच्छंतीस्त्रीरथारूढेत्यर्थः।तायसीस्त्रीवसायथाचलतितद्वत्॥छ॥
॥ ॥द्वितीयस्यचतुर्थेप्रथमोवर्गः॥ ॥अथषष्ठीमृचमाह॥छ॥ ॥यूयंनउग्रामरुतःसुचेतुनारिष्ट
यामाःसुमतिंपिपर्त्तन।यत्रावोदिद्युद्रदतिक्रिविर्दतीरिणातिपश्वःसुधितेवबर्हणा॥छ॥ ॥हेउग्रा
उद्गूर्णबलामरुतोयूयंसुचेतुनाशोभनचेतसाअरिष्टयामाःअहिंसितसंघाःसंतोनोस्माकंसुमति
शोभनबुद्धिंपिपर्त्तनपूरयत।यस्मिन्कालइतितदुच्यते।यत्रयस्मिन्कालेवोयुष्मत्संबंधिनीक्रिवि
र्दतीविकृतपाणशालिनदंतादिद्युदिति।रदतिविलिखतिमेघसंस्थायांपश्वःपशूंश्चरणानिरणातिहिन
स्तिवायोवानिमतिपरावःशौर्यतइतिप्रसिद्धं।हिंसायांदृष्टांतः।सुधितासुहितासुष्टुप्रेरिताबर्हणा।

इति।स्तुत्याधनादेर्निर्वापयथारिणातितद्वत्॥६॥अथसप्तमीमृचमाह॥७॥ ॥प्रस्कंभदेष्णाअनवभ्रररा चं ४
धसोअलातृणासोविदथेषुसुष्टुताः॥अर्चंत्यर्कंमदिरस्यपीतयेविदुर्वीरस्यप्रथमानिपौंस्या॥७॥ ॥
प्रस्कंभदेष्णाःप्रकर्षेणस्तंभितदानाःआविरतदानाइत्यर्थः।अनवभ्रराधसः।अभ्रष्टहविरादिधनाः।
राधइतिधननाम।अलातृणासःनकारस्यस्थानेलकारःअनातृणासःअतर्दनरहिताःअथवाअलं
पर्याप्तंअतर्दनाःशत्रूणांयद्वाअलमत्यर्थंदातारःफलानां।एवंरूपामरुतःविदथेषुयागेषुतर्कंअ
र्चनीयमिंद्रंस्वसखीभूतंअर्चंतिपूजयंतिस्तुत्यादिनासंभावयंतीत्यर्थः।किमर्थंमदिरस्यमादनसाध
नस्यसोमस्यपीतयेपानायतस्येंद्रस्यमहत्वंकथंजानंतीत्यतआह।तेमरुतःवीरस्यविविधंशत्रू ४
णामीरकस्येंद्रस्यप्रथमानिप्रतिमानिमुख्यानिपौंस्यापुंस्त्वानिवृत्रवधादिरूपाणिविदुर्जानंति॥७॥ ॥

॥अथाष्टमीमृचमाह॥८॥ ॥शतभुजिभिस्तमभिह्रुतेरघात्पूर्भीरक्षतामरुतोयमावत।जनंयमुग्रास्त
वसोविरप्शिनःपाथनाशंसात्तनयस्यपुष्टिषु॥८॥ ॥हेमरुतोयूयंशतभुजिभिःशतमित्यपरिमित
नाम।असंख्याताभोगवद्भिःपूर्भिःपालनैःउतात्र्येःशत्रूणांनगरैर्वाआवतरक्षतपालयत।तमित्य
पेक्षंकमित्याह।यंजनंअभिह्रुतेःअभिभवकारणात्कुटिलस्वभावाद्वाअघात्पापात्आवतरक्षति।
किंचहेउग्राःउद्गूर्णतेजसःहेतवसःबलवंतोवा।हेविरप्शिनःमहन्नामैतत्महांतःरपणीयाःश
शब्दयाःतद्येषांतेविरप्शिनःस्तोतारोयेषांतेयथोक्ताःहेतादृशायूयंयंचजनंपाथनपाथरक्षथ।क
स्मान्निमित्तादितिउच्यते।तनयस्यउपलक्षणमेतत्पुत्रादीनांपुष्टिषुपोषेषुशंसान्निशंसनात्य
मेवंकरुथनरतेतिशेषः।पापक्षयाद्यनिष्टपरिहारेणपुत्रादिपोषरूपेष्टप्राप्त्याचरक्षथेत्यर्थः॥८॥अथ

नवमीमृचमाह ॥७॥ ॥विश्वानि भद्रा मरुतो रथेषु वो मिथस्पृध्येव तविषाण्याहिता । अंसेष्वा वः प्रप
थेषु खादयोऽक्षो वश्चक्रा समया वि वावृते ॥७॥ ॥हे मरुतो वो रथेषु युष्मत्संबंधिरथेषु रंहणसाधनेषु
विश्वानि भद्रा सर्वाणि कल्याणि भोगायोग्यानि द्रव्याणि अस्मभ्यं प्रदेयानि फलानि वा आहितानि तथा
वः अंसेषु आ तदुपलक्षितभुजेष्वपि । आकारोऽप्यर्थे । मिथस्पृध्येव बलाधिक्यात् परस्परस्पर्धाविषयाणि त
विषाणि बलानि । अंसेषु कलक्षणान्यायुधानि वा आयुधानि किंच वः प्रपथेषु प्रगताः पंथानो येषु विश्रा
मस्थानेषु तानि प्रथमानि तेषु खादयः खाद्यानि भक्ष्याणि आहितानि यद्वा प्रगतः पंथा येषु तेषु पादाग्रेषु खा
दयः स्थिरा आभरणविशेषा आहिताः किंच वो अक्षः वो युष्मत्संबंधी रथ्योऽक्षः चक्रा तत्रोपनिबद्धानि चक्रा
णि समया समीपे तेषां परिसरे वि वावृते विशेषेणावर्तते न कदाचिदपि चक्रेषु संभग्नो भवतीत्यर्थः यस्मादे

वं देवयजनगमनसाधनानि संति तस्मात् शीघ्रमागच्छध्वमित्यभिप्रायः ॥७॥ अथ दशमीमृचमाह ॥७॥
॥ ॥भूरीणि भद्रा नर्येषु बाहुषु वक्षस्सु रुक्मा रभसासो अंजयः । अंसेष्वेताः पविषु क्षुरा अधि वयो न पक्षा
न्व्यनु श्रियो धिरे ॥७॥ ॥हे मरुतः नर्येषु नरेभ्यो हितेषु बाहुषु भुजेषु भूरीणि प्रभूतानि भद्राणि
कल्याणि धनानि स्तोतृभ्यो दातुं धिरे दधि धारयंति तथा वक्षःसु उरस्थलेषु रुक्माः सुवर्णरत्नादिनिर्मि
तान्याभरणानि धारयंति कीदृशानि रभसासः राभस्ययुक्तानि चलंति तथा अंजयः व्यक्तानि कांतिमंति वा
अंसेषु स्कंधदेशेषु एताः शुक्लवर्णाः मालाः पविषु वज्रसदृशेष्वायुधेषु क्षुराः क्षुरधाराः अधिः सप्तम्यर्थानु
वादी ॥ एवमेते मरुतः सर्वांगेषु श्रियो लक्ष्मीः अनुक्रमेण वि धिरे विविधं धारयंति तत्र दृष्टांतः वयो न प
क्षान् पक्षिणः पक्षानिव ॥७॥ ॥इति द्वितीयस्य चतुर्थे द्वितीयो वर्गः ॥ ॥अथैकादशीमृचमाह ॥७॥ ॥

महांतोमह्ना विभ्वो३ विभूतयो दूरेदृशो ये दिव्या इव स्तृभिः। मंद्राः सुजिह्वाः स्वरितार आसभिः संमिश्ला इं ४
द्रे मरुतः परिष्टुभः॥ ११॥ ॥ये मरुतो महांतः महत्त्वोपेताः केन मह्ना महत्त्वेन प्रभावातिशयेन तथा वि
भ्वः प्रभवः व्याप्ताः तथा विभूतयः विविधैश्वर्यवंतः दूरेदृशः दूरे दृश्यमानाः प्रकाशमानाः दूरदर्शने दृ
ष्टांतः। दिव्याः स्तृभिरिव स्तृइति नक्षत्रनामसु पाठात् स्तृभिरिति नक्षत्राणामिति निरुक्तत्वात् दिवि भवाः देवाः स्तृ
भिः स्वप्रभया कृत्वा तेजःपुंजैर्नक्षत्रैर्यथा दूरे दृश्यमाना भवंति तद्वत्। किंच मंद्राः मादनाः सुजिह्वाः शोभ
नजिह्वाः आसभिः आस्यैः स्वरितारः शब्दयितारः प्रियवचना इत्यर्थः। अत एव सुजिह्वा इत्युक्तं। किंच इंद्रे
संमिश्लाः सम्यक् मिश्रयितारः इंद्रसहायिन इत्यर्थः मरुतो हैनं नाजहुरिति श्रुतेः। तथा परिष्टुभः परि ६
स्तोभयुक्ताः स्तुतिभिर्युक्ताः एवं महानुभावा मरुतः संति ते अस्मद्यज्ञमागच्छंत्विति शेषः॥ ११॥ अथ द्वादशी

मृचमाह॥ १२॥ ॥तद्वः सुजाता मरुतो महित्वनं दीर्घं वो दात्रमदितेरिव व्रतं। इंद्रश्चन त्यजसा विह्रुणाति
तज्जनाय यस्मै सुकृते अराध्वं॥ १२॥ ॥हे सुजाताः शोभनजननाः हे मरुतो वो युष्मदीयं महित्वनं महि
त्वं तत् तादृक् खलु तदित्युक्तं कमित्याह। वो युष्माकं दात्रं दानं द्रव्यादिरूपं दीर्घं अत्यायतं अविच्छिन्न
प्रकृष्टोपकारादित्यर्थः। दीर्घत्वे दृष्टांतः अदितेर्व्रतमिव अदीनाया भूमेर्वा मातुर्देव्या वा व्रतमिव व्रतमिति
कर्मनाम तद्यथा दीर्घं अतिविस्तृतं तद्वत् अदितिर्द्यौरदितिरंतरिक्षमित्यादि मंत्रवर्णात्। किंच हे मरुतो यू
यं यस्मै सुकृते शोभनयागादिकर्त्रे यजमानाय यद्दानमितं धनमराध्वं तद्दा इंद्रश्च इंद्रोपि त्यजसा त्याग
नेन विह्रुणाति न विह्वरति कौटिल्यं न करोति चनेत्ययं यद्यपि निपातद्वयसमुदायरूप एकनिपाति
तः तथाप्यर्थवविभागेन नशब्दः समुच्चयो निषेधोधिगंतव्यः। युष्मद्दानादित्यागमिंद्रत्यागोपि नातिक्रा

मनीत्यर्थः। यद्वा यस्मै तद्धनमराध्नं तमिंद्रोपि न कुट्टयति। न नेषेधयति किंत्वनुमोदयतीत्यर्थः॥छ॥ अ ४
थ त्रयोदशीमृचमाह॥छ॥ ॥तद्वो जामित्वं मरुतः परे युगे पुरू यच्छंसममृतास आवत। अया धिया म
नवे श्रुष्टिमाव्या साकं नरो दंसनैरा चिकित्रिरे॥छ॥ ॥हे मरुतां वो जामित्वं बंधुत्वमस्मद्विषयप्रेमाधि
क्यं तत्खलु प्रसिद्धमित्यर्थः। कियत्पर्यंतमिति। तदुच्यते। परे युगे युगशब्दः कालोपलक्षकः उत्कृष्टेम
इति कालेतीतेपि वर्त्तत इति शेषः। तत्कथमधिगतमित्यत आह। अमृता सोमरणधर्माणो हे मरुतो यूयं
यद्यस्माद्धंसमस्माभिः क्रियमाणस्तुतिं पुरु प्रभूतं यथा भवति। तथा आवत रक्षथ। तस्मात्कथं तत् जा
मित्वमविनाशीत्यर्थः। किंच यूयं अया धिया अनया अनुग्राहात्मिकया बुध्या मनवे मनुष्याय स्तोत्रे य ७
ष्ट्रे वा अस्मदादये श्रुष्टिमाव्य कीर्तिस्तुतिं वा रक्षित्वा साकं संभूय नरः नेतारः संतो दंसनैः कर्मभिः छिंदता

आ चिकित्रिरे सर्वतो जानीथ॥छ॥ अथ चतुर्दशीमृचमाह॥छ॥ ॥येन दीर्घं मरुतः शूशवाम युष्माकेन परी
णसा तुरासः। आ यत्ततनन्वृजने जनास एभिर्यज्ञेभिस्तदभीष्टिमश्यां॥छ॥ ॥हे तुरासः वेगवंतो मरु
तो युष्माकेन युष्मत्संबंधिना येन परीणसा यद्यप्येन बहुना मस्तु परिगतं। तथापि यद्बहुतन्महदपि न वती
त्यत्र महदित्यर्थोवगम्यते। महता युष्मदनिगमनेन निषणेन वा दीर्घमायतं तत्रादिरूपं कर्म शशवाम प्रवर्द्ध
यामः। किंच यत् येन चाभिगमनेन निषणेन वा जना। मानुषाः अस्मदीयाः वृजने संग्रामे आ ततनुः सर्वतो वि
स्तारयंति ससामर्थ्यैः संग्रामं जयंतीत्यर्थः। तदभिष्टिमेषणगमनं एभिर्यज्ञेभिः इदानीं क्रियमाणैः स्तोत्रादि
रूपैः यज्ञैः अश्यां आभिमुख्येन आयां व्याप्नुयां॥छ॥ अथ पंचदशीमृचमाह॥छ॥ ॥एष वः स्तोमो मरुत इ
यं गीर्मांदार्यस्य मान्यस्य कारोः। एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुं॥छ॥ ॥अयं मंत्रो व्याख्या

यांतेव्याख्यातः।सूक्तोपक्रमप्रभृतिक्रियमाणांस्तुतिंमरुद्भ्यःसमर्थःस्वाभीष्टमाशास्ते।हेमरुतःएषस्तोमः ४
इदानींकृतस्तोत्रंवोयुष्माकंयुष्मदर्थमित्यर्थः।तथेयंगीःस्तुतिरूपावागपिवोयुष्माकंकस्यसंबंधीदमिति।
तदुच्यते।मंदार्यस्यमंदतेःरारयतेश्चमांदार्यःस्तुतिप्रेरयतःमान्यस्यमाननार्हस्यमाननार्हस्यकारोःस्तोतु
र्नाम्नेतत्स्तोत्रंसंबंधियेहितत्पदत्रयमुत्तरत्रसंबध्यते।उक्तलक्षणंस्तोत्रंइषाइच्छयाकामनयातन्वेयु
ष्मदर्थंयुष्मेस्तुत्याशरीरंवर्द्धति।आयासीष्टअभिगच्छतुस्तुतिः।वयांवयंचेषमन्नंवृजनंबलंजीरदानं
चिरकालजीवनंचविद्यामलभेमहि॥छ॥ ॥इतिद्वितीयस्यचतुर्थेतृतीयोवर्गः॥छ॥ ॥सहस्रंतइत्येका
दशर्चंतृतीयंसूक्तंआगस्त्यंत्रैष्टुभंआद्यंद्विशिष्टामरुद्देवताकाःसर्वत्रइतिशब्दात्।सहस्रमेकादशाद्येंद्राय
नुक्रमणिका।विशेषविनियोगोलैंगिकः॥छ॥तत्रप्रथमामृचमाह॥छ॥ ॥सहस्रंतइंद्रोतयोनःसहस्र

मिषोहरिवोगूर्त्ततमाः।सहस्रंरायोमादयध्यैसहस्रिणउपनोयंतुवाजाः॥छ॥ ॥हेइंद्रतेतवऊतयोरक्षाः
प्रकाराःसहस्रमपरिमिताइत्यर्थः।नोस्मान्उपयंत्वितिसर्वत्रयोज्यं।तथाहेहरिवःहरीइंद्रस्याश्वौताभ्यांत
द्वन्निंद्रगूर्त्ततमाःअत्यंतंगूर्त्तानिइषवःइषणीयाःअन्नानिसहस्रंबहूनित्वदीयानि।तथासहस्रंरायःअपरि
मितानिधनानिमत्तिभुक्तानिमादध्यैअस्मान्मादयितुंसंतिताान्यस्मानुपयंतुतथासहस्रिणोवाजाःगमन
वंतश्चतुष्पाद्रूपाःपशवोपिनोस्मानुपयंतुसमीपंप्राप्नुवंतु॥छ॥अथद्वितीयामृचमाह॥छ॥ ॥आनोवोभि
र्मरुतोयांत्वच्छाज्येष्ठेभिर्वाबृहद्दिवैःसुमायाः।अधयदेषांनियुतःपरमाःसमुद्रस्यचिद्धनयंतपारे॥छ॥ ॥
हेमरुतःअवोभीरक्षणैःसहितानोस्मानच्छअभिमुख्येनायांतुआगच्छंतुसुमायाःमायेतिप्रज्ञानामशोभ
नप्रज्ञाःएवमरुतोज्येष्ठेभिःबृहद्दिवैःवोज्येष्ठैःप्रशस्यतमैर्माणिमुक्तादिधनैश्चसहिताआयांतु।वाशब्दः

समुच्चये।आगमनेकथमेषांसामर्थ्यंतत्राह।अथआथेषांमरुतांयद्यस्मान्नियुतःएतन्नामकाःपरमाउत्कृ
ष्टाअश्वाःसमुद्रस्यचित्चिदुष्टोऽप्यर्थे।समुद्रस्यापिपारेपरस्मिन्तीरेधनयंतधनंधारणंवहनंकुर्वंति।तस्माद्
ह्यर्णोधनिश्वायांत्वित्यर्थः॥७॥अथदशमीयामृचमाह॥७॥ ॥मिम्यक्षयेषुसुधिताघृताचीहिरण्यनिर्णिगु
परानऋष्टिः।गुहाचरंतीमनुषोनयोषासभावतीविदथ्येवसंवाक्॥७॥ ॥सुधितासुष्ठुनिहितासुष्ठुहितावा
लोकस्यघृताचीघृतंरक्षणांशीलमुदकंअंचतीहिरण्यनिर्णिक्हिरमणीयरूपानिर्णिगितिरूपनाम।ए
वरूपाऋष्टिःविद्युदाख्यायुधविशेषोवाउपरानमेघमालेवयेषुमरुत्सुसम्मिम्यक्षसम्यक्गतिगतिकर्मासंग
तामृत।मेघपंक्तिविद्युतावित्रिमेअतिसंगतेइत्यर्थः।मेघपंक्तिविद्युच्चोभेदृष्टांतेनविशेष्यते।गुहानिगूढागु ५
हायांवांतरिक्षेचरंतीतत्रदृष्टांतःमानुषोनयोषामनुष्यस्यपरिवृढादर्मद्विषीवस्रायथासुवेषांतःपुर

एवमध्येचरंतीतद्वत्।किंसर्वादेवमितनेत्याह।सभावतीसभाजनसंयस्तवतीवर्षकालेआविर्भवंतीत्यर्थः
।तत्रदृष्टांतः।वदथ्यावाग्विविदथोयज्ञःतद्रूतानिविदथ्याप्रेषस्तोत्रादिवारूपावाक्सायथायज्ञसभां
आप्याविर्भवतितद्वत्।यद्वाविदथ्यावेदनार्हाविवदमानयोर्वाक्सायथासाभवतीतद्वत्।येवंरूपायंभूमि
म्यक्षनेमरुतोदेवयजनमागच्छंत्वित्यर्थः॥७॥अथएकादशीमृचमाह॥७॥ ॥पराशुभ्राअयासोयव्यासा
धारण्येवमरुतोमिमिक्षुः।नरोदसीअपनुदंतघोराजुषंतवृधंसख्यायदेवाः॥७॥ ॥शुभ्राःशोभनालंका
रादिनायेनिगंतरोमरुतःयव्यामिश्रणशीलयाविद्युतापरामिमिक्षुःप्रकर्षेणसिंचंतिउदकसिच्यायंसाधा
रण्येवयथालोकेसाधारण्यास्त्रियासंगतायुवानोरेतोमुंचंतितद्वत्।एवंकुर्वानाघोराःअतिवृष्टिप्रदानेभ
यंकराःतरोदसीद्यावापृथिव्योनापनुदंतअपनोदनंवर्षणरूपंतिरस्कारंनकुर्वंतिद्यावापृथिवीवचनोरो

दसीशब्दः॥सर्वत्राद्युदात्तः॥अत्रतुव्यत्ययेनांतोदात्तत्वमितिद्रष्टव्यंयद्वारोदसीशब्देनरोदनस्वभावोरुद्रः ४
तस्यस्त्रीरोदसीतिकेचिदाहुः॥अपरेतुमरुतांस्त्रियोरोदसीतिनामधेयमित्याहुः॥अयमेवपक्षोयुक्तः॥उ
त्तरत्रैवंव्यवहारात्तत्पक्षेरोदसीरोदस्याजोषतावसमम्याईकारोलुग्वाईइतोचसमम्यर्थइतिप्रगृह्यसंज्ञा
तस्यांप्रियंधनमुर्वंति।किंचदेवाःमोदयितारोमादयितारोवामरुतःसंख्यायधृष्टधृष्टंवृद्धिंतुषंतसेवंतेध्या
वापृथिवीपक्षेसख्यायजगतांसखित्वायतयोर्वृद्धिंकुर्वंतीत्यर्थः॥ब॥अथपंचमीमृचमाह॥ब॥ ॥
जोषद्यदीमसुर्यासचध्यैविषितस्तुकारोदसीनृमणाः॥आसूर्येवविधतोरथंगात्त्वेषप्रतीकानभसोनेत्या।
॥ब॥ ॥रोदसीमरुत्पत्नीविद्युद्वाएतन्नामकेयमपिईमेनंमरुत्संघंजोषत्असेवतसेवतेजुषेलेट्यडागमः॥किम १०
र्थंसचध्यैसंगमनार्थंकीदृशीसाअसुर्याअसुराबलेप्सारोमरुतः॥तेषांस्वभूताविषितस्तुकाविशिष्टकेशसंघा

विप्रकीर्णकेशसंघावासंभोगवशेनतथानृमणाःनृषुनेतृषुमरुत्सुमननवतीमनुष्येषुवावृष्टिप्रदानम
नोयुक्तात्वेषप्रतीकादीप्तोपक्रमादीप्तावयवाईदृशीरोदसीविधतःपरिचरतोमरुत्संघस्यरथमास्थात्॥आग
च्छव्याप्नोतियोगादेवांगंतंरथमारुह्यवायज्ञमागच्छति।केचविधतःसूर्यस्यरथंत्वेषंप्रतीकासूर्येवसूर्य
पत्नीवायद्वासूर्यस्यदुहिताश्विनोरथमिवसायथारोहतितद्वत्आगमनेदृष्टांतः॥नभसइत्यनेनअंतरिक्षा
दित्ययोःसाधारणोयंनभःशब्दः॥नभइतिषट्साधारणानीत्युक्तत्वात्॥अत्रादित्यवचनःतस्यगतिरिव
साययाशीघ्रातद्वत्॥ब॥ ॥इतिद्वितीयस्यचतुर्थेचतुर्थोवर्गः॥ब॥ ॥अथषष्ठीमृचमाह॥ब॥ ॥आ
स्थापयंतयुवतिंयुवानःशुभेनिमिश्लांविदथेषुपज्राम्॥अर्कोयद्वोमरुतोहविष्मान्गायद्गाथंसुतसोमोदुव
स्यन्॥ब॥ ॥युवानोमिश्रयंतोनित्यतरुणावामरुतोनित्यतरुणावामरुतोयुवतिंमिश्रयंतीनित्यतरु

णीवाविद्युद्रूपांरोदस्यांस्त्रियमास्थापयंतआस्थापयंति।देवनात्वेनरथेधारयंतिकीदृशी।तान्भिर्मिश्रां
नियमेनमिश्रयंती।पज्रां।पज्राबलंतद्वतीं।शुभे।शोभनते।दीप्यतइतिशुभ्।उदकंवृष्ट्युदकार्थंशुभेरथइतिवा
योज्यं।किंनिमित्तं।विदथेषु।यागेषु।निमित्तभूतेषु।कदायतयदा।हेमरुतो।वोयुष्मान्।अर्कः।मत्वर्थेलुप्
तेअर्चनसाधनमंत्रोपेतःस्तोतावाहविष्मान्प्रयाज्यादिहविर्युक्तः।सुतसोमः।हामाया।अभिषुतःसोमो
येनयजमानोऽदुवस्यन्परिचरन्गाथंगातव्यंस्तोत्रंगायन्गायतितदेत्यर्थः॥छ॥अथसप्तमीमृचमाह॥
॥छ॥ ॥प्रतंविविक्मिवक्म्योयएषांमरुतांमहिमासत्योअस्ति।सचायदींवृषमणाअहंयुःस्थिराचिज्ज
नीर्वहतेसुभागाः॥छ॥ ॥एषांमरुतांयोमहिमामहत्त्वातिशयःवक्म्यःसर्वैस्तुत्यःअबाध्यःअमोघोऽस्ति
तंप्रविविक्मिप्रवच्मिवर्णयामि।कथमेषांमहिमाप्राप्तइति।उच्यते।यद्यस्मात्ईएतेषांसंबंधिनीरोद

सी।वृषमणा।वृष्ट्यादिवर्षणमनस्काः।अहंयुःअहंकारवतीजगदुपकारकत्वेनकदाचिदस्तीत्यहंकारः
स्थिराचित्।चिदितिपूजायां।अत्यंतमविनश्वराःईदृशीदेवी।सुभगाःशोभनभाग्योपेताःजननशीलाःप्रजाः
वृष्ट्युत्पत्तिर्वावहतेधारयति।वृष्टौसत्यांसर्वेप्राणिनउत्पद्यंते।यस्मादेवंतस्मान्महिमास्ति।तंमहिमानंस्तौ
मीत्यर्थः॥छ॥अथाष्टमीमृचमाह॥छ॥ ॥पांतिमित्रावरुणाववद्याच्चयतईमर्यमोअप्रशस्तान्।उतच्य
वंतेअच्युताध्रुवाणिवावृधईंमरुतोदातिवारः॥छ॥ ॥हेमरुतोयुष्मत्संबंधिनोदेवाःमित्रावरुणौ
अहोरात्र्यभिमानिदेवौ।अर्यमो।अर्यमाउइतिनिपातसमुदायात्मकमेकंपदं।उशब्दोपिशब्दार्थे।अय
मपि।एतेत्रयोपि।ईं।अमुंलोकंयज्ञंवाअवद्यात्गर्ह्यात्।अयथानुष्ठानात्जगत्पक्षेव्यवहारप्रतिप्रतिबं
धरूपात्पांतिरक्षंति।तथा।एतेपाअप्रशस्तान्क्षीणादपिपदार्थान्चयतेचायंतिनायति।उतअपिच।एते

MEMORIAL

प्रेरितानि।अच्युतना।अच्युतानि।अस्थावीणि।अतएवअकवाणि।अविचलानिमेघस्थोदकानिच्यवंते।च्याव ४
यंतिवा।एतेअहोरात्रेवैमित्रावरुणावहोरात्राभ्यांखलुवैपर्जन्योवर्षतीतिश्रुतेः।यद्वा।अच्युतानि।अकवा
णिधनानिच्यवंते।कदेतिउच्यते।हेमरुतोयुष्मदीयंईमयंकालोदानिवारःप्रदेयजलःस्वंउत्तिमेघोवाय
दावर्द्धतिनदामित्रादयो।देवायुष्मदनुकूलव्यापारेणजगद्धंतीत्यर्थः।यद्वा।दातिवारोदातव्यरणीयद्र
विलक्षणधनोयजमानाः।हेमरुतः।ईमेनान्युष्मान्ववृधेवर्द्धयतियदातदेत्यर्थः॥८॥अथनवमीमृचमा
ह॥८॥ ॥नहीनुवोमरुतोअंत्यस्मेआरात्ताचिच्छवसोअंतमापुः।तेधृष्णुनाशवसाशूशुवांसोर्णोन
द्वेषोधृषतापरिष्ठुः॥८॥ ॥हेमरुतोयःशवसोयुष्माकंसंबंधिनोबलस्यअंतमवसानंअंतिकेआरा १२
त्तात्दूरादपियद्वाचिदितिकुत्सायांअत्यंतदूरात्अस्मेअस्मासुमध्येएकेपिनुचिन्नह्यापुःनैवखलु

प्राप्नुवंतिसंनिधानंसंनिधोचनप्राप्नुवंतीत्यर्थः।अथपरोक्षेप्रामबलत्वमाह।तेखलुमरुतोधृष्णुनाधर्षके
णशवसाबलेनशूशुवांसोवर्द्धमानाः।अतएवधृषतापराभिभावकेनसामर्थ्येनद्विषोद्वेष्टॄन्परिष्ठुःपरिभ
वंतिवशीकुर्वंति।तत्रदृष्टांतः।अर्णोनउदकमिवयथाउदकंस्वविरोधिअंजसाआदिकमभिभवतितद्वत्।य
स्मादेवंतस्मात्शवसोतंनापुः॥८॥दशमीमृचमाह॥८॥ ॥वयमद्येंद्रस्यप्रेष्ठावयंश्वोवोचेमहिसमर्ये
वयंपुरामहिचनोअनुद्यून्तन्नऋभुक्षानरामनुष्यात्॥८॥ ॥वयमद्येत्येतंदशामीअस्तमितआदित्येउ
पेत्तयाचस्ततं।वयमस्यैद्येंद्रस्यश्रेष्ठावैयंइत्यसतंयात्यादित्यइति।पाठस्तु।वयमद्येति।यद्यस्मिन्दिनेयष्टा
रइंद्रस्यदेवस्यप्रेष्ठाःप्रियतमाःनयेमयेक्षाप्रियतमावयमिंद्रस्यमहत्वंवोचेमहि।स्तोत्रंसमर्थात्रियास्मा।किं
चवयंश्वःपरस्मिन्नपिदिनेसमर्येसइमर्यामिश्चाज्ञित्विजोयस्मिन्ससमर्योयज्ञःतस्मिन्संग्रामेवाइंद्रस्यम

महत्वं वोचेमहि। किंच वयं पुरा सर्वस्मिन्नतीतेपि काले महि महत्। बलं नोस्मदर्थं वोचेमहि। तथा द्यून् दि ८
वसान् अनुप्रतिदिवसमित्यर्थः। अतीते आगामिनि च दिवसे सर्वदा वोचेमहि। तत् तस्मात् ऋभुक्षाः महन्नामैत
दृभुक्षा उक्षा इति तन्नामसु पाठात्। महानिन्द्रो नरां मनुष्याणां मध्ये नोस्माननुष्यात् अनुभवतु। अनुकूल
मनिमनप्रदो वा भवतु॥छ॥ ॥एष इत्येकादशी व्याख्याता॥छ॥ ॥इति द्वितीयस्य चतुर्थे पंचमो वर्गः॥छ॥
॥ ॥यज्ञायज्ञियेति दशर्चं चतुर्थं सूक्तमागस्त्यं मारुतं अत्यास्तिस्रः त्रिष्टुभः शिष्याः सप्त त्रिष्टुबंतं परिभाष
या जगत्यः। यज्ञायज्ञा दशान्त्य त्रिष्टुबंतमित्यनुक्रांतं। विशेषविनियोगो लैंगिकः॥छ॥ ॥तत्र प्रथमामृचमाह॥
॥छ॥ ॥यज्ञायज्ञा वः समना तुतुर्वणिर्धियंधियं वो देवया उ दधिध्वे। आ वोर्वाचः सुविताय रोदस्योर्महे ववृ १२
त्यामवसे सुवृक्तिभिः॥छ॥ ॥इमे मरुतो वः समना समानन्यूनाधिकाभावलक्षणा यज्ञायज्ञे सर्वेष्वपि य

ज्ञायज्ञेषु तुतुर्वणिः तूर्णवनिः त्वरमाणसंभजमाना भवति। तुर्वणिस्तूर्णवनिरिति यास्कः। तत्तद्यागावसरे आ
गत्य हविः स्वीकृत्य विकल्पपरिहारेण सम्मेकरुयेत्यर्थः॥ स्तत्यकंप्र किंच वो यूयं धियंधियं युष्मत्संबंधि इष्टिप्र
दानादिरूपं सर्वं कर्म देवया देवान् प्रापयितार एव संतो दधिध्वे धारयथ धारध्वे ये वा देवार्था देवान् विराध
त्वादनाय दृष्टिं कुरुथेत्यर्थः। यस्मादेवं कुरुथ तस्माद्वो युष्मानर्वाचो स्मदभिमुखान् आववृत्यां आवर्तयामि
किमर्थं। रोदस्योर्द्यावापृथिव्योर्महे महते। अवसे रक्षणाय प्राणनाय वा तदपि किमर्थमिति सुविताय सुष्ठु
प्राप्ताय आकेः साधनैः सुवृक्तिभिः शोभनावर्जनैः स्तोत्रैः॥छ॥ अथ द्वितीयामृचमाह॥छ॥ ॥वव्रासो न ये स्व
जाः स्वतवस इषं स्वरभिजायंत धूतयः। सहस्रियासो अपां नोर्मय आसा गावो वंद्यासो नोक्षणः॥छ॥ ॥ये म
रुतो मे वव्रासो न वव्रिरिति रूपनाम रूपवंत इव ते यथा प्रकृष्टा लक्ष्यंते तद्वत्। यद्वा अरूपा अपि सरूपा इव

स्वजनाः स्वयमेव स्वस्माद्वा जायमाना अन्यैरनुत्पादिता इत्यर्थः। धुनयः कंपनशीलाः संति ते इषं अन्नं इव ईलत्हणं अन्नसाधनं सस्यादिकं वा स्वः स्वर्गं वा निजायंत अभिलक्ष्य प्रादुर्भवंति। ते दृष्टांतमुखेन श्रूयंते। अपानोर्मयः उदकानां ऊर्मय इव समर्यः स्त्रियासः महस्त्रं मिताः तथा वंघ्रासः बकुल्लीरादिप्रदत्वेन स्तुत्या गावो न गाव इव आसा समीप एव उक्षणः वृष्टुरुदकस्य सेक्तारः तादृशा मरुतः प्रादुर्भवंतीत्यन्वयः॥ब॥ अथ तृतीयामृचमाह॥ब॥ ॥सोमासो न ये सुतास्तृप्तांशवो हृत्सु पीतासो दुवसो नासते। एषामंसेषु रंभिणीव रारभे हस्तेषु खादिश्च कृतिश्च सं दधे॥ब॥ ॥ये मरुतः सुताः अभिषुषीताः तृप्तांशवः तर्पितावयवा सोमासो न सोमा इव। यथा वल्लीरूपाः सोमाः अभिषवात्पूर्वं आप्यायते न तृप्तावयवाः संतः पश्चात्सुता अभिषुताः सेरन्नृताः पीतासः पीताः संतो हृत्सु पातॄणां हृदयेषु दुवसो नासते परिचिरंत इवासात नह्वत्मे मरुतः यज्ञे आहूतास्तृप्तावयवा भवंति ध्यायमानाः संतो हृत्सु हृदयेषु दुवसो न परिचिरंत इवासते। यद्वा प्रीणादिरूपेशरीरे स्थिता दुवसः परिचिरंत इव गमनादि चेष्टाः कुर्वंति आसते। एषामंसेषु रंभिणी वयुवतमां मालंबिनी। या षिदिवारारभे आरभे आश्लिष्यति अवलंबते सामर्थ्यान्निशंकाख्यायुधविशेषो लुजलक्ष्मीर्वा। किंच हस्तेषु खादिः हस्तत्राणकाश्च कृतिः कर्तनी वज्रज्वलता श्चिः संदधे संधीयते सम्यक् धृता भवति। परस्परमन्वयार्थश्चकारः। ये मरुत उक्तरूपास्ते आविर्भवंतीत्यर्थः॥ब॥ अथ चतुर्थ्यृचमाह॥ब॥ ॥अव स्वयुक्ता दिव आ वृथा ययुरमर्त्याः कशया चोदत त्मना। अरेणवस्तुविजाता अचुच्यवुर्दृळ्हानि चिन्मरुतो भ्राजदृष्टयः॥ब॥ ॥इमे मरुतः स्वयुक्ताः स्वैर्युक्ताः परस्परसंयुक्ताः स्वेन धनेन वा युक्ताः संतो दिवो द्युलोकात् वृथा। अनायासेन वा ययुः अवाङ्मुखमागच्छंति इमे मरुतो श्र्यं त्मना आत्मना

स्वयमेवकशयावाङ्गामेतत्वावास्तुतिरूपयावादतप्रेरयतस्तोउमितिशिषःतेचमरुतःअरेणवः
अपायाःसमुंदनेनपांसुविच्छुःच्यावयंतिचालयंति॥७॥अथपंचमीमृचमाह॥७॥ ॥कोवोंतर्मरु ४
तऋष्टिविद्युतोरेजतित्मनाहन्वेवजिह्वया॥धन्वच्युतइषांनयामनिपुरुप्रेषाअहन्योऽनेतशः॥७॥ ॥
हेमरुतःहेऋष्टिविद्युतःमेघमेदायुधविशेषेणविद्योतमानाःयुष्माकमंतःयुष्माकंमध्येस्थित्वाकःपु
मानरेजतिचालयतिप्रेरयति।नहिकिंथंचालनमिति।उच्यते।त्मनाआत्मानेवचालनेदृष्टांतःजिह्व
याहन्वेवहन्विवचनस्यआकारश्छंदसः।हनुवातोयथारसनयाचाल्यातेतद्वत्।यद्यप्येवंतथापिइषंअन्नानां
तत्साधनानांयामनिप्राप्तौसमृध्यर्थंधन्वच्युतोनधन्वनशब्दोंतरिक्षस्यवचनःतेनतत्सबंदकंत्वच्छ्य १५
ति।उदकःस्वाविणोमेघाइवतेयथाआकांक्षंते।तथायुष्मानादिप्रामायपुरुप्रैषाःबहुविधंफलमिच्छं

न्यतमानोस्तोत्रैःबहुप्रकारमाकारयंतीत्यर्थः।तत्रदृष्टांतः।अहन्यःअश्विनःएतशोनअश्वइवसयथा
शिष्यकारेणनानाप्रकारंप्राप्यतेतद्वत्॥७॥ ॥इतिद्वितीयस्यचतुर्थेषष्ठोवर्गः॥७॥ ॥अथषष्ठीमृच
माह॥७॥ ॥कस्विदस्यरजसोमहस्परंक्कावरंमरुतोयस्मिन्नायय।यच्यावयथविथुरेवसंहितंव्य
द्रिणापतथत्वेषमर्णवं॥७॥ ॥हेमरुतोयुष्मयंयस्मिन्नुदकेनिमित्तभूतेसतिआयय।आगच्छत।अस्य
उरसोव्यक्षुद्रकस्यलोकस्यवामहोमहतःपरंपारंअंतंकश्चिदज्ञात्वास्तीतिनास्तीत्यर्थः।तथाअवरं
अवाङ्वाङ्भागआदिश्चकश्चिद्ज्ञात्वास्तिआद्यंतंनकोपिजानातीत्यर्थः।यद्यद्युयंविथुरेवविधुराणिशि
थिलानिदृढाणानिवसंहितंएकत्रभूतंउदकंच्यावयथस्वस्थानाच्चालयत।तथाअद्रिणावज्रेणत्वेषंअर्णवंउद
कवंतंमेघंवितयविशीर्णंपातयथ॥७॥अथसप्तमीमृचमाह॥७॥ ॥मातिर्नवोमवतीस्ववंतीत्वेषावि

पाकामरुतःपिपिष्वती॥ भद्रावोरातिःपृणतोनदक्षिणापृथुज्रयीअसुर्येवजंजती॥७॥ ॥हेमरुतः
वोयुष्माकंसंबंधिनीसातिर्नसंभक्तिरिवयुष्मत्संभजनंयथाप्रशस्तगुणंतद्वद्रातिः।त्वेष्यादिविष
याअमवतीआमावात्यवतीइंद्रादिसहायवती।यथाराजेवामवानित्यत्रानशब्दोमात्यवचनःतद्वत्त्व
ह्यावस्मातिःसंविभक्तिर्नभवतिअरोगवत्तानभवति।किंतुस्वर्वतीसुखवतीत्वेषादीप्ताविपाकापरिपक्व
फलापिपिष्वतीपेषणवतीऊषीबालेःकर्षणवतीवाष्टोसत्यांकर्षतीतिप्रसिद्धं।स्वविरोधिपेषणवतीवाभ
द्रावंदनीयास्तुत्या।किंचपृणतोदातुर्धनिकस्यदक्षिणादक्षिणेवतद्वत्स्पष्टकरीपृथुज्रयीपृथुजवा।शीघ्र
गामिनी।किंचअसुरस्यस्वभूताजंजतीसवनिनिभवंती।शक्तिरिवसायथान्येभ्योमह्यन्यस्मैदातुंसमर्थ
नेद्वदियमपिमेघउदकमपहृत्यजगतोदातुंशक्तेरित्यर्थः।ईदृशीरातिरस्मभ्यमस्त्वितिभावः॥७॥ ॥७॥

अथाष्टमीमृचमाह॥७॥ ॥प्रतिष्टोभंतिसिंधवःपविभ्योयदभ्रियांवाचमुदीरयंति।अवस्मयंतविद्युतःपृ
थिव्यांयदीघृतंमरुतःप्रुष्णुवंति॥८॥ ॥पविभ्योमरुत्संबंधिवज्रेभ्यःसिंधवःस्पंदनशीलाआपःप्रतिष्टो
भंतिप्रतिचलंतिकदा।यत्यदाअभ्रियांअभ्रभवांवाचंशब्दस्तनितलक्षणंउदीरयंत्युच्चारयंति।वज्रा
णिकिंचविद्युतःविद्योतमानास्तडितःपृथिव्यांअंतरिक्षेपृथिवीत्यंतरिक्षनाम।पृथिवीभूरितितन्नाम
सूक्तत्वात्।तत्रावस्मयंतस्मयंते।अवाङ्मुखंप्रकाशंते।पृथिव्यामित्येतदुत्तरत्रवायोज्यं।यदियदापृथि
व्यांभूम्यांघृतंक्षरदुदकंमरुतःप्रुष्णुवंतिप्रुष्णंतिसिंचंति।प्रुषेःक्र्यादिकस्य।व्यत्ययेनश्नुः।यादेवंतदे
त्यर्थः॥८॥अथनवमीमृचमाह॥७॥ ॥असूतपृश्निर्महतेरणायत्वेषमयासांमरुतामनीकं।तेसप्स
रासोजनयंताभ्वमादित्स्वधामिषिरांपर्यपश्यन्॥८॥ ॥पृश्निर्मरुन्मातानानावर्णापृश्नियाःपयसोम

रुतो जाताः पृश्न्याः पुत्रा उपमासः इति श्रुतेः। तामेवांतरिक्षदेवताकेचिद्वाक्वः। सा देवी त्वेषं दीप्तं अयासांगंतॄणां
मरुतामनीकं समूहं एकोनपंचाशत्संख्याकमसूत उत्पादितवती॥ किमर्थं महः रणाय संग्रामाय मेध ४
जयायेत्यर्थः। ते च मरुतः सप्सरासः समानरूपाः इंसकावामेघानां अभ्वं मेघं जनयंति उत्पादितवंतः
आदित् अनंतरमेव इषिरासः वरिष्ठ्याः स्वधामन्नं सस्यादिसमृद्धिलक्षणं पर्यपश्यन् परिपश्यंति सर्वेज-
नाः॥छ॥ ॥एष व इति दशमी॥ व्याख्याता॥छ॥ ॥इति द्वितीयस्य चतुर्थे सप्तमो वर्गः॥छ॥ ॥महश्चित्त्व-
मित्यष्टर्चं पंचमं सूक्तं ऐंद्रमागस्त्यं त्रैष्टुभं द्वितीया चतुष्पदा विराट् अथ चतुष्पदा विराड्दशाकेरित्युक्तत्वा-
त् विराजो दिश इति पिंगलनागेन सूत्रितत्वाच्च। महश्चौ द्वितीया विराडित्यनुक्रमणिका सूक्तं दशरात्र १७
द्वितीयेऽहनि दोमे मरुत्वतीये इदं विश्वजितो निनरइति खंडे सूत्रितं। द्वितीयस्य शंसामहांम महश्चित्त्वमिंद्रेति॥छ॥

॥तत्र प्रथमामृचमाह॥छ॥ ॥महश्चित्त्वमिंद्र यत एतान्महश्चिदसि त्यजसो वरूता। स नो वेधो मरुतां चिकित्वा-
न्सुम्ना वनुष्व तव हि प्रेष्ठा॥छ॥ ॥हे इंद्र त्वं यतः कारणात् एतान् मरुतो महश्चित् महतोपि सामर्थ्यातिशय-
वत्वात् त्वं निरपेक्षेणापि महान् त्यजतातिशेषः अतः कारणात् महश्चिदसि पदहरणः मरुतोपि त्यजसः त्या-
गात् युद्धे तु क्रोधनाम। क्रोधात् वरूता वरिता रक्षिता भवसि। यद्वा मरुतोपि त्यागात् वृष्ट्यादिविषयात् वार-
यितासि यस्मादेवं तस्मात् हे मरुतां वेधः विधातः सतादृशस्त्वं चिकित्वान् चेतनवान् अस्मदनुग्रहविषयज्ञा-
नोपेतः सन् नोऽस्मभ्यं सुम्ना सुखानि मरुदायत्तानि वृष्ट्यादिरूपाणि वनुष्व देहि तानि सुम्नानि तव हि प्रेष्ठाः तव
खलु प्रियतमा हि निशाश्रायमिंद्रो मरुत्सखेत्यादिश्रुतिषु प्रसिद्धमर्थः॥छ॥ अथ द्वितीयामृचमाह॥छ॥ ॥
अयुज्रन्त इंद्र विश्वकृष्टीर्विदानासो निःषिधो मर्त्यत्रा। मरुतां पृत्सुतिर्हासमाना स्वर्मीह्ळस्य प्रधनस्य साता॥छ॥

॥ ॥पूर्वमंत्रेमरुतामिंद्रसाहाय्यमुक्तं।अत्रेंद्रस्यमरुत्साहाय्यमुच्यते।हेइंद्रतेमरुतोयुंजन्युंज्यंतेत्वया ४
युक्तानवंतीत्यर्थः॥कीदृशास्तेविश्ववृष्टीःविश्वकृष्टयराज्यत्वेनसर्वजनवंतः।किंचमर्यत्राअमर्येषुमत्या
र्थंनिषेधानिःशेषेणोदकस्यसेक्तारमेधान्विद्वानाम्ज्ञानानाः।किंचयेषांमरुतांसुष्टुतिःसेनास्वर्मीळ्हस्य
प्रधनस्यसुषमेकुःप्रकृष्टधनवतोहन्त्रादिसंग्रामस्यसातौलाभेजयेनिमित्तभूतेसतिसेनाप्रसमानाउ
संकुर्वंतीहर्षयुक्ताभवति।यद्वासुखेनमिह्यतेजलंयस्मिन्नतादृशस्यप्रधनस्यप्रकृष्टोदकाख्यधनसाधनस्य
संग्रामस्यसातौमेघघ्नेदेनायेतियावत्येषामीदृशीसेनास्तितेमरुतोयुवञ्जेत्नितिसंबंधः॥८॥अथतृतीया
मृचमाह॥८॥ ॥अभ्यर्कमानइंद्रज्ञवृष्टिरस्मेसनेभ्यन्नंमरुतोजुनंति।अग्निर्धिवद्धिभातसेवूशुक्वानापोनद्वी १८
पंदधतिप्रयांसि॥८॥ ॥हेइंद्रतेतवसाप्रमिश्लान्नरष्टिःवज्राख्यायुधविशेषोस्मेस्महृष्ट्यर्थंअस्यक्रप्राप्नोति।

मेघसमीप।एवंचसति।मरुतोपिसनेमिअर्कायेतिषट्पुराणनामानीत्यक्तत्वात्।सनेम।निपुराणानामपु
राणाचिरकालसंस्थितंअन्नंउदकंजुनंतिक्षिपंति।वर्षंतीत्यर्थः।कृष्णासस्यादिसमृद्धोसत्यामग्निर्धिद्धिवि
स्माइस्नोतिस्थरणेनअग्निरपिअतस्मेसंततेनकर्मणोनिमित्तभूतेसतिशुशुक्वान्दीप्यमानोवर्त्ततपश्चान्प्रयां
सिचपुरोडाशादिरूपाणिदधतिधारयंतिददातिवा।यजमानाःकिमिवआपोनद्वीपंद्वीपार्श्वस्थोदकंवानपर्वता
दिःद्वीपःतंयथाआपोधारयंतितद्वत्यद्वाआयुधमेवोच्यते।वज्राख्यायुधविशेषःअतसेकाष्ठसमूहेशुशुक्वा
न्दीप्यमानग्निर्धिवत्विद्धइउपमार्थेदधिविदित्युपमार्थेइतियास्केनोपमार्थस्योक्तत्वात्।काष्ठेज्वलन्नग्नि
रिवनद्वीपोवर्त्ततइदंएतदेवदीप्तोवर्त्तताएतदेवदीप्तत्वमपेक्ष्यमेत्यक्तंएवंचसत्यापोदीपमिववृष्ट्युदका
निप्रयांसिमस्याग्नानिदधतिधारयंति।एतत्सर्वंमहानुभावस्येंद्रस्यज्ञष्टेःसामर्थ्यमितींद्रस्यस्तुतिः॥८॥ ॥

अथचतुर्थीमृचमाह॥ठ॥ ॥त्वंन्नइंद्रऋतंरयिंदा ओजिष्ठयादक्षिणयेवरातिं।स्तुतश्चयास्तेचकनंतवायोःस्त
नंनमध्वःपीपयंतवाजैः॥ठ॥ ॥हेइंद्रत्वंत्रुउधारणत्वमेवतंरयिंत्वदान्नयोग्यंगवादिधनंदाः।द इयस्मादि ४
तरेभ्योपित्वमेवबकुप्रदः अतोतिमहत्तुनंदेहीत्यर्थः।वयंतु ओजिष्ठया ओजस्विनमयापरिक्रिमणादीयादक्षिण
यासमृद्धिसाधनयावादीक्षणयाकल्पितमिवरातिंदातारंत्वांप्राप्णयामइतिशेषः।यद्वादक्षिणाशब्दोदयन्न
व्यसामान्यवचनः।तनिशिष्टोबंधुवचनः।हिरण्यादिसारवद्व्यप्रदानेनबंधुयथावशीकुर्वंतितद्वत्त्वांवशी
कुर्मइत्यर्थः।किंवावयोःधोनयुक्तोपिषष्ठस्यरा अवरप्रदस्यतेकर्मणिषष्ठी।वायुंत्वांस्तुतः।यस्मदीयाःस्तो
तारःचकमंतकामयंतेनेतिवायोजना।कननेर्यंतालुङिचङिरूपं।चव्यन्यतरस्यामितिचङः।एवमिन्द्ररक्षदान्त १९
त्वांस्तोत्रादयोवाजैःहविर्लक्षणैरन्नैःपीपयंतआप्याययंति।तत्रदृष्टांतः।मध्वःमधुरस्यस्तन्यस्यलाभायवाजैः

सारवद्भिरन्नविशेषैःस्तनंनतंयथा आप्याययंतितद्वत्वयंत्वांबहुलतप्रदातारंयत्स्तुत्याहविषाप्याययामः
त्वंतुदातव्यत्वेनप्रसिद्धंधनंसर्वदादेहीत्यर्थः॥ठ॥ अथपंचमीमृचमाह॥ठ॥ ॥त्वेरायइंद्रतोशतमाःप्रणे
तारःकस्यचिदृतायोः।तेषुणोमरुतोमृळयंतुयेस्मापुरागातूयंतीवदेवाः॥ठ॥ ॥हेइंद्रत्वेतवरायोधनानि
विशेषाःतोशतमाः अतिशयेनप्रीणयितारः त्वय्यतेस्त्रोषः छांदसंइत्वं।यद्वातेरायोतयोबंधवोबंधुभूताःसखि
भूताःमरुतस्तोशतमातोशतिर्वधकर्मानितोशयतेनिबर्हयतइतितन्नामसुपाठात्।तोशतमाःहिंसितृतमाः अ
वर्षकाणांमेघानां।कस्यचिदृतायोःऋतमितियज्ञनामकस्यापियज्ञेच्छोःयजमानस्यप्रणेतारःप्रकर्षेणानि
नेतारःतेमरुतोनोस्मान्सुसुष्ठुमृळयंतु।केतेस्मयेखलुदेवाःद्योतनशीलामरुतःपुरापूर्वंगातूयंतीवगमनमि
च्छंतीवनवति।तत्रआगत्यमृळयंतु॥ठ॥ ॥इतिद्वितीयस्यचतुर्थेष्टमोवर्गः॥ठ॥ ॥अथषष्ठीमृचमाह॥ठ॥ ॥

प्रतिप्रयाहींद्रमीळ्हुषोनॄन्महःपार्थिवेसदनेयतस्व।अधयदेषांपृथुबुध्नासएतास्तीर्थेनार्यःपौंस्यानितस्थुः। ४
॥११॥ ॥इंद्रत्वंमीळ्हुषःउदकामेक्तृन्नॄन्नृजुगन्तेनृन्नरकारान्वामरुतोमहतःमेघान्प्रतिप्रयाहि।अभिग
च्छमेघानांहंत्ररूपेणान्नरकारत्वंयुक्तं।गत्वाचपार्थिवेसदनेदेवयज्ञनेयतनस्वयत्नंकुरुस्वविनेजिनायत्र
धअपियद्यदाएषांत्वत्संडाय्यकारिणांमरुतांसंबंधिनःपृथुबुध्नासोविस्तीर्णमूलाएषाःपृषद्गणागिताराश्वा
अश्वाःअर्यःअरेःशत्रोःपौंस्यानितीर्थेनयुद्धमार्गइवतस्थुःतिष्ठंतिमेघानाक्रमंतेयदेषांमरुतांपृथुबुध्नासः
बृहन्मूलाएताःकृष्णवर्णमेघाःतिष्ठंति।तत्रदृष्टांतः।अर्यःअरणीयस्यस्वामिनःपौंस्यानिबलानितीर्थेनराज
वीथ्यांयथातिष्ठंतितद्वत्॥११॥अथसप्तमीमृचमाह॥११॥ ॥प्रतिघोराणामेतानामयासांमरुतांशृण्वआय २०
तामुपब्दिः।येमर्त्यंपृतनायंतमूमैर्ऋणावानंनपतयंतसर्गैः॥११॥ ॥इंद्रनेसंबंधिनांघोराणांभयानका

नांशब्दनिमानानांवाएतानांएतवर्णानांअयासांअयमानांगमनशीलानांमरुतांआयतांआगच्छतांमरु
तांउपब्दिःउपशुब्दिसमीपेगम्यतेज्ञायतेउपपद्यतइतिवाउपब्दिःवाक्शब्दएवश्रूयंते।कर्मणिकर्तृप्रत्ययः।त
एवशिष्यंते।येमरुतोमर्त्यंमरणधर्माणंऊमैःस्वरक्षकैःउदकानिगमनसाधनैर्वापृतनायंतंसंग्रामंइच्छंतमात्मनइ
च्छंवैरिणंमेघंवासर्गैःसृष्टैःस्वकीयप्रहारविशेषैःपतयंतपातयंति।तेषामेवध्वनिःश्रूयतइत्यर्थः।पातने
दृष्टांतः।सर्गैःऋणावानंन।छंदसीवनिपाविति।वनिप्रत्ययऋणवंतंअधमर्णमिवतंयथाप्युदयत्वात्दीयंधन
मपहरंतितद्वत्।एवंमहानुभावामरुतस्तवानुगाइतींद्रस्यस्तुतिः॥११॥अथाष्टमीमृचमाह॥११॥ ॥त्वंमाने
भ्यइंद्रविश्वजन्यारदामरुद्भिःशुरुधोगोअग्राः।स्तवानेभिस्तवसेदेवदेवैर्विद्यामेषंवृजनंजीरदानुं॥११॥ ॥
हइंद्रत्वंमानेभ्योमानार्थंचित्तेनेत्यर्थं।तदर्थेचिउथश्च।विश्वजन्याविश्वजन्यःसोराकारःविश्वेप्राणिनउत्पादनी

यायस्य ताहशस्त्वं सर्वजनहितशान्तया वा मरुद्भिः सह ऋभुक्षः॥३॥ कस्य रूपेरोधयित्री॥३॥ पिकाः गोअग्याः गति
तमुदकं वा अग्नेपुरतो यासां तामेव पंक्तीः रदनविलिखविदारय इंद्र वद्योतमानत्वं स्तवानेभिः स्तूयमानेर्दे
विरन्यैर्मरुदादिभिः ज्ञातिभिर्वास्तिव सेश्रूयसे अन्यत्र कर्मणि कर्तृप्रत्ययः। विद्यामेत्ययं व्याख्यातः॥छ॥ ॥
इति द्वितीयस्य चतुर्थे नवमो वर्गः॥छ॥ ॥न नूनमस्तीति पंचर्चं षष्ठं सूक्तं आगस्त्यमैंद्रं। अत्रानुक्रमणिका।
न नूनं पंचागस्त्येनेंद्रे हविषि मरुतामुद्यत इंद्रागस्त्ययोः संवाद ऐंद्रस्त्वाद्याद्वृतीया चैंद्रवाक्यं चतुर्थश्चादौ ह
तीति स्रोनुष्टुभः इति। सूक्तस्यैंद्रागस्त्यसंवादरूपत्वादाद्या तृतीया चतुर्थ्यैंद्रवाक्यं। अतस्तासां तस्य वा
क्यन्यायेन स ऋषिः। शिष्टे अगस्त्यवाक्ये अतस्तयोः स एव ऋषिः आद्या चेद्दृत इतीततस्त्रिस्रो नुष्टुभः अंत्या अविशे
षात्रिष्टुप् विशेषविनियोगो लैंगिकः अत्र सूत्रे यास्कः अगस्त्य इंद्राय हविर्निरुप्य मरुद्भ्यः संप्रदित्सांचकार स

इंद्र एत्य परिदेवयांचक्र इति॥छ॥ तत्र प्रथमामृचमाह॥छ॥ ॥न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतं। अन्यस्य चित्त
मभि संचरेण्यमुताधीतं विनश्यति॥छ॥ ॥परिदेवनप्रकारः प्रतिपाद्यते। इंद्र आह। अद्यतनं यदस्ति तन्नूनं मह्यं ना
स्ति। नूनमत्र विचिकित्सार्थे अत्राद्येति यद्यपि नास्ति तथाप्युत्तरवाक्ये श्व इति दर्शनत्वादत्राद्येति गम्यते। तथा श्वो
पि भूतनं नो अश्वस्तावधारणे श्वस्तनमपि नैव नास्ति अद्य यथास्मदर्यं निरुप्तमन्यं नास्ति किल श्वः कथं लभ्यत
इति भावः यदद्भुतं अन्यस्मै दत्तमिति यदस्ति विपरीत्यं तत्को वेद। यद्वा यदद्भुतं नाविकार्यं यदस्ति तत्को वेद। अत्र
न श्वो वा लभ्यत इति आशानकार्ये सूक्तं नतिः तदेवाह। अभि संचारेण्यं सर्वतः संचारि अन्यस्य चित्तमानसं ज्ञाना
नीतिरोषः। उत अपि च अधीतं आध्यातं चिंतितमपि न हस्यं किमु सद्भूतस्मृतं नश्यतीति॥छ॥ अथ द्वितीयामृच
माह॥छ॥ ॥किं न इंद्र जिघांससि भ्रातरो मरुतस्तव। तेभिः कल्पस्व साधुया मा नः समरणे वधीः॥छ॥ ॥इद

MEMORIAL

२१

॥७॥अथतृतीयामृचमाह॥७॥ ॥किंनोभ्रातरगस्त्यसखासन्नतिमन्यसे।विद्माहितेयथामनोऽस्मभ्यमिन्नदित्ससि॥७॥ ॥उ।त्रि५

मगस्त्यवाक्यं।इन्द्रनोस्माननपराधिनः किंजिघांससिइन्द्रमिच्छसिकथमवध्यत्वमिति।अतआह।मरुतस्तव
भ्रातरःत्वयाभोगप्रदानेनभरणीयाइत्यर्थः।अतोवयमवध्याइत्यकंनवतिमरुत्वानिंद्रभ्रातृत्वमेकस्मिन्ने ४
वादितिगर्भेउत्पन्नत्वात्।सचोत्पत्तिःपुराणेषुप्रसिद्धा।संतुभ्रातरःततश्चकिमित्यतआह।तेभिस्तैर्मरुद्भिः
सहसाधुयासाधुत्वंकल्पस्वकल्पयहविर्भागातेःसहयुद्धंवानोस्मान्समरणेसंग्रामेमावधीःमाहिंसीः
यद्यपिखलुमेदृष्टांतःसंग्रामेयथाविरोधिनंहंसिनतथास्मानिति।किंनोभ्रातरिति।इदमिन्द्रवाक्यं।हेभ्रातरःहे
अगस्त्यहविःप्रदानेनवरप्रदानाभ्यांपरस्परोपकारत्वाद्भ्रातृत्वंतादृशस्त्वंसखासन्अस्मद्धितकार्यपिसन्
नोस्मान्किमपिमन्यसेकस्मादपराधादतिक्रम्यमनुषेअवलपसि।नायमपलापःकिंतुतथ्यमेवेतिच २२
उच्यते।गंतव्यंतेनवमनोमानसंयथायथायथावत्तुविद्मजानीमःकथंजानीथेतिउच्यते।अस्मभ्यमिन्न

दित्सति।अस्मदर्थंनिरूप्यमस्मभ्यंदातुंनेच्छस्येवाइदेवार्थे॥७॥अथचतुर्थीमृचमाह॥७॥ ॥अरंकृण्वंतु
वेदिंसमग्निमिंधतांपुरः।तत्रामृतस्यचेतनंयज्ञंतेतनवावहै॥७॥ ॥इदमिन्द्रवाक्यं।अपरेअगस्त्यवाक्यमाहुः
।इकारत्विजोयूयंअगस्त्योगीत्तनवान्।तस्माद्वेदिमरंकृण्वंतुसमार्जनपर्युक्षणादिनापरिष्कुर्वंतुतथापुरःपुर
स्तात्अग्निमाहवनीयादिकंसमिंधतांइध्मप्रक्षेपेणप्रज्वालयंतु।तत्राग्नावमृतस्यामरणलक्षणस्यवेद
त्वस्यचेतनंप्रज्ञापकंयज्ञंहेअगस्त्यतत्त्वत्दीयंत्वंचाहंचतनवावहै।अगस्त्यवाक्यपक्षेशिष्टमविशिष्टं॥
तत्रवेद्याममृतस्यतत्साधनस्यहविषोचेतनंप्रज्ञापनंमामादनंकुरुतीवआवांपत्नीयजमानौअध्वर्युयज
मानौवा।हेइन्द्रतेत्वदर्थंयज्ञंतनवावहै॥७॥अथपंचमीमृचमाह॥७॥ ॥त्वमीशिषेवसुपतेवसूनांत्वं
मित्राणांमित्रपतेधेष्ठः।इन्द्रत्वंमरुद्भिःसंवदस्वाधप्राशानऋतुथाहवींषि॥७॥ ॥इदमगस्त्यवाक्यं॥इ

यतोजपेत्॥विषंनक्रमतेचास्यसर्वादृष्टविषादपि॥यत्कीटलूतासुविषंदंष्ट्रिवृश्चिकतश्चयत्॥सर्वंचैत २७
न्मंत्रंवैजपन्सर्वमपोहतीति॥७॥प्रथमामृचमाह॥६॥ ॥कंकतोनकंकतोथोसतीनकंकतः॥द्वावि

तिप्लुषीइतिन्यदृष्टाअलिप्सत॥७॥ ॥कंकतःअल्पविषःकश्चित्नकंकतःतद्विपरीतोअनल्पविषोमहा
रोगादिकृतकतेर्गत्यर्थस्यवर्णव्यत्ययेनकृतइतिसरन्भवति॥अथोपिरचसतीनकंकतःसतीनमित्युदक
सतीनामसतीनंगच्छन्मितितन्नामसुपाठात्॥उदकचारीअल्पविषवान्॥कश्चित्डुंडुभादिःएवंद्वावितिअ
ल्पविषमहाविषभेदेनजलस्थभेदेनवाद्विप्रकाराइतिप्लुषीइतिप्लोषणाविति प्रकारद्वैविध्यद्योतकत्व
योःप्रतिपादनायेतिकारद्वयंतथाअदृष्टाअदृश्यमानरूपाःएतत्संज्ञकाश्चकेचित्विषधराएवमुक्तप्र
काराएसंतितेषुनंमान्यलिप्सतविषेशेणलिंपंतिसर्वाण्यंगानिविषम॥दृणोतिकेनैवंकृतमितिज्ञायत
इतिभावः॥७॥अथद्वितीयामृचमाह॥६॥ ॥अदृष्टान्हंत्यायत्यथोहंतिपरायती॥अथोअवघ्नतीहंत्य
थोपिनष्टिपिंशती॥७॥ ॥अनेनविषघ्नोषधिस्तूयते॥आयतीविषदष्टस्यसकाशमागच्छंतीविषनिर्हर्ण

साधनौषधिः अदृष्टान् अदृश्यमानान् विषधरान् हंति। हिनस्ति। अथा अपि च परायती परागच्छंती समार्जनि मम ५
येवक्ति अदृष्टान् हंति नाशयति जलचरविषधरान् अथो अपि च अव घ्नती कर्मणि कर्तृप्रत्ययः अवहन्यमा
नौषधिः स्वगंधेन हंति बहुविषा बहुविषान् यद्वा काचिदौषधिः दंशकान् मारयत्येव। अथो अपि च पिंषती पे
षणं कर्वती दृशात् पिष्यमाणा वौषधिः पिनष्टि न्वो। सा करोत्यस्य विषान्। अथवा सर्वेषु वाक्येषु विषेशेणास
र्वविषकारिणां नाश उक्तः॥ब॥ अथ तृतीयामृचमाह॥ब॥ ॥शरासः कुशरासो दर्भासः सैर्या उत॥ मौं
जा अदृष्टा वैरिणाः सर्वे साकं न्यलिप्सत॥ब॥ ॥अन्यांश्च विषधरानाह। शरासः शरा वेणुदंडसदृशा अं
त्येछिद्राः तृणविशेषाः कुशरासः कुत्सितशराः आत्मछिद्राः शरसदृशाः तृणविशेषाः दर्भासो दर्भाः कुशाः सै २८
यति टाकादिप्रांतो इव तृणविशेषाः आत्मवासा इति प्रसिद्धाः मौंजाः मुंजाः प्रसिद्धाः वैरिणाः वीरणप्रका

रा एतेषु वर्तमानाः अदृष्टाः उक्तरूपाः सार्वविषधराः साकं मिलित्वा न्यलिप्सत निलिपंति स्म॥ग॥ अथ च
तुर्थमृचमाह॥ग॥ ॥नि गावो गोष्ठे असदं नि मृगासो अविक्षत। नि केतवो जनानां न्यदृष्टा अलिप्सत।
॥ग॥ ॥गावो गोष्ठे न्यसदन् निषीदंति मृगासो मृगाः न्यविक्षत निविष्टाः स्वस्वस्थान उपरताः जनानां प्राणि
नां केतवः प्रज्ञानानि उपसर्गश्च तेषां योग्य क्रियाध्याहारनी चान्यनवन् एतस्मिन् समये अदृष्टा अदृश्यमा
नरूपाः संतो न्यलिप्सत निलिंपंति विशेषेण॥ग॥ अथ पंचमीमृचमाह॥ग॥ ॥एत उ त्ये प्रत्यदृश्रन् प्रदोषं
तस्करा इव। अदृष्टा विश्वदृष्टाः प्रतिबुद्धा अभूतन॥ग॥ ॥त्ये ते एते सर्पाः प्रत्यदृश्रन् प्रतिदृश्यंते गात्रो
च्छ्वासादि लिंगेन यद्वा ते गात्रो हंतारः दिवा एते प्रतिदृश्यंते। तत्र दृष्टांतः। प्रदोषं रात्रिदोषाः रात्रिं प्रति तमसा
वृता सुरात्रिषु तस्करा इव। हिंसकाश्चोरा दृश्यंते यथा तद्वत्। कीदृशास्ते अदृष्टाः अपरिदृश्यमानाः विश्वदृ

ष्टाःक्विंदृष्टंयेस्तैतादृशाःप्रतिदृश्यंतेअतोहेनराःप्रतिबुद्धाभवतअनृतननवत॥ब॥द्वितीयस्यपंच ५
मेचतुर्दशोवर्गः॥ब॥अथषष्ठीमृचमाह॥ब॥ ॥द्यौर्वःपितापृथिवीमातासोमोभ्रातादितिःस्वसा॥अदृष्टाविश्वदृष्टास्तिष्ठतेलयतासुकं॥ब॥ ॥अतःपरंविषविचिकित्सा॥तत्रतावनद्रासर्पाःवोयुष्माकंद्यौःपिता॥पृथिवीमातासोमोभ्राता॥अदितिर्देवमातासास्वसाएवंमहानुभावामहोरगा॥अदृष्टाःअन्यैरदृश्यमानरूपाःस्वयंतुविश्वदृष्टाःसर्वस्यद्रष्टारोयूयंतिष्ठततस्वस्वस्थानेमांप्रतिमागच्छतसुखुतराकंसुकयथातथाश्लयतशीरयतगच्छत॥सोमशब्देनसोमधाराफलोकउच्यते॥पृथिव्यांतस्मिंल्लोकस्थानस्थाःसर्पाःस्वस्वस्थानंप्राप्नुत॥अस्मद्बाधंमाकुरुतेत्यर्थः॥ब॥अथसप्तमीमृचमाह॥ब॥ ॥येअंस्यायेअंग्याः २९
सूचीकायेप्रकंकताः॥अदृष्टाःकिंचनेहवःसर्वेसाकंनिजस्यत॥ब॥ ॥येअंस्याःआसाहःअंगगाः

अंसेनवाःअंसाभ्यांखादंतोवातथायेअंग्याःअंगगाःअंगेनशरीरेणहंतारोवासूचीकायःसूचीकाःसूचीसदृशपुच्छरोमाणोवृश्चिकाद्याःयेचप्रकंकताःअल्पविषाअल्पगामिनोवामहोरगाःअदृष्टाअदृश्यमाना॥किंचनयकिंचित्सर्पजातमस्मिन्देशास्मिन्समीपेवोयुष्माकंकिमस्ति॥अतःयूयंसर्वेसाकंसहनितरांतस्यतगच्छतातस्मात्स्थानाद्दूरंगच्छत॥अस्माकंदृष्टिगोचरंमागच्छतेत्यर्थः॥ब॥अथाष्टमीमृचमाह॥ब॥ ॥उत्पुरस्तात्सूर्यएतिविश्वदृष्टोअदृष्टहा॥अदृष्टान्सर्वाञ्जंभयन्सर्वाश्चयातुधान्यः॥ब॥ ॥असौसूर्यःपुरस्तात्पूर्वस्यांदिश्युदेतिकीदृशःसःविश्वदृष्टःविश्वैर्द्रष्टव्यायस्यसतादृशःअदृष्टहाअदृष्टाविषविशेषाःविषधरविशेषावातेषांहंता॥यद्वाअदृष्टमदर्शनमज्ञानमंधकारस्तस्यहंता॥सूर्यउदितेसतिःसर्वेविषधराःविषाणिदापलायंते॥किमर्थमुदेतीतिचेत्॥उच्यते॥सर्वान्अदृष्टान्अदृष्टव्यान्विषरासभादीन्जंभयन्हिंसयन्॥तथासर्वाः

यडुधान्यःयातवोयातनाःतीव्रवेदनाःतासांधात्रीरुत्पादयित्रीर्म्मीहारगीगाहसीवर्जिंनयन्पुरस्तादु
दति।अतोस्मन्त्रोनिडस्यतेतिसंबंधः॥ग॥अथनवमीमृचमाह॥ग॥ ॥उदपप्तदसौसूर्यःपुरुविश्वानि
ऋर्वन्।आदित्यःपर्वतन्भ्योविश्वदृष्टोअदृष्टहा॥ग॥ ॥असौपुरस्ताद्दृश्यमानःसूर्यःसर्वस्यप्रेरकः
आदित्यःउदपप्तत्ऊर्ध्वंगच्छतिपततोर्धुलिभागमेरूपंकिंकुर्वन्विश्वानिवस्तूनिविषाणिपुरुप्रभूतंज्व
र्वन्हिंसन्।कीदृशोसौपर्वतन्भ्यःपर्ववद्भ्यःप्राणिभ्यःतेषामुपकारायआदित्यःविषोदनादीनामदनशील
विश्वदृष्टःविश्वंदृष्टंयेनतादृशःअदृष्टहाअदृष्टानाविषविशेषाणांहंताएवंमहानुभावःसूर्यउधमारो
हति।अतोविशेषशंकानकार्यः॥ग॥अथदशमीमृचमाह॥ग॥ ॥सूर्येविषमासज्जामिदृतिंसुरावतोगृ ३०
हा।सोचिन्नुनमरातिनोवयंमरामारेअस्ययोजनंहरिष्ठामधुत्वामधुलाचकार॥ग॥ ॥आदित्यमंडलेच

तुर्थेनांगुलिनाविषमादायमधुज्ञत्यायोजयित्वानिर्विषोनवेदिति।यदेतद्विषविद्यायामुक्तंतदिदमन्त्रो
च्यते।अहंविषाहृतोगरस्यःसूर्येसर्वस्यप्रेरयितरिमधुविद्यारूपेसूर्यमंडलेविषमाहृस्थवितमानंसूर्येआ
सज्जामिआसक्तंकरोमि।तत्रदृष्टांतःसुरावतोगृहेनिसुरानिर्माष्टिसदनेदृतिमिवचर्ममयंसुरापात्रमिवय
थानकर्तुर्नदोषायनवतितद्वद्विषमादित्यस्यनबाधकमित्यर्थः।सोचिन्।सचित्सज्जयांकःप्रसिद्धोस्य
सःसूर्यःखलुनमरातिनम्रियतेनोवयंमरामतद्वदुयद्यानन्नेवविवस्यवोजितत्वाद्वयमपिनम्रियामहे।उ
नयोरमरणोकारणमाह।हरिष्ठाःहरयोश्वाःतेषुस्थितआदित्यःआरेदूरेअस्यविषस्ययोजनंप्रापणंचकार।
नदेवोच्यते।ह्वेविषवांत्वांमधुअमृतंचकारविषस्यविषनावंदूरेपचोद्यामृतीचकारेति।एपेवमधुलामधु
दात्रीनिर्विषीकर्त्रीमधुविद्यायदादित्यस्यविषयोजनं।तेनचामतीयंरणंयदस्तिएषामधुविद्या॥ग॥द्दति।

यस्यपंचमेपंचदशोवर्गः॥छ॥अथएकादशीमृत्वमाह॥छ॥ ॥इयत्तिकाशकुंतिकामकाळघासमत्तेवि ५
षंसोचित्तुनमरातिनोवयंमरामारेअस्ययोजनंहरिछामधुत्वामधुलाचकार॥छ॥ ॥इयत्तिकाइय
त्तांकुवर्णाइयत्तावबालेत्यर्थःशकुंतिकाःशकुंतशकुनःतस्यस्त्रीतांकपिंजलीमाकृत्मका।सानेतव
विषंजघासनत्हितवती।साविषइत्रशितिप्रसिद्धा।साचित्तसाउइतिनिपातनसमुदायएकंपदं।सापिशकुं
तिकानम्रियतेनित्यप्रतिपन्नत्वाद्विषस्यशिष्टंव्याख्यातचरं।अनेनविधायांपदेइहत्तविषंतस्यशा
कुंतोत्यआदित्याप्रदानसमस्तीत्यफलंनवति॥छ॥अथद्वादशीमृत्वमाह॥छ॥ ॥त्रिःसप्तविष्णुलिंग
काविषस्यपुष्पमन्नन्।ताश्चित्तुनमरंतिनोवयंमरामारेअस्ययोजनंहरिछामधुत्वामधुलाचकार॥छ॥ २
॥ ॥त्रिःसप्तत्रिगुणिताःसप्तसंख्याकाविष्णुलिंगकाविविधाःविष्णुलिंगकाःसप्तसुलिंकाखलोइति

अल्कस्सलनेदेनैकविंशतिर्यसिंतोःयद्वात्रिःसप्तंएकविंशतिनेदाविष्णुलिंगकाःसूक्ष्मचटकिका
विषप्रतिपन्नन्हताःविषस्यास्मदावरकस्यपुष्पंपोषमन्नन्।अदंत्तनाशयंत्तताश्वनमरंतिनवय
मपि।शिष्टमविशिष्टं॥छ॥अथत्रयोदशीमृत्वमाह॥छ॥ ॥नवानांनवतीनांविषस्यरोपुपीणांस
र्वासामयनंनामारेअस्ययोजनंहरिछामधुत्वामधुलाचकार॥छ॥ ॥नवानांनवतीनांनवाधिका
नांनवतिसंख्याकानांनदीनां।पुनःकीदृशीनांविषस्यास्मद्यपेकस्यसर्वस्यविषस्यपुरोपुपीणांले
पयित्रीणांछेत्रीणांसर्वासांउक्तानांगंगादिनदीनांनामान्ययनंरक्षामिसंकीर्तयामि।रुदेछांदसेलु
ङिछांदसःल्लुक्।इयइोर्नः।अस्ययोजनमित्यादिगतं॥छ॥अथचतुर्दशीमृत्वमाह॥छ॥ ॥त्रिःस
प्तमयूर्यःसप्तस्वसारोअग्रुवःतास्तेविषंविजभ्रिरुदकंकुंनिनीरिव॥छ॥ ॥त्रिःसप्तएकविंशति

संख्याकाःमयूर्योमिथुरास्त्रियःताःविषकारिसर्पदूषिण्यइतिप्रसिद्धानागद्वेषिगरुडपक्षादुत्पन्नत्वात्
तथासप्तएतत्संख्याकाःसर्पाणांस्वभावाःस्वसारःस्वयमेवसरणाःअप्सुवःनदीनामेतत्अप्सुरगंगाद्याः
प्रसिद्धाःसप्तनद्यःसंतितास्तेदेइंहृतविषंविजभ्रिरेविशेषेणाहरंतु।तत्रदृष्टांतः।उदकंकुंभिनीः।कुंभिन्यः
कुंभवत्यःकुंभेनजलहारिण्यइवतायथातद्धरंतितद्वत्सप्तोमयूर्यःतिप्रसृतंहरंतु॥छ॥अथपंचद
शीमृचमाह॥छ॥ ॥इयत्तकःकुषुंभकस्तकंभिनद्म्यश्मना॥ततोविषंप्रवावृतेपराचीरनुसंवतः॥छ॥
॥ ॥इयत्तकःकुस्येयत्तःअल्पप्रमाणइत्यर्थःकुषुंभकःकुंटथीसुंभतिविषतीतिसर्पिणांकुंस्मितं
सुंभयितानिकुषुंभकोनकुलःसतेविषंहरत्वितिशेषः।यदिनतथासकरोतितर्हितंकुस्मितंतंनकुलमश्म २२
नानिनाग्निविदारयामिविषनिर्हरणप्रयोगेयावद्विषामगामतंपाषाणमनुघातमनुतिष्ठंतितद्विदःत

दिदमत्रोक्तं।ततःएवंप्रयोगेसतिविषंप्रवावृतेविपावृत्ताहेडोद्विषंप्रवर्त्तात।निर्गच्छत्विकाःप्रति।उच्यते।प
राचीःपरांगंचनवर्त्तरितिदारगाःसंवतःसंविभागवतोदिशोनुलक्षीकृत्यदिगंतंप्रतिगच्छतु।नमांप्रति
गच्छत्वित्यर्थः।अध्यायोपाकरणयोत्सर्गयोःकुषुंभकस्तदित्यंत्याविनियुक्तादधिसक्तुरसुहोतीत्यपक्र
म्यकुषुंभवस्तदब्रवीदितिसूत्रितत्वात्।सै॥छ॥सैषाषोडशीमृचमाह॥छ॥ ॥कुषुंभकस्तदब्रवीद्गिरेः
प्रवर्त्तमानकः।वृश्चिकस्यारसंविषमरसंवृश्चिकतेविषं॥छ॥ ॥एवंमहानुभावेनागस्त्यमहर्षिणा
उच्यमानेसनेसतिगिरेःसकाशात्प्रवर्त्तमानकःप्रवर्त्तमानोतिशीघ्रमभिगच्छन्कुषुंभकोनकुलःतद
ब्रवीत्।तद्वाक्यमाचख्यौ।किंतदिति।उच्यते।वृश्चिकस्यैतद्विषंअरसंअसारंबाधकंनभवतीत्यर्थः।तथालो
केपिसर्पदष्टमपिकृम्यादिदंशानेमेवन्नतोनबाधइतिहिववदंति।एतमनिवचनेनसोपिनिर्विषोभवत्।

अथतंवृश्चिकंप्रतिनकुलआह।इहवृश्चिकतेविषमरसअतस्त्वमपिकिंकरिष्यतितस्मात्परिहरेतियादेव ५
मवादीत्तदाप्रभृतिहवृश्चिकविषमसारमनवत्।एषाविषनिर्हरणफपनिषत्॥७॥इतिद्वितीयस्यपंच
मेषोडशोवर्गः॥७॥ ॥श्री॥ ॥इतिसायणाचार्यविरचितेमाधवीयेवेदार्थप्रकाशेद्वितीयाष्टकेप्रथमे
मंडलेचतुर्विंशोनुवाकः॥७॥ ॥श्री॥ ॥प्रथमंमंडलंच॥ ॥शतर्चिनांप्रथमंमंडलंव्याख्यातं॥ ॥
अथगार्त्समदंद्वितीयंमंडलंव्याख्यायते॥ ॥७॥ ॥त्वमग्नेद्युभिरित्यादिकंद्वितीयंमंडलंचत्वारोनुवा
काः।तेषुप्रथमेनुवाकेएकादशसूक्तानि।तत्रत्वमग्नेद्युभिरितिषोडशर्चंप्रथमंसूक्तं।मंडलद्रष्टागृत्समद
ऋषिःसचपूर्वमांगिरसकुलेशुनहोत्रस्यपुत्रःसन्यज्ञकालेसुरैर्गृहीतःइंद्रेणमोचितःपश्चात्तद्वचनेनैव २२
भृगुकुलेशुनकपुत्रोगृत्समदनामाभूत्।तथाचानुक्रमणिकायआंगिरसःशौनहोत्रोभूत्वाभार्गवः
शौनकोभवत्सगृत्समदोद्वितीयंमं ऽलमपश्यदिति।तथातस्यैवशौनकस्यवचनमृष्यनुक्रमणे।त्वमग्न
इतिगृत्समदःशौनकोभृगुतांगत।शौनहोत्रःप्रकृत्यातुयआंगिरसउच्यतइति।तस्मान्मंडलद्रष्टाशौन
कोगृत्समदऋषिःजगतीछंदःमंडलादिपरिभाषयाग्नेयं।अत्रानुक्रमणिका।त्वमग्नेन्नागतंत्विति।प्रा
तरनुवाकाश्विनशस्त्रयोर्जागतच्छंदसीदमादिसूक्तद्वयस्यविनियोगः।त्वमग्नेद्युभिरितिसूक्तस्त्रि
तत्वात्।उपाकरणोत्सर्जनयोरप्याद्याविनियुक्ता॥७॥तत्रप्रथमामृचमाह॥७॥ ॥त्वमग्नेद्युभिस्त्वमाशु
शुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि।त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वंनृणांनृपतेजायसेशुचिः॥७॥ ॥हेअग्ने
अग्रणीत्वादिगुणविशिष्टहेनृणांनृपतेनृणांमनुष्याणांमध्येनराष्टारःसंति।तेषांविशेषेणपालयितः
यहोभाभ्यांपदाभ्यांबहुत्वंनित्यस्वामित्वंचप्रतिपाद्यतेसर्वेषामपिनराणांनित्यपालकेत्यर्थः।नृणा

मित्यस्यनिघाताभावश्छांदसः।तादृशहेदेवत्वंक्रतियागादिवसैःनिमित्तभूतैर्जायसेयागार्थंमननेनोत्प ५
द्यसइत्यर्थः।यद्वातादृशोद्दिवसेभ्यःइतोजायसेतत्रयागादिवसेषुप्रसिद्धोभवसीत्यर्थः।तथात्वमाशुशुक्ष
णिःजायसेआसर्वतोदीप्यमानोभवसि।आङ्उपपदेशुचदीप्तावित्यंतस्यसनंतस्यछांदसमिदंरूपं।य
द्वा।आशुशीघ्रंशुचादीप्तासनयनःसंसेव्यतइति।आशुशुचंशोकंसनोतिददातिशत्रुभ्योदोहादिनेत्या
शुशुक्षणिः।तादृशोभवसि।एवंसर्वत्रप्रतिविशेषणंजायसइतियोज्यं।हेअग्नेत्वंअद्भ्योवृष्ट्युदकेभ्योजा
यसेविद्युद्रूपेणवाडवरूपेणवासमुद्रोदकेभ्यः।अश्मनोमेघात्पाषाणाद्वापरिजायसे।योअश्मनो
रंतरग्निंजजानेतिहिमंत्रांतरं।त्वंवनेभ्योवृक्षादिसमूहेभ्योदावरूपेणत्वमोषधीभ्यःवैश्वानररूपेण। ३५
एवंमनुनावस्त्वंमथनेनोत्पन्नःसन्सर्वात्मकोभवसीत्यर्थः।शुचिरेवजायसे।यद्वाशुचिरादित्यरूपे

जायसइत्यर्थः।अत्रत्वमग्नेयज्ञनिरस्तोनिरित्यादिनिरुक्तमनुसंधेयं॥१॥अथद्वितीयामृचमाह॥१॥ ॥त
वाग्नेहोत्रंतवपोत्रमृत्वियंतवनेष्ट्रंत्वमग्निदृतायतः।तवप्रशास्त्रंत्वमध्वरीयसिब्रह्माचासिगृहपतिश्चनोद
मे॥२॥ ॥हेअग्नेहोत्रंहोतुःकर्मशस्त्रयाज्यादिलक्षणंयदस्तितदपितवैवत्वदर्थमित्यर्थः।तथापोत्रं
पोतुःकर्मयदस्तितदपितवैव।तथाऋत्वियंप्राप्तकालमार्त्विज्यंतवैव।नेष्ट्रंनेष्टुःकर्मप्रस्थितयाज्यादिरू
पंतवहेअग्नेत्वमग्निन्नयतोअग्नीध्रस्त्वमेवासि।तथाऋतायतोयज्ञमिच्छतस्तवैवप्रशास्त्रंयत्प्रशास्तुर्मैत्रा
वरुणस्यकर्मतत्हेअग्नेत्वमध्वरीयसिअध्वरंयज्ञंकामयसेअध्वर्युर्भवसीत्यर्थः।तथाध्वर्युशब्दात्क्यप्रत्ययेः
अध्वर्युरध्वरयुरध्वरंकामयतइतिवेदितिनिरुक्तं।तथाब्रह्माब्राह्मणाच्छंदस्यपसितथानोदमेस्मद्यज्ञगृहे
गृहपतिश्चासीति॥२॥अथतृतीयामृचमाह॥२॥ ॥त्वमग्नइंद्रोवृषभःसतामसित्वंविष्णुरुरुगायोनम

स्यः॥त्वंब्रह्मारयिविद्ब्रह्मणस्पतेत्वंविधर्तःसचसेपुरंध्या॥१॥ ॥हेअग्नेत्वंयतःसतांवृषभोवर्षितासिअ ५
तइंद्रोसि।यद्वासतांमाधृतांइंद्रोसिकामानांवर्षितासि।त्वंविष्णुरसि।यतउरुगायःबहुभिर्गीयमानोनमस्य
नमस्कार्यश्चभवसि।हेब्रह्मणस्पतेपरिवृढस्यकर्मणोमंत्रस्यपालयितस्त्वंयतःरयिवित्गवादिधनस्यवे
त्ताअतोब्रह्मासि।हेविधर्तःविविधकारकवैश्वानररूपाग्नेपुरंध्याबहुप्रकारयाबुध्यासचसेसमइवर्त
सेसर्वदाबुध्यासहयसइत्यर्थः॥१॥अथचतुर्थीमृचमाह॥१॥ ॥त्वमग्नेराजावरुणोधृतव्रतस्त्वंमित्रो
भवसिदस्मईड्यः॥त्वमर्यमासत्पतिर्यस्यसंभुजंत्वमंशोविदथेदेवभाजयुः॥१॥ ॥हेअग्नेत्वंयतोधृत
व्रतःधारितकर्मासिअतोवरुणोराजासि।यतोदस्मःशत्रूणामुपक्षयितासिईड्यःस्तुत्यश्चअतोमित्रःएतन्ना ३५
मकोदेवासि।यतःसत्पतिःसतामभिमतप्रदानेनपालयिताअतःअर्यमाभवसि।दातृत्वंचार्यम्णोलिंगं।अ

र्यमेतितमाहुर्यददातीतियस्यार्यम्णोदानंसंभुजंसततंभुजव्यापकंभवति।यद्वायस्यधनंसंभुजंसम्य
क्भोगायसाधुयद्वीहणांतथात्वंअंशःभूर्यमहरयंतिरश्चतएतन्नामकोदेवोसिताहशाहदेवविदथेस्म
दीययज्ञेभाजयुःफलानांभाजयिताप्रापयितासि॥१॥अथपंचमीमृचमाह॥१॥ ॥त्वमग्नेत्वष्टाविध
तेसुवीर्यंतवग्नावोमित्रमहःसजात्यं।त्वमाशुहेमाररिषेस्वश्व्यंत्वंनरांशर्धोअसिपुरूवसुः॥१॥ ॥१॥
हेअग्नेत्वष्टाफलस्यसाधुसंपादयितात्वंविधतेपरिचरतेजनायसुवीर्यंधारणेनवीर्यंधनंतद्धेतुर्भवसि।ग्ना
वःस्तुतिवाचःसंतितास्तवत्वयाकृताः।हेमित्रमहःहितकारितेजसःसजात्यंअस्माकंबांधवंभजसइत्यर्थः
हेअग्नेआशुहेमाआशुप्रेरयितात्वंस्वश्व्यंशोभनाश्वसमूहोपेतंफलंररिषेददासि।हेअग्नेपुरूवसुःप्रभू
तधनस्त्वंनरांनराणांशर्धोबलस्थानीयोसि॥१॥इतिद्वितीयस्यपंचमेसप्तदशोवर्गः॥१॥अथषष्ठीमृचमाह॥१॥

॥ ॥त्वमग्नेरुद्रोअसुरोमहोदिवस्त्वंशर्धोमारुतंपृक्षईशिषे।त्वंवातैररुणैर्यासिशंगयस्त्वंपूषावि
धतःपासिनुत्मना॥ब॥ ॥हेअग्नेत्वंमहोदिवोमहतोद्युलोकात्उपलक्षणमेतत्।लोकत्रयात्अ
सुरःशत्रूणांनिरसितारुद्रोसिरुद्दुःखंदुःखहेतुर्वापापादिःतस्यद्रावयिताएतन्नामकोदेवोसिरुद्रो
वाएषयदग्निरित्यादिश्रुतेरुद्रशब्देनव्यवहारात्।यद्वात्वंरुद्रःरोतिमामनिष्ठानराडःस्वेपतिष्यंती
तिरुद्रःतादृशोसि।रुद्रोरौतीतिसतइतिहिनिरुक्तं।तथामहोमहतोद्युलोकस्यसंबंधीअसुरोसिअ
सुर्वलंतस्यदाताआदित्यरूपश्चत्वमसि।अग्नेर्द्युलोकसंबंधअसुरस्तत्रवादिवोअसुरायमन्मेत्या
दिषु।तथात्वंमारुतंशर्धःमरुत्संबंधरूपंबलमसिवायुरूपश्चत्वमसीत्यर्थः।एवमग्न्यादित्यवायुरूप ३६
स्त्वंपृक्षोन्नस्यहविर्लक्षणस्यत्वमीशिषेईश्वरोभवसियस्मादेवंतस्मात्त्वंवातैर्वायुसदृशैररुणैररु

णैररुणवर्णैरश्वैःशंगयःसुखस्यगृहरूपआवासभूतःसन्यासिप्राप्नोषियागगृहं।यद्वाअरुणैर्गम
नशीलैर्वातैर्वायुभिर्नुन्नःसन्यासिवने।तथात्वंपूषासर्वस्यपोषणःसन्नुक्षिप्रंत्मनाआत्मनाअनुग्र
हरूपयास्वबुद्ध्यैवविधतःपरिचरतोयजमानान्पासि॥ग॥अथसप्तमीमृचमाह॥ग॥ ॥त्वमग्नेद्रवि
णोदाअरंकृतेत्वंदेवःसवितारत्नधाअसि।त्वंभगोनृपतेवस्वईशिषेत्वंपायुर्दमेयस्तेविधत्॥ब॥ ॥अ
हेअग्नेत्वंअरंकृतेत्वामलंकुर्वतेयजमानायद्रविणोदाःहिरण्यस्यदातासिदेवोद्योतमानःसवितासवि
तासर्वस्यसत्कर्मसुप्रेरकस्त्वंरत्नधारमणीयानांधनानांमणिमुक्तादीनांधारयितासि।तथाहेनृपते
नृणांपालकाग्नेत्वंभगोभजनीयःसन्वस्वोवसुनोधनस्यईशिषेसमर्थोभवसि।दात्वंयोयजमानोद
मेयज्ञगृहेतेत्वांअविधत्परिचरतितस्यपायुःपालकस्त्वमसि॥ग॥अथाष्टमीमृचमाह॥ब॥ ॥ग॥

त्वामग्नेदमआविश्पतिंविशस्त्वांराजानंसुविदत्रमृंजते।त्वंविश्वानिस्वनीकपत्यसेत्वंसहस्राणिशतादश
प्रति॥८॥ ॥हेअग्नेविश्पतिंयजमानानांपालकंत्वांविशःयजमानादमेस्वकीयेयज्ञगृहेआआसाद ५
यंति।उपसर्गवशाद्योग्यक्रियाध्याहारः।तथात्वाराजानंदीप्यमानंसुविदत्रंशोभनज्ञानंअस्मदनुग्र
हचेतस्कंसुधनंवात्वांऋंजतेप्रसाधयंति।ऋंजतिःप्रसाधनकर्मेतियास्कः।यतएवंततोहेस्वनीकशोभनज्वा
लारूपसेनत्वंविश्वानिसर्वाणिद्रव्याणीतिशेषः।षष्ठ्यर्थेद्वितीया।विश्वेषांद्रविणानांस्वसोमभराडाशादी
नांपत्यसेईश्वरोभवसि।ईश्वरनामैतत्।इष्यतिपत्यतइतितन्नामसुपाठात्।यद्वापतिनात्वमाचरसि।त्वं
सहस्राणिशतानिदशएतत्संख्याकानिप्रतिएतत्संख्याकानामभिमतसाधनानांप्रतिनिधिरित्य ३७
र्थः।प्रतिःप्रतिनिधिप्रतिदानयोरितिकर्मप्रवचनीयत्वं।तैर्यत्फलंभवतितत्त्वयालभ्यतइत्यर्थः॥८॥अथनवमी॥

॥ ॥त्वामग्नेपितरमिष्टिभिर्नरस्त्वांभ्रात्रायशम्यातनूरुचं।त्वंपुत्रोभवसियस्तेविधत्त्वंसखासुशेवःपा
स्याधृषः॥९॥ ॥हेअग्नेपितरंपालकंत्वांनरोनेतारोयजमानाइष्टिभिरेषणसाधनैर्यागैःयजंतइतिशेषः॥
पितृवत्पालनाययजंतइत्यर्थः।तथातनूरुचंशरीराणांदीपकंशरीरेषुदीप्यमानंवैश्वानरात्मनात्वांभ्रातृ
त्वायसौभ्रात्रायशम्याकर्मनामैतत्कर्मणायजंतइतिशेषः।यद्वोभयत्रवक्ष्यमाणेनाविधदित्यनेनसंबंधः
हेअग्नेयोनरस्तेत्वांअविधत्परिचरतितस्यत्वंपुत्रोभवसिपुत्रवत्पालयिताभवसितथात्वंसखासमा
नख्यानःसखिवद्धितकारीसुशेवःशेवमितिसुखनामसुखंनामसुसुखकारीसन्आधृषःआधर्षका
त्पापादिरक्षसिपितृत्वकामयपितृत्वेनभ्रातृत्वकामायभ्रातृत्वेनपुत्रकामायपुत्रस्थानीयोभवसित्रि
प्रकारेणरक्षसीत्यर्थः॥९॥अथदशमीमृचमाह॥१०॥ ॥त्वमग्नऋभुराकेनमस्यस्त्वंवाजस्यक्षुमतो

रायईशिषे।त्वंविभास्यनुदक्षिदावनेत्वंविशिक्षुरसियज्ञमातनिः॥७॥ ॥हेअग्नेत्वंरुक्षुःउरुत्वासममानो
मेधावीवात्वमाकेअंतिकेनिभावेवनमस्योनमस्कार्यःस्तुत्यइत्यर्थः।इतरदेवतावन्मंत्रप्रतिपाद्यत्वाका
रेणस्कृत्योनभवसि।किंतुप्रत्यक्षइत्यर्थः।तथात्वंक्षुमतःशाश्वतःसर्वत्रश्रूयमाणस्यवाजस्यान्नस्य
रायोधनस्यचईशिषेस्वामीभवसि।अनस्तहृदीत्यर्थः।हेअग्नेत्वंविभासिविशेषेणदीप्यसेतदर्थम
नुक्रमेणैवधक्षिदहसिकाष्ठादीन्देहलीदीपिप्ररूपंसंहितायांनपठ्यतवोनावश्छांदसः।किमर्थमवंदा
नवेछेदनायांधकारस्ययद्वारुविपोदानवतेयजमानायवा।किंचत्वंयज्ञंविशिक्षुःविशेषेणशिक्षयि
तासाधयितासि।नलोकाव्ययेतिषष्ठ्यानिषेधः।तथाआतनिःफलस्यसर्वतोविस्तारयिता॥७॥इति ३९
द्वितीयस्यपंचमेष्टादशोवर्गः॥७॥अथैकादशी॥ ॥त्वमग्नेअदितिर्देवदाशुषेत्वंहोत्राभारतीवर्द्ध

सेगिरा।त्वमिलाशतहिमासिदक्षसेत्वंवृत्रहावसुपतेसरस्वती॥७॥ ॥हेअग्नेदेवत्वंदाशुषेहविर्द
त्तवतेयजमानायादितिरखंडयितापरिपालयतासि।ययाअदीनाभूमिरसि।किंचत्वंशतहिमाहिम
शब्दःकालोपलक्षकः।अपरिमितकालानित्याइलाभूमिरसितादृशीसतीदक्षसेदानायसमर्थाभ
वसि।तङःउत्तरत्वादनिघातः।तथाहेवसुपतेधनपालकवृत्रहापापादेर्हंतात्वंसरस्वतीसरणवान्वा
युक्तस्संबंधिनीएतन्नियामकामाध्यमिकासिआदित्याग्निवायूनांसंबंधिन्याभारतीलासरस्वत्याख्या
यातिस्रोदेव्यःसंतिताअपित्वमेवेत्यर्थः॥७॥अथद्वादशी॥७॥ ॥त्वमग्नेसुभृतउत्तमंवयस्तवस्पा
र्हेवर्णआसंदृशिश्रियः।त्वंवाजःप्रतरणोवृहन्नसित्वंरयिर्बहुलोविश्वतस्पृथुः॥७॥ ॥हेअग्नेत्वंसु
भृतःसुष्टुपोषितःसन्उत्तमंनिरतिशयंवयःअन्नमायुष्यंवात्वमसितत्संपादकोसीत्यर्थः।तथातव

स्पार्हैः स्पृहणीयैर्वासि ज्योतिष्मत्त्वादिलक्षणे संदृशि सम्यग्दर्शनीये श्रियः ऐश्वर्याणि कांतयो वः आश्रित्य व- ५
र्तंते। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। किंच त्वं वाजः अन्नं तत्साधकत्वात्ताच्छब्द्यं अन्नसाधक इत्यर्थः।
प्रतरणः प्रतारयिता पापानात्। अत एव बृहत् महानसि। तथा त्वं रयिर्धनरूपोसि बहुः सर्वविषयबाहुल्यो-
पेतः। विश्वतः पृथुः विस्तीर्णः प्रख्यात इत्यर्थः॥ग॥ अथ त्रयोदशी॥ग॥ ॥त्वामग्न आदित्यास आस्यं१ त्वां
जिह्वां शुचयश्चक्रिरे कवे। त्वां रातिषाचो अध्वरेषु सश्चिरे त्वे देवा हविरदंत्याहुतं॥ब॥ ॥हे अग्ने त्वां आ-
दित्यासः अदितेः पुत्रा इंद्रादयः आस्यं स्वकीयं मुखं भक्षणपानादिसाधनं चक्रिरे इति वक्ष्यमाणेन सं-
बंधः। तथा हे कवे क्रांतप्रज्ञ त्वामेव शुचयः शुद्धा दीप्ता वा देवा जिह्वां स्वकीयजिह्वास्थानीयमास्वादन- ३९
साधनं चक्रिरे त्वन्मुखेनैव भक्षयंति त्वज्जिह्वयैवास्वादयंतीत्यर्थः। तथा त्वामेव रातिषाचः रातिर्हविर्दत्त-

हविरादि धनं च तेन समवेता देवा अध्वरेषु यज्ञेषु सश्चिरे सेवंते त्वामेव प्रतीक्षंते विना त्वया स्वेषां हविर्लक्ष-
णायोगात्। एवं कृत्वा त्वयि देवाः सर्वे आहुतं सर्वतो दत्तं हविरदंति भक्षयंति। एवं सर्वदेवोपकारिणं म-
नुनावं स्तौमीत्यर्थः॥ग॥ अथ चतुर्दशी॥ग॥ ॥त्वे अग्ने विश्वे अमृतासो अद्रुह आसा देवा हविरदंत्याहु-
तं। त्वया मर्तासः स्वदंत आसुतिं त्वं गर्भो वीरुधां जज्ञिषे शुचिः॥ग॥ ॥हे अग्ने त्वे त्वयि विश्वे सर्वे अमृतासः
अमरणधर्माणः अद्रुहः अद्रोग्धारो देवा आसा त्वदीयेनास्येन आहुतं हविरदंति भक्षयंति। आस्यशब्दस्य
तृतीयैकवचने पद्दन्नोमास् इत्यादिना आसन्नादेशः। ऊडिदंपदादि इति विभक्तेरुदात्तत्वं। तथा मर्तासो मनु-
ष्या अपि त्वया साधनभूतेन आसुतिं रसरूपमन्नादिकं स्वदंति आस्वादयंति। त्वमेव वीरुधां लतादीनां गर्भः
गर्भस्थानीयः तासां मध्यावस्थानात् वसुः सर्वेषां निवासभूतः सन् जज्ञिषे उत्पादयसि सस्यान्नं॥ब॥ अथ

पंचमी॥छ॥ ॥त्वंतान्संचप्रतिचासिमज्मनाग्नेसुजातप्रचदेवरिच्यसे।पृक्षोयदत्रमहिनावितेभु ५
वदनुद्यावापृथिवीरोदसीउभे॥छ॥ ॥हेअग्नेत्वंमज्मनाबलेनतान्प्रसिद्धान्देवान्संचासिसंगछ
सि।तैःसहितोभिनवसि।तथासामर्थ्येनप्रतिचासिप्रत्येकंतैर्विभिन्नःप्रतिनिधिर्वानिवसि।प्रतिस्वीका
रसमयेतैःरहितोनवसिवियुक्तश्चनवतीत्यर्थः।हेसुजातशोभनजननमंत्रमहितमथनेनोत्पन्नत्वा
द्देवःसुजन्मत्वं।तादृशस्त्वंहेदेवप्ररिच्यसेचातैर्बलेनचाधिकोनवसि।आधिक्येकारणमाह।यत्य
स्मात्अत्रास्मिन्यज्ञेपृक्षःसर्वमप्यन्नंव्यत्ययेनबहुवचनं।ततेतवविभुवत्समर्थंभवतिमहिमामा
हात्म्येनयतोमहत्त्वमस्तिअतइत्यर्थः।उक्तेतितदुच्यते।रोदसीसर्वनिरोदनस्वभावेउभेद्यावापृथिव्या ५०
वनुतेप्रतितयोर्मध्येव्याप्तंइत्यर्थः।त्वयिहुतमन्नंत्वन्महत्त्वेनलोकत्रयेव्याप्तमित्यर्थः॥छ॥अथषोडशी॥छ॥

॥ ॥येस्तोतृभ्योगोअग्रामश्वपेशसमग्नेरातिमुपसृजंतिसूरयः।अस्मांचतांश्चप्रहिनेषिवस्यआबृहद्वदेम
विदथेसुवीराः॥छ॥ ॥अनयाहोतास्तुतिनिगमव्याजेनमाशास्ते।हेअग्नेसूरयोमेधाविनःप्रेरयितारो
वायजमानाःस्तोतृभ्यःस्तुतिकर्तृभ्योअग्रांगावोग्रगामिन्योयस्यास्तादृशीं।गोप्रमुखांअश्वपेशसंपेशइति
रूपनामअश्वेननिरूपणीयांएतद्वयंप्राधान्याभिप्रायं।गोश्वाश्वश्चाजाश्चेतिदक्षिणापरिगणनेगवा
श्वयोःप्राधान्यात्।तादृशींरातिमुपसृजंतिददतेतान्यजमानानस्मांश्चर्त्विजोवस्योवसीयःश्रेष्ठंस्वर्गादि
स्थानंआसर्वतःप्राणादिभिःप्रकर्षेणनयसिखलुनयेत्यर्थः।हिप्रसिद्धौवयंचसुवीराःशोभनपुत्रादिस
हिताविदथेयज्ञेबृहद्बृहत्महत्मंत्रजातंचवदेमोच्चारयामामःस्तुमइत्यर्थः॥छ॥इतिद्वितीयस्यपंचमेए
कोनविंशोवर्गः॥छ॥ ॥यज्ञेनवर्द्धतेतित्रयोदशर्चंद्वितीयंसूक्तंमंडलद्रष्टुःगृत्समदस्यार्षंमंडलादित्वा

ग्नेयमितिपरिभाषयाग्नेयं।उशद्धेत्यनुवर्त्तनादिदमपिजागतं।यज्ञेनसप्तोनेत्यनुक्रांतं।प्रातरनुवाकाश्विन
शस्त्रयोर्जागतेछंदस्यविनियोगः।सूत्रंतुपूर्वसूक्तएवोक्तं।तथाचातुर्विंशिकेतृतीयसवनेजातवेद
स्यनिविद्धानमिदं।चातुर्विंशिकंतृतीयसवनमिति।चतुर्विंशादेतिदिष्टत्वात्।।७।।तत्रप्रथमा।।७।।
यज्ञेनवर्द्धतजातवेदसमग्निंयजध्वंहविषातनागिरा।समिधानंसुप्रयसंस्वर्णरंद्युक्षंहोतारंवृजनेषु
धृर्षदं।।७।। ।।हेयजमानाऋत्विजोवायूयंजातवेदसंजातानांवेदितारंजातधनंजातप्रज्ञंवा
ग्निंयज्ञेनयागेनवर्द्धतसामान्येनोक्तंविशेषेणाह।हविषाचरुपुरोडाशादिनातना।विस्तृतयागि
रास्तुत्याचयजध्वंपूजयध्वं।कीदृशंतंसमिधानंसमिध्यमानंसुप्रयसंशोभनान्नंस्वर्णरंस्वर्गेनितथाय
जमानायस्यताहशं।यद्वास्वरितिसर्वपर्यायिस्तुतीनांनेतारःस्तोतारःबहुस्तोतारमित्यर्थः।द्युक्षंदी

MEMORIAL

प्तंद्युनिवासिनंवाहोतारंहोमसंपादकंवृजनेषुबलेषुधृर्षदंतंबलस्यकर्त्तारमित्यर्थः।अग्नेपाटवेसति
शरीरंबलवन्नवतीतिप्रसिद्धं।।७।।अथद्वितीया।।७।। ।।अनित्वानक्तीरुषसोववाशिरेग्नेवत्संनस्वसरे
षुधेनवः।दिवइवेदरतिर्मानुषायुगाक्षपोभासिपुरुवारसंयतः।।७।। ।।हेअग्नेत्वात्वांअग्निप्रतिन
क्तीरात्रीउषसःअह्वानिसर्वासुरात्रिषुसर्वेष्वप्यहस्सुयद्वानक्ताशब्दःसायंकालंलक्षयति।सायंप्रातरग्नि
होत्रस्यसद्भावात्सर्वेष्वकालेषुसायंप्रातःकालेषुवाववाशिरेआक्रांतवंतेयजमानायष्टुं।यद्वाअह्ना
निरात्रयश्चत्वामेवकामयंतेतेषुतंकालेकर्मणाश्चोदनात्कालानांकामनमुपचर्यते।तत्रदृष्टांतः।स्व
सरेषुस्वयंसरणशीलेषुगृहेषुसुष्ठुसरणाधिकरणेषुगोष्ठेषुवाधेनवोवत्संनवत्समिव।किंचइषु
रुवारबहुभिर्वरणीयाग्नेसंयतोनियतस्त्वंदिवइवद्युलोकस्येवअरतिःव्याप्तोविस्तृतः।तत्रत्यानादे

वानांहविःप्रदानायैवसर्वत्रवांतेत्यर्थः।मानुषामानुषाणांयजमानानांसंबंधिनीयुगायुगानियुगशब्दः ५
कालोपलक्षितः।प्रातरादिसवनानिसर्वेषुसवनेषु।अत्यंतसंयोगेद्वितीया।क्षपारात्रीःसर्वासुरात्रि
ष्वपिआभासिसमंतादीप्यसे॥छ॥अथतृतीया॥छ॥ ॥तंदेवाबुध्नेरजसःसुदंससंदिवस्पृथिव्योर
रतिंन्येरिरे।रथमिववेद्यंशुक्रशोचिषमग्निंमित्रंनक्षितिषुप्रशंस्यं॥छ॥ ॥तंप्रसिद्धयुक्तगुणविशिष्ट
मग्निंदेवाःअसिताव्यवहर्तारऋत्विजोवारजसोरंजनात्मकस्यलोकस्यबुध्नमूलेपृथिव्यांवेद्यामित्य
र्थः।तत्रन्येरिरेनितरामीरयंतिव्यापारयंतिस्वस्वरूपविज्ञानायऋत्विक्पदैःस्तोत्रादिनानितरांगच्छंतिन्
जंतेकीदृशमित्याह॥सुदंससंशोभनदर्शनंदिवस्पृथिव्योःअरतिंईश्वरंगंतारंव्याप्तंवावेद्यंवेदाधनं ४२
तस्माइतिरथमिवरथंयथास्वाभिमतलाभायाश्रयंतेतद्वत्।यद्वारथमिवप्राप्तिसाधनत्वेनवर्तमानंवेद्यं

लब्धव्यंशुक्रशोचिषंदीप्तवर्णंअग्निमित्रमिवसखिवत्कार्यसाधकं।यद्वाआदित्यमिवक्षितिषुयागभूमिषु
मनुष्येषुवाप्रशंस्यंप्रकर्षेणस्तुत्यंएवंमहानुभावमग्निंन्येरिरेइति॥छ॥अथचतुर्थी॥छ॥ ॥ ॥तंक्षुम्नमा
र्णंरजसिस्वआदमेचंद्रमिवसुरुचंह्वारआदधुःपृश्न्याःपतरंचितयंतमक्षभिःपाथोनपायुंजनसीउभेअ
नु॥छ॥ ॥तंक्षुमंतरंरजस्यंतरिक्षेआक्रममाणंसर्वतःसिंचंतंवृष्टिजलंरजसिपृथिव्यांवर्द्धांघृतादिना
आसिच्यमानंवास्वेस्वकीयेह्वारेकुटिलेदमेयागगृहेआदधुःआदधाना।कीदृशंतंचंद्रमिवसुरुचंचंद्रमि
निहिरण्यमिवशोभनदीप्तिंपृश्न्याअवस्थायांपृश्न्याःपतरंफललोकस्यांतरिक्षस्यगंतारंअक्षभिःस्वकीये
ज्वालारूपैःअवयवैःचितयंतंचेतयमानंपाथोनपायुंउदकमिवरक्षकंउभेजननीसर्वस्यजनयित्र्योद्या
वापृथिव्यावनुव्याप्तं।तस्यानेवहोमाधारत्वेनस्थितत्वाद्धविःप्रापणायफललोकगामिनमितिभावः।एवंरूपम

निमाद्धोत॥छ॥अथपंचमीमृचमाह॥छ॥ ॥सहोताविश्वंपरिभूत्वध्वरंतमुहव्यैर्मनुषऋंजतेगिरा।हिरि
शिप्रोवृधसानासुजर्भुरद्यौर्नस्तृभिश्चितयद्रोदसीअनु॥छ॥ ॥सोग्निर्होताहोमनिष्पादकःसन्विश्वंस
र्वमध्वरंयागंपरिभूतपरितोभवतु।तमुतमेवाग्निंहव्यैर्हविर्भिःगिरास्तुत्याचमनुषोमनुष्याऋंजतेप्रसा
धयंति।ऋंजतिःप्रसाधनकर्मा।हिरिशिप्रोहरणशीलहनुःहिरीमान्सोमपीथोवाशिप्राःशीर्षस्तुवितताहिरण्यशि
रित्यादिमंत्रांतरात्।वृधसाधनासुप्रवर्द्धमानास्वौषधीषुज्वालासुवाजर्भुरत्।भ्रियमाणोयज्ञगंता।शत्रं
तंपदंयङ्द्वितीयार्थेसप्तमी।वर्द्धमानाउषधीर्जर्भुरत्पुनःपुनर्हरन्नित्यर्थः।द्यौर्द्युलोकोनक्षत्रैःस्तृभिर्न
नक्षत्रैरिवरोदसीअनुद्यावापृथिव्यावनुचितयन्चेतयति।ज्वालाभिर्विस्फुलिंगैश्चभुवमंतरिक्षंचव्या ४२
प्नोतीत्यर्थः॥छ॥ ॥इतिद्वितीयस्यपंचमेविंशोवर्गः॥छ॥ ॥अथषष्ठीमृचमाह॥छ॥ ॥सनोरेवत्समिधा

नःस्वस्तयेसंददस्वान्रयिमस्मासुदीदिहि।आनःकृणुष्वसुवितायरोदसीअग्नेहव्यामनुषोदेववीतये॥
॥छ॥ ॥हेदेवसतादृशस्त्वंनोस्माकंस्वस्तयेस्वस्त्यविनाशनाम्नेक्षेमायरेवत्रयिमत्रयिंधनं
उपर्युपरिवृद्धिमत्।दानयोग्यंवाधनंअस्मासुसंददस्वान्सम्यक्प्रयच्छन्समिधानोस्माभिःसम्यगिध्य
मानःसन्दीदिहिदीप्यस्वापक्षेरेवदितिक्रियाविशेषणंराधनंसमृद्धिमत्यथातथादीप्यस्वेति।तथानु
नःसमननोस्मभ्यंसुवितायसुहितायशोभनफलायरोदसीद्यावापृथिव्यावाकृणुष्वसर्वतःकुरुष्व।उभौ
लोकौभोगप्रदौकुर्वित्यर्थः।किमर्थमितितदुच्यते।हेदेवाग्नेमनुषोमनुष्यस्ययजमानस्यममसंबंधी
निहव्याहवींषिवीतयेदेवेभ्योभक्षणायपुनःपुनर्यागाद्यनुष्ठानायेत्यर्थः॥छ॥अथसप्तमीमृचमाह॥
॥छ॥ ॥दानोअग्नेबृहतोदाःसहस्रिणोदुरोनवाजंश्रुत्याअपावृधि।प्राचीद्यावापृथिवीब्रह्मणाकृधि

स्वार्णशुक्रमुषसोविदिद्युतुः॥ब॥ ॥हेअग्नेनोस्मभ्यंबृहतोमहतःप्रभूतान्गवाश्वादिधनविशेषा ५
न्दाःदेहि।तथासहस्रिणःसहस्रसंख्योपेतान्पुत्रप्रभृत्यादीन्दाःदेहि।ददातेश्छांदसोलुङिरूपं।वा
क्यदीनेदनिघातः।कृत्यैकीर्त्यैवाजमन्नंदुरोनतस्यद्वाराण्यपिनशब्दश्चार्थे।अपावृधिअपवृणु
प्रेरयेत्यर्थः।यद्वाद्वाराणीव।तप्रांश्चपायान्विशादयति।तथैदंद्यावापृथिवीब्रह्मणापरिवृढेनकर्मणा
प्राचीप्रत्नंचनेअस्मदनुकूलेऽधिकुरु।स्वर्णआदित्यइवसययाजगत्प्रकाशयतितद्वत्।शुक्रं
दीप्तंत्वामुषसउषःकालाविदिद्युतुः।विद्योतयंति।उषःकालेह्यग्नयःप्रज्वाल्यते॥ब॥अथाष्टमीमृचमा
ह॥ब॥ ॥सइधानउषसोराम्याअनुस्वार्णदीदेदरुषेणभानुना।होत्राभिरग्निर्मनुषःस्वध्वरोराजा ५५
विशामतिथिश्चारुरायवे॥ब॥ ॥सोग्निःरामरमणहेतुभूताउषसःअनुअनुलक्ष्यइधानःइध्यमा

नःदीपितःसन्अरुषेणरोचमानेनभानुनातेजसास्वर्णआदित्यइवदीप्यतेसोग्निर्मनुषोमनुष्यस्यहोतुः
होत्राभिः।होत्रेतिवाङ्नाम।होमसाधनभूताभिःस्तुतिभिःस्तूयमानःस्वध्वरःशोभनयागोविशांप्रजानांरा
जाराजमानःस्वामीआयवेमनुष्याययजमानायतदर्थंचारुःचरणशीलःअतिथिःअतिथिवत्पूज्योभ
वति॥ब॥अथनवमीमृचमाह॥ब॥ ॥एवानोअग्नेअमृतेषुसत्यधियाधीपायबृहद्दिवेषुमानुषा।दुहा
नाधेनुर्वृजनेषुकारवेत्मनाशतिनंपुरुरूपमिषणि॥ब॥ ॥बृहद्दिवेषुप्रभूतदीप्तिषुअमृतेषुदेवे
षुमध्येहेसत्यसत्यवन्।अग्नेएवंमानुषामनुष्याणांमध्येनोस्मदीयाधीर्बुद्धिःस्तुतिःकर्मवा।एवएवंपी
पायप्याययति।यद्वामानुषामनुष्यान्धीस्त्वदीयाबुद्धिःकर्मवाप्याययतु।तथात्वदीयाधीःवृजनेषुयज्ञे
षुकारवेस्तोत्रेदुहानधेनुःदोग्ध्री।धेनुरिवत्सोपममेतत्।त्मनाआत्मानेवइषणि।इषणीयांसत्यांशति

नंअपरिमितसंख्याकंपुरुरूपंगवाश्वादिरूपेणनानारूपंधनसंभृतंइहानाभवति॥छ॥अथदशमीमृच
माह॥छ॥ ॥वयमग्ने अर्वता वा सुवीर्यं ब्रह्मणा वा चितयेमा जनां अति। अस्माकं द्युम्नमधि पंच कृष्टिषू
च्चा स्वर्ण शुशुचीत दुष्टरं॥छ॥ ॥हेअग्नेवयंयजमानाःसुवीर्यंशोभनसामर्थ्योपेतंयथातथाअर्व
तावाअरुणकुलेनाश्वेनवाशब्दश्चार्थेब्रह्मणावाअन्नेनचत्वद्दत्तेनजनानस्मत्समानानतिचितयेम
अतिक्रम्यज्ञायेमहि।कर्मणिकर्तृप्रत्ययः।यद्वात्वद्दत्तेनाश्वेनान्नेनचसुवीर्यंचितयेमप्रकाशायमत
दर्थमस्माकंपंचपंचसुकृष्टिषुजनेषुनिषादपंचमेषुचतुर्षुवर्णेषुउच्चाउच्चैःअतिप्रभूतंदुस्तरंअन्ये
नाप्राप्यंद्युम्नंधनंस्वर्णसूर्यइवअधिकंशुशुचीतदीप्यतां।अधीत्ययमनर्थकोवा॥छ॥अथैकादशीमृ ५५
चमाह॥छ॥ ॥स नो बोधि सहस्य प्रशंस्यो यस्मिन्सुजाता इषयंत सूरयः। यमग्ने यज्ञमुपयंति वाजिनो

नित्ये तोके दीदिवांसं स्वे दमे॥छ॥ ॥हेअग्नेसहस्यशत्रूणामभिभवितःबलप्रभववाप्रशंस्यःस्तुत्यः
त्वंनोस्मदीयंस्तोत्रादिकंबोधिबुध्यस्व।सहस्येत्यत्रकइत्याह।यस्मिन्त्वयिसुजाताःशोभनजननाःसूरयःस्तोतार
ऋत्विजःइषयंतगमयंतिस्तोत्राणि।किंचहेअग्नेयज्ञंयजनीयंयंवाजिनोहविर्लक्षणान्नवंतोयजमाना
नित्येतोकेरसेपुत्रेनिमित्तभूतेसति।तद्वातस्मिन्तथादीप्यतेपुत्रगतेयथापिनादीप्यतितद्वत्स्वेदमेस्व
कीयेयागगृहेसवनीयानिदिस्थानेदीदिवांसंप्रथमानसुपयंतिहविःस्तोत्रादीनामबोधीत्यन्वयः॥छ॥
अथद्वादशीमृचमाह॥छ॥ ॥उभयासो जातवेदः स्याम ते स्तोतारो अग्ने सूरयश्च शर्मणि। वस्वो रायः पुरु
श्चंद्रस्य भूयसः प्रजावतः स्वपत्यस्य शग्धि नः॥छ॥ ॥हेजातवेदःजातानांवेदितरग्नेस्तोतारःत्वांस्तुवं
तऋत्विजःसूरयामेधाविनोयजमानाश्चेत्येवमुभयासःउभयेवयंशर्मणिसुखेनिमित्तभूतेसतितेतवसंबं

धिनःस्यामनवेमा।यद्वातेशर्मणिस्यामत्वंचनोस्माकंवस्वोनिवासहेतोर्वसिष्ठस्यरायोगवादिधनस्यपुरु
श्चंद्रस्यअतिशयेनाह्लादकस्यबहुहिरण्योपेतस्यवाभूयसःप्रभूतस्यप्रजावतोभृत्याद्युपेतस्यपुत्रा
दिभिर्भोगपर्याप्तस्यवास्वपत्यस्यशोभनपुत्रस्यईदृग्रूपंधनंनोस्मभ्यंशाग्धिदेहिदातुंशक्तोभवसि॥ब॥येस्तो
तृभ्यइतित्रयोदशीव्याख्या॥त॥ब॥ ॥येस्तोतृभ्योगोअग्रामश्वपेशसमग्नेरातिमुपसृजंतिसूरयः।अ
स्मांचतांश्चप्रहिनेषिवस्यआबृहद्वदेमविदथेसुवीराः॥ब॥ ॥इतिद्वितीयस्यपंचमेएकविंशोवर्गः॥ब॥
॥ ॥समिद्धोअग्निरित्येकादशर्चंतृतीयंसूक्तंगार्त्समदंत्रैष्टुभंसप्तमीजगतीसमिद्धोअग्निरग्निनानरा
शंसतनूनपादादयएकादशप्रजाजदेवताःसमिद्धएकादशासप्तमीजगतीत्यनुक्रमणिका।पशौशुन ४८
कानामिदमाप्रीसूक्तं।गृत्समदस्यापिशुनकत्वात्समिद्धोअग्निरितिशुनकानामितिदिष्टसूक्तं।गृत्समद

स्यापिशुनकत्वात्समिद्धोअग्निरितिशुनकानामितिदिष्टत्वात्॥ब॥तत्रप्रथमामृचमाह॥ब॥ ॥समिद्धोअ
ग्निर्निहितःपृथिव्यांप्रत्यङ्विश्वानिभुवनान्यस्थात्।होतापावकःप्रदिवःसुमेधादेवोदेवान्यजत्वग्निरर्हन्
॥ब॥ ॥पृथिव्यांवेदिलक्षणायांसमिद्धःसम्यक्दीप्तःएतन्नामकोग्निःनिहितःस्थापितःसन्विश्वानिस
र्वाणिभुवनानिभूतजातानिप्रत्यङ्अभिमुखःसन्अस्थात्तिष्ठतियदासर्वेजनाःपश्यंतितथाप्रहृष्टोभ
वतीत्यर्थः।किंचसोग्निर्होताहोमनिष्पादकोदेवानामाह्वातावपावकःशोधकःप्रदिवःपुराणःसुमेधाःशो
भनप्रज्ञोदेवोद्योतमानःएवंमहानुभावोग्निअर्हन्यागयोग्यःसन्देवान्यजतुअत्रयष्टव्यानिंद्रादीन्य
जतु॥ब॥अथद्वितीयामृचमाह॥ब॥ ॥नराशंसःप्रतिधामान्यंजन्तिस्रोदिवःप्रतिमह्नास्वर्चिः।घृतप्रुषा
मनसाहव्यमुंदन्मूर्धन्यज्ञस्यसमनक्तुदेवान्॥ब॥ ॥नराशंसःनरैर्नेतृभिऋत्विग्भिःशंसनायएतन्नाम

कोग्निःस्वर्चिःशोचनन्दालःसन्धामानिस्थानानित्र्याकृत्यधिकरणानितेजांसिप्रतिपत्येकंमङ्क्षास्त्वमर्चिषा
अंजन्व्यक्तीकुर्वन्नितिद्वौदिवःद्योतमानास्त्रीन्भूम्यादिलोकांश्चप्रतिपत्येकमंजन्ननुष्ठितान्भूमिंप्रकाशेना
तरिक्षंहविःश्रापणेनदिवमित्यभिप्रायः॥यद्वालोकानांप्रत्येकंत्रित्वोपेतत्वात्तिस्रोदेव्यइत्यविरुद्धंतिस्रो
देवःपृथिवीस्तिस्रइत्यादिमंत्रवर्णात्त्रयोवाइमेत्रिवृतोलोकाइतिब्राह्मणाच्च।तथाघृतप्रुषा।घृतंसिंचता
मनसाहव्यंरुदन्क्लेदयन्स्निग्धीकुर्वन्यज्ञस्यमूर्द्धन्मूर्द्धनिमुख्येहोमसमयेदेवान्यष्टव्यान्समनक्तु
सम्यक्व्यक्तीकरोतुतर्पयत्वित्यर्थः॥ब॥अथतृतीयामृचमाह॥ब॥ ॥ईळितोअग्नेमनसानोअर्हन्दे
वान्यक्षिमानुषात्पूर्वोअद्य।सआवहमरुतांशर्द्धोअच्युतमिंद्रंनरोबर्हिषदंयजध्वं॥ब॥ ॥हेअग्नेईळि ५३
तोस्माभिःस्तुतःसन्मनसास्मदनुरक्तेनदेवानांयागबुद्ध्यावाअर्हन्योगयोग्यःसन्मानुषाद्धोतुःपूर्वभावी

नोस्मदर्थमद्यास्मिन्दिनेदेवान्यष्टव्यान्यक्षि।त्वमेवयजसि।सतादृशोयष्टात्वमावह।आकारयकान्मरु
तांशर्द्धोगणंअच्युतमक्षीणमिंद्रंदेवानांतमिंद्रमपियद्वामरुद्भिरुपेतमिंद्रंअनंतरंहेनरोनेतारऋत्वि
जोबर्हिषदंबर्हिषिसीदंतंतमिंद्रंयजध्वंपूजयध्वं॥ब॥अथचतुर्थीमृचमाह॥ब॥ ॥देवबर्हिर्वर्द्धमानंसु
वीरंस्तीर्णंरायेसुभरंवेद्यस्यां।घृतेनाक्तंवसवःसीदतेदंविश्वेदेवाआदित्यायज्ञियासः॥ब॥ ॥देवबर्हिर्दे
वएतदभिमानन्नाग्नेवर्द्धमानंसुवीरंशोभनवीरसंपादकंसुभरंसुष्ठुसंस्तीर्णंअस्मदीयैर्ऋत्विग्भिरास्तृ
तंभव।किमर्थंरायेधनाय।अस्यांवेदीवेद्यां।सप्तम्यर्थेप्रथमासंज्ञा।संहितायांयणादेशःछांदसः।घृतेनाक्ते
नाक्तमिदंस्निग्धंबर्हिःसीदत।केहेवसवःएतन्नामकाःहेविश्वेसर्वेदेवाःहेआदित्याःयज्ञियासोयज्ञार्हास्ते
यूयमिदंबर्हिर्निषीदत।अस्मिन्बर्हिषिनिषीदतेत्यर्थः॥ब॥अथपंचमीमृचमाह॥ब॥ ॥विश्रयंतामुर्विया

हूयमानाद्वारोदेवीःसुप्रायणानमोभिः।व्यचस्वतीर्विप्रथंतामजुर्यावर्णंपुनानायशसंसुवीरं॥५॥ ॥
द्वारोदेवीःअग्नेर्द्वारनिमानिन्योदेव्योविश्रयंतांविविच्यश्रयंतांविवृतापिधानाभवंतु।कीदृश्यस्ताउर्वियाः ५
उर्व्यःमहत्यःनमोभिर्नमस्कारोपेतैःस्तोत्रैर्हूयमानाःसुप्रायणाःसुष्ठुप्रकर्षेणगंतव्याःईदृश्यादेव्योवि
श्रयंतां।किंचव्यचस्वतीःव्याप्तिमत्यःअजुर्याःअहिंस्याःअजननावासुवीरंशोभनपुत्राद्युपेतंयशसंयशो
युक्तंवर्णंवरणीयंरूपविशेषंपुनानाःयजमानाशोधयित्र्यःसंपादयित्र्योदेव्योविप्रथंतांविशेषेणप्रख्या
नाभवंतु॥५॥ ॥इतिद्वितीयस्यपंचमेद्वाविंशोवर्गः॥ ॥५॥ ॥अथषष्ठीमृचमाह॥५॥ ॥साध्व
पांसिसनतानउक्षितेउषासानक्तावय्येवरण्विते।तंतुंततंसंवयंतीसमीचीयज्ञस्यपेशःसुदुघेपयस्व ४८
ती॥५॥ ॥साधुसाधूनिनोस्मदीयानिअपांसिकर्माणिउक्षियसततासनातनेनअतिच्छिन्नप्रवृत्तिके

नस्तोत्रादिनाउक्षितेसिंचितेयद्वापुराणवाचीक्षिनश्वंतसनछब्दोस्ति।तस्यप्रथमाद्विवचनस्याकारः।स
नातनेनित्येइत्यर्थः।अस्मिन्पक्षेउक्षितेफलस्यसेचयित्र्यौकर्तरिनिष्ठा।उषासानक्ताअहोरात्रदेवते
वय्याइववानकुशलेइवरण्वितेशब्दितेस्तुतेपरस्परंगच्छंत्यौवाततंविस्तृतंतंतुंतंतुस्थानीयंयज्ञावय
वंसंवयंतीसम्यक्चित्रंसरूपावयंत्यौउत्पादयित्र्यौसमीचीसम्यक्प्रवृत्तिकेपरस्परानुकूले।किमर्थंसंवयंती
यज्ञस्यानुष्ठीयमानस्यपेशोरूपंनिर्मातुमितिशेषः।यज्ञंनिवर्तयितुंतदवयवानक्रमेणानुष्ठापयित्र्यावि
त्यर्थः।अहोरात्राभ्यांहियज्ञास्तन्यंतेसुदुघेसुष्ठुफलस्यदोग्ध्र्योपयस्वतीउदकवत्यौअहोरात्राभ्यांखलु
वृष्टिर्जायते।एवंमहानुभावेअहोरात्रदेवतेअस्मद्यज्ञंनिर्वहतामित्यर्थः॥५॥अथसप्तमीमृचमाह॥५॥
॥ ॥दैव्याहोतारापथमाविदुष्टरऋजुयक्षतःसमृचाविदुष्टरा।देवान्यजंतावृतुथासमंजतोनाभा

थिव्या अधिसानुषुत्रिषु॥७॥ ॥दैव्याविति॥दिव्योग्निःतस्माद्दिव्यादग्नेर्जातौहोतारा आह्वातारौदे ५
वानांहोमनिष्पादकौवाग्नीपार्थिवौतस्त्रिंप्रथमाप्रथमाप्रथमंयष्टव्यौविदुष्टराविद्वत्तमौवपुष्टराप्रकृ
ष्टवपुषौदेवादृचामंत्रेणऋजुअविकलंयथातथासम्यक्यक्षतःयजतःऋतुथानत्रहूतौतत्रतत्रकाले
देवान्यष्टव्यान्यजंतौदेवौपृथिव्यानाभौनाभावुत्तरवेद्यांअधिउपरित्रिषुसानुषुसमुच्छ्रितेषुप्रदेशेषु
गार्हपत्यादिषुसमंजतःसमंक्तःअंजेर्लेटिड्आगमः॥७॥ अथाष्टमीमृचमाह॥८॥ ॥सरस्वतीसाधयंती
धियंनइळादेवीभारतीविश्वतूर्तिःतिस्रोदेवीःस्वधयाबर्हिरेदमच्छिद्रंपांतुशरणंनिषद्य॥८॥ ॥नोस्म
दीयांधियंबुद्धिंयागंवासाधयंतीनिवर्तयंतीसरस्वतीएतन्नामिकादेवीभारतीचविश्वतूर्तिर्विश्वानितू ४९
र्णानियस्याःसातादृशीसर्वविषयगतावाक्एतत्त्रयविशेषणंतिस्रोदेवीःएतास्तिस्रोदेव्यःस्वधयाअ

स्मदन्नरूपहविर्निमित्तेनेदंबर्हिर्यज्ञंअच्छिद्रंयथातथापांतुपालयंतु।किंकृत्वाशरणंयागगृहंआनिषद्यआ
श्रित्यायद्वास्वधयेदंबर्हिरिमंयज्ञमागत्यास्मदीयंशरणंगृहंनिषद्याच्छिद्रंयथातथापांतु॥८॥ अथपिशंग
रूपइतिनवमीत्वाष्ट्रेपशौपुरोडाशस्ययाज्या।पिशंगरूपःसुभरोवयोधाःप्रथमभाजंयशसंवयोधामितिसू
त्रितत्वात्।पाठस्तु॥८॥ अथनवमीमृचमाह॥९॥ ॥पिशंगरूपःसुभरोवयोधाःश्रुष्टीवीरोजायतेदेवका
मःप्रजांत्वष्टाविष्यतुनाभिमस्मेअथादेवानामप्येतुपाथः॥९॥ ॥पिशंगरूपःसुवर्णवर्णःनानारूपोवा
सुभरःशोभनयज्ञःशोभनभरणोतावयोधाःवयसोन्नस्यधारयितावैदातावाश्रुष्टीक्षिप्रंगुणवीरोविविध
मीरयितादेवकामःदेवाःकाम्यंतेयेनतादृशःईदृशःपुत्रोजायतेजायतामुत्पद्यतां।त्वष्टुरनुग्रहात्सचत्व
ष्टाएतन्नामकोदेवोस्मेअस्मभ्यंनाभिंकुलस्यबंधिकांप्रजांपुत्रादिरूपंविष्यतुविमुंचतुवितरत्वित्यर्थः।अथ

अपिचदेवानांसंबंधिपथोन्नमप्यस्मानेतुगछंतु अपिक्रिययावासंबंध्यतेगछंत्वित्यर्थः॥छ॥ अथदशमी
मृचमाह॥छ॥ ॥वनस्पतिरवसृजन्नुपस्थादग्निर्हविःसूदयातिप्रधीभिः॥त्रिधासमक्तंनयतुप्रजानन्देवे ५
भ्योदैव्यःशमितोपहव्यं॥छ॥ ॥वनस्पतिःयूपाभिमानीएतन्नामकोग्निःअवसृजन्नस्मदीयंकर्मानु
ज्ञानन्नुपास्मसमीपेस्थात्तिष्ठतुअग्निःपाकाधारोग्निश्चहविःपशुरूपंधीभिःकर्मभिःविशेषैःपाकसाधनैः
प्रकर्षेणसूदयातिक्षारयतिअपाकाधिकपाकादिराहित्येनहविःपचतीत्यर्थः॥किंचदैव्योदेवसंबंधीआहु
त्यधिकरणभूतोग्निःशमिताहविषःसंस्कर्तायद्वाहविषःसंस्कर्तायद्वादैव्यःशमिताएतन्नामकोग्निःअ
ग्निर्वैदेवानांशमितेतिश्रूयतेत्रिधात्रिप्रकारंउपस्तरणावदानाभिधारणैःसमक्तंसम्यक्सिक्तंहव्यंहविः ५०
प्रजानन्विद्वान्नयनप्रकाराभिज्ञःसन्देवेभ्यउपनयतु॥समीपंप्रापयतु॥छ॥अथैकादशीमृचमाह॥छ॥

॥ ॥घृतंमिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम॥अनुष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षि
हव्यं॥छ॥ ॥अस्याग्नेर्घृतमाज्यंमिमिक्षेसिंचामियतोस्यघृतंयोनिःकारणंउत्पन्नोपिघृतेश्रितःआश्रितः
अस्याग्नेर्घृतमेवतेजोधाम॥घृतेनह्ययंदीप्यते॥इदानींसंबोध्योच्यते॥हेअग्नेवृषभफलस्यवर्षितस्त्वंअनु
ष्वधंप्रतिहविःसर्वेष्वपिहविःषुदीयमानेषुआवहदेवान्आह्वयतान्मादयस्वप्रीणयतस्त्वंस्वाहाकृतं
स्वाहाकारेणदत्तंवक्षिवह॥छ॥इतिद्वितीयस्यपंचमेत्रयोविंशोवर्गः॥छ॥ ॥ध्रुवेवइतिनवर्चंचतुर्थंसूक्तं
भार्गवःसोमाहुतिनामकऋषिःअग्निर्देवतात्रिष्टुप्छंदःध्रुवेनवसोमाहुतिर्भार्गवोइत्यनुक्रमणिका॥प्रात
रनुवाकाश्विनशस्त्रयोःत्रैष्टुभेछंदसीदंसूक्तंच॥ध्रुवेवःसुद्योत्मानंनिरेतारोत्रपदनइतिसूक्तेइति॥छ॥
॥तत्रप्रथमामृचमाह॥छ॥ ॥ध्रुवेवःसुद्योत्मानंसुवृक्तिंविशामग्निमतिथिंसुप्रयसं॥मित्रइवयोदिधि

षाय्यो न हि देवा देवेषु नेजातवेदाः॥छ॥ ॥हे यजमाना वो युष्मदर्थं अग्निं हुवे आह्वयामि कीदृशं तं सु
द्योत्मानं सुष्टु द्योतमानं सुवृक्तिं सुष्टु वर्जितं पापैः ज्ञानेन स्तुतिं वा विशां यजमानानां अतिथिं अतिथिव
त्सदा सत्कार्यं सुप्रयसं शोभनहविर्लक्षणान्नं किंच जातवेदाः ज्ञातानां वेदिता यो देवोग्निर्मित्र इव सखेव
व आदित्य इव वा दिधिषाय्यः धारयिता भूत् अभवत् कुत्रेति उच्यते आदेवपर्यंते जने मनुष्यप्रभृतिदे
वपर्यंतेषु जनेषु धारको भवदित्यर्थः॥छ॥ अथ द्वितीयामृचमाह॥छ॥ ॥इमं विधंतो अपां सधस्थे द्वितादध
र्भृगवो विक्ष्वायोः एष विश्वान्यभ्यस्तु भूमा देवानामग्निररतिर्जीराश्वः॥छ॥ ॥इममग्निं विधंतः प
रिचरंतो भृगवो महर्षयः अपां सधस्थे सहस्थानं अंतरिक्षे आयोर्मनुष्यस्य यजमानस्य स्वभूता
सु विक्षु प्रजासु विक्षु तेषां मध्ये च द्विता द्वयोः स्थानयोः आदधाते धुः लिटि रूपं एषोग्निर्भूमा भूमा अस्यर्थं विश्वानि भू

तजातान्यस्मद्विरोधीन्यभ्यस्तु अभिभवतु सं कीदृशः देवानामरतिरीश्वरः तेषां मध्ये शीघ्रं अरणशीलो
वा स्वधागं प्रति तथा जीराश्वः क्षिप्राश्वः॥छ॥ अथ तृतीयामृचमाह॥छ॥ ॥अग्निं देवासो मानुषीषु वि
क्षु प्रियं धुः क्षेष्यंतो न मित्रं स दीदयदुशतीरूर्म्या आ दक्षाय्यो यो दास्वते दम आ॥छ॥ ॥देवासो देवाः
क्षेष्यंतः स्वर्गं प्रतिगच्छंतः संतः इवं मानुषीषु मनुष्यसंबंधिषु विक्षु प्रजासु प्रियं देवानां प्रीणयितारमग्निं धुः
अधुः स्थापितवंतः तत्र दृष्टांतः क्षेष्यंतो मित्रं न राये प्रतिगच्छंतो नरा मित्रं प्रियं सखायं स्वगृहरक्षार्थं स्थापयंति
तद्वत् य एवं देवैः स्थापितो योग्निर्दास्वते हविर्दत्तवते यजमानाय तदर्थं दमे तदीये यागगृहे आ आहितः स्था
पितः दक्षाय्यः समर्द्धयिता दाता वा सोग्निः उशतीः कामयमानाः ऊर्म्याः रात्रीः सर्वासु रात्रिषु आदीदयत्
दीप्यते सर्वतः सर्वरात्रीरादीपयति वा॥छ॥ अथ चतुर्थीमृचमाह॥छ॥ ॥अस्य रण्वा स्वस्येव पुष्टिः संदृ

BHAU DAJI

ष्टिरस्यह्रियानस्यदक्षोः।वियोभरिभ्रदोषधीषुजिह्वामत्योनरथ्योदोधवीतिवारान्॥छ॥ ॥यस्याग्नेःपु
ष्टिःशरीरवृद्धिःरण्वारमणीयाशब्दयुक्तावा।तत्रदृष्टांतः।स्वयपुष्टिरिवयथालोकेस्वकीयापुष्टिःस्वस्मै
रमणीयाभवतितद्वत्।यद्वास्याग्नेःसंबंधिनीतद्वत्यद्वास्याग्नेःसंबंधिनीपुष्टिर्यजमानविषयारण्वा
तस्याग्नेःपुष्टिर्यथारण्वातद्वत्।किंचह्रियानस्यसमृद्धिंगच्छतोव्याप्नुवतोयाह्वाकाष्ठानूदधक्षोःद
ग्धुमिच्छोरस्याग्नेःसंदृष्टिःसंदर्शनाविर्भावापिरण्वायोग्निरोषधीषुकाष्ठेषुजिह्वांज्वालांजात्येकवच
नंज्वालाःविभरिभ्रत्अत्यर्थंविहरतिकंपयतीत्यर्थः।भरतेर्यङ्लुगंतत्वेनदाधर्त्यादिषुनिपातिता
लेड्युडागमः।यत्योषादिनिघातः।तत्रदृष्टांतः।रथ्योरथार्होत्योनवाजी।यथावारान्दशवारणामा ५२
धनान्बालान्दोधवीतिकंपयतितद्वत्।योग्निर्ज्वालाःकंपयतिअस्याग्नेःपुष्टीरण्वेति॥छ॥अथपंच

मीमृचमाह॥छ॥ ॥आयन्मेअभ्वंवनदःपनंतोशिग्भ्योनामिमीतवर्णं।सचित्रेणचिकितेरंसुभासाजुजु
र्वांयोमुहुरायुवाभूत्॥छ॥ ॥यतोयस्याभ्वंमहत्त्वंमेम संबंधिनोवनदःवपनंतःसंभक्तारः।यद्वा
वदनः।अवनदःस्तुतीशब्दयंतस्तोतारः।अवशब्दोभृशार्थवाचीतस्वर्वानदेःक्विप्।अवाप्योरित्येकार
लोपः।आपनंतःसमंतात्स्तुवंतिसोग्निरुशिग्भ्योस्मदीयंरूपकामयमानेभ्यःऋत्विग्भ्योवर्णंस्वदृशंरू
पंनामिमीतनशब्दःस्वार्थेनिर्मिमीतेचसुवरंसुरमणीयेष्वाज्यादिहविःषुनिमित्तेषुचित्रेणभासाहि
रण्यकनकादिनावर्णयादीप्त्याचिकितेविज्ञायतेकिंचयोग्निर्जुजुर्वान्जीर्णसन्ज्वालोपशमेसए
वमाहुःपुनःपुनःपुनःआयुवासर्वतोमिश्रयितातरुणोवाआभूत्आभवतिपुनराज्यादिसंयोगा
त्॥छ॥इतिद्वितीयस्यपंचमेचतुर्विंशोवर्गः॥छ॥ ॥अथषष्ठीमृचमाह॥छ॥ ॥आयोवनातातृषाणो

नभातिवार्णपथारथ्येवस्वानीत्। कृष्णाध्वातपूरण्वश्चिकेतद्यौरिवस्मयमानोनभोभिः॥ब॥ ॥योग्निर्व ५
नावनानितृष्णसमृद्धान्तृषाणोनतृषितइवत्वरमाणइत्यर्थः। आभातिआभासयतिदहतीत्यर्थः।
यद्वावनावनेआभाति। किंचवार्णउदकमिवपथाप्रवणेनमार्गेणमार्गेणगच्छतितद्वत्। इतस्ततोगच्छ
ति। रथ्येवरथस्यवोढाश्वइवस्वानीत्शब्दयति। यद्वारथशब्दात्सोस्यादिशःयथारथेयुद्धमार्गेणगच्छ
न्स्वनतितद्वत्। किंचकृष्णाध्वाकृष्णवर्त्मातपुस्तापकःरण्वोरमणीयःएवंभूतःसन्चिकेतज्ञायते
प्रकाशतइत्यर्थः। कइवनभोभिर्नक्षत्रैःस्मयमानःप्रकाशमानोद्यौरिवद्युलोकइवस्मयथानभो
भिरंतरिक्षप्रदेशविशेषैःस्मयमानःशोभमानोद्योरादित्यइवनीलवर्णांतरिक्षचार्यादित्येयथाज्ञा ५२
यतेतद्वत्। स्वसंचारेणकृष्णीभूतेमार्गेज्ञायतेप्रकाशयतइत्यर्थः॥ब॥ अथसप्तमीमृचमाह॥ब॥ ॥

सयोव्यस्थादभिदक्षदुर्वींपशुर्नैतिस्वयुरगोपाः। अग्निःशोचिष्माँअतसान्युष्णन्कृष्णव्यथिरस्वदयन्नभू
म॥ब॥ ॥योग्निर्व्यस्थात्विविधंतिष्ठतिव्याप्नोतिविश्वं। तथायोग्निरुर्वींविस्तृतांपृथिवींसर्वांपिचअ
भिदक्षत्आभिमुख्येनप्रवर्द्धमानोभवति। तनेअपियच्छब्दयोगान्ननिहन्यते। सोग्निःपशुर्नपशुरिवयथा
जातपशुःस्वच्छंदेनचरतितथास्वयुःस्वयमेवगच्छत्। अगोपाःगोपवारक्षितानियामकवर्जितइत्यर्थः।
एतिगच्छतिकिंकुर्वन्। शोचिष्मान्प्रकृष्टदीप्तिःकृष्णव्यथिःकृष्णवर्त्मप्रासादग्नाव्यथकराःकंटकादयो
देवयेनतादृशःसन्भूम। अत्यधिकंअस्वदयन्नआस्वादयतीवदृष्टगतान्रसान्अतसानिसंतता
निनीरसानिवातरुगुल्मादीनिउष्णन्दहन्नेति॥ब॥ अथाष्टमीमृचमाह॥ब॥ ॥नूतेपूर्वस्यावसोअ
धीतौतृतीयेविदथेमन्मशंसि। अस्मेअग्नेसंयद्वीरंबृहंतंक्षुमंतंवाजंस्वपत्यंरयिंदाः॥ब॥ ॥हेअ

ग्नेनेनवसंबंधिनःपूर्वस्यसर्वंयागसमयेऽजनयथावसोनिमंतर्पणस्यअधीतोस्मरणेसतितत्स्मृत्यात्तुअधा
प्सितायेविदथेयागेऋतायसवनेयद्वाप्रातरनुवाकसंबंधिनांआग्नेयोषस्याश्विनानामध्येअन्यतमेऋता १
येकमौमन्ममननीयंस्तोत्रंशंसिअशंतिशस्यतेस्माभिः।हेअग्नेत्वंचास्मेअस्मभ्यंसंयद्वीरंसयतोवीरायस्मि
न्ताहशंबृहंतंमहांतंक्षुमंतंशब्दवंतंकीर्तिमंतंवाजंउक्षणमन्नंस्वपत्यंरयिंचदाःदेहि॥छ॥अथ
नवमीमृचमाह॥छ॥ ॥त्वयायथागृत्समदासोअग्नेगुहावन्वंतउपरांअभिष्युःसुवीरासोअभिमाति
षाहःस्मत्सूरिभ्योगृणतेतद्वयोधाः॥छ॥ ॥हेअग्नेत्वयास्तुकेणाभिवन्वंतःछांदसेनजः।गृत्समदाऋ
षयःआत्मनिपरोक्षेणवचनं।यथागुहागुहायांवर्त्तमानान्उपरान्उपरमणसाधनान्उपरितिष्ठ ५४
त्वर्त्तमानान्वाधनविशेषानभिस्युःअभिभवेयुःस्वाधीनान्कुर्युः।यद्वागुहानुपरान्उपरेअधिकत्वेनवर्त्त
मानान्यापानभिष्युःअभिभवेयुःतथाकुर्वित्यर्थः।कीदृशाःसुवीरासःशोभनपुत्रोपेताःअभिमातिष
हःवैरिणांपापादीनांसोढारः।किंचसूरिभ्योमेधाविभ्योयजमानेभ्योगृणते।व्यत्ययेनैकवचनं।शब्दय
द्भ्यःस्तोतृभ्यः।यद्वासूरिभ्योयजमानेभ्योगृणतेस्तोत्रेचस्मत्सुमत्अतिप्रभूतंतत्तादृशंप्रसिद्धंवयोन्नं
धाःधेहि॥छ॥इतिद्वितीयस्यपंचमेपंचविंशोवर्गः॥छ॥ ॥होताजनिष्टेत्यष्टर्चंपंचमंसूक्तंसोमाहुते
रार्षमाग्नेयमानुष्टुभंहोताष्टवोनुष्टुभमित्यनुक्रांतं।प्रातरनुवाकाश्विनशस्त्रयोराग्नेयेक्रतावस्यविनि
योगःसूत्रितंच।अस्मायोहोताजनिष्टेतिचतुर्विंशेऽहन्यपीदमेवाज्यं।चतुर्विंशेहोताजनिष्टेत्याज्यमिति॥
अभिप्लविकेद्वितीयेऽहनिइदमेवाज्यंद्वितीयस्यचतुर्विंशेनाज्यमित्यतिदिष्टत्वात्॥छ॥तत्रप्रथमामृचमा
ह॥छ॥ ॥होताजनिष्टचेतनःपितापितृभ्यऊतये।प्रयक्षञ्जेन्यंवसुशकेमवाजिनोयमं॥छ॥१ ॥होताहो

मनिष्पादकः।चेतनःचेतयितास्मदनुष्ठितस्यपितापालकोस्मद्यज्ञस्यईदृशोग्निरजनिष्टउत्पन्नः।किमर्थंपि ५
तृभ्यःपालकेभ्योयजमानेभ्यः।षष्ठ्यर्थेचतुर्थी॥तथाभूतयेरक्षणायचवयंचवाजिनःहविर्लक्षणान्नवंतः
संतःप्रत्यक्षंप्रकर्षेणहव्यंजेन्यंजेतव्यंयमंयमितव्यंवसुधनंशकेमशक्ताभूयास्मलब्धुमितिशेषः।य
द्वावाजिनोन्नस्ययमंयमनंकर्तुंशकेम।प्रत्यक्षंयोन्यंवसुधनमित्युपमानंउक्तलक्षणंधनमिवनृयथा
वरोढुंशक्नुमस्तद्वत्॥ग॥अथद्वितीयामृचमाह॥ग॥ ॥आयस्मिन्सप्तरश्मयस्तताय‍ज्ञस्यनेतरि।मनु
ष्वद्दैव्यमष्टमंपोताविश्वंतदिन्वति॥ग॥ ॥यज्ञस्यनेतरियागस्यनिर्वाहकेयस्मिन्नग्नौसप्तरश्मयः
सप्तसंख्याकारश्मिवद्व्याप्ताहोत्रकाःआततास्वस्वकर्मभिःसर्वतोव्याप्ताभवंतिसपोतापावकोग्नि ५५
पोत्राख्यऋत्विग्रूपोवाग्निर्मनुष्वत्मनुष्यपोतृवत्दैव्यंदेवोयज्ञस्तत्संबंधिअष्टममष्टर्त्विक्संबंधितद्वि

श्वंकर्तव्यजातंसप्तहोत्रैःसहस्वयमष्टमःसन्इन्वतिव्याप्नोति।यद्वातदित्यस्यलिंगव्यत्ययःसपोतेति
संबंधःसप्तहोत्रादिकैःसहाष्टमोभूत्वातद्यज्ञंनिर्वहतीत्यर्थः॥ग॥अथतृतीयामृचमाह॥ग॥ ॥दधन्वे
वायदीमनुवोचद्ब्रह्माणिवेरुतत्।परिविश्वानिकाव्यानेमिश्चक्रमिवाभवत्॥ग॥ ॥एवेमंत्रेहोत्रा
दिवत्स्वयमपियज्ञंनिर्वहतीत्युक्तं।अत्रतुसर्वंतत्रदात्मनास्थित्वास्वयमेवनिर्वहतीत्याह।वा।अथवा
इमेनंयज्ञंअनुलक्ष्यीकृत्ययद्धविरादिकंदधदधेधारयत्यध्वर्य्वादिरूपः।यानिब्रह्माणिशस्त्रादीनिअनु
वोचत्अनुवक्तिहोत्रादिरूपः।अत्रवाचित्येतद्योज्यंतत्सर्वंविरुवेरेवकामयतेजानातिस्त्वास्वयमनु
ष्ठातुंअयमग्निर्विश्वानिसर्वाणिकाव्याकाव्यानिकवयोमेधाविनऋत्विजस्तत्संबंधीनिकर्माणिपर्यभि
वत्परिभवतिस्वायत्तानिकरोतिव्याप्नोतीत्यर्थः।व्याप्तौदृष्टांतः।नेमिःबहिर्वेष्टनवलयःचक्रंरथांगंय

याकास्येनिव्याप्नोतितद्वत्॥छ॥ अथचतुर्थीमृचमाह॥छ॥ ॥साकंहिशुचिनाशुचिःप्रशास्ताक्रतुनाज
निविद्वांअस्यव्रताध्रुवावयाइवानुरोहते॥छ॥ ॥शुचिःस्वयंशोधकःप्रशास्तादेवानांएतन्नामकऋ
त्विक्प्रशासितावायज्ञविघ्नानांशुचिनाक्रतुनाशोधकेनाग्निहोत्रादिकर्मणासाकंहिसहैवाजनिउ
त्पन्नःज्ञातमात्रएवश्रुद्धःसर्वस्यप्रशास्ताचसन्नग्निहोत्रादिनिर्वोढाभवदित्यर्थःअस्याग्नेर्ध्रुवाध्रुवा
णिफलपर्यंतस्थायीनिव्रतानिकर्माणिविद्वान्जानन्यजमानोवयाइवविस्तृताःशाखाःइवानुरोहते
क्रमेणानुतिष्ठति॥छ॥ अथपंचमीमृचमाह॥छ॥ ॥ताअस्यवर्णमायुवोनेष्टुःसचंतधेनवःकुवित्ति
सृभ्यआवरंस्वसारोयाइदंययुः॥छ॥ ॥याःवक्ष्यमाणलक्षणाअंगुलयःइदमनुष्ठीयमानंकर्मययुः प६
प्राप्नुवंतिअनुतिष्ठंतिताःआयुवःगंत्र्यःव्याप्ताधेनवःप्रीणयित्र्यःस्वसारःस्वयंसारिण्योंगुलयोनेष्टुःहवि

र्मिश्रयितुःशोधयितुःपोषयितुःनेतुर्वास्याग्नेःयद्वैतन्नामकऋत्विग्रूपस्यातिसृभ्यःआगार्हपत्यादि
मूर्तिनामपिवरंवर्णंकुवित्बहुलत्वःसचंतसेवंतेपरिचरंति॥छ॥ अथषष्ठीमृचमाह॥छ॥ ॥यदीमा
तुरुपस्वसाघृतंभरंत्यस्थित।तासामध्वर्युरागतौयवोवृष्टीवमोदते॥छ॥ ॥यदियदामातुःसर्वस्यनि
र्मातुर्भूम्याःवेदिलक्षणायाःस्वसास्वस्थानीयाजुहूर्घृतंभरंतीसतीउपास्थितउपतिष्ठेदग्निंएकवचन
मपिविवक्षितंजुहूपभृद्ध्रुवाःघृतंभरंत्यःतिष्ठंतीत्यर्थःतदातासांजुह्वादीनामागतौयागायप्राप्तौस
त्यामध्वर्युःएतन्नामकऋत्विग्रूपःअध्वरंकामयमानोवायमग्निःमोदतेहृष्यतियवोवृष्टीवहृष्ट्यायथामो
दतेतद्वत्॥छ॥ अथसप्तमीमृचमाह॥छ॥ ॥स्वःस्वायधायसेकृणुतामृत्विगृत्विजं।स्तोमंयज्ञंचावरं
वनेमाररिमावयं॥छ॥ ॥अयमग्निःस्वःस्वयमेवस्वायस्वकीयायधायसेकर्मणोहविषाधारणायवाऋ

DR. BHAU DAJI

त्विक्होताजनिष्टेत्यादिनोक्तलक्षणोहोतृपोतृप्रशास्त्राद्यृत्विग्रूपःसन्नृत्विजंआर्त्विज्यंनावप्रधानोयं ८
निर्देशः।देवर्त्विग्रूपःसन्नृत्विजंमानुषमार्त्विज्यंकृणुतांकरोतुवयंचतदनुग्रहात्आदनंतरमेवस्तो
मंस्तोत्रंयज्ञंचतष्टाअयंयागमपिअरंअलमत्यर्थंवनेमसंभजेमइदिरिमिददेमत्विहविः।यद्वास्तोमं
वनेमयज्ञंयज्ञयोग्यंहवीररिमि॥७॥अथाष्टमीमृचमाह॥७॥ ॥यथाविप्रांअरंकरद्विश्वेभ्योयजते
भ्यः।अयमग्नेत्वेअपियंयज्ञंचकृमावयं॥७॥ ॥हेअग्नेविद्वान्त्वमाहात्म्याभिज्ञःप्रयोगज्ञोवायज
मानोयथाविश्वेभ्योयजतेभ्यःसर्वेभ्योयजनीयेभ्योदेवेभ्यःअरंपर्याप्तिंकरत्।करोति।तथात्वमनुगृह्
णेत्यर्थः।वयमपियंयज्ञंयागविशेषंचकृमकृतवंतःकर्मणिसंयोगस्त्वेअपि।अपिरेवार्थेतावेवत्वत्प्रीत्यर्थः।तमेव ५७
तस्मात्त्वंसर्वदेवार्थंयागंतन्नहृत्विग्रूपःसन्निर्वहेत्यर्थः॥७॥इतिद्वितीयस्यपंचमेषड्विंशोवर्गः॥७॥ ॥

॥ ॥७॥ ॥इमांमइत्यष्टर्चंषष्ठंसूक्तंसोमाहुत्यार्षमाग्नेयंगायत्रं।इमांमेगायत्रंहीत्यनुक्रांतं।प्रातरनु
वाकेआश्विनशस्त्रेगायत्रेछंदस्यविनियोगः।सूत्रितंच।इमांमेअग्नेसमिधमिमामितितिस्रउत्तमामु
द्धरेदिति।अपराह्णिक्यामुपसदीमांमेअग्नेसमिधमितितिस्रऋचस्तिस्रस्तानवसामिधेन्यःकृत्वावि
नियोक्तव्याः।अथोपसदितिखंडेसूत्रितं।इमांमेअग्नेसमिधमिमामितिसामिधेन्यइति॥७॥तत्रप्रथ
मामृचमाह॥७॥ ॥इमांमेअग्नेसमिधमिमामुपसदंवनेः।इमाउषुश्रुधीगिरः॥७॥ ॥हेअग्नेम
दीयामिमांआधीयमानांसमिधंइमामुपसदंउपसदनसाधनामाहुतिंउपसद्यागेक्रियमाणांवावने
संभजेथाः।तथेमाःइमाअपिगिरःस्तुतीःसुउसुष्ठुश्रुधिशृणु॥७॥अथद्वितीयामृचमाह॥७॥ ॥अयाते
अग्नेविधेमोर्जोनपादश्वमिष्टे।एनासूक्तेनसुजात॥७॥ ॥हेअग्नेतेत्वांअयाअनयाआहुत्याविधे

मपरिचरेमहेऊर्जोनपात्।बलस्यनप्तःतस्यनपातयितर्वाहेअश्वमिष्टेव्यापकयज्ञ।यद्वाआशुक्रियमा
णंकर्माश्विंतदिच्छतीतिअश्वमिष्टिःसत्वरमाणाद्रूपसद्वावरतितेकर्मभिःसमत्वरंतेतित्वःसामिध्वनी
रन्त्स्यतिस्वोदेवताअयजन्तीतिब्राह्मणं।तादृशाग्नेतेत्वांअयानयाऊत्याविधेमपरिचरेमतथादस्युज्ञा
तशोननऊनननएनाएनेनसूक्तेनस्तोत्रेणप्राणायेमेतिशेषः।यद्वाअस्तुत्कपक्षूक्तेनविधेम॥छ॥अथतृतीया
मृचमाह॥छ॥ ॥तंत्वागीर्भिर्गिर्वणसंद्रविणस्यंद्रविणोदः।सपर्येमसपर्यवः॥छ॥ ॥हेद्रविणोदः
धनस्यदातःअग्नेतंतादृशंगिर्वणसंगीर्भिस्तुतिभिर्वननीयंद्रविणस्युद्रविणमिच्छव — त्वात्वांसपर्यवः
परिचरणकर्त्तारोवयंगीर्भिस्तुतिभिःसपर्येमपरिचरेम॥छ॥अथचतुर्थ्यृचमाह॥छ॥ ॥सबोधिसू ५८
रिर्मघवावसुपतेवसुदावन्।युयोध्यस्मद्द्वेषांसि॥छ॥ ॥मघवाअन्नवा — सूरिर्विद्वान्प्रेरकोवास

उक्तलक्षणकस्त्वंबोधिबुध्यस्वअस्मदीयंस्तोत्रं।किंचहेअग्नेद्वेषांसिद्वेष्टॄनस्मदस्मत्तोयुयोधिपृथक् — कुरु॥छ॥
अथपंचमीमृचमाह॥छ॥ ॥मनोवृष्टिंदिवस्परिसनोवाजमनर्वाणं।सनःसहस्त्रिणीरिषः॥छ॥ ॥
सःसएवाग्निःनोस्मदर्थंदिवस्परिद्युलोकादंतरिक्षात्परीतिपंचम्यर्थानुवादी।वृष्टिंकरोतीतिचशेषः
॥सएवनोस्मदर्थमनर्वाणमविचलमनल्पंवाजंबलंददातु।तथासहस्त्रिणीःअपरिमितप्रकाराणिइषः
अन्नानिसएवाग्निर्ददातु॥छ॥अथषष्ठीमृचमाह॥छ॥ ॥ईळानायावस्यवेयविष्ठदूतनोगिरा।य
जिष्ठहोतरागहि॥छ॥ ॥हेयविष्ठयुवतमदूतदेवानांयज्ञादिसूचकयविष्ठअतिशयेनयष्टव्य
होतःदेवानामाह्वातरग्नेनोगिराअस्मदीययास्तुत्याईळानायस्तुवतेअवस्यवेरक्षणमिच्छतेमद
र्थंआदिआगच्छ॥छ॥अथसप्तमीमृचमाह॥छ॥ ॥अंतर्ह्यग्नईयसेविद्वाञ्जन्मोभयाकवे।दूतोजन्येव

मित्र्यः॥ब॥ ॥हेकवेमेधाविन्नग्नेअंतर्जनानांहृदयेहृदयेईयसेदिगिच्छसिज्ञातामिव॥हेःमसेतुइन्यंचि
किल्वांअंतरायमत्यादिमंत्रांतरप्रसिद्धिद्योतनार्थः॥कीदृशस्त्वंजनयाजनयविधानिजन्मजन्मानियष्टॄणां
यजमानानांयष्टव्यानांदेवानांचसंबंधिनीविद्वान्जानन्सन्नईयसइतिसंबंधः॥तत्रदृष्टांतः॥जन्योजन्ये
न्योऽर्तिःमित्र्योविशेषेणमित्रेभ्योहितोहूतइवसयथाप्रजानांचित्रवृत्तिज्ञानायराज्ञाप्रेरितःतामामनो
जानातितद्वत्॥तमप्यस्माकमंतरायसइत्यर्थः॥ब॥अथाष्टमीमृचमाह॥ब॥ ॥सविद्वांआचपिप्र
योयक्षिचिकित्वआनुषक्॥आचास्मिन्त्सत्सिबर्हिषि॥ब॥ ॥हेअग्नेसत्वंविद्वान्विशेषान्जिज्ञःसन्आ
चपिप्रयःसर्वतोस्मान्प्रयच्छकाम्यैः॥हेचिकित्वश्चेतनावनआनुषकअनुक्रमेणयक्षियजदेवानआ ५९
सत्सिआसीदचास्मिन्त्सर्वबर्हिषि॥ब॥इतिद्वितीयस्यपंचमेसप्तविंशोवर्गः॥ब॥ ॥श्रेष्ठंयविष्ठेतिषड्

चंसप्तमंसूक्तंसोमाहुत्यार्षमाग्नेयंगायत्रंप्रातरनुवाकाश्विनशस्त्रयोगायित्रेछंदस्यविनियोगः॥सर्वसूक्त
स्वोक्तः॥श्रावणीकर्मण्याद्याविनियुक्ता॥ब॥सैषासूक्तेप्रथमा॥ब॥ ॥श्रेष्ठंयविष्ठभारताग्नेद्युमंतमा
भर॥वसोपुरुस्पृहंरयिं॥ब॥ ॥हेअग्नेयविष्ठयुवतमहेभारतभरताऋत्विजःतेषांसंबंधीभारतःतेअ
ध्वर्यादिभिःमथनहविस्तोत्रादिनाव्याप्रियमाणत्वात्॥तादृशहेवसोवासकव्याप्तवाएवंरूपाग्नेश्रेष्ठंअति
प्रशस्यंद्युमंतंदीप्तिमंतंपुरुस्पृहंबहुभिरर्थिभिस्पृहणीयंरयिंआभरआहर॥ब॥अथद्वितीयामृचमाह
॥ब॥ ॥मानोअरातिरीशतदेवस्यमर्त्यस्यच॥पर्षितस्याउतद्विषः॥ब॥ ॥हेअग्नेत्वदनुग्रहान्नोस्मा
नरातिःअदानंशत्रुत्वंयद्वाछंदस्यरातिशब्दःशत्रुवाची॥स्त्रीलिंगोभवति॥अदाताशत्रुःमाईशपराभवितुं
शक्तोमाभूत्॥मास्वविषयाकुर्यात्॥आरातिविशेष्यते॥देवस्यचमर्त्यस्यचसंबंधिनी॥तेःकारिताउतअपिच

तस्मात्तन्नयविधायाःविद्विषःअस्मदरातेःपर्षिदेरय॥छ॥अथतृतीयामृचमाह॥छ॥ ॥क्षिवात्तनत्वयाव ५
यंधारात्तदन्याइव।अतिगाहेमहिद्विषः॥छ॥ ॥उतअपिचहेअग्नेवयंत्वदनुग्रहात्।क्षिवाद्विषःसर्वानि
पिद्वेष्टॄनुदन्याधाराइवउदकसंबंधिनीर्धाराअसञ्छुतीरिवात्मनाआत्मनेवअन्यनिरपेक्षणातिगा
हेमहि।अतिक्रम्यगच्छेम॥छ॥अथचतुर्थीमृचमाह॥छ॥ ॥शुचिःपावकवंद्योग्नेबृहद्विरोचसे।त्वंघृ
तेभिराहुतः॥छ॥ ॥हेपावकशोधकाग्नेशुचिःशुद्धोवंद्यःनमस्कार्यःसन्बृहद्महत्अत्यधिकंवि
रोचसेविविधंदीप्यसेयतःत्वंघृतेभिःघृतैराहुतःसमंतात्सिक्तःअतोविरोचसे॥छ॥अथपंचमीमृच
माह॥छ॥ ॥त्वंनोअसिभारताग्नेवशाभिरुक्षभिः।अष्टापदीभिराहुतः॥छ॥ ॥हेभारतऋत्विजंभृ ६०
त्स्थानीयाग्नेनोस्मदीयःत्वंवशाभिःवंध्याभिःगोभिःउक्षभिःसेचनैर्बलीवर्दैःअष्टापदीभिर्गर्भिणीभि

श्चाहुतआराधितोसि॥छ॥अथषष्ठीमृचमाह॥छ॥ ॥द्रुन्नःसर्पिरासुतिःप्रत्नोहोतावरेण्यः।सहसस्पु
त्रोअद्भुतः॥छ॥ ॥द्रुन्नःसमिद्रूपान्नःसर्पिरासुतिःसर्पिराज्यमासिच्यतेयस्मिन्सतादृशःप्रत्नःपु
रातनःहोताहोमनिष्पादकःवरेण्योवरणीयःसहसस्पुत्रःसहसोबलस्यपुत्रस्थानीयःबलेनोत्पन्नत्वात्
अद्भुतआश्चर्यभूतोरमणीयइत्यर्थः।एवंमहानुभावोग्निर्मामनुजानात्वित्यर्थः॥छ॥इतिद्वितीयस्य
पंचमेष्टाविंशोवर्गः॥छ॥ ॥वाजयन्निवेतिषड्टचमष्टमंसूक्तंसोमाहुतेरार्षमनुष्टुभस्यानवा
न्मंडलद्रष्टागृत्समदऋषिःअग्निर्देवताशिष्टागायत्रीछंदःअंत्यानुष्टुप्।वाजयन्निवेत्यानुष्टुबित्यनु
क्रांतंप्रातरनुवाकाश्विनशस्त्रयोस्तृतीयसूक्तत्वेनास्योत्तमावर्जितस्यविनियोगउक्तः॥छ॥तत्रप्रथ
मामृचमाह॥छ॥ ॥वाजयन्निवनूरथान्योगाँअग्नेरुपस्तुहि।यशस्तमस्यमीळ्हुषः॥छ॥ ॥हेअंत

रात्मन्स्तुहिप्रंअग्नेर्यागानश्वानुपस्तुहि।कीदृशस्याग्नेःयशस्तमस्यप्रकृष्टयशसःत्वमथोजुष्यतेमी
ढुषःसेकुःफलस्यदृशस्ययोगान्स्तुहिहोतुरितिवासंबोध्यं।स्तुतौदृष्टांतः।वाजयन्निवअन्नमिच्छ
न्पुरुषइवसयथाअश्वान्गमनायस्तौतितद्वत्।यथोक्तलक्षणस्याग्नेर्गमनसाधनान्रथान्स्तुहि
॥ब॥अथद्वितीयामृचमाह॥ब॥ ॥यःसुनीथोददाशुषेअजुर्योजरयन्नरिं।चारुप्रतीकआहुतः॥ब
॥ ॥सुनीथःशोभननयेनःअजुर्यःअजरणीयःअनतिनाव्यःचारुप्रतीकःशोभनोपक्रमोयया
ग्निसोग्निःददाशुषेहविर्दत्तवतेयजमानायतदर्थंअरिंतस्यशत्रुंजरयन्नाशयन्आहुतःसमं
ताद्राधितोभवति॥ब॥अथतृतीयामृचमाह॥ब॥ ॥यउश्रियादमेष्वादोषोषसिप्रशस्यते।य ६
स्यव्रतंनमीयते॥ब॥ ॥योग्निःउश्रियाज्वालयायुक्तःसन्दमेषुआआगत्यदोषारात्रिषुउशसि

अहःसुचप्रशस्यतेस्तूयतेयस्याग्नेर्व्रतंकर्मनमीयतेनहिंस्यतेनक्षीयतेवा॥ब॥अथचतुर्थीमृचमा
ह॥ब॥ ॥आयःस्वर्णभानुनाचित्रोविभात्यर्चिषा।अंजानोअजरैरभि॥ब॥ ॥योग्निश्चित्रश्चा
यनीयःनानावर्णोवाअर्चिषाज्वालयारश्मिसमूहेनआविभातिसर्वतोभासतेतत्रदृष्टांतः।स्वर्भा
नुनाकिरणेनसूर्यइवसयथाविभातितद्वत्।किंकुर्वन्अजरैर्नित्यैःज्वालासमूहैःअभिसर्वतः
अंजानःव्यंजयन्प्रकाशयन्प्रकाशयन्॥ब॥अथपंचमीमृचमाह॥ब॥ ॥अत्रिमनुस्वराज्य
मग्निमुक्थानिवावृधुः।विश्वाअधिश्रियोदधे॥ब॥ ॥अत्रिंशत्रूणामन्नानांवाभक्षकंस्वराज्यंस्वय
मेवराजमानंस्वाराज्यमनुअग्निंलक्ष्यवाग्निंउक्थानिशस्त्राणिववृधुःवर्धयंति।सचाग्निर्विश्वाःसर्वाः
श्रियःअधिदाधधारयति॥ब॥अथषष्ठीमृचमाह॥ब॥ ॥अग्नेरिंद्रस्यसोमस्यदेवानामूतिभिर्वयं।अ

BABU ... MEMORIAL

रिष्यंतःसचेमहि।अभिष्यामपृतन्यतः॥छ॥ ॥अरिष्यंतःकेनाप्यहिंस्यमानावयंअग्नेरिंद्रस्यसोम
स्यदेवानामन्येषामतिऊतिभीरक्षणैःसचेमहि।युक्ताभवेम।तथारक्षायुक्तावयंपृतन्यतःपृ ५
तनात्मनइच्छंतःशत्रूनभिष्याम।अभिभवेम।पृतनाशब्दात्क्यचिकव्यध्वरपृतनस्यर्चिलोपइत्यवर्ण
लोपः॥छ॥ ॥इतिद्वितीयस्यपंचमेएकोनत्रिंशोवर्गः॥छ॥ ॥वेदार्थस्यप्रकाशेनतमोहार्दंनि
वारयन्।पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥छ॥ ॥२॥ ॥इतिश्रीमद्राजाधिराजपरमे
श्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कनृपालसाम्राज्यधुरंधरेणसायणामात्येनविरचितेमाधवी
येवेदार्थप्रकाशेऋक्संहिताभाष्येद्वितीयाष्टकेपंचमोध्यायः॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥ ६२
॥ ॥छ॥ ॥यादृशमितिन्यायान्नमेदोषः॥ ॥छ॥ ॥श्रीरस्तु॥ ॥छ॥ ॥शुभंभवतु॥ ॥

द्वितीयाष्टकषष्ठाध्यायभाष्य।

॥नमःश्रीगणेशाय॥ ॥यस्यनिश्वसितंवेदायोवेदेभ्योखिलंजगत्।निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥१॥
वागीशाद्याःसुमनसःसर्वार्थानामुपक्रमे।यंनत्वाकृतकृत्याःस्युस्तंनमामिगजाननं॥२॥निहोतेतिषळृ
चंनवमंसूक्तंगृत्समदस्यार्षंनिहोतेत्यनुक्रांतत्वात्।अनुक्तत्वात्त्रिष्टुप्मंडलादिपरिभाषयाग्निर्दे
वता।प्रातरनुवाकाश्विनशस्त्रयोराग्नेयेक्रतौत्रैष्टुभेछांदस्यस्यविनियोगः।अथैतस्याइतिखंडेसू
त्रितं।निहोताहोतृषदनेसूक्तेइति॥अग्निप्रणयनेआद्येऋचौविनियुक्तेपंचम्यांपौर्णमास्यामितिखं
डेसूत्रितं॥छ॥तस्मिन्सूक्तेप्रथमा॥छ॥ ॥निहोताहोतृषदनेविदानस्त्वेषोदीदिवाँअसदत्सुदक्षः।
अदब्धव्रतप्रमतिर्वसिष्ठःसहस्रंभरःशुचिजिह्वोअग्निः॥छ॥ ॥गृत्समदस्तौति।होतादेवानामाह्वा
ताविदानोविद्वान्त्वेषःप्रवृद्धःदीदिवान्दीप्यमानःसुदक्षःशोभनबलःअदब्धव्रतप्रमतिःअदब्धा

निअहिंसानिव्रतानिकर्माणियस्याःसाअदब्धव्रताप्रमतिःप्रकृष्टबुद्धिःयस्यसतथोक्तःवसिष्ठःसर्वस्यवास
यितृतमःवासयतेस्तृजंतस्यइष्ठनिरूपं।सहस्रंभरःसहस्रस्यानेकविधस्यजगतोविहरणेननानाविधरू
पस्यधारकस्यधारकइत्यर्थः।यद्वासहस्रस्यसर्वस्यजगतः।तथाचवाजसनेयं।सर्वंवैसहस्रंसर्वंभरइत्ये
वतदाहेति।शुचिजिह्वःशुचिर्दीप्ताजिह्वाज्वालायस्यसतथोक्तःएवंभूतोग्निःहोतृषदनेहोतात्रसीदतीति
होतृषदनंसुत्रवेदीअधिकरणेल्युट्।तत्रन्यसदत्नितरांसीदतु।उक्तार्थेब्राह्मणं।निहोताहोतृषद
नेविदानइत्यग्निर्वैदेवानांहोतातस्यैतद्धोतृषदनेविदानइत्यवैदेवानांहोतातस्यैतद्धोतृषदनंयदुत्त
रवेदीनाभिस्त्वेषोदीदिवाँअसदत्सुदक्षइत्यासन्नोहिसतदीप्यत्यदब्धव्रतप्रमतिर्वसिष्ठइत्यग्निर्वैदे
वानांवसिष्ठःसहस्रंभरःशुचिजिह्वोअग्निरित्येषाह्वाअस्यसहस्रंभरतायदेनमेकंसंतंबहुधाविहरं

BHAU DAJI MEMORIAL

तीति॥ठ॥अथद्वितीयामृचमाह॥ठ॥ ॥त्वंनस्त्वमुतःपरस्पास्त्वंवस्यआवृषभप्रणेता।अग्नेतोकस्यन ६
स्तनेतनूनामप्रयुच्छंदीद्यद्बोधिगोपाः॥ठ॥ ॥हेवृषभअभिमतफलवर्षकहेअग्नेत्वंनःअस्मदीये
यज्ञेदेवाह्वानार्थंदूतोभव।त्वमुत्वमेवनोस्माकंपरस्पाःआपद्भ्यःपारयितापालाचभव।किंचत्वंवस्यो
वसुनोधनस्यआप्रणेताअस्मदृत्विग्भ्येनप्रापयिताभव।अप्रयुच्छन्।अप्रमाद्यन्दीद्यत्दीदेतिर्दी
प्तिकर्मशोभमानःत्वंनोस्माकंतोकस्यपुत्रस्यातननेतनोतिविस्तारयतिकुलमितितनःपौत्रःतस्मिन्
अस्मदीयानांतनूनांगोपाःगोपायिता।तथाचब्राह्मणं।अग्निर्वैदेवानांगोपाअग्निमेतत्सवितागोप्तारं
परिदत्तआत्मानंचयजमानायचेति।तादृशस्त्वंचगोपायतानवामीतिबोधिबुध्यस्व॥ठ॥ ॥अथतृ
तीयामृचमाह॥ठ॥ ॥विधेमतेपरमेजन्मंनग्नेविधेमस्तोमैरवरेसधस्थे।यस्माद्योनेरुदारिथायजेतंप्र २

त्वेहवींषिजुहुरेसमिद्धे॥ठ॥ ॥हेअग्नेपरमेउत्कृष्टेजन्मन्जायतेप्रादुर्भवत्यस्मिन्नितिजन्मस्थानंद्योःत
स्मिन्द्युलोकेवस्थितायतेतुभ्यंविधेमस्तुतिभिःपरिचरेम।अवरेद्युलोकादधस्तनेसधस्थंतरिक्षे।स्थिता
यतुभ्यंस्तोमैःस्तोमैर्विधेमपरिचरेम।यस्माद्योनेःपृथिवीरूपात्स्थानात्त्वमुदारिथाःउज्जातासिप्रादुर्भूतो
सितंपृथिवीप्रदेशंयजेपूजयामि।तत्रहिसमिद्धेसमिद्भिःसमिध्यमानेत्वयिहवींषिपुरोडाशादीनिप्रजुहु
हुरेअध्वर्य्वादयःप्रजुह्वतिजुहोतेर्लिटिरूपं॥ठ॥अथचतुर्थीमृचमाह॥ठ॥ ॥अग्नेयजस्वहविषायज्ञा
यंश्रुष्टीदेष्णमभिगृणीहिराधः।त्वंह्यसिरयिपतीरयीणांत्वंशुक्रस्यवचसोमनोता॥ठ॥ ॥हेअग्नेय
जीयान्यष्टृतमस्त्वंहविषास्मद्दत्तेनयजस्वदेवान्संयोजय।देष्णंदेयंराधोन्नंश्रुष्टीश्रुष्टीतिक्षिप्रनाम
क्षिप्रंअभिगृणीहिदेवानांपुरतःइदंस्वादुतरमिदंस्वादुतरमितिब्रूहियद्वाश्रुष्टीक्षिप्रकारीत्वंदेष्णंदेयं

राधोधनंअनिष्टणा।हिअस्मदानिमुख्येनअदिप्रयच्छेत्यर्थः।दानसामर्थ्यंदर्शयति।त्वंरयीणांधनानांम ६
ध्येरयिपतिः।उत्तमस्यधनस्यपतिरसि।हि।यद्वारयीणांरयिपतिरित्यत्रैकोरयिशब्दोनुवादः।त्वंशुक्रस्य
दीप्तवचसःअस्मदीयस्यस्तोत्रस्यमनोताप्रज्ञातानवसि।यद्वामनोता॥ ७॥ अथपंचमीमृचमाह॥ ७॥
॥ ॥उन्नयंतेनह्रीयतेवसव्यंदीवेदिवेजायमानस्यदस्म।त्वाद्युमंतंजरितारमग्नेऊधिपतिंस्वप
त्यस्यरायः॥ ७॥ ॥अस्मदर्शनीयहेअग्नेदिवेदिवेप्रतिदिनमग्निहोत्रकालेजायमानस्यतेतवउत्त
यवसव्यंदिव्यंनोमंचवस्तुवस्वादित्वास्माथिकोयत्प्रत्ययःतादृशमुन्नयंवस्तुनह्रीयते।नहीयते।अ
स्योन्नयविधधनसद्भावेमंत्रवर्णः।त्वंह्यग्नेदिव्यस्यराजसित्वंपार्थिवस्येत्यस्मात।अतस्त्वंजरितारंव
स्तोत्रंकुर्वाणमिमंयजमानंद्युमंतमन्नवंतंकीर्तिमंतंवात्वधिकुरु।किंचस्वपत्यस्यशोभनापत्ययु ३

क्तस्यरायोधनस्यपतिंस्वामिनंकुरु॥ ७॥ साकमेधपर्वणिमृर्वेद्धरत्नुसवनंतिस्त्रइष्टयःकर्तव्याःप्रथमा
यारग्नेरनीकवचनःसेनानीकेतियाज्या।तथाचतःसाकामधाइतिखंडेसूत्रितं।सेनानीकेनसुविदत्रोअ
स्मेइति॥ ७॥ सैषासूक्तेषष्ठी॥ ॥सेनानीकेनसुविदत्रोअस्मेयष्टादेवांआयजिष्ठःस्वस्ति।अदब्धोगोपा
उतनःपरस्पाअग्नेद्युमदुतरेवद्दिदीहि॥ ७॥ ॥हेअग्नेसतादृशस्त्वंएनाएनाएनानीकेनयुक्तस्त्वंसु
विदत्रःसुप्रतिज्ञःसुधनोवास्मेअस्माकंनवदेवान्यष्टादेवानांहविःप्रदानेनसृजकआयदिष्टःयष्टृ
तमःअदब्धःकेनाप्यतिरस्कृतःगोपाःदेवानांगोपायितासतापिचनोस्माकंपरस्याःदुरितेभ्यःपारयितापा
पाचत्वंद्युमतत्कांतियुक्तंउतापिचरेवत्धनयुक्तंयथाभवतितथास्वस्तिदिदीहि।क्षेमेणसर्वतोदिदीहि।क्षे
मेणसर्वतोदीप्यस्व॥ ७॥ इतिद्वितीयस्यषष्ठेप्रथमोवर्गः॥ ७॥ ॥जोहूत्रइतिषड्र्चंदशमंसूक्तंगार्त्समदं

मेधुनमाग्नेयं।जोऽहंत्रइत्यनुक्रांतत्वात्।सूक्तविनियोगःसर्वेणसत्रोक्तः॥छ॥ ॥अथतस्मिन्सूक्तेप्र ८
थमा॥छ॥ ॥जोऽहंत्रोअग्निःप्रथमःपितेवेळस्पदेमनुषायत्समिद्धः।श्रियंवसानोअमृतोविचेता
मर्मृजेन्यःश्रवस्यःसवाजी॥छ॥ ॥जोऽहंत्रःसर्वैर्यज्ञार्थंहूतव्योहोतव्योवाकर्यतेजुह्वोतेर्वारूपं
तादृशःप्रथमः।अग्निर्वैदेवानामवमइत्याम्नानात्।मुख्योयोग्निःयत्यदाइळःइळायेदीप्यंवसानः
आच्छादयन्अमृतःमरणधर्मरहितःविचेताःविविधप्रज्ञःश्रवस्यःश्रवइत्यन्ननामतस्मैहितःवाजीब
लवान्सोग्निमर्मृजेन्यःसर्वैःपरिचरणीयोभवतिपइत्युगंतात्केन्यप्रत्ययः॥छ॥अथद्वितीयामृचमा
ह॥छ॥ ॥श्रयाअग्निश्चित्रभानुर्हवंमेविश्वाभिर्गीर्भिरमृतोविचेताः।श्यावारथंवहतोरोहितावोतारु
षाहचक्रेविभृत्रः॥छ॥ ॥अमृतोमरणधर्मरहितोविचेताविशिष्टप्रज्ञःचित्रभानुःविचित्रदीप्तिःचाय ५

दीप्तिर्भासोग्निःविश्वाभिर्गीर्भिःस्तुतिसाधनभूतैःसर्वैर्वाक्यैःक्रियमाणंमेममहवंस्तोत्रंशृणोतु।तस्याग्नेरथं
श्यावाश्यावर्णौअश्वौवहतःवाअपिवारोहितारोहितवर्णावश्वौरथंवहतःरोहितसंज्ञयोरश्वयोःश्यावा
दिवर्णपरिग्रहःस्वेच्छयाभवति।विभृत्रःनानास्थानेषुविहृतःचाकर्ष्णत्वित्तिरकारिवक्तु।करोतेःकर्मणि
लिट्॥छ॥अथतृतीयामृचमाह॥छ॥ ॥उत्तानायामजनयन्त्सुषूतंभुवदग्निःपुरुपेशासुगर्भः।शिरिणा
यांचिदक्तुनामहोभिरपरीवृतोवसतिप्रचेताः॥छ॥ ॥उत्तानायामुत्तानशयायामरण्यांसुषूतंअग्नि
होत्रार्थंसुष्ठुप्रेरितमग्निमजनयत्अध्वर्य्वादयउदपानयत्सोग्निःपुरुपेशासु।पेशइतिरूपनाम।बहुरू
पास्वोषधीषुगर्भोभुवत्।अंतर्वर्तमानयागर्भइवभवेत्।लभतेर्लिङिरूपंशिरिणायांशीर्यतेस्यांभूता
नीतिशिरिणारात्रिःतस्यामपिअक्तुनाअञ्जनादक्तुस्तमःतेनतमसाअपरीवृतःअसंस्पृष्टःअतएवम

होनिःस्वतेजोनिर्युक्तःप्रचेताःप्रकृष्टप्रज्ञःसन्वसतिदीप्यमानोवर्त्तते॥छ॥अथचतुर्थीमृचमाह॥छ॥
॥ ॥जिघर्म्यग्निंहविषाघृतेनप्रतिक्षियंतंभुवनानिविश्वा।पृथुंतिरश्चावयसाबृहंतंव्यचिष्ठमन्नैरभ
संदृशानं॥छ॥ ॥विश्वासर्वाणिभुवनानिप्रतिक्षियंतंविश्वानरात्मनाधिधितिष्ठंतंपृथुंमहांतंतिरश्चा
सर्वतःप्रवर्त्तमानेनवयसापयसाबृहंतंप्रवृद्धंअन्नैर्हविर्लक्षणैर्व्यचिष्ठंव्याप्तंरभसंबलवंतंदृशा
नंएवंगुणवत्तयादृश्यमानमग्निंघृतरूपाशादिलक्षणेनहविषाघृतेनचप्रतिक्षेपसर्वाणिभूतानिक्षे
तिपृथिव्याएषवयसाक्षमेनबृहन्व्यचिष्ठमन्नैरभसदृशानंनित्यनवकाशनवनमन्नैरन्नादंदीप्यमा
नमित्येतदाविश्वतइत्यासर्वतःप्रत्यंचंजुहोमीत्येतदरक्षसेत्यहेलमानेनमनसेदंजुषेतेत्येतन्म ५
यश्रीरितिमर्यश्रीरित्येषस्पृहयद्वर्णोअग्निर्नाभिमृशेइतिनक्षेपमृशेतदीप्यमानोनवतीति॥छ॥

॥अथपंचमीमृचमाह॥छ॥ ॥आविश्वतःप्रत्यंचंजिघर्म्यरक्षसामनसातज्जुषेत।मर्यश्रीःस्पृहयद्व
र्णोअग्निर्नाभिमृशेतन्वाजर्भुराणः॥छ॥ ॥विश्वतःसर्वत्रव्याप्यवर्त्तमानंप्रत्यंचंयज्ञंप्रत्यागच्छतंअग्निं
येनघृतेनआजिघर्मिआसिंचामिअरक्षसाबाधकरहितेनमनसास्तोत्रेणसइतदाज्यंजुषेतनवानूसे
वेतामर्यश्रीःमर्यैर्मर्त्यैश्रयणीयोभजनीयःस्पृहयद्वर्णःयादृशंवर्णंयजमानस्पृहयतितादृशवर्णोपितः
तन्वातेजसाजर्भुराणःस्फुरमाणोग्निःनाभिमृशेअतितेजस्वितयाअभिमर्शनीयोनभवति।अभिमर्वा
न्मृशेःकृत्यार्थेकेनप्रत्ययः॥छ॥अथषष्ठीमृचमाह॥ ॥ज्ञेयाभागंसहसानोवरेणत्वादूतासोमनु
वद्वदेम।अनूनमग्निंजुह्वावचस्यामधुपृचंधनसाजोहवीमि॥छ॥ ॥वरेणवारयअनेनशत्रूनितिव
रंतेजःतेनसहमानःशत्रूनभिभवन्।त्वंभागंजननीयंस्तोत्रंज्ञेयाःज्ञानीहि।आसा।लिङि।वान्यस्यसंयोगा

द्रित्येवंत्वाहूतासः त्वंहूतोयेषामसितेत्वाहूतासः यद्वात्वयाप्रेरिताःसंतःवयंमनुवत्मनुरिवमदेमस्तो
त्रंब्रूयामः। शुक्राक्रूयतेतस्यामितिशुक्रःक्षत्वालोपात्रविशेषोवातयाअन्नंसंहरणंमधुःएवंमधुना
कर्मफलेनयजमानंसंयोजयंतमग्निंधनसाःधनस्यसंभक्ताइंद्रंचस्याःस्तुतिकामनयाजोहवीमि॥ब॥
इतिद्वितीयषष्ठेद्वितीयोवर्गः॥ब॥ ॥ऋभीइवमित्येकविंशत्यृचंमेकादशंसूक्तंगार्त्समदं। अत्रानुक्र
मणिका। ऋभिसैकैंद्रंविराट्स्थानमृतेंत्यामिति। नब्रह्मणमनुक्रमण्यामुक्तोनवकोवैराजस्त्रैष्टुभश्च
द्वोवावैराजोनवकस्त्रैष्टुभश्चविराट्स्थानेति। अंत्यात्रिष्टुप्। विशेषस्यानुक्तत्वादिंद्रोदेवता। पृष्ठ्यस्यच
तुर्थेहनिमरुत्वतीयशास्त्रेइदंसूक्तंनिविद्धानंतत्रेदंतृतीयंसूक्तंचतुर्थेहनीतिखंडेसूत्रितं। ऋभीइवमि 6
द्रमरुत्वाइंद्रंनिमरुत्वतीयमि॥ब॥ अथतस्मिन्सूक्तेप्रथमा॥ब॥ ॥ऋभीइवमिंद्रमारिषण्यःस्याम

B. BHAU DAJI MEMORIAL

नेदावनेवसूनां। इमाहित्वाभूर्जोवर्द्धयंतिवसूयवःसिंधवोनक्षरंतः॥ब॥ ॥गृत्समदस्तौति। हेइंद्रमेइवम
दीयमिदंस्तोत्रंऋधिशृणुमारिषण्यःमाहिंसीःइदमल्पंनासाधीयइतिमानिराकार्षः। दुरस्फद्रविणस्फ
वृषिण्यतिरिषण्यतीतिनिपातितः। वयंतेतववसूनांदावनेदानायस्यामपात्रभूताभवेम। इमाःअस्माभिर्दि
त्तानिवसूयवःदातुर्यजमानस्यधनमिच्छंति। छंदसिपरेच्छायांक्यच्। ताहृशानिक्षरंतःसिंधवइव। वृतक्षरणो
पेतानि। ऊर्जोहविर्लक्षणान्यन्नानित्वांवर्द्धयंतिहि॥ब॥ अथद्वितीयामृचमाह॥ब॥ ॥सृजोमहीरिंद्रया
अपिन्वःपरिष्ठिताअहिनाशूरपूर्वीः। अमर्त्यंचिद्दासंमन्यमानमवाभिनदुक्थैर्वावृधानः॥ब॥ ॥शूरशा
त्रूणांहिंसकहेइंद्रयाअपोअपिन्वःअवर्द्धयःपूर्वीःप्रभूतास्ताअहिनामेघेनवृत्रेणवापरिष्ठिताअवष्ठिता
आक्रांताःततस्त्वंतस्मादहेःसकाशात्महीःमहतीःअपःसृजःउक्थैःशास्त्रैर्वावृधानोवर्द्धमानस्त्वंदासंमवसो

पन्हयितारंअमर्त्यंचित्मरणधर्मरहितमेवात्मानंमन्यमानंतमसुरंअवाभिनत्।अवाङ्मुखंयथाभवति ८
तथा।भिदिरविदारणे।लङि।सिरूपं॥ब॥अथतृतीयामृचमाह॥ब॥ ॥उक्थेष्विंनुशूरयेषुचाकन्स्तोमेष्विं
द्ररुद्रियेषुच।तुभ्येदेतायासुमंदसानःप्रवायवेसिस्रतेनशुभ्राः॥ब॥ ॥हेशूरेंद्रयेषूक्थेषुहोत्रादिभिः
क्रियमाणेषुशास्त्रेषुरुद्रियेषुरुद्रियंसुखंतत्साधनभूतेषु।यद्वारुद्राःस्तोतारःतत्कृतेषुउद्गातृणांस्तोमेषु
चनुच्छिप्रंचाकन्स्तुतीःकामयसेकमतेःकनतेर्वायिट्।लुङिरूपं।येषुस्तोत्रशास्त्ररूपासुस्तुतिषुमंदसा
नोहृष्यन्भवसिताएताःशुभ्राःदीप्यमानाःस्तुतयःआयवेअस्मदीयंयज्ञंप्रत्यागच्छते।तुभ्यन्तुभ्यमेवप्र
सिस्रसिस्रतेत्वदर्थमेवप्रसरंतिःसंप्रत्यर्थेताअधुनासेवस्व॥ब॥अथचतुर्थीमृचमाह॥ब॥ ॥शुभ्रंनु ९
तेशुष्मंवर्द्धयंतःशुभ्रंवज्रंबाह्वोर्दधानाःशुभ्रस्त्वमिंद्रवावृधानोअस्मेदासीर्विशःसूर्येणसह्याः॥ब॥ ॥

हेइंद्रतेतवशुभ्रंशोभनंशुष्मंबलंस्तोत्रैर्वर्द्धयंतःशुभ्रंदीप्तंवज्रमायुधंनुक्षिप्रंतवबाह्वोर्दधानानिदधानाःस्तू
यमानोहींद्रोसुरवधायवज्रमादत्तइतीत्येवंरूपेणायुधंनिदधानाःभवामःवावृधानःस्तोत्रैर्वर्द्धमानःशु
भ्रःतेजसायुक्तःत्वंअस्मेअस्माकंदासीःउपक्षयित्रीःविशःआसुरीःप्रजाःसूर्येणसुहुप्रकारेणआयुधंदि
प्रेरयतित्वंयुध्यस्वेति।एवंरूपेणबाह्वोर्निहितेनवज्रेणसह्याःअभिभव।सहतेर्व्यत्ययेनलिङिपरस्मैप
दं॥ब॥अथपंचमीमृचमाह॥ब॥ ॥गुहाहितंगुह्यंगूल्हमप्स्वपीवृतंमायिनंक्षियंतं।उतोअपोद्यांतस्त
भ्वांसमहन्नहिंशूरवीर्येण॥ब॥ ॥हेशूरेंद्रगुहागुहायांहितंनिहितंअतएवगुह्यंअप्रकाश्यंगूल्हं
गूढंअपीवृतंतिरोहितं।अत्रैकस्मिन्नतिरोधानरूपेर्थेपुनरुक्तयस्तिरोधानत्रयस्यप्रतिपादनपराःअ
प्स्वासेहिन्त्वयानर्थेभिवतियथाह्रोदर्शनीयाह्रोदर्शनीयेतितादृशंमायिनंमायाविनंअसुरंक्षियंतंनिव

सेनंउतोअपिचअपोद्यांदिवंचतस्तभ्नाःस्वसामर्थ्येनिस्तंभयंतंइत्थंनृतमनिर्हिमसुरंमेघंवावीर्येण। ६
सामर्थ्येनतेनवज्रेणअहन्हतवानसि।हनहिंसागत्योरित्यस्यलङिरूपं॥छ॥इतिद्वितीयस्यषष्ठेत्रिं
शोवर्गः॥ ॥छ॥ ॥अथतस्मिन्सूक्तेषष्ठीमृचमाह॥छ॥ ॥त्वावानुतइंद्रपूर्व्यामहान्युतस्तवाम
नूतनाकृतानि।स्तवावज्रंबाह्वोरुशंतंस्तवाहरीसूर्यस्यकेतू॥छ॥ ॥हेइंद्रपूर्व्याणिपुरातनानिमहानि
महांतितेतवकर्माणिनुक्षिप्रंस्तवस्तवाम।उतअपिचनूतनाअधुनातनानिकृतानिकर्माणिस्तवाम।बा
ह्वोरुशंतंदीप्यमानंवज्रंस्तवस्तवाम।किंचसूर्यस्यसुष्ठुप्रेरकस्यसुवीर्यस्यवासूर्यात्मनोवाइंद्रस्यकेतू
प्रज्ञापकौहरीएतन्नामकावश्वौस्तवस्तवाम।सुष्टुतौतिङांतिङोभवंतीतिउत्तमबहुवचनस्यमध्यमै ७
कवचनादेशः।बहुलंछंदसीतिशपोलुगभावः॥छ॥अथसप्तमीमृचमाह॥छ॥ ॥हरीनुतइंद्रवाजयं

ताघृतश्चुतंस्वारमस्वार्ष्टां।विसमनाभूमिरप्रथिष्टारंस्तपर्वतश्चित्सरिष्यन्॥छ॥ ॥हेइंद्रवाजयंतावेगंकु
र्वतौतत्करोतीतिणिच्।तेनचहरीएतन्नामकावश्वौघृतश्चुतंघृतस्योदकस्यच्यावयितारंस्वारंमेघध्वनिंनु
क्षिप्रंअस्वार्ष्टांस्वरतिःशब्दकर्मापाकंपचतीतिवत्।कार्यांतरनुवादःलङिरूपं।समनासमस्थलाःयद्वा
समनासर्वतोव्यप्रथिष्टगलनिश्चकृत्वाममोपरिवृष्टिर्भवतीतिप्रथितानृत।तथापर्वतश्चित्मेघोपिसरि
ष्यन्वेगेनार्थमितस्ततोगमिष्यन्।अरंस्त।अरमत।रमतेर्लुङिरूपं॥छ॥अथाष्टमीमृचमाह॥छ॥ ॥
निपर्वतःसाद्यप्रयुच्छन्संमातृभिर्वावशानोअक्रान्।दूरेपारेवाणीवर्धयंतइंद्रेषितांधमनिंपप्रथंनि॥छ॥
॥ ॥अप्रयुच्छन्अप्रमाद्यन्वर्पणेसावधानःपर्वतोमेघःनिषादिनिषसिनिषसेआसीत्।मातृनिर
द्भिःमाध्यमिकाभिर्वाग्भिर्वासिंवावशानःमहाशब्दंकुर्वाणःअक्रान्अक्रमीत्इतस्ततःसंचारमकरोत्

क्रमतेलङिबहुलंछंदसीतिविकरणस्यलुक्।दूरेपारेअतिदूरेतरिक्षेस्थितांवाणींमाध्यमिकांवा ८
चंवर्द्धयंतःस्तोत्रैःसमृद्धांकुर्वंतःस्तोतारोमरुतोवाइंद्रेषितामिंद्रेणप्रेरितामधनिंशब्दंकुर्वाणांतां
वाचंनितरांपप्रथन्।अप्रथयन्॥छ॥अथनवमीमृचमाह॥छ॥ ॥इंद्रोमहांसिंधुमाशयानंमाया
विनंवृत्रमस्फुरन्निः।अरेजेतांरोदसीभियानेकनिक्रदतोवृष्णोअस्यवज्रात्॥छ॥ ॥बलवानिंद्र
महांमहांसिंधुःस्पंदतेइतस्ततःसंचरतीतिसिंधुर्मेघःतमाशयानंतमधिष्ठायशयानंमायाविनंवृत्र
मसुरंयद्वासिंधुरुदकंतदधिष्ठायशयानंवृत्रंवृणोत्याकाशमितिवृत्रोमेघःतंनिरस्फुरन्निरहन्वृ
ष्णःवर्षकस्यअस्येंद्रस्यकनिक्रदतःशब्दंकुर्वाणाद्वज्रात्भियानेनभयंप्राप्तेरोदसीद्यावापृथिव्यौअरेजे ९
तामकंपेतांदाधर्त्तिदर्धर्त्तीत्यादिनाकनिक्रदच्छब्दोनिपातितः॥छ॥अथदशमीमृचमाह॥छ॥ ॥आ

रोरवीद्वृष्णोअस्यवज्रोमानुषंयन्मानुषोनिजूर्वात्।निमायिनोदानवस्यमायाअपादयत्पपिवान्सुतस्य।
॥छ॥ ॥वृष्णःकामानांवर्षकस्येंद्रस्यवज्रःअरोरवीत्भृशंशब्दमकरोत्कादत्यपेक्षायामाह।यद्य
दाअमानुषंमनुष्याणांरहितं।यद्वामानुषोऽहंनभवामीत्येवंमन्यमानंतमसुरंमानुषोमनुष्याणांहितक
री।यद्वामतिमानिंद्रोनिजूर्वात्नितरांहिंस्यात्जिघांसतीत्यर्थः।जूर्वतिर्हिंसाकर्मणोलेटिरूपं।सुतस्या
भिषुतंसोमंपपिवान्पीतवान्मायिनोमायाविनोदानवस्यदनुर्नामवृत्रमातादानुःशयइत्यादिषुदृष्ट
त्वात्।तस्याःपुत्रस्यवृत्रस्यमायाःवंचनानिन्यपादयत्न्यपातयत्बबाधेइतियावत्॥छ॥इतिद्वितीयस्यषष्ठे
चतुर्थोवर्गः॥छ॥ ॥अथतस्मिन्सूक्तेएकादशीमृचमाह॥छ॥ ॥पिबापिबेदिंद्रशूरसोमंमंदंतुत्वामंदि
नःसुतासः।पृणंतस्तेकुक्षीवर्द्धयंत्वित्थासुतःपौरइंद्रमाव॥छ॥ ॥शूरबलवन्हेइंद्रपिबपिबेत्अभिषु

तमिमंसोमंपिबैवआदरार्थैषावीप्सामंदिनोमदकराःसुतास्तेनिषुताःसोमाःत्वामंदंतुत्वांमादयंतु।म ८
दिस्तुत्यादिषुव्यत्ययेनपरस्मैपदं।तेसोमास्तेतवकुक्षीउदरस्योनोपार्श्वौपृणंतपूरयंतःसंतस्त्वांवर्द्धयं
तुइच्छाअप्रकारेणापोरःउदरःपूरकःसुतोनिषुतःसोमःइंद्रंत्वामावतर्पयंतुअवतेस्तर्पणार्थस्यलङिरू
पं॥छ॥अथद्वादशीमृचमाह॥छ॥ ॥त्वेइंद्राप्यभूमविप्राधियंवनेमऋतयासपंतः।अवस्यवोधीमहिप्रश
स्तिंसद्यस्तेरायोदावनेस्याम॥छ॥ ॥इंद्रविप्रामेधाविनोवयंतेत्वयित्वद्धृदयेअभूमअपिसानुनाय
प्रश्नेवर्त्ततोतेतवहृदयेकिंवर्त्तामहइतिऋतयाऋतंकर्मफलंतत्कामनयासपंतःत्वांपरिचरणाख्येनक
र्मणास्पृशंतोवयंधियंत्वद्धृदशोक्रियमाणंकर्मवनेमसंभजेमहि।वनषणसंभक्तौआशीर्लिङिलिङ्याशि १०
ष्यङित्यङ्प्रत्ययः।किंचअवस्यवात्वत्तोरक्षणमिच्छंतःप्रशस्तिंशास्तिःशासनंप्रकृष्टंशंसनंस्तोत्रंधीमहित्व

यिनिदधीमहि।ततःतेत्वदीयस्यरायोधनस्यदावनेदानायपात्रभूताःसद्यःस्याम।इदानींनवेम॥छ॥अथत्रयोद
शीमृचमाह॥छ॥ ॥स्यामतेतइंद्रयेतऊतीअवस्यवऊर्जंवर्द्धयंतः।शुष्मिंतमंयंचाकनामदेवास्मेरयिंरासि
वीरवंतं॥छ॥ ॥इंद्रतेतवऊतीऊत्याप्रणयनेनअवतेःप्राप्त्यर्थस्यक्तिनिरूपं।तेतवअवस्यवोरक्षा
कामाःऊर्जंहविर्लक्षणमन्नंवर्द्धयंतोभवंतितेतववयंतेस्यामत्वदधीनाभवेम।देवद्योतमानहेइंद्रशुष्मिं
तमंदानानागायाईतयावलवत्तमंयच्छशत्रूणांशोषयितृतमंयंरयिंचकेनामकामयामहे।कनतेःकां
त्यर्थस्ययङ्लुगंतस्यलोटिरूपं।वीरवंतंपुत्रपौत्रैःसहितंतादृशंरयिमस्मेअस्मभ्यंरासिदेहि॥छ॥अथच
तुर्दशीमृचमाह॥छ॥ ॥रासिक्षयंरासिमित्रमस्मेरासिशर्धइंद्रमारुतंनः।सजोषसोयेचमंदसानाःप्रवा
यवःपांत्यग्रणीतिं॥छ॥ ॥इंद्रक्षयंक्षियंतिनिवसंत्यत्रेतिक्षयंगृहंतदस्मभ्यंरासिदेहिमित्रंतथास

खायं अस्मे अस्मभ्यं रासि वा कश्चनेदीदन्निपातः मारुतमारुतां देवविशां संबंधि शर्द्धो बलं नो अस्मभ्यं रासि एने
न मरुतामप्यागमनं प्रार्थ्यते। ये मरुतः सजोषसः सह प्रीयमाणाः मदंतो मोदमाना वायवो यज्ञप्रतिगंता
रः संतः अग्रणीतिं अग्रे नीयमानं सोमं प्रपाति प्रकर्षेण पिबंति ते षां शर्द्ध इति समन्वयः। यद्वा येच वायवो अग्रे
नीयमानं सोमं पिबंति तेषां वा इनां वलं रासि वायव इति छंदस्याया बहुवचनं। वायुर्हि सोमस्याग्रपातेति
॥ब॥ अथ पंचदशीमृचमाह॥ब॥ ॥व्यं त्वि नुयेषु मंदसान स्तृपत्सोमं पाहि द्रुह्य दिंद्र। अस्मान्सुपृत्स्वा तरु
त्रा वर्द्धयो द्यां बृहद्भिरर्कैः॥ब॥ ॥हे इंद्र येषु नवसद्मायन्तेषु मरुत्सु मंदसानो माद्यन्नवसितेमरुतो
नुद्दिप्रं व्यंत्र सोमं नहूयंत्र इत्स्वार्थे द्द्यत्र तद इत्येरिदं रूपं आत्मानं दृढीकुर्वन्त्वं रपततर्पयंत मिमं सो
मं पाहि पिब तरुत्रः शत्रूणां हिंसक हे इन्द्र बृहद्भिर्बलवद्भिः अर्कैः स्तवनीयैर्मरुद्भिः सहितस्त्वं आ इति वार्थे

Dr. BHAU DAJI MEMORIAL

११

तेनो अस्मान्द्यां च पृत्सु पृत्सु संग्रामेषु पुत्रादिभिरस्मादिभिरस्मान्पालनेन च दिवमवर्द्धयः। यद्वा येषु सोमेषु मं
दसानो मोदमानो नवसिते सोमाव्यंत्र त्वां गच्छंत्र शेषं पूर्ववत्॥ब॥ इति द्वितीयस्य षष्ठे पंचमो वर्गः॥ब॥ ॥
अथ षोडशीमृचमाह॥ब॥ ॥महं तइन्नु ये ते तरुत्रोच्छेनिवसिषुम्नमा विवासान्। स्तृणानासो बर्हिः पस्त्याव
त्वोता इदिंद्र वाजमग्मन्॥ब॥ ॥तरुत्र आपद्भ्यस्तारक हे इंद्र ये पुमांसः सुम्नं सुखकरं त्वा सुष्ठैः शास्त्रैः
आविवासान्परिचरेयुः। विवासतेर्लेट्याडागमः। तएव पुमांसः नु क्षिप्रं अविलंबेन महं तो न वेनिश्चरणाः। किं
च बर्हिस्तृणानासः वेद्यां बर्हिराच्छादयंतः ये त्वां पस्त्यावंतीति ते त्वोता इतत्वया रक्षिताः संतः एव पस्त्यावन्तः गृह
सहितं वाजमन्नमग्मन् गच्छंति॥ब॥ अथ सप्तदशीमृचमाह॥ब॥ ॥उग्रेष्विन्नु शूर मंदसानस्त्रिकद्रुकेषु पा
हि सोममिंद्र। प्रदोधुवच्छ्मश्रुषु प्रीणानो याहि हरिभ्यां सुतस्य पीतिं॥ब॥ ॥हे शूर बलवन्निंद्र उग्रेत्र ऊर्णे

द्वि०
धवकृत्सोत्रशास्त्रवत्सुत्रिकद्रुकेषुज्योतिर्गौरायुरितोतन्नामकेषुआभिप्लविकेषुअहस्सुमंदसानोहृष्यन् ६
सोमंपाहिपिबततःप्राणानःसोमपानेनप्रीतोनवतस्तमश्वत्थुलिप्संसोमंप्रदोधुवद्वहजिकंपनेयद्भृंगंतस्य
ज्ञातिरूपंपुनःपुनर्धुन्वन्सुतस्याभिषुतस्यपीतिंपानमभ्विन्यद्धरिभ्यामश्वाभ्यांयुक्तःसन्नयाहिगच्छ॥४॥
अथाष्टादशीमृचमाह॥४॥ ॥धिष्वाशवःशूरयेनवृत्रमवाभिनद्दानुमौर्णवाभं।अपावृणोज्योतिरार्याय
निसव्यतःसादिदस्युरिंद्र॥४॥ ॥शूरहेइंद्रशवसात्त्वंबलंधिष्वधारयदधातेर्लोटिव्यत्ययेनछंदसी
तिशपोलुक्।छंदस्युभयथेतिवासआर्द्धधातुकत्वादिडागमः।येनबलेनदानुंदानोःपुत्रंवृत्रंअर्णवा
नंऊर्णनाभिःकीटविशेषःअर्णवाभइत्युच्यतेतमिवअवाभिनत्विदारितवान्।यद्वाअर्णवःअर्णनाभिःत १२
दाभंतत्सदृशमित्यर्थः।ततस्तमोरूपस्यहननादार्यायकर्मणाम्पुरुत्तपितामहवृत्रःसव्यतःतवसव्यपार्श्वे

निषादित्वयानितरांसंनोबाधितोवर्तते॥४॥अथैकोनविंशीमृचमाह॥४॥ ॥सनेमयेतऊतिभिस्तरंतो
विश्वास्पृधआर्येणदस्यून्।अस्मभ्यंतत्त्वाष्ट्रंविश्वरूपमरंधयःसाख्यस्यत्रिताय॥४॥ ॥सनेमतान्पु
रुषान्संभजेमयेतेतवोतिभिःपालनैःविश्वाःस्पृधःस्पर्द्धमानाःसर्वाविज्ञाःतरंतःहिंसंतःतथाआर्येणआ
र्यनाम्नावेनादस्यूनुपक्षयिष्टन्हिंसंतोभवंतितदस्मभ्यंवशमानय।किंतत्तदाह।त्वाष्ट्रंत्वष्टुःसुतंविश्वरूप
मेतन्नामकमसुरंअरंधयःरध्यतिर्वशगमनेवशमानय।यद्वातमसुरमवधीः।रधहिंसासंराध्योः।रधिज
भोरचीतिनुम्।इंद्रस्त्वाष्ट्रमवधीत्ययमर्थः।तैत्तिरीयकेविश्वरूपोवैत्वाष्ट्रइत्यत्रमहताप्रबंधेनप्रपंचितः।
किंचसाख्यस्यसखित्वस्यअनुपालनायत्रितायमहर्षयेवशमानय।यद्वासनेमतेवयंप्रवृद्धाभवेम
येवयंतवस्तावानिःस्पर्द्धमानाःअज्ञादस्यूंश्चतरंतोतिक्रामंतोनवेमसनेमेतिवृद्ध्यर्थेआधकदात्तः।यद्वासने

द्वि॰ ६

ममित्रावरुणासनंतइतिसकर्मकत्वेनमध्योदात्तःसनेमवाऽन्तवेतीतरंतःतॄप्लवनतरणयोःशतरिरूपं
संज्ञावचनश्चेदंतोदात्तःतथातरंतइवमइनेति॥छ॥अथविंशीमृचमाह॥छ॥ ॥अस्यसुवानस्यमंदि
नस्त्रितस्यन्यर्बुदंवावृधानोअस्तः।अवर्तयत्सूर्योनचक्रंभिनद्वलमिंद्रोअंगिरस्वान्॥छ॥ ॥मंदिनो
स्यमंदकरमिमंसुवानस्यसुन्वतःत्रितस्यतीर्णनमस्कस्यमहर्षेरर्थेवावृधानःसोमेनवर्द्धमानइंद्रः
अर्बुदंअंब्ननिददातीतिअर्बुदोमेघःअनुस्वारस्यारफश्छांदसःयद्वानामैतत्अर्बुदाख्यमसुरंन्यस्तःतृ
हिंसायामित्यस्यलङितिपिबहुलंछंदसीतिविकरणस्यलुक्।गुणेऽलतेइलङ्यादिनातिलोपःनितरा
मवधीत्।महांतंचिदर्बुदंनिक्रमीःपदेत्यादिषुअर्बुदवयःस्पष्टमुक्तं।किंचअंगिरस्वान्अंगिरोभिर्म १३
हितइंद्रःअवर्तयत्असुरहननार्थंवज्रमभ्रामयत्।सूर्योनियथासूर्यश्चक्रंभ्रामयतितद्वत्।यद्वायस्माद

सुरात्नियात्सूर्यःस्वकीयंरथचक्रंआवर्तयत्निषेधार्थीयोत्रनकारःवर्त्तयितुंनाशकत्तुंबलंपणीनामसु
मसुरंभिनत्।यद्वाद्विचक्रेऽपिसर्वेसूर्यस्यरथःतस्यैकंचक्रमिंद्रेणापहृतं।सूर्यइतिसुपांसुलुगितिषष्ठ्येकव
चनस्यसुःसूर्यस्यसंबंधिअपहृतंतदेकंचक्रमवर्तयत्।रक्षोहननार्थंअभ्रामयत्।तेनचक्रेणवलमभि
नत्वानस्त्वार्थो॥छ॥अहर्गणेषुमाध्यंदिनसवनेश्रुतायमानरूपेषुअच्छावाकस्यअहरहःशस्यसंज्ञकमनि
तष्टोवतिसूक्तं।नूनंसातइत्येषातस्यांतेषंमनीयासूक्तिंचा।नूनंसातइत्यंतमुत्तमम्इति॥छ॥सैषासूक्तेए
कविंशीमृचमाह॥छ॥ ॥नूनंसातेप्रतिवरंजरित्रेदुहीयदिंद्रदक्षिणामघोनी।शिक्षास्तोतृभ्योमातिध
ग्भगोनोबृहद्वदेमविदथेसुवीराः॥छ॥ ॥हेइंद्रयादक्षिणादक्षउत्साहनंकरोतीतिदक्षिणास्तोतृभ्यो
देयातेत्वत्संबंधिनीधनवती।जरित्रेश्रोत्रेवयंश्रेष्टमभिमतमर्थंनूनंप्रतिदुहीयत्इदानींप्रतिदोग्धिसंपाद

द्वि॰ ६

पनात्यर्थः।तादृशींदक्षिणांस्तोतृभ्योस्मभ्यंशिक्षप्रयच्छ।किंचनगोनऊनीयःत्वमतिधक्दंदह्यमानार्थस्य
षुडिमंत्रेष्वसेत्यादिना।त्रर्भुक्।नोस्माननतिक्रम्यअन्येभ्योदक्षिणामादाःअथममस्मभ्यंदत्वापश्चाद
न्येभ्योदीयतामित्यर्थः।यद्वानोस्माकंकामान्माधक्माधाक्षीःअपेक्षितफलदानेनहरयेत्यर्थः।सुवी
राःशोभनपुत्रपौत्राःसंतोवयंविदथेस्मिन्यज्ञेबृहत्प्रभूतंस्तोत्रंवदेमत्वांस्तुहिंशयब्रवाम।अत्रसातेप्र
तिदुग्धामितिप्रकृत्यवीरोवीरयत्यमित्रान्वेतेर्वास्याद्गतिकर्मणोवीरयतेर्वेत्यतंनिरुक्तमनुसंधेयं
॥६॥इतिद्वितीयस्यषष्ठेषष्ठोवर्गः॥ ॥६॥इतिगार्त्समदमंडलेप्रथमोनुवाकः॥ ॥द्वितीयेनुवाके
एकादशसूक्तानि॥तत्रयोजातइतिपंचदशर्चंप्रथमंसूक्तं।गार्त्समदंत्रैष्टुभमैंद्रं।संसवेनिष्केवल्येनि १४
विद्धानीयस्यपुरस्ताद्योजातएवेतिशंस्येत।यदिपर्यादितिखंडेसूत्रितं।योजातएवेतिनिष्केवल्येइति॥

आग्निचिकेतृतीयेहनिनिष्केवल्येइतियोजातएवेतिनिविद्धानीयं।सूत्रितंचतृतीयस्यअयमायोजातए
तिमध्यंदिनइतिविश्वजितिमाध्यंदिनेसवनेमैत्रावरुणःस्वशस्त्रेप्राक्तनात्सूक्तात्पूर्वंयोजातइतिसामसू
क्तंशंसेत्।विश्वजितोग्निंनरइतिखंडेसूत्रितं।मत्रामदासोयोजातएवाहरेकइतिसामसूक्तानीति।अनि
पुनिष्केवल्येनिविद्धानमिदंउयेनाङ्गिरानामितिखंडेसूत्रितं।तिष्ठाहरीइतियोजातएवेतिमध्यंदिनइति
महाव्रतेनिष्केवल्येयोजातएवेतिसूक्तं।उरूइतिखंडेसूत्रितं॥वनेनवायोन्यधायिचाकन्योजातएवप्र
थमोमनस्वानिति॥६॥अत्रेतिहासोबृहद्देवतायामुक्तः।संयुज्यतपसात्मानमैंद्रंबिभ्रत्समृद्धवपुः।अदृश्य
नभुक्त्वेनदिविचव्योम्निचैवच॥तमिंद्रमंतंइतिमत्वात्रादैत्यौनामपराक्रमौ।धुनिश्चचुमुरिश्चोभौसायुधा
वभिपेततुः।विदित्वासतयोर्भावंमृषिःपापंचिकीर्षतोः।योजातइतिसूक्तेनकर्माण्यैंद्राण्यकीर्तयत्॥३॥

द्वि० ६ अन्येत्वन्यथावर्णयंति।पुराकिलेंद्रादयोवैन्ययज्ञंसमाजग्मुः।गृत्समदोपितत्रागत्यसदस्यासीत्।दैत्या
श्चेंद्रंजिघांसयतेत्रसमागमन्।तान्दृष्ट्वानिर्जगामेंद्रोयज्ञाद्गृत्समदाकृतिः।सचगृत्समदोवैन्येनपूजि
तोयज्ञवाटान्निरगच्छत्।निर्गच्छंतंतमृषिंदृष्ट्वाअयमेवेंद्रइतिमन्यमानास्तमसुराःपरिवव्रुः।नाहमिंद्रस्तु
च्छःकिंत्वेवंगुणोपेतःसइत्यनेनसूक्तेनतान्प्रत्युवाच।अपरेत्वेवंकथयंति।गृत्समदस्ययज्ञेप्रविष्टमेका
किनमिंद्रंज्ञात्वाअसुराःपरिवव्रुः।सइंद्रोगृत्समदरूपेणयज्ञवाटान्निर्गत्यस्वर्गंजगाम।ततोअसुराःइंद्रो
विलंबितइत्यंतःप्रविश्यगृत्समदंदृष्ट्वापूर्वमिवगृत्समदोगतः।अयंत्विंद्रोस्मद्भयाद्गृत्समदरूपेणास्तइति
तंजगृहुः।सतान्नाहमिंद्रोयमित्यनेनसूक्तेनप्रत्युवाच।अयमेवार्थोमिश्रभारतेप्रपंचितः॥७॥तत्रैषा १५
सूक्तेप्रथमा॥७॥ ॥योजातएवप्रथमोमनस्वान्देवोदेवान्क्रतुनापर्यभूषत्।यस्यशुष्माद्रोदसीअभ्य

सेतांनृम्णस्यमह्नासजनासइंद्रः॥७॥ ॥गृत्समदोब्रूते।हेजनाःहेअसुराः।यःजातएवजायमानस
न्प्रथमःदेवानांप्रधानभूतःमनस्वीमनस्विनामग्रगण्यःदेवोद्योतमानःसन्क्रतुनावृत्रवधादिलक्षणे
नस्वकीयेनकर्मणादेवान्सर्वानपियागदेवान्पर्यभूषत्रक्षकत्वेनपर्यगृह्णात्।भूषअलंकारेइत्यादिःलङि
रूपं।यद्वासर्वानन्यान्देवान्पर्यभूषतपर्यभवत्अत्यक्रामत्।अस्मिन्यज्ञेप्रत्ययेव्यत्ययेनक्सः।श्यकः
कित।किदप्रतिषेधः।यस्येंद्रस्यशुष्मात्शारीरात्बलात्रोदसीद्यावापृथिव्यौअभ्यसेतां।अबिभीतां।भ्यस
भयान्अनुदात्तेत्।भ्यसभयवेपनयोरितिनेरुक्ताः।अभ्यसेतांवेपेतांवा।तथाचमंत्रांतरं।इमेचित्तवम
न्यवेवेपेतेभियसामहीइति।नृम्णस्यसेनालक्षणस्यबलस्यमह्नामहत्त्वेनयुक्तः।सइंद्रोनाहमिति।अत्र
निरुक्तं।योजातएवप्रथमोमनस्वान्देवोदेवान्क्रतुनाकर्मणापर्यभवत्पर्यगृह्णात्पर्यरक्षदत्यक्रामदि

दि० ६

तिवायस्यबलाद्यावापृथिव्यावभ्यबिभीतांनृम्णस्यमह्नाबलस्यमहत्वेनस्यजनासइंद्रःस्पष्टेहिसूक्तार्थस्य
प्रातिनिर्वत्याख्यानसंयुक्तेति॥७॥अथद्वितीयामृचमाह॥७॥ ॥यःपृथिवींव्यथमानामदृंहद्यःपर्व
तान्प्रकुपितांअरम्णात्।योअंतरिक्षंविममेवरीयोयोद्यामस्तभ्नात्सजनासइंद्रः॥७॥ ॥हेजनाःयःइं
द्रःव्यथमानांचलंतींपृथिवींअदृंहत्।शर्करादिभिर्दृढामकरोत्।दृहदृंहिवृद्धौ।यश्चप्रकुपितानइत
स्ततश्चलितान्पक्षयुक्तान्पर्वतान्अरम्णातनियमितवान्।स्वेस्वेस्थानेस्थापितवान्।अरम्णात्रमुक्री
डायांअंतर्भावितण्यर्थस्यव्यत्ययेनश्नाप्रत्ययः।यश्चवरीयउरुतरमंतरिक्षंविममेनिर्ममेविस्तीर्णंचका
रेत्यर्थः।यश्चद्यांदिवमस्तभ्नात्स्तंभनिरुद्धामकरोत्।स्तंभुनिरुद्धइतिस्तौत्रोधातुःसएवेंद्रोनाहमिति॥ १६
॥७॥अथतृतीयामृचमाह॥७॥ ॥योहत्वाहिमरिणात्सप्तसिंधून्योगाउदाजदपधावलस्य।योअश्म

नोरंतरग्निंजजानसंवृक्समत्सुसजनासइंद्रः॥७॥ ॥यःअहिंमेघंहत्वामेघमेहनंहत्वासप्तसर्पणशी
लाःआपःअरिणात्प्रेरयत्।यद्वासप्तगंगायमुनाद्यामुख्यानदीःरिणात्रीङ्स्रवणेक्र्यादिः।यश्चवल
स्यबलनामकस्यासुरस्यअपधाकर्तृकान्निरोधान्निरुद्धागाउदाजत्निरगमयत्।अपधाअपपूर्वाद्दधा
तेरातश्चोपसर्गइतिभावेअङ्प्रत्ययः।सुपांसुलुगितिपंचम्याआकारः।यश्चअश्मनोःअश्नुसेव्याप्नोत्यं
तरिक्षमित्यश्मामेघःअत्यंतदृढरूपायामेघयोरंतर्मध्येवैद्युतमग्निंजनानउत्पादयामास।यश्चसमत्सु
संमंदंतियोद्धाणामास्वितिसमदःसंग्रामाःतेषुसंवृक्नवतिवृणक्तेर्हिंसार्थस्यक्विपिरूपं।सइंद्रो
नाहमिति॥७॥अथचतुर्थीमृचमाह॥७॥ ॥येनेमाविश्वाच्यवनाकृतानियोदासंवर्णमधरंगुहाकः॥
श्वघ्नीवयोजिगीवांलक्षमाददर्यःपुष्टानिसजनासइंद्रः॥७॥ ॥येनेंद्रेणइमाइमानिविश्वाच्यवननेश्व

Dr. BHAU DAJI MEMORIAL

ऋ० ६

राणिच्यवनानिकृतानिस्थिरीकृतानि।यश्चदासंवर्णंशूद्रादिकंयद्वादासमुपक्षपयितारंअधरंनिकृष्टमसु
रंगुहायांगूढस्थानेनरकेवाअकःअकार्षीत्।करोतेर्लुङि मंत्रेघसेत्यादिनाच्लेर्लुक्।किंरूपं।जघ्न्वंलक्षंजि
गीवान्जिजयेक्वसौसन्लिटोर्जेरितिअभ्यासादुत्तरस्यकुत्वं।दीर्घश्छांदसः।जितवान्।यःअर्यःअरेःषष्ठ्ये
कवचनेछांदसोयणादेशः।शत्रोःसंबंधीनिपुष्टानिसमृद्धानिआदत्आदत्ते।तत्रदृष्टांतः।श्वघ्नीवश्वभि
र्मृगान्हंतीतिश्वघ्नीव्याधः।यथाव्याधोजिगीवान्लक्षंतंमृगंपरिगृह्णातितद्वत्॥४॥अथपंचमीमृचमाह॥
॥५॥ ॥यंस्मापृच्छंतिकुहसेतिघोरमुतेमाहुर्नैषोअस्तीत्येनं।सोअर्यःपुष्टीर्विजइवामिनातिश्रदस्मै
धत्तसजनासइंद्रः॥५॥ ॥अपश्यंतोजनाघोरंशत्रूणांघातकंयंपृच्छंतिस्मकुहसेतिसइंद्रःकुत्रवर्तत १७
इति।सेतिसेचिलोपोत्वत्यादध्वरणामितिसोद्दष्यसौविशेषतोस्माभिर्नदृश्यतेतथापिअस्तीतिविश्वासंकुरु

ता।एवंविधैश्वर्यमहिमोपेतःसइंद्रोनाहमिति॥५॥इतिद्वितीयस्यषष्ठेसप्तमोवर्गः॥७॥ ॥अथतस्मिन्सूक्ते
षष्ठी॥६॥ ॥योरध्रस्यचोदितायःकृशस्ययोब्रह्मणोनाधमानस्यकीरेः।युक्तग्राव्णोयोवितासुशिप्रःसुत
सोमस्यसजनासइंद्रः॥६॥ ॥यःरध्रस्यारधहिंसासंराध्याःसमृद्धस्यचोदिताधनानांप्रेरयिताभवति।य
श्चकृशस्यदरिद्रस्यचयश्चनाधमानस्यनाधृयाच्ञोपतापैश्वर्याशीःषु।याचमानस्यकीरेःकरोतेःकी
र्यतेवास्तोत्रब्रह्मणोब्राह्मणस्यचधनानांप्रेरयितायश्चसुशिप्रःशोभनहनुःसुशीर्षकोवासन्युक्त
ग्राव्णःअभिषवार्थमुद्यतग्राव्णःसुतसोमस्याभिषुतसोमस्ययजमानस्यावितारक्षिताभवतिसएवं
ज्ञोनाहमिति।ब्रह्मशब्दस्यचन्नंपस्वेत्याद्युदात्तःस्यात्।यथाब्रह्मवन्वानोअजरंसुवीरमिति।अयंत्वंतोदा
त्तःपठ्यतइतिनान्नपरः॥६॥अथसप्तमीमृचमाह॥७॥ ॥यस्याश्वासःप्रदिशियस्यगावोयस्यग्रामायस्य

द्वि० ६

विश्वेरथासः।यःसूर्यंयउषसंजजानयोअपांनेतासजनासइंद्रः॥ब॥ ॥यस्यसर्वांतर्यामितयावर्त्ति
मानस्यप्रदिशिप्रदेशनेनुशासनेअश्वासोश्वावर्त्तंते।यस्यानुशासनेगावः।यस्यानुशासनेग्रामाःग्रसं
तेअत्रेतिग्रामाजनपदाः।यस्याज्ञायांविश्वेसर्वेरथासोरथावर्त्ततेयश्चवृत्रंहत्वासूर्यंजजानजनया
मास।यश्चोषसं।तथामंत्रःजजानसूर्यमुषसंसुदंसाइति।यश्चामवनेदनद्वाराअपांनेताप्रेरकःसस
इंद्रइत्यादिप्रसिद्धं॥ब॥अथाष्टमीमृचमाह॥ब॥ ॥यंक्रंदसीसंयतीविह्वयेतेपरेवरउभयाअमि
त्राः।समानंचिद्रथमातस्थिवांसानानाहवेतेसजनासइंद्रः॥ब॥ ॥यंक्रंदसीरोदसीशब्दंकुर्वाणेमा
नुषीदेवीचद्वेसेनवासंयतीपरस्परंसंगच्छंत्यौयमिंद्रंविह्वयेतेस्वरक्षार्थंविविधमाह्वयतःपरेउत्कृ १८
ष्टाःअवरेअधमाश्चोभयाःउभयविधाःउभयमाह्वयंति।समानंइंद्ररथसदृशंरथमातस्थिवांसाआस्थितौ

द्वौरथिनौताविंद्रंनानापृथकपृथकहवते।आह्वयेतेयद्वासमानमेकरथमारूढाविंद्राग्नीहवेतेयज्ञा
र्थंयजमानैःपृथगाह्वयेतेतयोरन्यतरःसइंद्रोनाहमिति॥ब॥अथनवमीमृचमाह॥ब॥ ॥यस्मान्न
ऋतेविजयंतेजनासोयंयुध्यमानाअवसेहवंते।योविश्वस्यप्रतिमानंबभूवयोअच्युतच्युत्सजनासइं
द्रः॥ब॥ ॥यस्मादृतेजनासोजनाःनविजयंतेविजयंनप्राप्नुवंति।अतःयुध्यमानायुद्धंकुर्वाणाजना
अवसेस्वरक्षणाययमिंद्रंहवंतेआह्वयंति।यश्चविश्वस्यसर्वस्यजगतःप्रतिमानंप्रतिनिधिर्बभूव।यथाच्यु
तच्युतअच्युतानांक्षयरहितानांपर्वतादीनांच्यावयितासइंद्रइत्यादिप्रसिद्धं॥ब॥अथदशमीमृचमाह
॥ब॥ ॥यःशश्वतोमह्येनोदधानानमन्यमानांछर्वाजिघान।यःशर्द्धतेनानुददातिशृध्यांयोदस्योर्हंतास
जनासइंद्रः॥ब॥ ॥यःसर्वस्मिन्नेनोदधानान्शश्वतोबहून्अमन्यमानान्आत्मानमजानतःइंद्रमत्र

द्वि० ६ जयतोवाजनान्शत्रावभिशृणातिशत्रूननेनेतिशरुर्वज्रःतेनायुधेनजघान।हंतेर्लिटिरूपं।यश्चशर्धतेउत्सा
हंकुरुते।अनात्मज्ञायजनायअध्यात्मसाहनीयंकर्मनानुददातिनप्रयच्छति।अनुपूर्वाद्ददातेर्दाने
ऽपात्यादिकंअन्यस्तानामादितिरिचादात्तवती।तिगतेर्निघातः।यश्चदस्योरुपक्षयितुःशत्रोर्हंताघा
तकःसइंद्रइत्यादिपूर्ववत्॥१०॥इतिद्वितीयस्यषष्ठेऽष्टमोवर्गः॥८॥अथैकादशीमृचमाह॥११॥ ॥यःशं
बरंपर्वतेषुक्षियंतंचत्वारिंश्यांशरद्यन्वविंदत्।ओजायमानंयोअहिंजघानदानुंशयानंसजनासइंद्रः॥११॥
॥ ॥यःपर्वतेषुक्षियंतंइंद्रेणियाबहून्संवत्सरान्प्रच्छन्नोभूत्वापर्वतगुहासुनिवसंतंशंबरंएतन्नाम
कमायाविनमसुरंचत्वारिंश्यांशरदिचत्वारिंशेसंवत्सरेअन्वविंदत्अन्विष्यलब्धवान्ततः।लब्ध्वायःओजाय १९
मानंकर्तुं।क्यङ्सलोपश्च।ओजसोऽप्सरसोनित्यमितिसकारलोपः।बलमाचरंतंअहिंआहंतारंदानुंदानवं

शयानंशंबरमसुरंजघानहतवान्इंद्रोनाहमिति॥११॥अथद्वादशीमृचमाह॥१२॥ ॥यःसप्तरश्मिर्वृष
भस्तुविष्मानवासृजत्सर्तवेसप्तसिंधून्।योरौहिणमस्फुरद्वज्रबाहुर्द्यामारोहंतंसजनासइंद्रः॥१२॥ ॥
यःसप्तरश्मिःसप्तसंख्याकाःपर्जन्यारश्मयोयस्यतेचरश्मयःवराहवःस्वतपसोविद्युन्महसोधूपयश्चा
पयोगृहमेधाश्चेत्येतेयेचमेघाइति।द्विषःपर्जन्याःसप्तपृथिवीमभिवर्षंतिवृष्टिभिरितितैत्तिरीयारण्य
केह्याम्नाता।वृषभोवर्षकःतुविष्मान्वृद्धिमान्बलवान्वासप्तसर्पणःस्वभावान्सिंधून्यःसर्तवेसरणा
यअवासृजत्अवसृष्टवान्।यद्वागंगाद्याःसप्तमुख्यानदीरसृजत्वयश्चवज्रबाहुःसन्द्यांदिवमारोहं
तंरौहिणमसुरंअस्फुरत्जघानस्फुरस्फुरणेतुदादिः॥१२॥अथत्रयोदशीमृचमाह॥१३॥ ॥
द्यावाचिदस्मैपृथिवीनमेतेशुष्माच्चिदस्यपर्वताभयंते।यःसोमपानिचितोवज्रबाहुर्योवज्रहस्तःस

द्वि० ६ जनासइंद्रः॥छ॥ ॥अस्मैइन्द्रायद्यावापृथिवीइतरेतरापेक्षयाद्विवचनं।मित्रयोर्वरुणयोरितिवत्न
मेतेस्वयमेवप्रह्वीभवति।।एषुप्रह्वत्वेकर्मकर्त्तरिलिङ्इत्कनमांयक्चिणावितियकःप्रतिषेधः।चिदपि
चअस्यैंद्रस्यशुष्मात्बलात्पर्वताभयंतेबिभ्यति।यःसोमपाःसोमस्यपतानिचितःसर्वैःयक्षः।अन्येभ्यो
पिदेवेभ्योदृढांगः।वज्रबाहुःवज्रसदृशबाहुःयश्चवज्रहस्तःवज्रयुक्तःसइंद्रइत्यादिप्रसिद्धं॥छ॥
अथचतुर्दशीमृचमाह॥छ॥ ॥यःसुन्वंतमवतियःपचंतंयःशंसंतंयःशशमानमूती।यस्यब्रह्म
वर्द्धनंयस्यसोमोयस्येदंराधःसजनासइंद्रः॥छ॥ ॥यःसुन्वंतंसोमाभिषवंकुर्वंतंयजमानमव
तिरक्षंति।यश्चपुरोडाशादीनिहवींषिपचंतंयश्चऊतीऊतयेसुपांसुलुगितिचतुर्थ्याश्शिर्वःस्तसम्याः २०
सवर्णदीर्घःस्वरक्षायैशस्त्राणिशंसंतंयश्चशशमानंअवतिस्तोत्रंकुर्वाणंस्तौतिब्रह्मपरिवृढंस्तो

त्रंयस्यवर्द्धनंवृद्धिकरंभवति।तथायस्यसोमोवृद्धिर्भवति।यस्यचइदमस्मदीयंराधःपुरोडाशादिलक्ष
णमन्नवृद्धिकरंभवति।सइंद्रइत्यादिप्रसिद्धं॥छ॥अथपंचदशीमृचमाह॥छ॥ ॥यःसुन्वतेपचते
दुध्रआचिद्वाजंदर्दर्षिसकिलासिसत्यः।वयंतइंद्रविश्वहप्रियासःसुवीरासोविदथमावदेम॥छ॥
॥ ॥इदानीमृषिःसाक्षात्कृतमिंद्रंप्रतिप्रब्रूते।हेइंद्रयोदुध्रःदुर्धरःसन्सुन्वतेसोमाभिषवंकुर्व
तेपुरोडाशादिहवींषिपचतेयजमानायवाजमन्नंबलंवा।आदर्दर्षिभृशंप्रापयसिसतादृशस्त्वस
त्यःयथार्थभूतोसिनपुनर्नास्तीतिबुद्धियोग्योसिकिलेतिप्रसिद्धौ।तेतवप्रियासःसुवीरासःकल्याण
पुत्रपौत्राःसंतोवयंविश्वहसर्वेष्विदस्सुविदथंस्तोत्रंआवदेमब्रूयाम॥छ॥इतिद्वितीयस्यषष्ठेनवमो
वर्गः॥छ॥ ॥ऊर्ज्जनित्रीतित्रयोदशर्चंद्वितीयंसूक्तंगार्त्समदं।ऊर्ज्जःसप्तोनांत्रिष्टुबित्यनुक्रमणि

दि० ६ का॥ अस्मभ्यंतद्वसोइतित्रयोदश॥ त्रिष्टुप्शिष्यास्त्रिष्टुबंतपरिभाषयाजगत्यः॥ इंद्रोदेवता॥ उक्थ्येतृती
यसवनेऽच्छावाकशस्त्रे अस्यसूक्तस्यविनियोगः॥ सूत्रितंच॥ ऋतुर्जनित्रीनूमर्त्तोनिवामित्रइतिदश
रात्रेषष्ठेऽहन्यपितृतीयसवनेऽच्छावाकशस्त्रेएतत्सूक्तं॥ ऋतुर्जनित्रीतिनित्यान्यैवाहिकानीतिसूत्रि
तं॥१॥ अथतस्मिन्सूक्तेप्रथमा॥१॥ ॥ऋतुर्जनित्रीतस्याअपस्परिमक्षूजातआविशद्यासुव
र्धते। तदाहनाअभवत्पिप्युषीपयोंऽशोःपीयूषंप्रथमंतदुक्थ्यं॥१॥ ॥ऋतुर्वर्षाख्यःकालःजनित्री
सोमस्यजनयित्रीजननीभवतितस्याःपरितस्याजनित्र्याःसकाशाज्जातःसोमस्यअपउदकानिम
क्षुशीघ्रमाविशत्यास्वप्सुसोमोवर्धते। ताआविशदित्यन्वयः तस्मादप्सुप्रतिष्ठानात्सोमआहनाआ
हंतव्योअभिषोतव्योभवति। आहनाइतिसकारांतमिदंपदं। तथाचमंत्रवर्णः॥ यत्रमदाआहनसोवि २१

ह्वस इति॥ याचांशुरूपासोमलतापयःसारभूतंपिप्पलीवर्धयंत्यभवत् प्यायतेर्लिटिक्वसौलिड्यङोश्चेति
पीभावः वसोःसंप्रसारणं उगितश्चेतिङीप्॥ अंशोःतस्याःसोमलतायाःपीयूषंरसंभृतंपयःउक्थंप्रशस्यं
हविरिंद्रस्यभवति॥१॥ अथद्वितीयामृचमाह॥१॥ ॥सध्रीमायंतिपरिबिभ्रतीःपयोविश्वप्स्न्यायप्रभ
रंतभोजनं। समानोअध्वाप्रवतामनुष्यदेयस्ताकृणोःप्रथमंसास्युक्थ्यः॥१॥ ॥सध्रीअंचतेर्लुक्
छांदसः॥ सहस्यसध्रीरितिसध्र्यादेशः अंतोदात्तत्वेननिपातितः सध्रीचीनाःपयउदकंपरिपरितोबिभ्र
तीर्बिभ्राणाः ईएतानद्यःआयंतिसर्वतोगच्छंतितानद्योविश्वप्स्न्यायविश्वासामपांमानयन्नेतायसमु
द्रायभोजनंभुज्यतइतिभोजनंपयःप्रभरंतप्रकर्षेणास्पांदधंति कृतणएतत्कृतदाह। प्रवतांप्रवणावतांनि
म्नगानांपयसामनुष्यदेक्रियार्थे। तावेकेनकेन्यत्वाइतिकेन्प्रत्ययः॥ अनुष्यंदनायाध्वमार्गःसमानएको

दि० ६

द्रियस्तंतातानिसोमोत्पादननदीप्रवर्त्तनादीनिकर्माणिप्रथमंपूर्वंअकृणोःअकरोःसतादृशस्त्वमिंद्रोपे
तस्त्वंउक्थेभिःसर्वैःप्रशास्योभवसि॥ब॥अथतृतीयामृचमाह॥ब॥ ॥अन्वेकोवदतियद्ददातितद्रू
पामिनंतदपाएकईयते।विश्वाएकस्यविनुदस्तितिक्षतेयस्ताकृणोःप्रथमंसास्युक्थ्यः॥ब॥ ॥यजमा
नायहविर्देवेभ्योददातितदेकोहोताअन्वदतियाज्यापुरोनुवाक्याभ्यांदेवतारयतिएकोध्वर्युःरूपापश्वा
दीनांरूपाणिमिनन्हिंसन्तदपाःतद्विशसनाख्यमपःकर्मयस्यतादृशःसन्ईयतेदेवयजनेसर्वत्रग
च्छतिएकस्याध्वर्योर्विश्वाविनुदःसर्वाणितत्कर्तृकाणिविक्षेपणरूपाणिकर्माणिवैगुण्यानितितिक्षतेतद्यो
ग्यप्रायश्चित्तकरणेनब्रह्मासहतेयुष्मिक्विध्नःसन्नाह्नमायामिष्यते।तानिहविःप्रदानादीनिकर्माणि २२
यस्त्वमकृणोःकारणासत्वमुक्थ्योसि॥ब॥अथचतुर्थीमृचमाह॥ब॥ ॥प्रजाभ्यःपुष्टिंविभजंतआसते

रयिमिवपृष्ठंप्रभवंतमायते।असिन्वन्दंष्ट्रैःपितुरत्तिभोजनंयस्ताकृणोःप्रथमंसास्युक्थ्यः॥ब॥ ॥इं
द्रपुष्टिंत्वयादत्तंपोषकंधनंस्वकीयाभ्यःप्रजाभ्यःविभजंतःअस्यैतावदितिविभागंकुर्वाणाःगृहमेधिनः
आसतेस्वस्वगृहेषुनिवसंति।तत्रदृष्टांतः।आयतेगृहंप्रत्यागच्छतेतिथयेपृष्ठंधारकंप्रभवंतंबहुनर
णसमर्थंरयिंधनंयथाविभज्यप्रयच्छंतितद्वत्असिन्वन्सेतुबंधादिकंकर्मकुर्वन्लोकःपितुःपालयि
त्र्यादिवःसकाशात्आगतंभोजनमुदकंतत्कार्यमोषधीःदंष्ट्रैर्दातैरत्तिभक्षयतियद्वाअसिन्वन्अध्वा
प्रियमाणोग्निःपितुःपालकस्ययजमानस्यसंबंधिभोजनंहविर्लक्षणमन्नंदंष्ट्रैर्दंतरूपैर्ज्वालैरत्तिय
स्ताकृणोरित्यादिसिद्धं॥ब॥अथपंचमीमृचमाह॥ब॥ ॥अधाकृणोःपृथिवींसंदृशेदिवेयोधौतीनामहि
हन्नारिणक्पथः।तंत्वास्तोमेभिरुदभिर्नवाजिनंदेवंदेवाअजनंसास्युक्थ्यः॥ब॥ ॥हेइंद्रअथापिचत्वं

दिवेद्योतमानायसूर्यायपृथिवींचलितांसंतींदृढांकृत्यमदृशोसंदर्शनीयामकृणोरकरोः दृशोविख्येन्वे
ऋ० ६ तिकेन्प्रत्ययांतत्वेननिपातितः यश्चत्वंद्योतीनांचलंतीनांनदीनांपथः मार्गान् अरिणाकव्यस्त्वयः गं
तुंयोग्यामकरोरित्यर्थः रिचिरविरेचने लङि सिपि तस्यहल्ङ्यादिनालोपः अदिह्नन्अदेहत्रेयथमे
धस्यतादृतः हेइंद्रदेवास्तोतारस्त्वंतादृशंतंदेवंत्वांस्तोमेभिः स्तोत्रैरजनत् तत्रदृष्टांतः उदनिर्नियथा
वाजिनमश्वंउदनिरुदकैर्वर्द्धयंतितद्वत् पदन्नोमासित्यादिनाउदकस्यउदभावः शेषंसिद्धं॥छ॥ ॥
अथषष्ठीमृचमाह॥छ॥ ॥योभोजनंचदयसेचवर्द्धनमार्द्रादाशुष्कंमधुमद्दुदोहिथ। सशेवधिंनि
दधिषेविवस्वतिविश्वस्यैकईशिषेसास्युक्थ्यः॥छ॥ ॥हेइंद्रयस्त्वंभोजनंभुज्यतइतिभोजनमन्नादि २२
वदयसेयजमानेभ्यः प्रयच्छसि दयदानगतिरक्षणहिंसादानेषु आत्मनेपदी॥ किंचवर्द्धनंवृद्धिकरं

धनंबलंवादयसे। तथाआर्द्रात्काण्डात्शुष्कमनाद्यंव्याह्यादिकंमधुमत्मधुरसोरपेतंदुदोहिथ दुग्ध
वानसि दुहेर्लिट्क्रादिनियमादिडागमः सतादृशस्त्वंविवस्वतितेपस्विरणंकुर्वाणेयजमानेशेव
धिंधनसदनंनिदधिषेनिदधासि किंबहुनाविश्वस्यजगतः एकः अद्वितीयः एवसन्ईशिषेस्वामीभवसि
ईषऐश्वर्ये ईशः से इतीडागमः सइत्यादिसिद्धं॥छ॥ अथसप्तमीमृचमाह॥छ॥ ॥यः पुष्पिणीश्चप्रस्वश्चध
र्मणाधिदानेव्यवनीरधारयः। यश्चासमाअजनोदिद्युतोदिवउरुरूर्वाँअभितः सास्युक्थ्यः॥छ॥ ॥हे
इंद्रयस्त्वंपुष्पिणीः पुष्पवतीश्चप्रस्वः प्रसूताः प्रसूयमानावा अवनीः अवित्रीः ओषधीः दानेक्षित्पल्यंतेस
स्यान्यत्रेतिदानंक्षेत्रं अधिकरणेल्युट् तस्मिन्क्षेत्रे धर्मणासकललक्षणेनकर्मणाव्यधारयः न्यदधाः
यश्चत्वंदिवोद्योतमानस्यसूर्यस्यअसमाः विषमाः नानाप्रकाराः दिद्युतः दीप्तीरजनयः अजनयः यश्चादि

द्वि० अ० ६

वोनक्षत्राणिजनेर्लङिव्यत्ययेनशप्।यश्चोरुःमहांस्त्वंअभितःसर्वतःऊर्वान्मरुतःप्राणिनिकायान्
पर्वतांश्चाजनयः।शिष्टंस्पष्टं।।८।।अथाष्टमीमृचमाह।।८।। ।।योनार्मरंसहवसुंनिहंतवेपृक्षाय
चदासवेशायचावहः।ऊर्जयंत्याअपरिविष्टमास्यमुतैवाद्यपुरुकृत्सास्युक्थ्यः।।८।। ।।पुरुकृत्पु
रूणांकर्मणांकर्ताहेइंद्रयस्त्वंनार्मरंनरान्मनुष्यान्मारयतीतिनृमरःकश्चिदसुरःतस्यापत्यंना
र्मरःतंसहवसुंवसुनासहवर्ततइतिसहअसुरनामैतएतन्नामकमसुरंनिहंतवेहंतेस्तुमर्थेत
वेप्रत्ययः।तादौचनितीतिगतेःप्रकृतिस्वरत्वं।निहंतुंऊर्जयंत्याःबलवत्याःवज्रधारायाःअपरि
विष्टमलादिभिरव्याप्तंआस्यंअद्यैवअहतमसुरंप्रापयः।किमर्थंपृक्षयेनवहविर्लक्षणान्न २४
लाभायदासवेशायदासानांदस्यूनांवेशायविनाशायच।यद्वाअस्माकमन्नलाभायदस्युविना

शायच।।८।।अथनवमीमृचमाह।।८।। ।।शतंवायस्यदशसाकमाद्यएकस्यश्रुष्टौयद्धचोदमावि
थ।अरज्जौदस्यून्त्समुनब्दभीतयेसुप्राव्योअभवःसास्युक्थ्यः।।८।। ।।हेइंद्रएकस्यएकाकिनःश्रेष्ट
स्यवायस्यतेश्रुष्टौसुखनिमित्तंतदर्थंशतंदशादशशतानिहरयोवाहनार्थंभवंतीतितथाचमंत्रव
र्णः।इंद्रोमायाभिःपुरुरूपईयतेयुक्ताह्यस्यहरयःशतादशेति।अपिचयश्चआ।आद्य।सर्वेषांसर्वतः
उपजीव्यःनतस्येशोमःनाद्याद्याहनेनंनाद्यकरितिहिकृतिः।यद्वायश्चत्वंचोदंस्तोत्राणांप्रेरकंयजमानं
आविथरक्षितवानसि।किंचयस्त्वंअरज्जौरज्जुवर्जितबंधनागारेदस्यूनुपक्षयितॄन्दभीतयेदभी
तिनामर्षिःतदर्थंसमुपहिंसितवानसि।उन्नातेर्हिंसाकर्मणोलङिव्यत्ययेनश्नम्।हल्ङ्यादिनासि
पोलोपः।अडभावश्छांदसः।किंचसुप्राव्यःसुखेनसर्वैरुपसर्पणीयोभावः।शिष्टंसिद्धं।।८।।अथदशमी।।

॥ ॥विश्वेदनुरोधनाअस्यपौंस्यंददुरस्मैदधिरेकृत्नवेधनं।षळस्तभ्नाविष्टिरःपंचसंदृशःपरिपरो
अभवःसास्युक्थ्यः॥छ॥ ॥विश्वेत्सुपांसुलुगितिञसआकारः।सर्वाएवरोधनाःरोधस्वत्योनद्यः
अस्येंद्रस्यपौंस्यंपुंसोभावःपौंस्यंवीर्यमितियावत्।अनुतद्वीर्यमनुवर्त्तंतअस्माइंद्रायददुःहविर्ल
क्षणंयजमानाःप्रयच्छंति।किंचकृत्नवेकर्मणांकर्त्रेइंद्रायधनंदधिरेसर्वेजनाधारयंति।तथाचमंत्रः॥
इंद्रायद्यावऔषधीरुतापोरयिंरक्षंतिजीरयोवनानीति।विष्टिरोविस्तीर्णाःषट्संख्याकाउर्वीःताश्चद्यौ
श्चपृथिवीचाहश्चरात्रिश्चापश्चौषधयइत्येवंरूपाःताअस्तभ्नाःनियमितवानसि।संदृशःसम्यक्पश्यं
तीतिसंदृशोजनाःपंचसंदृशःपंचजनान्परिसर्वतःपरःपारयितापालयितावाअभवःभवसिगत २५
मन्यत्॥छ॥इतिद्वितीयस्यषष्ठेएकादशोवर्गः॥छ॥ ॥अथैकादशीमृचमाह॥छ॥ ॥सुप्रवा

चनंतववीरवीर्यंयदेकेनक्रतुनाविंदसेवसु।जातूष्ठिरस्यप्रवयःसहस्वतोयाचकर्थसेंद्रविश्वास्युक्थ्यः॥
॥छ॥ ॥वीरबलवनहेइंद्रतववीर्यंसामर्थ्यंसुप्रवाचनंसुष्ठुप्रवचनंसर्वैःश्लाघनीयमित्यर्थः।कितत्
एकेनक्रतुनाकर्मणा।वसुविंदतेशत्रूणांधनंलभसे।विद्लृलाभे।तुदादिःस्वरितेत्।यद्वातदीयंधनंस्तोतॄ
न्प्रापयसि।ईदृशंयत्तत्प्रशस्यमित्यर्थः।सहस्वतोबलवतोजातूष्ठिरस्यएतन्नामकःकश्चित्तस्यवयोन्नं
प्रादाः।यद्वाजातूष्ठिरस्यजातुकदाचित्सर्वदास्थिरस्यसहस्वतःबलवतोयज्ञादेयःकर्म्मणःसंबंधिव
योहविर्लक्षणमन्नंप्रविंदसइतिसमन्वयः।यायानीमानिअन्यानिविश्वासर्वाणिकर्माणिचकर्थकृत
वानसि।सतादृशस्त्वंउक्थ्यःसर्वैःप्रशंसनीयोभवसि॥छ॥अथद्वादशीमृचमाह॥छ॥ ॥अरमयःसरप
स्तरायकंतुर्वीतयेचवय्यायचस्रुतिं।नीचासंतमुदनयःपरावृजंप्रांधंश्रोणंश्रवयन्सास्युक्थ्यः॥छ॥ ॥

द्वि० ६

हेइंद्रसरपसःसरणमपःकर्मयासांतासरपसःशकंध्वादित्वात्पररूपत्वं।ताअपःकंसुखेनतरायतरणाय
अरमयःअरंक्रीयः।किंचतुर्वीतयेतुर्वीतिनामकश्चिद्राजर्षिःतस्मैवय्यायवय्योनामकश्चित्तस्मैताभ्यां
स्रुतिंसरणंप्रतिअरमयः।तौहिजलपूर्णांमहानदींदृष्ट्वातरीतुमसमर्थावास्तां।तौचत्वयातारितौ।परावृजं
परितःपापानिवृणक्तिदहतीतिपरावृक्कश्चिदृषिःतमप्सुमग्नंतयानीचानीचंसंतंउदनयः।आप्लुत्यउ
न्नीतवानसि।किंच।अंधंसंतंश्रोणंपंगुंसंतंचक्षुर्दानात्पंगुकरणाच्चउदनयः।किंकुर्वन्प्रकर्षेणश्रव
यन्आत्मानंकीर्तिमंतंकुर्वन्उदनयइतिसमन्वयः।सहइत्यादिसिद्धं॥ब॥अथत्रयोदशीमृचमाह॥ग॥
॥ ॥अस्मभ्यंतद्वसोदानायराधःसमर्थयस्वबहुतेवसव्यं।इंद्रयच्चित्रंश्रवस्याअनुद्यून्बृहद्वदेमवि २६
दथेसुवीराः॥ग॥ ॥वसोःसर्वस्यवासकवसुमन्वाहेइंद्रस्तोतृभ्योस्मभ्यंतद्रायोधनंदानायस्तुपन्द

णमेतत्।भोगायचसमर्थयस्वदेहिअस्मान्संगमयेत्यर्थः।अर्थयाचनेचुरादिरदंतआत्मनेपदी।तेतवब
हुप्रभूतंवसव्यंवासवंवसव्यंवस्वादित्वात्स्वार्थिकोयत्।तादृशंप्रभूतंधनमस्तिखलु।चित्रंचायनीयंयं
इंद्रंअनुद्यून्अन्वहं।कालाध्वनोरितिद्वितीया।श्रवस्याःभोग्यमिच्छेः।अंतसाश्तएपर्थत्वात्।अकर्मकत्वं
यथारोदितीतिसत्यत्वंदेह्यत्रकर्मणाउद्देश्यकर्मचविधेयकर्मेतिद्वतंउद्देश्यकर्मणासकर्मकोनविध्यति
।यथामाणवकंपुत्रीयतीतिनाप्यत्रउदाहृतां।श्रवःशब्दाच्छंदसिपरेच्छायांक्यच्।तदंतस्यलेड्याडागमेरूपं।सु
वीराःकल्याणपुत्रपौत्राःसंतोवयंविदथेअस्मिन्यज्ञेबृहत्प्रभूतंशस्त्रादिकंवाक्यंवदेम॥ब॥इतिद्वितीयस्य
षष्ठेद्वादशोवर्गः॥ब॥ ॥अध्वर्यवोभरतेतिद्वादशर्चंतृतीयंसूक्तं।गार्त्समदंत्रैष्टुभमैंद्रं।अध्वर्यवोद्वाद
शेत्यनुक्रांतं।सूक्तविनियोगोलैंगिकः।अतिरात्रेप्रथमेपर्यायेहोतुःशस्त्रयाज्याअध्वर्यवइत्येषा।अध्वर्यवो

१६०६

भरतेंद्रायसोममितियाज्येतिसूत्रितं॥छ॥तस्मिन्सूक्तेप्रथमामृचमाह॥छ॥ ॥अध्वर्यवोभरतेंद्राय
सोममामत्रेभिःसिंचतामद्यमंधः।कामीहिवीरःसदमस्यपीतिंजुहोतवृष्णेतदिदेषवष्टि॥छ॥ ॥
हेअमदोभूते।अध्वर्यवःअध्वरस्यनेतारःअध्वरंयजमानायेच्छंतः।कव्यध्वरेइतनस्यविलोपइत्यकार
लोपः।अध्वर्यास्कः।अध्वरयुअध्वर्युरध्वरंयुनक्त्यध्वरस्यनेतेति।हेअध्वर्यवःइंद्रायसोमंदेवायइद्दिन्निाडु
भरवेदिंप्रतिभरतहरत।आमंत्रितस्याविद्यमानत्वादनिघातः।ऊत्वाअमत्रेभिःअमासहअदंत्यत्रभो
जनादयइतिअमत्राणिचमसाः।तैःमद्यंशब्दकरमंधःसोमलक्षणमन्नंआसिंचतअग्नौप्रक्षिपत।अत्रया
स्कः।आसिंचतामत्रैर्मदनीयमंधःअमत्रंपात्रममाअस्मिन्नदंतीति।वीरःसइंद्रःअस्यसोमस्यपीतिंपा २७
नंसदमिदंसदैवकामीहिकामयमानोहि।तस्मात्वृष्णेवर्षित्रेइंद्रायसोमंजुहोतजुहुत।हुदानादान

योर्लोटितप्तनप्तनथनाश्चेतितबादेशः।एषइंद्रःतदित्।तदेवसोमद्रव्यंवष्टिकामयते॥छ॥अथद्वितीयामृ
चमाह॥छ॥ ॥अध्वर्यवोयोअपोवव्रिवांसंवृत्रंजघानाशन्येववृक्षं।तस्माएतंभरततद्वशायांएषइंद्रो
अर्हतिपीतिमस्य॥छ॥ ॥हेअध्वर्यवःयइंद्रःअपउदकानिवव्रिवांसंआआवृत्यस्थितंवृत्रंवृणोत्याका
शमितिवृत्रोमेघःमेघंवज्रेणजघानहतवान्।यथाअत्रान्यास्वेक्षताअग्निनावृक्षंदहतितद्वत्।तस्मैत
द्वशायसोमकायतस्माइंद्रायएतंसोमंभरतउत्तरवेदिंप्रतिहरत।एषइंद्रःअस्यसोमस्यपीतिंपानमर्ह
ति॥छ॥अथतृतीयामृचमाह॥छ॥ ॥अध्वर्यवोयोदृभीकंजघानयोगाउदाजदपहिवलंवः।तस्मा
एतमंतरिक्षेनवातमिंद्रंसोमैरोर्णुतजूर्णवस्त्रैः॥छ॥ ॥हेअध्वर्यवःयइंद्रःदृभीकंसर्वान्विदारय
तिनियंकरोतीतिदृभीकोनामासुरःतमसुरंजघान।यश्चबलासुरेणनिरुद्धगाउदाजःउन्निरगमयत॥

ऋ० ६

यश्वतमेवबलमसुरं अपवः अपावृणोत् हिंसितवानित्यर्थः। वृणोतेर्लङि मंत्रे घसेत्यादिना च्लेर्लुक्। हल्ङ्या
दिना तिपो लोपः। तस्मा इंद्राय सोमं एतं सोमं अंतरिक्षे घातनवातमिव धारानिर्व्यामिकं कुरुतन देवाद्
सोमैरिंद्रं आजुहुत समवृत आच्छादयत जुगुम्भ आच्छादने आद्यादिकः। लोटि रूपं तत्र दृष्टांतः। अत्कं नजूर्णो
यथा वस्त्रेण गमाच्छादयति तद्वत्॥३॥ अथ चतुर्थीमृचमाह॥३॥ ॥अध्वर्यवो य उरणं जघान नव चख्वां
संनवतिं च बाहून्। यो अर्बुदमव नीचा बबाधे तमिंद्रं सोमस्य भृथे हिनोत॥४॥ ॥हे अध्वर्यवः यः इंद्रः
नवनवतिं च एकोनशतं बाहून् चख्वांसं चष्टेर्लिटि रूपं। यद्वा खनतेः क्वसौ रूपं जनेलोपः छांदसं रूपं सव
स्य दर्शयंतं यद्वा आत्मनो देहे निखातवंतं उरणं एतन्नामकमसुरं जघान यश्च अर्बुदं एतन्नामकमसुरं
नीचा धो मुखं कृत्वा अव बबाधे तमेनमिंद्रं सोमस्य भृथे सोमे बिभ्रति पात्रे हिनोत वर्द्धयत। यद्वा सोम

२८

स्य भृथे भरणे संपादने सति हिनोत स्तोत्रैः प्रीणयत। हिगतिवृद्ध्योः स्वादिः॥५॥ अथ पंचमीमृचमाह
॥६॥ ॥अध्वर्यवो यः स्वश्नं जघान यः शुष्णमशुषं यो व्यंसं। यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इंद्रायांधसो
जुहोत॥६॥ ॥हे अध्वर्यवः यः इंद्रः अश्नं अश्नाति नन्दयति प्राणिजातमिति। यद्वा अश्नुते स्वतेजसा स
र्वं व्याप्नोतीति अश्नः। कश्चिदसुरः तन्नमसुरं सुसु जघान। अशुषं केनाप्यशोषणीयं शुष्णमसुरं यश्च तं असु
रं व्यंसं असहीनं कृत्वा जघान यश्च पिप्रुं तेजसा जगत्पूरयंतं एतन्नामकमसुरं जघान यश्च। तैत्ति
रीयके नमुचिमसुरं नालब्धेत्येति प्रकृत्य फेनेन शिर उदवर्तयदित्यं तन वाक्यसंदर्शनेन नमुचिवधः प्र
पंचितः। तथा मंत्रश्च। अपां फेनेन नमुचेः शिर इंद्रोदवर्त्तय इति रुधिक्रां तं एतन्नामकमसुरं यश्च जघान
तस्मा इंद्राय अंधसो हविर्लक्षणान्यन्नानि जुहोत जुहुत॥६॥ अथ षष्ठीमृचमाह॥७॥ ॥अध्वर्यवो यः

Dr. Bhau Daji Memorial

८६·६

शतंशंबरस्यपुरोबिभेदाश्मनेवपूर्वीः।योवर्चिनःशतमिंद्रःसहस्रमपावपद्भरतासोममस्मै॥छ॥ ॥
हेअध्वर्यवःयइंद्रःशंबरस्यमायाविनोसुरस्यपूर्वीः।पुरातनीःशतंपुरःपुराअश्मनेव।अश्मसदृशेनवज्रेन
बिभेदयश्चेंद्रोवर्चिनःवर्चदीप्तौगमेरितिविधीयमानइनिप्रत्ययस्यवचनादस्माद्भवतीयद्वानामैतत्।तस्या
सुरस्यशतंसहस्रंएतत्संख्याकानपरिमितान्वीरान्पुत्रान्आवपत्युगपदेवभूम्यांअपातयत्।तथा
चमंत्रवर्णः।शतंवर्चिनःसहस्रंचसाकंहथोअप्रत्यसुरस्यवीरानिति।अस्माइंद्रायसोमंभरत॥छ॥इति
द्वितीयस्यषष्ठेत्रयोदशोवर्गः॥छ॥ ॥अथसप्तमीमृचमाह॥छ॥ ॥अध्वर्यवोयःशतमासहस्रंभूम्या
उपस्थेवपज्जघन्वान्।कुत्सस्यायोरतिथिग्वस्यवीरान्न्यावृणग्भरतासोममस्मै॥छ॥ ॥हेअध्वर्यवोजघ २९
न्वान्हतवान्यइंद्रःशतंसहस्रमसुरान्भूम्याउपस्थेउत्संगेअवपत्एकेनेनप्रकारेणपातयत्।किंचयः

कुत्सस्यएतन्नामकस्यराजर्षेःआयोःपौरूरवस्यराजर्षेःअतिथिग्वस्यदिवोदासस्यएतेषांत्रयाणांवी
राननिगंतॄन्पातिरक्षितॄन्शुष्णादीनसुरान्न्यावृक्वृणक्तिर्हिंसाकर्माअवधीत्।तथाचमंत्रवर्णः।त्वं
शुष्णंशुष्मकृत्यैषाविथारंधयोतिथिग्वायशंबरमिति।तादृशायेंद्रायसोमंभरत॥छ॥अथाष्टमीमृचमाह
॥छ॥ ॥अध्वर्यवोयंनरःकामयाध्वेश्रुष्टीवहंतोनशथातदिंद्रे।गभस्तिपूतंभरतश्रुतायेंद्रायसोमंय
ज्यवोजुहोत॥छ॥ ॥नरःकर्मणांनेतारोहेअध्वर्यवःयदभिलषितमर्थंकामयध्वे।कामयतेर्लेट्याडाग
मः।श्रुष्टीक्षिप्रंइंद्रेसोमंवहंतःआपयंतोयूयंतदभिलषितंफलंनशाथप्राप्स्यथ।श्रुतायलोकेप्रसिद्धायेंद्रा
यगभस्तिपूतंहस्ताभ्यांमार्जनदोहनादिनिःशोधितंसोमंभरत।उत्तरवेदिंप्रतिहरत।ततोयज्यवःयागंकु
र्वाणाहेअध्वर्यवःआहृतसोममिंद्रायजुहोत।जुहुत।अग्नौप्रक्षिपत॥छ॥अथनवमीमृचमाह॥छ॥ ॥छ॥

ऋ० ६ अध्वर्यवःकर्तनाश्रुष्टिमस्मैवनेनिपूतंवनउन्नयध्वं।जुषाणोहस्त्यमभिवावशेवइंद्रायसोमंमदिरंजु
होत॥८॥ ॥अध्वर्यवःअस्माइंद्रायसोमंश्रुष्टिंसुखकरंकर्तनकुरुत।करोतेर्लोटिबहुलंछंदसीति
विकरणस्यलुक्।तप्तनप्तनथनाश्चेतितनबादेशः।आमंत्रितस्याविद्यमानत्वान्ननिघातः।किंचवनेसं
भजनीयेवनउदकेनिपूतमाप्यायनेनशोधितंसोममुन्नयध्वंऊर्ध्वंनयत।यद्वावनेतद्विकारेचमसेनि
पूतंदशापवित्रेणशोधितंसोमंवनेचमसेउन्नयध्वंजुषाणःप्रीयमाणःसइंद्रःवोयुष्माकंहस्त्यंहस्ता
भ्यामभिषुतंसोमंअभिवावशेकामयते।वशकांतौयङ्लुगंतस्यलटिव्यत्ययेनात्मनेपदंलोपस्तआ
त्मनेपदेष्वितितलोपः।मदिरंमदकरमिमंसोममिंद्रायजुहोतइंद्रोद्देशेनाग्नौप्रक्षिपत॥८॥अथदशमी ३०
मृचमाह॥८॥ ॥अध्वर्यवःपयसोधर्यथागोःसोमेभिरीपृणताभोजमिंद्रं।वेदाहमस्यनिभृतंमएतद्दित्सं

तंभूयोयजतश्चिकेत॥९॥ ॥हेअध्वर्यवःयथागोरूधःपयसापूर्णंतद्वदीमेनंभोजंफलस्यदातारंरक्षिता
रंवेंद्रंसोमेभिःसोमैःपृणत।पूरयत।मेमदीयास्यास्यसोमस्यनिभृतंगूढंसुखसाधनत्वनाहमेववेद
जानामि।इतीदंसर्वंनपरस्मैकथितं।तथापियुष्मभ्यंब्रवीमीत्येवंदित्संतंसोमंदातुमिच्छंतंयजमानंय
जतोयष्टव्यइंद्रोभूयोतिशयेनचिकेत।दित्संतंडुदाञ्दानेइच्छायांसन्सनिमीमाघ्विति।आकारस्यइस
देशः।अत्रलोपोभ्यासस्याद्धधातुकइतिमकारस्यनत्वं॥९॥अथैकादशीमृचमाह॥९॥ ॥अध्वर्यवो
योदिव्यस्यवस्वोयःपार्थिवस्यक्षम्यस्यराजा।तमूर्दरंनपृणतायवेनेंद्रंसोमेभिस्तदपोवोअस्तु॥१०॥ ॥
हेअध्वर्यवःयइंद्रःदिवस्यद्युलोकार्हस्यवस्वोवसुनोराजाभवतियश्चपार्थिवस्यपृथिवीशब्देनविस्तीर्ण
मंतरिक्षमुच्यते।तत्रत्यंधनंपार्थिवस्यपृथिवीशब्देनविस्तीर्णमंतरिक्षमुच्यते।तत्रत्यंधनपार्थिवस्य

राजायश्चक्षम्यस्यक्षमाभूमिः तत्रत्यंधनंक्षम्यंतस्यराजानवर्ततितमेवंविधमिंद्रंसोमेभिः सोमैः पृणातर्प
यत। तत्रदृष्टांतः। जर्द्धनेनजर्हृष्टंदीर्णमुहुरैस्कूसलं। यथायवेनस्पृणंतद्वदिंद्रंस्परयतेति। नादृशंसोमादि
नेंद्रोदक्षरणात्तक्षणमपःकर्मवायुष्माकमस्तु॥छ॥ अथद्वादशीमृचमाह॥छ॥ ॥अस्मभ्यंतद्वसोदा
नायराधःसमर्थयस्वबहुतेवसव्यं। इंद्रयच्चित्रंश्रवस्याअनुद्यून्बृहद्वदेमविदथेसुवीराः॥छ॥ ॥एषा
ऋग्व्याख्याता॥छ॥ ॥इतिद्वितीयस्यषष्ठेचतुर्दशोवर्गः॥छ॥ ॥छ॥ ॥प्रघान्वस्येतिदशर्चंचतुर्थं
सूक्तं। गार्त्समदंत्रैष्टुभमैंद्रं। अत्रानुक्रमणिका। प्रघदशेतिदशरात्रेपृष्ठेइतिनिष्केवल्येत्रीणिसूक्तानि
तत्रेदंद्वितीयं। षष्ठस्येतिखंडेसूत्रितं। एंद्रंयाह्युपनःप्रघान्वस्यान्नरेकइतिनिष्केवल्यमितित्र्येकमा ३१
मकेनिष्केवल्येप्रघान्वस्येत्येषासूक्तमुखीयाउशनस्तोमेनेसूत्रितं। अर्यमामनुषोदेवताताप्रघान्वस्य

महतोमहानीति॥छ॥ सैषासूक्तेप्रथमा॥छ॥ ॥प्रघान्वस्यमहतोमहानिसत्यासत्यस्यकरणानिवोचं।
त्रिकद्रुकेष्वपिबत्सुतस्यास्यमदेअहिमिंद्रोजघान॥छ॥ ॥गृत्समदोब्रूते। महतोबलवतःसत्यस्य
सत्यसंकल्पस्यास्येंद्रस्यसत्यासत्यानियथार्थानिमहांतिमहांतिकरणानिअस्मिन्सूक्तेवक्ष्यमा
णानिकर्माणिनुअद्यप्रवोचंप्रकर्षेणब्रवीमि। वचपरिभाषणे। छंदसिलुङ्लङ्लिटइतिवर्तमानेलुङि
अस्यतिवक्तिख्यातिभ्योऽङ्वचउम्। ज्योतिरादिकामितानियंतेत्रिकद्रुकेष्वज्योतिर्गौरायुरित्ये
वरूपेष्वभिप्लविकेष्वहःसुतस्याभिषुतंसोममिंद्रोपिबत्। ततःपीतस्यास्यसोमस्यमदेहर्षेसंजाते
सतिइंद्रःअहिंवृत्रमसुरंजघानहतवान्॥छ॥ अथद्वितीयामृचमाह॥छ॥ ॥अवंशेद्यामस्तभाय
द्बृहंतमारोदसीअपृणादंतरिक्षं। सधारयत्पृथिवींपप्रथच्चसोमस्यतामदइंद्रश्चकार॥छ॥ ॥

ऋ०६

अवंशेआकाशेद्यांद्योतमानंस्वर्गंद्युलोकंवाअस्तभायत्।इंद्रःअस्तभ्नात्अनवलंबनस्यतस्याव
स्थानमकरोदित्यर्थः।स्तंभइतिसौत्रोधातुःक्रियादिःलङिव्यत्ययोबहुलमितिश्नावपिशायजा
देशः।बृहंतंमहांतं।तद्द्विरोदसीद्यावापृथिव्यौच।अपृणात्स्वतेजसापूरितवान्।किंचसइंद्रःपृथिवीं
विस्तीर्णांभूमिंधारयत्अधारयत्।तथापप्रथच्चएनांभूमिंअप्रथयत्।प्रथप्रख्याने।प्रथेस्तस्यलुङि
चङ्यन्यतरस्यामितिमध्योदात्तत्वं।सोमस्यमदेहर्षेसंजातेसतितानिमानिकर्माणिइंद्रश्चकार।।२।।
।।अथतृतीयामृचमाह।।३।। ।।सद्मेवप्राचोविममायमानैर्वज्रेणखान्यतृणन्नदीनां।वृथासृजत्प
थिभिर्दीर्घयाथैःसोमस्यतामदइंद्रश्चकार।।३।। ।।सद्मेवयथायज्ञगृहमानैःषड्त्रिंशत्प्रक्रमप्रा २२
चीत्येवंरूपैःपरिमाणैःप्राक्प्रवणान्कुर्वंतितद्वत्सिंधून्लोकान्वापृथग्भूतान्मानैःपरिमाणैःप्राचः

प्राङ्मुखान्विममयेइंद्रोविशेषेणनिर्मितवान्।तथानदीनांखानिनिर्गमनद्वाराणिवज्रेणचअतृणत्अख
नत्।तृदिर्हिंसानादरयोः।रुधादिर्लङ्।तथाचमंत्रः।इंद्रोअस्मांअरदद्वज्रबाहुरिति।तथादीर्घयाथैःबहु
कालगंतव्यैःपथिभिर्मार्गैःवृथासृजत्अनायासेनतानदीःसृष्टवान्सोमस्येतिसिद्धार्थइति।।३।।अथच
तुर्थीमृचमाह।।४।। ।।सप्रवोळ्हॄन्परिगत्यादभीतेर्विश्वमधागायुधमिद्धेअग्नौ।संगोभिरश्वैरसृजद्रथेभिः
सोमस्यतामदइंद्रश्चकार।।४।। ।।पुराकिलचुमुरिधुनिप्रभृतयोऽसुराःदभीतेःपुरंसंरुध्यपरिगृहीतस्मा
त्पुरान्निरगुरितिकथा।सइंद्रःदभीतेःदभीतिर्नामकश्चिद्राजर्षिःतस्यप्रवोळ्हॄन्प्रवोढॄन्सइविड्गोरादव
ारस्येत्यात्वंप्रकर्षेणतद्दभीतिंवहतस्तानसुरान्समध्येमार्गंपरिगत्यतेषांविश्वंसर्वमायुधमिद्धेदीप्यमा
नेवह्नौअधाक्अधाक्षीत्।दहेर्लुङिमंत्रेघसेत्यादिनाच्लेर्लुक्।पश्चात्तंदभीतिंगोभिरश्वैरथेभिःरथैश्चस

पृ० ६ मरुज्जनसंयोजितवान्।सोमस्यादिसिद्धमिति॥ब॥अथपंचमीमृचमाह॥ब॥अतिनाम्नेकाइमेरुत्वतीयेरु
क्षुखाया।अनिमृत्निनतिखंडेरुत्रितं।इसंमहीधुनिमेतोररम्णादिति॥ब॥अथपंचमीमृचमाह॥ब॥ ॥
सईमहीधुनिमेतोररम्णात्सोअस्नातॄनपारयत्स्वस्ति।तत्स्नायरयिमन्निप्रतस्थुःसोमस्यतामदइंद्रश्च
कार॥ब॥ ॥सइंद्रःईमेनांमहीमहतींधुनिंधुनोतिस्तोतॄणांपापानीतिधुनयःपरुष्णीनदीनांएतोः
ईश्वरपदासन्निधानेपितोस्तन्प्रत्यय।ऋषीणागमनार्थंअरम्णात्उपाशमयत्।महाजलांनदींअल्पो
दकामकरोदित्यर्थः।ततःसइंद्रःअस्नातॄन्स्नातुमशक्तान्तरणासमर्थान्ऋषीन्स्वस्तिक्षेमेनअपार
यत्तेमहर्षयःत्स्नायांतांनदीमुत्तीर्यपरक्षायितपेत्यगच्छंतितंरयिंअभिलक्ष्यप्रतस्थुःप्रतस्थिरेसिद्धं ३३
सिद्धं।ब॥इतिद्वितीयस्यषष्ठेपंचदशोवर्गः॥ब॥ ॥अथषष्ठीमृचमाह॥ब॥ ॥सोदंचंसिंधुमरिणान्महि

त्वावज्रेणानउषसःसंपिपेष।अजवसोजविनीनिर्विहृश्वश्योमस्यतामदइंद्रश्चकार॥ब॥ ॥सइंद्रःसिंधुं
प्रांचंसंतमहित्वास्वकीयेनमहिम्नाउदंचमरिणात्।उदङ्मुखमकरोत्।सिंधुशब्दःछंदसिउलिंगः।उषसः
उषोदेव्याःअनःशाकटंवज्रेणसंपिपेष।दृणश्चकार।एतच्चादिवश्चिद्दुहितरमित्यत्रस्पष्टंवक्ष्यते।
किंकुर्वन्अजवसःजवहीनाउर्वलाःसेनाजविनीनिःजवयुक्तानिःविहृश्वन्विशेषेणनिंदन्पिपेष
तिसमन्वयः।वृश्चछेदनेशतरिग्रहिज्यादिनासंप्रसारणंशिष्टंस्पष्टं॥ब॥अथसप्तमीमृचमाह॥ब॥
॥ ॥सविशंअपगोहंकनीनामाविर्भवंनुदतिष्ठत्पराहक्।प्रतिश्रोणास्थाद्यनगच्चष्टसोमस्यतामद
इंद्रश्चकार॥ब॥ ॥पुराकिलकन्यकाःचक्षुर्हीनंपाददीनंपरावृजंजिहासुमृषिंहसंतिस्म।ततःस
ऋषिःइंद्रंस्तुत्वाचक्षुःपादंचलेनेतदेतदाह।कनीनांकन्यकानांअपगोहंनिगोनाविवंविशन्पराहृक्ऋषिः

२.६०.६

आविर्भवन्सर्वेषांप्रत्यक्षोभवन्नुदतिष्ठत्।श्रोणः एवंपंगुरिदानींइंद्रस्यप्रसादाच्छिन्नजानुःताः
कन्याःअस्थितात्एवंमंधःअधुनाचक्षुर्लब्ध्वाएताःकन्यकाःविशेषेणपश्यतेस्म।तानीमानिक
र्माणिमदइंद्रश्चकार॥छ॥अथाष्टमीमृचमाह॥छ॥ ॥भिनद्वलमंगिरोभिर्गृणानोविपर्वतस्यदृंहि
तान्यैरत्।रिणग्रोधांसिकृत्रिमाण्येषांसोमस्यतामदइंद्रश्चकार॥छ॥ ॥अंगिरोभिर्गृणानस्तूय
मानःसइंद्रःवलंवलनामकमसुरंभिनत्।तथागवांनिरोधकस्यपर्वतस्यदृंहितानिशिलाभिर्दृढीकृता
निद्वाराणिव्यैरत्।उद्घाटितवान्।तदेवाह।एषांपर्वतानांकृत्रिमाणिक्रियमाणिक्रियानिर्वृत्तानिरोधां
सिनिरुद्धानिद्वाराणिरिणक्।उदघाटयत्।गतमन्यत्॥छ॥अतिर्भूत्विनाम्न्येकादेनिक्षेवल्येसक्तसुखी २४
या।स्वप्नेनेत्येषा।सूत्रितं।स्वप्नेनाभ्युप्याचुमुरिंधुनिंचेतिसूक्तसुखीयेति॥छ॥सैषासूक्तेनवमीमृचमाह॥

॥छ॥ ॥स्वप्नेनाभ्युप्याचुमुरिंधुनिंचजघंथदस्युंप्रदभीतिमावः।रंभीचिदत्रविविदेहिरण्यंसोमस्यताम
दइंद्रश्चकार॥छ॥ ॥सत्वंदस्युंसर्वस्योपक्षपितारंचुमुरिंधुनिंचएतन्नामावसुरौस्वप्नेनदीर्घनिद्रया
अभ्युप्यसंयोज्यजघंथहतवानसि।ततस्ताभ्यांयुद्ध्यमानंदभीतिंराजर्षिंआवः।रक्षितवानसि।तथाचमं
त्रवर्णः।त्वंनिदस्युंचुमुरिंधुनिंचास्वापयोदभीतयेसुहंत्विति।आवः।अवतेरक्षणार्थस्यलङिसिपिरूपं।
रंभी।चित्।वेत्रधारीवास्यदौवारिकः।अत्रास्मिन्युद्धेतयोरसुरयोर्हिरण्यंधनंविविदेलेभेविद्लृलाभे
स्वरितेत्।तानीमानिकर्माणिसोमस्यमदेसतिचकारेति॥छ॥अथैकादशीमृचमाह॥छ॥ ॥नूनंसाते
प्रतिवरंजरित्रेदुहीयदिंद्रदक्षिणामघोनी।शिक्षास्तोतृभ्योमातिधग्भगोनोबृहद्वदेमविदथेसुवीराः॥छ॥
॥छ॥ ॥एषाव्याख्याता॥छ॥इतिद्वितीयषष्ठेषोडशोवर्गः॥छ॥ ॥प्रवःसतामितिनवर्चंपंचमंसूक्तं

MEMORIAL

१६। ६ गार्त्समदमैंद्रं।अत्रानुक्रमणिका।प्रवोनुवांत्यात्रिष्टुबिति।नवमीत्रिष्टुप्शिष्टात्रिष्टुबंतपरिभाषयाज
गत्यः।तृतीयेपर्यायेछावाकशस्त्रेप्रवःसतामितिसूक्तं।अतिरात्रमितिखंडेसूत्रितं।प्रवःसतांप्रद्रोणे
हरयःकर्माग्मन्नितियाज्येति।।छ।।तस्मिन्सूक्तेप्रथमामृचमाह।।छ।। ।।प्रवःसतांज्येष्ठतमायसुष्टु
तिमग्नाविवसमिधानेहविर्भरा।इंद्रमजुर्यंजरयंतमुक्षितंसनाद्युवानमवसेहवामहे।।छ।। ।।सुस
मदोवृते।हेयजमानाःवोयुष्मदर्थंसतांमहतांदेवानांज्येष्ठतमायअतिशयेनश्रेष्ठायइंद्रायतदर्थंअ
ग्नाविवसमिधाने।इवशब्दएवार्थः।दीप्यमानएवाग्नौहविःभरतेसयादयामिततःपरंसुष्टुतिंशोभनां
स्तुतिंकरोति।नरइतिनृन्नरणे।जित्वाद्धुनयपदानेटिरूपं।अजुर्यमजरणीयंजरयंतंसर्वमन्यज्जरयं ३५
तमुक्षितंसोमेनसिक्तंसनात्सनातनं।युवानंनित्यतरुणंतादृशमिंद्रमवसेस्माकंरक्षणायतस्यतर्प

णायवाहवामहेआह्वयामः।।छ।।अथद्वितीयामृचमाह।।छ।। ।।यस्मादिंद्राद्बृहतःकिंचनेमृतेविश्वान्यस्मि
न्संभृताधिवीर्या।जठरेसोमंतन्वीसहोमहोहस्तेवज्रंभरतिशीर्षणिक्रतुं।।छ।। ।।बृहतोमहतःयस्मा
दिंद्रादृतेकिमपीईमिदंजगत्चननास्तीत्यर्थः।चेतनेतिनिपातद्वयसमुदायश्चनेति।चेतिचिदित्यर्थेन
तिनिषेधार्थेएकपद्यंत्रसांप्रदायिकं।उक्तार्थेमंत्रः।नेंद्रादृतेपवानधामकिंचनेति।यद्वा।इंद्रादृतेईमि
दंजगत्किंनतुइमत्यस्यमित्यर्थः।कुतएतत्तदेवोच्यते।अस्मिन्निंद्रेविश्वानिसर्वाणिवीर्याणिसामर्थ्या
निअधिसंभृता।अधिकंसंभृतान्यासतोयश्चेंद्रोजठरेस्वोदरेसोमममभिषुतंसोमरसंभरतिबिभर्ति।
किंचतन्वितन्वांस्वकीयेसर्वस्मिन्शरीरेसहोबलंमहस्तेजश्चबिभर्तिहस्तेवज्रमायुधंबिभर्तिय
द्वृत्तयोगादनिघातः।वाक्यभेदाद्वानिघाताभावः।शीर्षणिशीर्षमध्येक्रतुमिति।।छ।।अथतृतीयामृचमाह।।

५६ः६ ॥६॥ ॥नक्षोणीभ्यांपरिभ्वेतइंद्रियंनसमुद्रैःपर्वतैरिंद्रतेरथः।नतेवज्रमन्वश्नोतिकश्चनयदाशुभिःप
तसियोजनापुरु॥६॥ ॥हेइंद्रतेतवइंद्रियंबलंक्षोणीभ्यांद्यावापृथिवीभ्यांनपरिभ्वेनभरन्नवतायां।त्व
त्यार्थेतावेकेन्केन्यत्वनइतिकेन्प्रत्ययः।उदात्तस्वरितयोरितिस्वरितत्वं।किंचतेरथःसमुद्रैःपर्वतैश्चन
परिभवनीयः।तेवज्रमायुधंकश्चनपुमान्नान्वश्नोतिनव्याप्नोतिपरिभवितुं।व्यत्ययेनपरस्मैपदं।यद्य
दाशुरवधार्थदृश्विजलकालेपुरुप्रभूतानिबहूनियोजनानियोजनानिपतसिगच्छसितदातवबलादिनप
रिभवनीयमितिसमन्वयः॥६॥अथचतुर्थीमृचमाह॥६॥ ॥विश्वेह्यस्मैयजतायधृष्णवेक्रतुंभरंतिवृ
षभायसश्चते।वृषायजस्वहविषाविदुष्टरःपिबेंद्रसोमंवृषभेणभानुना॥६॥ ॥हेयजमानविश्वे ३६
सर्वेजनाःयजतायसर्वैर्यजनीयायधृष्णवेशत्रूणांधर्षणशीलायवृषभायकामानांवर्षित्रेसश्चतेस

मानानांयस्तुत्यादिकर्मविसृजन्तोऽथएतादृशायेंद्रायक्रतुंयज्ञादिलक्षणंकर्मभरंतिहिहरंतिखलुप्रणयं
तीत्यर्थः।भरंतिहियोगादनिघातः।यस्मादेवंतस्मात्वृषासोमरससेचनसमर्थः।विदुष्टरः।विद्वच्छब्दात्तर
पिछांदसंसंप्रसारणं।शासिवसिघसीनांचेतिसंहितायांषत्वं।विद्वत्तरस्त्वंहविषावमिंद्रंयजस्व
॥६॥अथपंचमीमृचमाह॥६॥ ॥वृष्णःकोशःपवतेमध्वऊर्मिर्वृषभान्नायवृषभायपातवे।वृषणाध्व
र्यूवृषभासोअद्रयोवृषणंसोमंवृषभायसुष्वति॥६॥ ॥इदानीमिंद्रंसंबोध्याय।हेइंद्रवृष्णःफलस्य
वर्षितुःमधुःमदकरस्यसोमस्यकोशोरसःऊर्मिःअनुष्ठातृणांचप्रेरकःसन्पवतेसगच्छति।पवगतौ।
अनुदात्तेच।किमर्थंवृषभान्नायबलवर्षकान्निअन्नानियस्यसतथोक्तः।तादृशायवृषभायकामानां
वर्षित्रेइंद्रायपातवेपानार्थंपवतइतिसमन्वयः।किंचवृषणासोमरससेचनसमर्थाअध्वर्यूअध्वर्युप्र

५६०६

निप्रस्नातारोवृषणासःवर्षकाएतादृशाअभिषवग्रावाणश्चवृषणःस्वर्गादिफलस्यसेक्तारंसोमंवृषणाय
देवानांश्रेष्ठायतुभ्यंसुषतिसुन्वंति।सुनोतेर्लटिबहुलंछंदसीतिविकरणस्यश्नुः।अदभ्यस्तादिति।
झरदादितिषः॥८॥इतिद्वितीयस्यषष्ठेसप्तदशोवर्गः॥८॥ ॥अथषष्ठीमृचमाह॥८॥ ॥वृषातेवज्र
उततेवृषारथोवृषणाहरीवृषभाण्यायुधा।वृष्णोमदस्यवृषभत्वमीशिषइंद्रसोमस्यवृषभस्यतृप्णु
हि॥८॥ ॥वृषभकामानांवर्षकहेइंद्रतेतववज्रःवृषाकामवर्षकः।तथातेरथोपि।वृषातेहरीएत
न्नामकावश्वौवृषणावर्षकौतववज्रआयुधावज्रव्यतिरिक्तान्यायुधान्यपिवृषभाणिवृष्णोवर्षकस्यम
दस्यमदकरस्यसोमस्यत्वमेवराईशिषेस्वामीभवसि।हेइंद्रवृषभस्यवर्षकेणसोमस्यसोमेनतृप्णुहि ३७
।तृप्तोभव।तृपप्रीणनेस्वादिः।श्नुत्रात्रादिभ्यनतमनद्वतीनीतिपवितं।तथापिसर्वविधीनांछंदसिविक

ल्पितत्वादुत्वणत्वप्रतिषेधोनभवति॥८॥अथसप्तमीमृचमाह॥८॥ ॥प्रतेनावंनसमनेवचस्युवं
ब्रह्मणायामिसवनेषुदाधृषिः।कुविन्नोअस्यवचसोनिबोधिषदिंद्रमुत्संनवसुनःसिचामहे॥८॥ ॥
दाधृषिःत्वत्प्रसादात्शत्रूणांधर्षकोहंसमनेसंग्रामेवचस्युवं।अमितत्वादिवाहुकडादेशः।स्तोत्रमिच्छं
तंनावंननावमिवआपयःअस्तारकतेत्वासवनेषुब्रह्मणास्तोत्रेणप्रयामिप्राप्नोमि।किंचअस्यवचसः
स्तुतिलक्षणमेतदर्थकंकुविद्बहुनिबोधिषत्।इंद्रोनितरांबुध्यतां।बुधअवगमनेलेटिसिपबहुलमि
तिसिप्।कुविद्योगादनिघातः।तिङ्चोदात्तवतीतिगतेर्निघातः।वयंचउत्संनजलस्याविधानभूतंको
शमिववसुनोतिविधानभूतमिंद्रंसिचामहेसोमेनसिंचामः।सिचिरक्षरणेस्वरितेत्।आगमानुशास
नस्यानित्यत्वान्नुमभावः॥८॥अथषष्ठीमृचमाह॥८॥ ॥पुरासंबाधादभ्याववृत्स्वनोधेनुर्नवत्संप

ऋ॰ ६ वसस्यपिप्युषी। सत्तस्सुतेसुमतिभिःशतक्रतोसंपत्नीभिर्नवृषणोनसीमहि॥छ॥ ॥हेइंद्रसंबाधा
त्शत्रुजन्यात्संबाधात्भंगोनोस्मान् अन्यावद्स्वशत्रुभिरुत्पादितात्। आवर्तय। यथासंबाधोस्मान्
अस्पृशतितथाकुर्वित्यर्थः। तत्रदृष्टांतः। यथायवसस्यघासेनपिप्युषी आप्यायिताधेनुर्वत्संतुबाधा
त्परावर्तयइतितद्वत्हेशतक्रतोवयंसुमतिभिःत्वद्विषयैःशोभनैस्तोत्रैःसत्तस्सत्तदप्सुनशीमहि
सुष्टुव्याप्नुमहि। तत्रदृष्टांतः। वृषणोनसेक्तारोयुवानःयथापत्नीभिर्व्याप्नुवंतितद्वत्॥छ॥ अथनवमीमृच
माह॥छ॥ ॥नूनंसातइतिव्याख्याता॥ नूनंसातेप्रतिवरंजरित्रेदुहीयदिंद्रदक्षिणामघोनी। शिक्षास्तो
तृभ्योमातिधग्भगोनोबृहद्वदेमविदथेसुवीराः॥छ॥ ॥इतिद्वितीयस्यषष्ठेसप्तदशोवर्गः॥छ॥ ॥ ३८
तदस्माइतिनवर्चंषष्ठंसूक्तंगार्त्समदमैंद्रं अत्रानुक्रमणिका। तदस्मैद्विस्त्रिष्टुबंतमिति॥छ॥ अंत्येद्वेत्रि

ष्टुभेशिष्टाःसप्तजगत्यः। अतिरात्रेद्वितीयेपर्यायेअच्छावाकशस्त्रेतदस्माइतिसूक्तं। अतिरात्रेपर्यायाणामिति
खंडेसूत्रितं। तदस्मैनव्यमस्यपिबयस्यजज्ञानइंद्रेतियाज्येति॥छ॥ तस्मिन्सूक्तेप्रथमा॥छ॥ ॥तद
स्मैनव्यमंगिरस्वदर्चतशुष्मायदस्यप्रत्नथोदीरते। विश्वायद्गोत्रासहसापरीवृतामदेसोमस्यदृंहितान्यै
रयत्॥छ॥ ॥गृत्समदोद्भूताःस्तोतारः नव्यंनवतरमितिमन्येष्वदृष्टपूर्वंनत्वाहशस्तोत्रमंगिरस्वदंगि
रसइवास्माइंद्रायार्चतक्रूतायद्यस्माज्जातमात्रस्यास्येंद्रस्यशुष्माःशत्रूणांशोषकाणितेजांसिप्रत्न
था। प्रत्नएवविश्वेमात्थाप्रत्नच्छंदसीतिइवार्थेथाल्प्रत्ययः। प्रत्नानिपुरातनानीवउदीरतेउद्गच्छंतिईरगतौ।
अनुदात्तेत्तिङ्ङिवोदात्तवतीतिगतेर्निघातः। यद्यस्माच्चविश्वासर्वाणिगोत्रामेघाःपरीवृतावृत्रेणाक्रांता
न्सर्वत्रसुष्टप्रदेशान्वृंहितानितेनदृढीकृतानिमेघान्सोमस्यमदेहर्षेसंजातेसतिसहसाबलेनऐरय

ऋ॰ ६ ताउद्घाटयत्।भेद्यभेदेननापः।प्रेरयामासेत्यर्थः।यद्वाविश्वासर्वाणिपरीवृताआवृताअसुरेणाक्रांतानिदृंहि
तानिपर्वतनिलेनिरुद्धागोत्राइतिक्रकद्युकश्चेतिमत्वर्थेप्रत्ययः।गवांवृंदानिमदसाऐरत्।तस्मा
द्बिलान्निरगमयत्।तस्मादेर्वितितिसमन्वयः।ऐरयत्ईरगतौ।ण्यंतस्यलङिरूपं।यद्वृत्तयोगादनिघातः
॥छ॥अथद्वितीयामृचमाह॥छ॥ ॥सनुयोधप्रथमायधायसओजोमिमानोमहिमानमातिरत्।
शूरोयोयुत्सुतन्वंपरिव्यतशीर्षणिद्यांमहिनाप्रत्यमुंचत॥छ॥ ॥सइंद्रोनूत्तुनवित्तु।वर्द्धनामित्यर्थः
यइंद्रःओजस्तेजोबलंमिमानःकुर्वाणःसन्प्रथमायमिकायधायसेधेट्पानेसोमपानायमहिमानमा
तिरत्अवर्द्धयत्।तिरतेर्व्यत्ययेनशः।यद्यदादनिघातः।शूरःशत्रूणांशातव्यत्ययोव्यवहरणप्रयोगक ३९
मःयितायइंद्रःयुत्सुयुद्धेषुतन्वंस्वकीयशरीरंपरिव्यतचर्मणापरिवीतमकरोत्।सइंद्रोमहिनास्वकी

DR. BHAU DAJI MEMORIAL

येनमहिम्नाशीर्षणिस्वशिरसिद्यांप्रत्यमुंचतअधारयत्॥छ॥अथतृतीयामृचमाह॥छ॥ ॥अधाकृणोः
प्रथमंवीर्यंमहद्यदस्याग्रेब्रह्मणाशुष्ममैरयः।रथेष्ठेनहर्यश्वेनविच्युताःप्रजीरयःसिस्रतेसध्र्य१क्पृ
थक्॥छ॥ ॥अधापिचहेइंद्रत्वंप्रथमंमुख्यंतद्वीर्यंसामर्थ्यमहद्गुणैरकृणोः।किंतत्।ब्रह्मणास्तो
त्रेणस्तुतिसाधनभेदेनवेदवाक्येनाल्पवीर्यस्यस्तोतुर्जनस्याग्रेपुरतःयत्शुष्मंशत्रूणांशोषकंब
लमैरयःउदगमयःजीरयोजरयितारोबाधकाअसुराःरथेष्ठेनरथस्थितेनहर्यश्वेनविच्युताःस्वस्था
नाच्चावयिताःसंतःसध्र्यकसध्रीचीनाःपरस्परंसंगताःपृथक्नीत्यानियुक्ताःसंतःप्रसिस्रतेप्रकर्षे
णधावंति।स्कृगतौजुहोत्यादिःबहुलंछंदसीत्यभ्यासस्येत्वं।सध्र्यगितिसहस्यसध्रिरिति।सध्र्यादेशः
अंचिसध्र्योरंतोदात्तत्वेननिनिपातनादुदात्तःस्वरितायोरितियणःस्वरितत्वं॥छ॥अथचतुर्थीमृचमाह॥

१६.६

॥ठ॥ ॥अधायोविश्वाभुवनाभिमज्मनेशानकृत्प्रवयाअभ्यवर्द्धत।आद्रोदसीज्योतिषावह्निरातनोत्सी
व्यंतमांसिदुधितासमव्ययत्॥ठ॥ ॥अधापिचप्रवयाःप्रवृद्धानःपुरातनोवायइंद्रःविश्वाभुवना
सर्वान्लोकान्मज्मनाबलेनाभिनूयईशानकृत्आत्मानंसर्वस्याधिपतिंकुर्वन्।यद्वाअग्न्यादीन्
देवान्तत्तल्लोकाधिपतीन्कुर्वन्अभ्यवर्द्धतसर्वतःप्रवृद्धोभवत्।आदनंतरंवह्निर्जगतांवोढा
सइंद्रःज्योतिषास्वीयेनतेजसारोदसीद्यावापृथिव्यावतनोत्व्याप्नोत्।किंचतमांसितमोरूपाणि
रक्षांसिदुधितानिदुर्हितानिदुर्गतानिसीव्यत्विस्तारयत्समव्ययत्आवृणोत्।जगद्व्याप्यवर्त्तत
इत्यर्थः॥ठ॥अथपंचमीमृचमाह॥ठ॥ ॥सप्राचीनान्पर्वतान्दृंहदोजसाधराचीनमकृणोदपामपः। ५०
अधारयत्पृथिवींविश्वधायसमस्तभ्नान्मायायाद्यामवस्रसः॥ठ॥ ॥सइंद्रःप्राचीनान्इतस्ततःप्रक

र्षेणांचतोगच्छतःपरिस्थात्पर्वतान्ओजसाबलेनदृंहत्।पक्षच्छेदंकृत्वाभूमौदृढीचकारअचलानकरो
दित्यर्थः।अपामेवस्थितानामुदकानामपःस्पंदनलक्षणंकर्मअधराचीनंअधःप्रदेशमंचतिगच्छती
त्यधराचीनंतादृशमकरोत्मेघभेदनंकृत्वाअपोभूमावगायतेदित्यर्थः।किंचविश्वधायसंविश्वस्यधा
त्रींपृथिवींबलेनधारयत्मायायाप्रज्ञयाउपायेनद्यांद्युलोकंअवस्रसःस्रंसुगतौ।संपदादिलक्षणे
भावेक्विप्अवपतनादरक्षत्।अत्रेअश्वजितेगोजितेबलेनापहृतानांगवांजेत्रेअब्जितेवृत्रेणाक्रांतानाम
पांजेत्रेयजनाययजनीयायतस्माइंद्रायईर्यतंईर्यगतिकांत्योःवृन्मृदृशीत्यादिनाकर्मण्येनच्चका
मनीयंस्पृहणीयंचासोमंभरतेतिसमन्वयः।अग्निर्नुवइतिअग्निवत्॥ठ॥इतिद्वितीयस्यषष्ठेएको
नविंशोवर्गः॥ठ॥ ॥अथषष्ठीमृचमाह॥ठ॥ ॥सास्माअरंबाहुभ्यांयंपिताकृणोद्विश्वस्मादाज

१०६ नुषोवेदसस्परि।येनापृथिव्यांनिक्रिविंशयध्यैवज्रेणहत्व्यवृणक्तुविष्वणिः॥६॥ ॥सताहशाङ्
ड्डः॥अस्मैजगतेअरमलंपर्याप्तोबभूवास्त्हकत्वेनस्वामीबभूवेत्यर्थः।पितासर्वस्यपालकःप्र
जापतिःविश्वस्मात्सर्वस्माज्जनुषोजननात्परितितोप्युत्कृष्टाद्वेदसोज्ञानात्द्विशिष्टंबाहुभ्यांयमाकृ
णोत्तुविष्वणिःबहुकीर्तिःमहास्वनोवासइन्द्रःयेनज्ञानेनक्रिविंचतएतन्नामानमसुरंवज्रेणह
त्वाव्यादयश्चेति।त्वीहेत्वाताडयित्वापृथिव्यांभूमौशयध्यैशयनायदीर्घनिद्रायैन्यवृणक्।वृणक्ति
हिंसाकर्मान्यवधीत्॥६॥अथसप्तमीमृचमाह॥७॥ ॥अमाजूरिवपित्रोःसचासतीसमाना
दासदसस्त्वामियेभगं।कृधिप्रकेतमुपमास्याभरदद्धिभागंतन्वोयेनमामहः॥७॥ ॥हेइन्द्रअ ४१
माजूःयावज्जीवंगृहएवजीर्यंती।पित्रोःसचासहमानापितृभ्यांसहभवंतीतयोःशुश्रूषणपरापतिम

लनामानादुहिता।समानादात्मनःपित्रोश्चधारणात्सदसोगृहात्अधिकरणेचोपसंख्यानमिति।पू
इत्युपस्थायैवयथानागंयथाचेतथाच्चोताहभगंभजनीयंधनंत्वामियेईगत्यादिषुनिरुक्तमइतिव्य
त्ययेनात्मनेपदं।इयडादेशः।त्वायाचेतत्रदेयंधनंप्रकेतंप्रकर्षेणज्ञातव्यंविश्वसनीयंकृधिकुरु
तदुपमासिएतावदिदंधनमितितत्कुरुआभरतत्रधनंसंपादयतद्भागंभजनीयंतन्वःशरीराय
मह्यमिति।यावत्दद्धिदेहि।येनधनेनममहःस्तोतृनिमान्आमहयसि॥७॥अथाष्टमीमृचमाह॥
॥८॥ ॥भोजंत्वामिंद्रवयंहुवेमदद्दिष्टमिंद्रापांसिवाजान्।अविड्ढीन्द्रचित्रयानऊतीकृधिवृषन्नि
न्द्रवस्यसोनः॥८॥ ॥हेइन्द्रभोजंपालयितारंभोजयितारंवात्वांवयंहुवेमह्वयामहे।लङिबहुलंछं
दसीतिसंप्रसारणं।हेइन्द्रत्वंअपांसिकर्माणिवाजानन्नानिददिःदाणदाने।आदृगमहनजनइतिकिप्र

१०६ त्ययः।जङ्जिनावादन्यासादिकार्यं।नञोकाव्ययेतिनिषेधेनषष्ठीप्रतिषेधः।दातारवस्तुहेइंद्रचित्रयाना
नाप्रकारयजतीज्यत्यापालनेनमोस्मानविद्धिरस्त्वदृषान्कामानांवर्षकहेइंद्रनोस्मान्।अतिशये
नवसुमतंकृधिकुरु॥ग॥अथनवमीमृचमाह॥ब॥ ॥नूनंसातइतिव्याख्याता॥ग॥ ॥इतिद्वि
तीयस्यषष्ठेविंशोवर्गः॥ ॥प्रातरथइतिनवर्चंसप्तमंसूक्तंगार्त्समदंत्रैष्टुभमैंद्रं।प्रातरित्यनुक्रां
तं॥लैंगिकोविनियोगः॥ग॥तस्मिन्सूक्तेप्रथमा॥ब॥ ॥प्राताराथोनवोयोजिसस्निश्चतुर्युगस्त्रि
कशःसप्तरश्मिः।दशारित्रोमनुष्यःस्वर्षाःसइष्टिभिर्मतिभिरंह्योभूत॥ग॥ ॥रथोरंहणाद्रथो
यज्ञःसचनवोनूयतेस्तूयतेनेतिनवःस्तुतिस्मात्सस्निःष्णाशौचे।आदृगमहनेतिकिन्प्रत्ययः।उद्वः ४२
एवंविधोयज्ञःप्रातःप्रातःकालेयोजिअयोज्यस्माभिःचतुर्युगःयुज्यंतइतियुगानिग्रावाणःचत्वारि

युगानियस्यसतथोक्तः।अध्वर्युप्रभृत्विगभिप्रायंवा।त्रिकशःतिस्रःकशावाचोमंद्रमध्यमतारूपाय
स्यसतथोक्तः।सवनत्रयाभिप्रायंवा।सप्तरश्मिःअश्नुवतेव्याप्नुवंतिकर्माणीतिरश्मयःछंदांसिस
प्तसंख्यानिगायत्र्यादीनिछंदांसियस्यसतथोक्तः।दशारित्रःअरित्र्यःपापेभ्यस्त्रायंतइतिअरित्रा
णःदशसंख्याकाअरित्रायस्यसतादृशः।चमसाध्वर्य्वभिप्रायंवा।मनुष्याणांहितःस्वर्षाःस्वर्गस्यदाता
एवंविधोयज्ञःइष्टिभिःप्रायणीयातिथ्यादिभिःमतिभिर्मननीयैस्तोत्रैःरंह्योनेतायान्दभूत।यद्वान
वोनिनवःसास्निःसनोतेर्द्विवचादिकानांदातारथोरमंतेस्मिन्नितिरथःस्पंदनःप्रातःसवनेनवसोम
पार्थयोजिअश्वैरयोज्ञिकीदृशश्चतुर्युगःत्रिकशःतिस्रःकशायस्यसतथोक्तः।सप्तरश्मिःसप्तरज्जुः
दशारित्रोदशवक्रमनुष्यःमनुष्यहितःस्वर्षाःस्वर्गस्यसंगमयिताइंद्ररथःइष्टिभिर्यागैर्मतिभिस्तो

ऋ॰ ६

श्वप्राप्तव्यो भवति॥ब॥ अथ द्वितीयामृचमाह॥ब॥ ॥सास्मा अरं प्रथमं स द्वितीयमुतो तृतीयं मनु
षः स होता। अन्यस्या गर्भमन्य ऊ जनंत सो अन्येभिः सचते जेन्यो वृषा॥ब॥ ॥स यज्ञः सोमो वा अस्मा
इंद्राय प्रथमं प्रातःसवने अरं पर्याप्तो भूत्। सर्वत्र कालाध्वनोरिति द्वितीया। स यज्ञः सोमो वा मनुषो मनु
ष्यस्य होता शत्रूनां बाधको भवति किंच अन्ये ऋत्विजः अन्यस्याः पृथिव्याः वेद्यात्मिकाया वाचो वा गर्भंशि
तं सोमं यज्ञं वा जनंत अजनयंत तत्प्रसिद्ध्यर्थः वृषा अभिमतिफलं वर्षकः जेन्यो जयसमर्थः सोमो वा
अन्येभिः अन्यैरिंद्रादिभिर्देवैः सचते संगते सच समवाये अनुदात्तेत्॥ब॥ अथ तृतीयामृचमाह॥ब॥
॥ ॥हरी नु कं रथ इंद्रस्य योजमायै सूक्तेन वचसा नवेन। मो षु त्वामत्र बहवो हि विप्रा नि रीरमन्य ४२
जमानासो अन्ये॥ब॥ ॥इंद्रस्य संबंधिनि रथे हरी एतन्नामकावश्वौ नु क्षिप्रं कं सुखेन। आयै गमना

यत्वेन अन्यैरकृतपूर्वेण वचसा वेदात्मकेन सूक्तेन साधनेन योजं युनज्मि युजिर् योगे लुङि इरितो वेति
च्लेरङादेशः। अत्रास्मिन्यज्ञे बहवो विप्रा मेधाविनः स्तोतारो भवंति हि तथापि अपि अन्ये मध्यतिरिक्ता य
जमानासो यजमानाः त्वां सुष्ठु मो निरीरमत् नितरां मा रीरमन् रमयंतु अतोस्मदीयं यज्ञमागत्य सो
मं पिबेति भावः। रीरमन् रमतेर्ण्यंतस्य लुङि चङि सन्वद्भावादभ्यासस्येत्वं दीर्घो लघोरित्यभ्यासदीर्घत्वं हियो
गाभावेन निघातः॥ब॥ अथ चतुर्थीमृचमाह॥ब॥ ॥आ द्वाभ्यां हरिभ्यामिंद्र याह्या चतुर्भिरा षड्भिर्हूयमा
नः। आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः॥ब॥ ॥हे इंद्र स्तोतृभिराहूयमानस्त्वं द्वाभ्यां
हरिभ्यामश्वाभ्यामिमं यज्ञं प्रति सोमपानार्थमायाहि। चतुर्भिर्हरिभिरायाहि। तथा षड्भिरागच्छ सोमपेयं पा
पाने कर्मणि अचो यत् ईद्यतीतीत्वं। पातव्यं सोमं प्रति अष्टाभिरश्वैरायाहि अष्टनो दीर्घादिति विभक्तेरु

५६०६

दान्तत्वं।दर्शनिर्हरिभिर्हरिभिरागच्छ।सुमखेषुयज्ञेषुधनवाहेइंद्रअयंसोमस्त्वदर्थमभिषुतःअतोयज्ञ
स्यमृध्रोहिंसाःमाकःमाकार्षीः।करोतेर्लुङिमंत्रेघसेत्यादिनाच्लेर्लुकि।गुणेकृतेहल्ङ्यादिनासिपो
लोपः।यद्यपींद्रस्यद्वावेवहरीतथापितयोर्विभूतिभेदान्नानात्वं।अतोऽश्वबहुत्वमविरुद्धं॥६॥अथ
पंचमीमृचमाह॥६॥ ॥आविंशत्यात्रिंशतायाह्यर्वाङाचत्वारिंशताहरिभिर्युजानः।आपंचाशता
सुरथेभिरिंद्राषष्ट्यासप्तत्यासोमपेयं॥६॥ ॥हेइंद्रसोमपेयंपातव्यंसोमंप्रतिअर्वाङस्मदभिमुखः
सन्विंशत्याविंशतिसंख्याकैरश्वैर्योगादित्रिंशत्संख्याकैर्हरिभिर्युजानोयुज्यमानस्त्वंसोमपानंप्रत्या
याहिसुरथेभिःसुरहणैःसुगमानैःपंचाशताहरिभिरायाहितथाषष्ट्याषष्टिसंख्याकैर्हरिभिःसोमपा ४४
नंप्रत्यागच्छ॥६॥इतिद्वितीयस्यषष्ठेएकविंशोवर्गः॥६॥ ॥अथषष्ठीमृचमाह॥६॥ ॥आशीत्यान

वत्यायाह्यर्वाङ्शतेनहरिभिरुह्यमानः।अयंहितेशुनहोत्रेषुसोमइंद्रत्वायापरिषिक्तोमदाय॥६॥ ॥
आशीत्याआशीतिसंख्याकैरश्वैःसोमपानार्थमर्वाङस्मदभिमुखःसन्आयाहिनवत्याएतत्संख्याके
रश्वैरागच्छशतेनशतसंख्याकैर्हरिभिरुह्यमानोधार्यमानस्त्वंआयाहि।हेइंद्रयस्मात्त्वंमदायहर्षायशुनहो
त्रेषुसुखेनस्तूयतेसामोयेभिरितिशुनहोत्राःपात्रविशेषाःतेषुअयंसोमःत्वायात्वत्कामनयापरिषिक्तः॥६॥
अथसप्तमीमृचमाह॥६॥ ॥ममब्रह्मेंद्रयाह्यच्छाविश्वाहरीधुरिधिष्वारथस्य।पुरुत्राहिविहव्योबभूथा
स्मिञ्छूरसवनेमादयस्व॥६॥ ॥हेइंद्रममब्रह्मअस्मदीयामेवस्तुतिमच्छाभिलक्ष्याहिविश्वाव्याप्तौहरी
रथस्यधुरियुगप्रांतेधिष्वसंयोजयपुरुत्रापुरुभिर्बहुभिर्यजमानैःत्वंविहव्योविविधंह्वातव्योबभूथाब
भूविथ।बभूथाततंथजगृभ्मववर्थेतिनिपातनादिडभावः।हेशूरअस्मिन्सवनेयज्ञेमादयस्वसोमपानेनहृष्टो

२६०६

नव॥ब॥अथाष्टमीमृचमाह॥ब॥ ॥नमइंद्रेणसख्यंवियोषदस्मन्यमस्यदक्षिणाउहीत।उपज्येष्ठेवरू
थेगभस्तौप्रायेप्रायेजिगीवांसःस्याम॥ब॥ ॥इंद्रेणसहमेममममसख्यंयष्टृयष्टव्यलक्षणंसख्येनविष
योषत्।कदाचिदपिनियुज्यतां।योतेर्लिटिसिब्बहुलमितिसिप्।अडागमः।अस्येंद्रस्यदक्षिणाइंद्रकर्तृकं
दानमस्मभ्यंदुहीत।अभिमतफलंदुग्धां।दुहेर्लिटिरूपं।ज्येष्ठेअतिशयेनप्रशस्येवरूथेआपदावारकेव
रणीयेवागभस्तौबाहौउपवर्त्तिनःस्याम।इंद्रस्यहस्तयोग्यानवेमेत्यर्थः।किंचप्रायेप्रायेसोमपानार्थ
मिंद्रस्ययज्ञस्यशालायांप्रवेशेप्रवेशेजिगीवांसःशत्रूणांजेतारोभवेम॥ब॥अथनवमीमृचमाह॥ब॥
॥ ॥नूनंसातइतिव्याख्याता॥ब॥ ॥इतिद्वितीयस्यषष्ठेद्वाविंशोवर्गः॥ग॥ ॥अपाय्यस्येतिनवर्चं ५५
अष्टमंसूक्तं।गार्त्समदंत्रैष्टुभमैंद्रं।अपायीत्यनुक्रांतं।लैंगिकःसूक्तविनियोगः।द्वितीयेपर्यायहोतृश

स्त्रयाज्याअपायीत्येषा॥ग॥सैषासूक्तेप्रथमा॥ग॥ ॥अपाय्यस्यांधसोमदायमनीषिणःसुवानस्य
प्रयसः।यस्मिन्निंद्रःप्रदिविवावृधानओकोदधेब्रह्मण्यंतश्चनरः॥ब॥ ॥सुवानस्यसोमाभिषवंकुर्वा
णस्यमनीषिणःप्राज्ञस्ययजमानस्यसंबंधिनःप्रयसःप्रउःतर्पणेअस्तुनृप्रीतिकरस्यअसोमलक्षण
स्यांधसःमदायअपायिएतदन्नमिंद्रेणपीतमित्यर्थः।यद्वाअपायीतियातेर्व्यत्ययोबहुलमितिचिणा।क
र्त्तरिनिवर्तिच्छंदसिलुङ्लिटइतिलोडर्थेलुङ्।प्रीतिकरणस्यांधसःमदायअपायिशेषःविवक्षयाकर्म
णिषष्ठी॥इंद्रःसोमंपिबन्प्रदिविपुराणेयस्मिन्सोमलक्षणेंधसिवावृधानोवर्द्धमानइंद्रःओकोदधेसेव्य
नयानिवासंचकार।किंचब्रह्मण्यंतःइंद्रायस्तोत्रमिच्छंतःनरःकर्मणानेतारऋत्विजःयस्मिन्निवासंचि
दधिरेतदेतदपायीतिशर्वेणान्वयः॥ब॥अथद्वितीयामृचमाह॥ग॥ ॥अस्यमंदानोमध्वोवज्रहस्तोहि

दि० ६ मिंद्रोअर्णोवृतंविवृश्चित्।प्रयद्वयोनस्वसराण्यच्छाप्रयांसिचनदीनांचक्रमंत॥३॥ ॥अस्यमधंद्वि
तीयार्थेषष्ठी॥ ॥अनेनमदकरेणसोमेनमदानोहृष्यन्वज्रःवज्रयुक्तोहस्तोयस्यसइंद्रःअर्णोवृतं
उदकस्यावरकंउदकेनावृतंवाअहिंवृत्रंमेघंवाविवृश्चत्विशेषेणाछिनत्।ओव्रश्चूछेदने।तौदादि
कःलङिग्रहिज्यादिनासंप्रसारणं।यद्यदाअहिंभेदनेजातेनदीनांप्रयांसिप्राणयितृणिजलानिअच्छसमु
द्रमभिलक्ष्यप्रचक्रमंतगंतुमुपाक्रमंत।तत्रदृष्टांतः।वयोनयथापक्षिणःस्वसराणिस्वगृहअर्यंतिप्राप्नु
वंतिस्वइतिस्वसराणि।कुलायाःतानभिलक्ष्यगच्छंतितद्वत्॥३॥अथतृतीयामृचमाह॥३॥ ॥समाहि
नइंद्रोअर्णोअपांप्रेरयदहिहाच्छासमुद्रं।अजनयत्सूर्यंविदद्गाअक्तुनाह्नांवयुनानिसाधत्॥३॥ ॥ ४६
माहिनोमहनीयःस्तुत्यःपूजनीयःयद्वामहिम्नोपेतःअहिहाअहिमेघंहतवानिंद्रःबलमृणवृत्रेणक्लिश॥३

कूलंछंदसीतितत्कालेक्लिश।सइंद्रःअपामर्णउदगतोश्चोतालक्षणंप्रवाहंसमुद्रंलक्ष्यप्रेरयत्किंचस
इंद्रःअंगिरसोविलांतवर्तीतमाहूतानांगवांलाभायसूर्यमजनयत्।ततःगाःपणिभिरपहृतागाविददल
भतविदिरलाभे।लुङिईरितोवेतिङ्गेरङादेशः।वाक्यभेदादनिघातः॥३॥अथचतुर्थीमृचमाह॥३॥ ॥सो
अप्रतीनिमनवेपुरूणीन्द्रोदाशद्दाशुषेहंतिवृत्रं।सद्योयोनृभ्योअतसाय्योभूत्पस्पृधानेभ्यःसूर्यस्य सातौ
॥४॥ ॥सोअप्रतीनिकृचासपादोर्द्धर्चस्यक्रः।यइंद्रःपरस्यसातोसातिःभंजनंसूर्यसंभजनविषाय
भूतेपस्पृधानेभ्यःअहमेवप्रथमंसूर्यंप्राप्नुयामितिस्पर्धमानेभ्यःसद्यस्तदानीमेवअतसाय्यस्तत्राभिद
वनःसन्समाश्रयणीयोभूत्।यद्वासूर्यस्यसातोषोतकर्मणिअधिकरणेक्तिन्सूर्यस्यसंबंधि
नियुद्धेपस्पृधानेभ्यःअतसाय्योभूत्॥४॥अथपंचमीमृचमाह॥४॥ ॥सस्सुन्वतइंद्रःसूर्यमादेवो

रिणङ्मर्त्यायस्तवान्।आयद्रयिंगुहदवद्यमस्मैभरदंशंनैतशोदशस्यन्॥७॥ ॥स्तवान्‌एतशेनस्तू
यमानः।देवोद्योतमानःसइंद्रःसुन्वतेसोमाभिषवंकुर्वतेमर्त्यायमनुष्यायएतशायसूर्यमारिणक्
एतशेनःस्पर्द्धमानंसूर्यंबलेनारेचयत्।तथाचनिगमः।प्रैतशंसूर्येपस्पृधानंसौवश्व्येसुष्विमावदिंद्र
इति।यद्यस्माएतशेऽसौवश्व्योराजाद्दशस्यन्यजमानःअस्माइंद्रायगुहदवद्यंप्रच्छन्नावद्यंसोम
मंशंसंपादयामास।तत्रदृष्टांतः।अंशानेयथापिताअंशंभागंपुत्रायभरतितद्वत्॥७॥ ॥इति
द्वितीयस्यषष्ठेत्रयोविंशोवर्गः॥७॥ ॥अथषष्ठीमृचमाह॥ ॥सरंधयत्सदिवःसारथये शुष्ण
मशुषंकुयवंकुत्साय।दिवोदासायनवतिंचनवेंद्रःपुरोव्यैरच्छंबरस्य॥७॥ ॥सदिवःदीप्तियुक्तःसइं
द्रःसारथयेआत्मनःसारथ्यंकुर्वतेकुत्सायअखाचराजर्षयेशुष्णंशोषयतिसर्वमितिशुष्णःकश्चिद

सुरःनमशुषंनकेनापिशोषणीयंएतन्नामानमसुरंरंधयत्।रध्यतिर्वशगमने।वशमनयत्।यद्वारधहिंसा
राधोरित्यस्यपैतस्यरधिजभोरचीतिनुम्।अवधीत्।किंचसइंद्रःदिवोदासायएतन्नामकायराज्ञेशंबर
स्यासुरस्यनवनवतिंपुरःव्यैरत्विदारितवान्॥७॥अथसप्तमीमृचमाह॥७॥ ॥एवातइंद्रोचथम
हेमश्रवस्यानत्मनावाजयंतः।अश्यामतत्साप्तमाशुषाणाननमोवधरदेवस्यपीयोः॥७॥ ॥हेइं
द्रश्रवस्याःसुपांसुलुगितितृतीयायाःसवर्णदीर्घः।अन्नेच्छयावाजयंतःत्वाबलिनंकुर्वंतःयद्वाश्र
वस्यायशःकामनयावाजयंतोऽन्नमिच्छंतः।इच्छार्थीमपिणिचूदृश्यते।अश्वायंतोगव्यंतोवाजयंतइ
तिकेऽजंतत्वेतिप्रातिपदिकस्यांतोदात्तत्वंस्यात्।वाजयंतःशतक्रतुमितियथा।तादृशावयंतेतुभ्य
मेववयंस्तोत्रंत्मनाआत्मनास्वयमेवनः।अहेमप्रापयेमहि।गातोसंप्रत्यर्थे।इदानींआशुषाणाः।अ

ऋ॰ ६ श्नोतेःकानचिव्यत्ययोबहुलमितिलिङ्युपिविकरणाद्व्यत्ययःसचत्वामक्षवानाःवयंवदन्नित्व
षितंतच्चाक्षंसत्पुरुषसंबंधिनपदीनांमरव्यंअस्यामव्याभुयाम अदेवस्यदेवानिंद्रादीन्ज्ञानतः
पीयोःपीयतिर्हिंसाकर्माहिंसकस्यासुरस्यवधःवध्यंतेशत्रवोनेनेतिवधरायुधननमःततअधो
नमयःननमःणप्रसुद्धक्त्वेण्यंनस्यलुङिच्विङिरूपं।हिंसकस्यासुरस्यामितिस्वरः॥७॥अथाष्टमी
मृचमाह॥७॥ ॥एवातेगृत्समदाःशूरमन्मावस्यवोनवयुनानितक्षुःब्रह्मण्यंतइंद्रतेनवाय
इषमूर्जंसुक्षितिंसुम्नमश्यः॥७॥ ॥शूरबलवन्हेइंद्रतेतुभ्यंगृत्समदाःअत्रयास्कःगृत्सम
दोगृत्सोमदनोगृत्सइतिमेधाविनामगृणातेस्तुतिकर्मणइति॥७॥ ॥तथाविधाःमन्मममननीयं ५८
स्तोत्रंतेतुभ्यमेवतक्षुःततक्षुःचक्रुःतत्रदृष्टांतःअवस्यवोनअवगत्यर्थादवतेरसुनिस्रपमवइ
ति।अवोगमनमिच्छंतःभुमांसोवयुनानिमार्गान्यथाकुर्वंतितद्वत्।किंचनवायसुपांसुलुगितिषष्ठ्या
लुकनवनीयसोनवतरस्यततःब्रह्मण्यंतःस्तोत्रंकर्तुमिच्छंतःगृत्सदाःसुक्षितिमिषशोभननिवासो
पेतंमनजऊर्जंबलंसुम्नंचास्युःप्राप्नुयुःएकस्मिन्गृत्समदेबहुवचनंपरोक्षनिर्देशश्च॥७॥अथन
वमीमृचमाह॥७॥ ॥नूनंसातइतिमिश्रार्था॥७॥ ॥इतिद्वितीयस्यषष्ठेचतुर्विंशोवर्गः॥७॥ ॥
वयंतेवयइतिनवर्चंनवमंसूक्तंगार्त्समदंत्रैष्टुभमैन्द्रं।वयंतइत्यनुक्रांतंसूक्तविनियोगोलैंगिकादव
धार्यते॥७॥तस्मिन्सूक्तेप्रथमा॥७॥ ॥वयंतेवयइंद्रविद्धिषुणःप्रभरामहेवाजयुर्नरथं।विपन्य
वोदीध्यतोमनीषासुम्नमियक्षंतस्त्वावतोनॄन्॥७॥ ॥इंद्रतेतुभ्यंवयंवयःसोमलक्षणमन्नं
प्रभरामहेप्रकर्षेणसंपादयामःतत्रदृष्टांतःवायुर्यन्नियथात्मात्मनइच्छन्भुमान्रथशकटंसं

ऋ॰ ६

पादयति।तस्मात्तएवंहविःसंपादकान्नोस्मान्सुष्टुविद्धिजानीहि।विदेर्ज्ञानार्थस्यलोटिरूपंवाक्यादित्वा
देर्निघातः।किंकुर्वाणावयंविपन्यवःतवस्तोत्रंकुर्वाणाःमनीषामनसइच्छयास्तुत्यादीध्यतोदीप्यमा
नाःदीधीङ्दीप्तिदेवनयोःव्यत्ययेनशप्टत्वावत्युष्मदस्मद्भ्यांछंदसिसादृश्यउपसंख्यानमितिच
त्वप्रत्वत्सदृशान्हन्नन्नेहन्अस्मादीन्सुम्नंसुखमियक्षंतःयावमानाःयद्वासुम्नसुखेनहन्नन्नेह
न्नत्यादीन्देवानियक्षंतःइयक्षतिर्गतिकर्माहविषातान्प्राप्नुवंतोवयंनरामहइतिसमन्वयः
॥८॥अथद्वितीयामृचमाह॥८॥ ॥त्वंनइंद्रत्वाभिरूतीत्वायतोअभिष्टिपासिजनान्।त्वमिनोदाशु
षोवरूतेत्थाधीरभियोनक्षतित्वा॥८॥ ॥हेइंद्रत्वंताभिरूतिभिःपालनाभिःनोस्मान्पाहि।किंचत्वा ५७
यतःस्तुपूक्यचशात्रन्तुमइतिविभक्तेरुदात्तत्वं।त्वकामान्जनानभिष्टिपांसुपांसुलुगितिसोका

रःअभिष्टियोतिगंतारःशत्रवःतेभ्यःपातारक्षकोसिभवसिदाशुषोहविर्दत्तवतोयजमानस्यत्वमिनःईश्वरः
खलुवरूतायसितस्कन्नितेतिनिपातनादीकारऊकारःबाधकानांनिवारकोसि।किंचत्वंतस्यस्तोतुरिच्छाधी
रेवंविधमपद्रवोपशमंरूपकर्माभियस्त्वामभिनक्षतिहविषाप्राप्नोतिइति॥८॥अथतृतीयामृचमाह॥८॥ ॥
सनोयुवेंद्रोजोहूत्रःसखाशिवोनरामस्तुपाता।यःशंसंतंयःशशमानमूतीपचंतंचस्तुवंतंचप्रणेषत्॥
॥८॥ ॥युवातरुणःयष्टृणांफलस्यशमयितावाजोहूत्रःस्तोतृभिराह्वातव्यःहोतव्योवासखासमवि
न्नतःशिवःसुखकरःसइंद्रःनरांनुशास्तुस्यामिच्छांदसोगुणःनरशास्तुस्यवाआमिआगमानुशासनस्या
नित्यत्वान्नुडभावःकर्मनन्नृणामस्माकंपालकोभवति।यःशास्त्राणिशंसंतंयश्चशशमानंशाशाकृत
गतोक्रियाःकुर्वाणंपुरोडाशादिकंहवींषिपचंतंस्तुवंतंसामभिस्तोत्रंकुर्वाणंस्तनशास्त्रयोःप्रणीताप्र

पृ० ६

मीतमंत्रसाध्यत्वेनभेदस्यप्रतिपादितत्वात्। अत्रदृष्टयद्रिर्देशः। एवंवयंयजमानंजनीजन्यास्त्रणेनप्रनेषत्। न
यतेर्लेटिसिबहुलमितिसिप्अडागमः। निङिचोदात्तवतीतिगतेर्निघातः। कर्मणापारंप्रापयन्॥ ३॥ अथचतु
र्थीमृचमाह॥ ३॥ ॥तमुष्टुषइंद्रंतंगृणीषेयस्मिन्पुरावावृधुःशाशदुश्च। सवस्वःकामंपीपरदियानोब्रह्मण्य
तोनूतनस्यायोः॥ ४॥ ॥तमुतमेवंइंद्रंस्तुषेस्तौमि। तथातमिंद्रंगृणीषेशंसामि। उत्तमपुरुषव्यत्ययः। य
स्मिन्निंद्रेपुरापूर्वंस्तोतारोवावृधुःप्रवृद्धाअभवन्शाशदुश्चशत्रूनहिंसितवंतश्च। शदृशातने लिटितुजादित्वा
न्नित्यमभ्यासस्यदीर्घः। इयानःस्तोतृभिर्याच्यमानःसइंद्रःब्रह्मण्यतःस्तोत्रमिच्छतोनूतनस्यायोर्मनुष्यस्यय
जमानस्यवस्वःवसुनःकाममभिलाषंपीपरत्अभिलषितफलदानेनपूरयतु॥ ४॥ अथपंचमीमृच ५०
माह॥ ५॥ ॥सोअंगिरसामुचथाजुजुष्वान्ब्रह्मातूतोदिंद्रोगातुमिष्णन्। मुष्णन्नुषसःसूर्येणस्तवानश्न

स्यचिच्छिश्नथत्पूर्व्याणि॥ ५॥ ॥अंगिरसांसंबंधीनिउच्यथाउक्थानिजुजुष्वान्जुषीप्रीतिसेवनयोरित्यस्य
लिटिक्वसौरूपं। सेवमानःसइंद्रःगातुंपणिनिरुपद्रुतानामंगिरसांमार्गमिष्णन्प्रेरयन्ब्रह्मतेषांस्तोत्रंका
मप्रदानेनतूतोत्। तुदव्यथनावित्यस्यलङिबहुलंछंदसीतिविकरणस्यश्लुः। अवर्द्धयत्किंचस्तवानःस्तोतृभिः
स्तूयमानःसूर्येणस्वात्मभूतेनउषसोमुष्णन्अपहरन्। उदितेहिसूर्येउषसोव्यावर्त्तातानादृशःसइंद्रःअ
श्नस्य। अश्नुतेस्वतेजसासर्वंजगदित्यश्नःकश्चिदसुरःतस्यपूर्व्याणिपुरातनानिपुराणिबलानिवाशि
श्नथत्शिथिलीचकार॥ ५॥ इतिद्वितीयस्यषष्ठेपंचविंशोवर्गः॥ ५॥ ॥अथषष्ठीमृचमाह॥ ६॥ ॥स
हश्रुतइंद्रोनामदेवऊर्ध्वोभुवन्मनुषेदस्मतमः। अवप्रियमर्शसानस्यसाह्वांछिरोभरद्दासस्यस्वधावा
न्॥ ६॥ ॥देवोद्योतमानःश्रुतःकीर्तिमान्अतएवदस्मतमःशत्रूणामतिशयेनदर्शनीयःसइंद्रःमनुषेमनो

ऋ० ६

रथंऊर्द्ध्वेनिवतकामप्रदानेप्रवृत्तेउदस्युखोनवद्ग।नामप्रसिद्धौ।इतिस्मरणः।तदुच्यतेसाक्षान्नशान्तन
मनिनिवनत्स्वधावानबलवानिंद्रः।अशंसानस्यशोकबाधमानस्यदासस्यएतन्नामकस्यासुरस्यप्रय
शिरःअवनरत्।अधःपातयत्उदरातलेद्गुउागमःछन्दसोर्थः॥७॥अथसप्तमीमृचमाह॥७॥ ॥सवृ
त्रहेंद्रःस्नक्लयोनीःपुरंदरोदासीरैरयद्वि।अजनयन्मनवेक्षामपश्चसत्राशंसंयजमानस्यतूतोत्॥७॥
॥ ॥वृत्रहावृत्रस्यहंतापुरंदरःशंबरपुरांदारयितासइंद्रःस्नक्लयोनीःनिकृष्टजातीःदासीरूपक्षयि
त्रीःसुरासुरैःसेनाख्यैरयत्।व्यदवत्।किंचमनवेमनोरर्थंक्ष्मांपृथिवीमपःउदकोनिवअजनयत्यजमा
नस्यसत्रामहांतंशंसमभिलाषतूतोत्।कामप्रदानेनअवर्द्धयत्उवृद्धावितिसौत्रोधातुःशपःश्लुः।तुजादि ५१
त्वादीर्घः।यद्वासत्रामहत्शंसंसनीयंशस्त्रंकामप्रदानेनवर्द्धयत्।यद्वास्नक्लयोनीःस्नक्लाख्येनासुरेणनि

षेक्तारस्तस्काःदासीनार्याख्यैरयतव्यदवत्॥तथामंत्रः।यःस्नक्लगन्नातिइन्द्रःस्निश्वानति॥७॥अथाष्टमीमृच
माह॥७॥ ॥तस्मैतवस्यमनुदायिसत्रेंद्रायदेवेभिरर्णसातौ।प्रतियदस्यवज्रंबाह्वोर्धुर्हत्वीदस्यून्पुर
आयसीर्नितारीत्॥७॥ ॥देवेभिर्देवतैः।लेःस्तोतृभिःअर्णसातौ।उदकलाभेनिमित्तेतस्माइंद्रायतवस्यं
तवसेबलायइतिबलवर्द्धनंहविःसत्रासततंसर्वेष्वहस्सुअनुक्रमेणसवनक्रयेदायिअदायि।पश्चात्तवस्यं
यद्बलंप्रवृद्धायदीयतेतत्तवस्यंदेवेभिर्देविरुदकलजनेअनुअनुक्रमेणतद्बलंतस्माइंद्रायादायि।तथामं
त्रः।अनुतेदायिमहइंद्रियायेति।यद्यदाअस्येंद्रियस्यबाह्वोर्वज्रंप्रतिधुःस्तोतारोऽसुरवधस्तवकेनस्तो
त्रेणप्रतिनिदधुःस्तूयमानोहींद्रोदस्युवधार्थंवज्रमादत्तेदधुःदधातेर्लुङिगातिस्थेतिसिचोलुक्।आतइति
झेर्जुस्।तत्तेनवज्रेणदस्यूनसुरान्हत्वानदायआयसीरयामयीःपुरोनितारीत्।नितरामनाशयत्॥७॥अथ

ऋ॰ ६

नवमीमृचमाह॥छ॥ऋतंसामइतिव्याख्यातम्॥छ॥ ॥इतिद्वितीयस्यषष्ठेषड्विंशोवर्गः॥छ॥ ॥विश्वजि
तइतिषड्टचंदशमंसूक्तंगार्त्समदमैंद्रंअंत्यात्रिष्टुप्शिष्टाःपंचजगत्यः।तृतीयेपर्यायेहोतुःशस्त्रएतत्सूक्तंसू
त्रितंच।विश्वजितेतिनिष्ठाद्हरीरथआयुज्यमानेति।छ।तस्मिन्सूक्तेप्रथमा॥छ॥ ॥विश्वजितेधनजितेस्व
र्जितेसत्राजितेनृजितउर्वराजिते।अश्वजितेगोजितेअब्जितेभरेंद्रायसोमंयजतायहर्यतं॥छ॥ ॥
हेअध्वर्योइंद्रायसोमंभरसंपादयकीदृशायविश्वजितेसर्वस्यजेत्रे।तदेवप्रपंचयतिधनजितेशत्रु
विजयेनतदीयधनानांजेत्रेस्वर्जितेस्वर्गस्यजेत्रेअधिपतयेसत्राजितेसत्रासमंततंजयशीलायमहते
जेत्रेवानृजितेनृणांनायकानांजेत्रेउर्वराजितेउर्वरासर्वसस्याभूःजेत्रेअश्वजितेगोजितेबलेनापहृता ५२
नांगवांजेत्रेअब्जितेवृत्रेणाक्रांतानामपांजेत्रेयजमानायतस्माइंद्रायहर्यतंहर्यगतिकांत्योःस्पृहणीया

दिनाकर्मणिपचकमनीयंस्पृहणीयंवासोमंभरनेतिसमन्वयः॥छ॥अथद्वितीयामृचमाह॥छ॥ ॥अभिभु
वेऽभिभंगायवन्वतेषाल्हायसहमानायदाशुषे।तुविग्रयेवह्नयेदुष्टरीतवेसत्रासाहेनमइंद्रायवोचत॥
॥छ॥ ॥अभिभुवेसर्वस्याभिभवित्रेभंगायअसुराणांभंजकायवन्वतेवनषणसंभक्तौव्यत्ययेनउप्र
त्ययः।शत्रूणांवधंभजनायअषाल्हायसाहःकर्मणिनिष्ठाउत्वाभावश्छांदसः।शत्रुभिरनभिभूतायस
हमानाय।सर्वंसहायवेधसोसर्वस्यविधात्रेतुविग्रयेबहुविधग्रीवाय।ग्राहेरौणादिकःकर्मणि
कप्रत्ययः।तुविनिर्वढ्रुनिस्तोतव्यायवह्नयेसर्वस्यवोढ्रेदुष्टरीतवेअन्यैर्दुस्तरायदुर्हिंसायसत्रासाहे
सर्वदाभिभवित्रेमहतोभिभवित्रेवाएवंविधायेंद्रायनमःनमःशब्दपूर्वकंस्तोत्रंवोचत।हेस्तोतारोयू
यंब्रूतत्र्पुरुषोलुङि।ब्रुवोवचिः।अस्यतिवक्तिख्यातिभ्योऽङितिच्लेरङादेशः।वचउमित्युमागमः॥छ॥अथतृ

ऋ० ६

नीयामृचमाह॥३॥ ॥सत्रासाहो जनभक्षो जनंसहश्च्यवनो युध्मो अनु जोषमुक्षितः। वृतंचयः सहु
रिर्विक्ष्वारित इन्द्रस्य वोचं प्र कृतानि वीर्या॥३॥ ॥सत्रासहः वस्तूनामभिभविता। जनभक्षः जनानां यज
मानानां कामप्रदानेन संभक्ता तैः संभजनीय इति वा। जनंसहः बलिनां जनानामभिभविता। च्यवनः श
त्रूणां च्यावयिता स्वस्थानात्। युध्मः योद्धा। जोषमनु प्रीतिमनु उक्षितः सिक्तः सोमेन। वृतंचयः वृतस्याभि
हस्याचेता संचेता दातेत्यर्थः। यद्वा वर्त्तते पुनः पुनः पुनरभिमुखमागच्छतीति वृतः शत्रुः तं चयते हिनस्ती
ति वृतंचयः वृतस्याभीष्टं चयति हिंसाकर्मा तथा च ब्राह्मणं। यो वै नागिनां नागान्नुदते वैनं न चयते अ
स्य पुत्रमथ पौत्रं चयते वैनमिति। सहुरिः जसिसहो रुरिन्निति उरिन्प्रत्ययः। अभिभविता शत्रूणां विक्षु ५२
प्रजासु आरितः पालकत्वेन प्रापितो भवति। तादृशस्येन्द्रस्य कृतानि वृत्रहननादिरूपाणि वीर्याणि साम

र्थ्यानि प्रवोचं प्रवर्षेण वदामि॥४॥ अथ चतुर्थीमृचमाह॥४॥ ॥अनानुदो वृषभो दोधतो वधो गंभीर ऋ
ष्वो असमष्टकाव्यः। रध्रचोदः श्नथनो वीळितस्पृथुरिन्द्रः सुयज्ञ उषसः स्वर्जनत्॥४॥ ॥अनानुदः पश्चाद्
दातीत्यनुदः आतश्चोपसर्ग इति कर्त्तरि कः। मानस्तिय स्य मत तथोक्तः। प्रत्तनधनदानेन समानोऽनुनास्तीत्य
र्थः। अत एव वृषभः कामानां वर्षिता। दोधतः हुधिः हिंसाकर्मा हिंसकस्यासुरस्य वधः हंतारं गंभीर महत्वे
न गांभीर्योपेतः। ऋष्वः महान् यद्वा यद्वा दर्शनीयः सर्वैः। असमष्टव्यः अशौव्यासौ कर्मणि निष्ठाऊ उत्वा
द्विकल्पः। नञ्समासः। स्वैरव्याप्तकर्मा। रध्रचोदः रध्रं हिंसा संराध्याः मरध्राणां समृद्धानां प्रेरकः यद्वा श
त्रूणां हिंसकानां नोदकः। श्नथनः शत्रूणां बलापहारेण श्नथयिता। वीळितः दृढांगः पृथुः स्वतेजसा जग
द्व्याप्य वर्त्तमानः सुयज्ञः कर्माणि तादृश इन्द्रः उषसः स्वः सूर्यं ज्योतिः स्वः सूर्य इति हि ब्राह्मणं। सूर्यं च जनयत्

१६० ६

पादुश्चकार॥छ॥अथपंचमीमृचमाह॥छ॥ ॥यज्ञेनगातुमप्तुरोविविद्रिरेधियोहिन्वानाउशिजो
मनीषिणः॥अभिस्वरानिषदागाअवस्यवइंद्रेहिन्वानाद्रविणान्याशत॥छ॥ ॥धियोहिन्वानाःस्तु
तीरिंद्रेप्रेरयंतःउशिजःइंद्रंकामयमानाःमनीषिणोमेधाविनोंगिरसःअप्तुरःअपांप्रेरकाःदिशःगातुंग
वांमार्गंयज्ञेनतपसाविविद्रिरेतेनिरेतनःअवस्यवःरक्षणमिछंतःइंद्रेगाःस्तुतीर्हिन्वानाःहिगतिवृध्यो
श्चादिःप्रेरयंतःतेंगिरसःअभिस्वराःअभितस्वरःस्वरणंशब्दनंयस्यतेनास्तनस्तोत्रेणनिषदाउपसदे
नचद्रविणानिगोधनानिआशतप्राप्नुवन्अशोतेर्लुङिब्बहुलंछंदसीतिविकरणस्यलुक॥छ॥अथ
षष्ठीमृचमाह॥छ॥ ॥इंद्रश्रेष्ठानिद्रविणानिधेहिचित्तिंदक्षस्यसुभगत्वमस्मे।पोषंरयीणामरिष्टिं ५४
तनूनांस्वाद्मानंवाचःसुदिनत्वमह्नां॥छ॥ ॥हेइंद्रश्रेष्ठान्युत्तमानिधनद्रविणानिधनानिअस्मभ्यंधेहि

निधेहिदक्षस्यदक्षतेर्भावेघञ्।कर्मकरणसामर्थ्यस्यचित्तिंख्यातिंधेहिअस्मेअस्मभ्यंसुभगत्वंशोभनधन
वत्त्वंसौभाग्यंवाधेहिरयीणांत्वयादत्तानांधनानांपोषंसमृद्धिंधेहितनूनामंगानां।यद्वातायतेएभिःकृत्स्ना
मितितन्वःतनोतेःकरणेउप्रत्ययःतेषामरिष्टिंअहिंसांधेहितथास्मदीयायावाचःस्वाद्मानंस्वादुतांअ
ह्नांसुदिनत्वंशोभनदिनत्वंचधेहि।येष्वहःसादयोदेवाइज्यंतेतानिसुदिनानितेषांभावःसुदिनत्वं॥छ॥
इतिद्वितीयस्यषष्ठेसप्तविंशोवर्गः॥छ॥ ॥त्रिकद्रुकेष्वितिचतुर्दशंएकादशर्चंसूक्तंगार्त्समदमैंद्रं।अत्रेय
मनुक्रमणिका।त्रिकद्रुकेषुचतुष्कमष्ट्याद्यतिशाक्करमंत्याष्टिर्वेति।आद्यायामष्टिश्छंदःसूत्रितंत्रिकद्रु
केषुमहिचतुःपष्ट्यक्षराअवशिष्टाःषष्ट्यक्षराःअतिशाक्करःअंत्याष्टिर्वा।षोडशिशस्त्रेत्रिकद्रुकेष्विति
तृचःसूत्रितंत्रिकद्रुकेषुमहिषोयवाशिरंप्राग्रस्मैधुरांरथमितितृचावितिच्छंदसावितिं।अविवाकेइ

२.६

नेमकत्वनीयेप्रतिपदृचस्यकद्रुकेष्विति प्रथमादशोरेमेंनितिखंडेस्त्रितं। आत्वारथंयथोतयइतस्यास्था
नेत्रिकद्रुकेषुमहिषोयवाशिरमती ति आश्वमेधिकेमध्यमेइनिमरुत्वतीयेआद्यातस्य विज्ञोयात्वद्या
मइतिखंडेस्त्रितं। त्रिकद्रुकेषुमहिषोयवाशिरमिति। मरुत्वतीयस्यप्रतिपत्निपदितिमइाव्रतेपिमा
ध्यंदिनेसवनेब्राह्मणाछंसिनःस्तोत्रियस्तृचः त्रिकद्रुकेषुमहिषोयवाशिरामिति स्तोत्रियइतिस्त्रित
॥छ॥ तस्मिन्सूक्तेप्रथमामृचमाह॥ब॥ ॥त्रिकद्रुकेषुमहिषोयवाशिरंतुविशुष्मस्तृपत्सोममपि
बद्विष्णुनासुतंयथावशात्। सईंममादमहिकर्मकर्तवेमहामुरुंसैनंसश्चद्देवोदेवंसत्यमिंद्रंसत्यइं
दुः॥ब॥ ॥गृत्समदोन्नूते। महिषःमहान्‌हल्यःतुविशुष्मःबहुवचलस्तृपत्तृपश्रीणनेतुदादिः आगमा
नुशासनस्यानित्यत्वान्नुनावन्तृप्यनिंद्रः त्रिकद्रुकेषुज्योतिर्गौरायुरित्येतन्नामकेषुआभिप्लविकेष्वह

स्सुसुतमभिषुतंयवाशिरंयवमायेःसक्तुभिर्मिश्रितं। आरुःसर्वस्यश्रीणानेः किपिअपस्पृधेथामित्यादिना
शिरइत्यादेशः। तंसोमंविष्णुनासहापिबत्यथावशत्सर्वेयथातंसाममकामयततथापिबत्। वशकां
तो। बहुलंछंदसीतिशपोलुगनाबः। पातःससोमःमहांमहांतमुरुंतेजस्याविस्तीर्णंइमेनमिंद्रंममादय
त्। किमर्थं। महिमहन्वृत्रहननादिलक्षणंकर्मकर्तावकर्तुंसत्यइंदुःस्रवन्‌देवोदीप्यमानःससोमःस
त्यंयथार्थंन्तंदेवंसोमंकामयमानमिंद्रंसश्चत्सश्चतिर्व्याप्तिकर्मा। व्याप्नोतु॥व॥ अथद्वितीयामृचमा
ह॥व॥ ॥अधत्विषीमाँअभ्योजसाक्रिविंयुधाभवदारोदसीअपृणादस्यमज्मनाप्रवावृधे। अधत्तान्यं
जठरेप्रेमरिच्यतसैनंसश्चद्देवोदेवंसत्यमिंद्रंसत्यइंदुः॥ब॥ ॥अधायसोमपानानंतरंत्विषीमान्दीप्त
वानिंद्रःओजसाबलेनक्रिविनामासुरंयुद्धायुद्धेनअन्यनवतअभिन्नतवान्। किंचमहेंद्रःरोदसीद्यावा

Dr BHAU DAJI

२१०६ पृथिव्यौआपृणत्स्वतेजसासमंतात्पूरयामास।तथाअस्यपीतस्यसोमस्यमज्मनाबलेनप्रवावृधेप्रक
र्षेणवर्द्धते।यद्वाअस्यक्रिविरसुरस्यमज्मनामारणेनरोदसीअपूरयत्।सइंद्रःसोमंदेधाविनज्यान्यंना
गंस्वकीयेजठरेअधत्तईमेनमपरंनागंदेवस्यआरिच्यतप्रारेचयत्एतेनार्द्धमिंद्रायअर्द्धमन्येभ्योदेवेभ्य
इत्युक्तंभवति।तथातैत्तिरीयकंयज्ञसर्वेषामर्द्धमिंद्रःप्रतितस्मादिंद्रोदेवतानांभूयिष्ठभाक्तमइति॥७॥ ॥
अथतृतीयामृचमाह॥७॥ ॥साकंजातःक्रतुनासाकमोजसाववक्षिथसाकंवृद्धोवीर्यैःसासहिर्मृ
धोविचर्षणिःदाताराधस्तुवतेकाम्यंवसुसैनंसश्चद्देवोदेवंसत्यमिंद्रंसत्यइंदुः॥७॥ ॥क्रतुनाकर्म
णाप्रज्ञयावाकंसहजातःसाकमोजसाबलेनसहववक्षिथविश्वंवोढुमिच्छसि।वहेःसनंतस्यलिटिमं ५६
त्वादाप्तमवति।किंचत्वंवीर्यैःशत्रुहननादिलक्षणैःपराक्रमैःसाकंप्रवृद्धःवृद्धोऽसिकामसंग्रामात्।

सासहिः।नलोकाव्यायतिषष्ठीप्रतिषेधः।तेष्यमभिभविता।विचर्षणिःभुण्यस्ततोभुण्यस्ततश्चविशेषणाद्द्र
ष्टास्तुवतेस्तोत्रंकुर्वाणाययजमानायराधःसाधकंकाम्यंप्रार्थनीयंवसुधनंदातासन्ववक्षिथेतिसमन्व
यः।सैनमितिपरोक्षनिर्देशःसिद्धार्थश्च॥७॥अथचतुर्थीमृचमाह॥७॥ ॥तवत्यंनर्यंनृतोपइंद्रप्रथमंपू
र्व्यंदिविप्रवाच्यंकृतं।यद्देवस्यशवसाप्रारिणाअसुंरिणन्नपः।भुवद्विश्वमभ्यादेवमोजसाविदादूर्जंश
तक्रतुर्विदादिषं॥७॥ ॥नृपोसर्वेषांनर्त्तयितःहेइंद्रनर्यंनराणांहितकरंप्रथमंप्रततंप्रथमंप्रततं
प्रथतंप्रततमितियास्कः।पूर्व्यंपूर्वकालभवंत्वायात्कृतंतत्रत्यत्ततत्अपःकर्मदिविस्वर्गलोकेप्रवा
च्यंप्रकर्षेणवक्तव्यंसाधनीयमित्यर्थः।किंतत्।देवस्यविजिगीषोरसुरस्यअसुंप्राणंरिणन्त्वंअपः
नेननिरदास्फदकानिअरिणाःअरयः।इतियदेतत्कर्मतत्प्रवाच्यमितितमन्वयः।परोक्षनिर्देशोवसि

द्वि॰ ६

घ्नः सइंद्रः विश्वं व्याप्तं अदेवं तमोरूपमसुरं जसा बलेन अनिवृवत् अनिनवत् ॥ किंच शतक्रतुरिंद्र ऊर्जं बलं विदात् । इदं इ विलक्षणमन्नं विदात् विदिरलाभे शविकरणो लेट्याडागमः ॥ठ॥ इति द्वितीयस्य षष्ठे ऽष्टाविंशो वर्गः ॥ठ॥ ॥ गार्त्समदमंडले द्वितीयोनुवाकः ॥ठ॥ तृतीयेनुवाके दश सूक्तानि तत्रेदमेकोनविंशत्यृचं गार्त्समदं प्रथमं सूक्तं अत्रेयमनुक्रमणिका । गणानामेकोना ब्राह्मणस्पत्यं इ बार्हस्पत्या स्तु इहस्पतिलिंगाः पंचदश्यंते त्रिष्टुभावितिपंचदशी एकोनविंशी च त्रिष्टुभौ शिष्टा जगत्यः । यासु बृहस्पतिशब्दः श्रूयते ता बार्हस्पत्याः शिष्टा ब्राह्मणस्पत्याः अवशिष्टे निष्टेव एतस्सूक्तं स्पष्टोदकमिति निर्वंजस्तत्रितं । गणानां त्वा प्रथश्चयस्येति ॥ठ॥ तस्मिन्सूक्ते प्रथमा ॥ ॥ गणानांत्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमं ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिः सीद सादनं ॥ठ॥ ॥ हे ब्रह्मण 五 ५ठ

स्पते ब्रह्मणोन्नस्य परिवृढस्य कर्मणो वा पते पालयितः गणानां देवादिगणानां संबंधिनं गणपतिं स्वीयानां पतिं कवीनां क्रांतदर्शिनां कविं उपमश्रवस्तमं उपमीयते अनयेत्युपमा सर्वेषामुपमानं श्रवोन्नं यस्य सत्तथोक्तः अतिशयेनोपमश्रवा उपमश्रवस्तमः उपमः माङ्मानेआनश्चापसर्गे करणे आङ् प्रत्ययः । अपो मंज्ञा छंदसोरिति ह्रस्वत्वं । ज्येष्ठराजं ज्येष्ठाः प्रशस्यतमाः तेषां मध्ये राजंतं ब्रह्मणां मंत्राणां स्वामिनं त्वा त्वां हवामहे । अस्मिन्कर्मण्याह्वयामः । किंच नोस्माकं स्तुतीः शृण्वन् त्वं ऊतिभिः पालनैरेह्नूतेः सादनं सीदंत्यस्मिन्निति सदनं यज्ञस्थानमासीदोपविश ॥ठ॥ अथ द्वितीयामृचमाह ॥ठ॥ ॥ देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः । उस्राइव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि ॥ठ॥ ॥ असुर्य असुराणां हंतः हे बृहस्पते प्रचेतसः प्रकृष्टज्ञानाः ते त्वदीया देवाश्चिद्देवा अपि यज्ञियं यज्ञार्हं भागमानशुः प्रा

८ं.६ भुवन्। यद्वा अचेतस इति बृहस्पतेर्विशेषणं। अज्ञस्य ज्ञानवतस्तेन च संबंधिनो देवा इति योजनीयं। यद्वा अचे-
तसः विनष्टिपरिणामः अचेतसस्त्वयि सति देवाः यज्ञियं भागमानशिरे कर्मविघ्नकारिणामसुराणां रक्षोघ्नै-
र्मंत्रैरपाकरणात्। तावे ब्रह्मणएव द्विष्यतो। तिथ्यवणात् ज्योतिषा तेजसा मादनीयः सूर्यस्त्वत्तः स्याायितेजो वा त्यादि-
नारक्प्रत्ययः। यथा किरणान् जनयति तथा विश्वेषां सर्वेषां ब्रह्मणां मंत्राणां जनिता जनयितेवासि। जनि-
तामंत्र इति निपातनाण्णिलोपः॥ठ॥ अथ तृतीयामृचमाह॥ठ॥ ॥ आ विबाध्या परिरापस्तमांसि च ज्योतिष्म-
न्तं रथमृतस्य तिष्ठसि। बृहस्पते भीममित्रदंभनं रक्षोहणं गोत्रभिदं स्वर्विदं॥ठ॥ ॥ हे बृहस्पते परिरपः
परितः रपः पापरूपं रक्षः। यद्वा रपलपव्यक्तायां वाचि क्विप्। परिवदतो निंदकान् तमांसि च विबाध्य तेजसा ५८
निराकृत्य ज्योतिष्मंतं ज्योतिषा तद्वंतं ऋतस्य प्रापकं भीमं शत्रूणां भयंकरं अमित्रदंभनं शत्रूणां हिंसकं। त

द्वाः रक्षोहणं रक्षसां हंतारं गोत्रभिदं मेघानां भेत्तारं स्वर्विदं सर्वस्य लंभकं रथमातिष्ठसि अधितिष्ठसि॥ठ॥
॥ अथ चतुर्थीमृचमाह॥ठ॥ ॥ सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत्। ब्रह्मद्विषस्त-
पनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनं॥ठ॥ ॥ हे बृहस्पते सुनीतिभिः शोभननीतयो येषु तैः सुनीतयः
सन्मार्गाः तैर्जनं नयसि अपेक्षितफलं प्रापयसि त्रायसे जनमापद्भ्यो रक्षसि च यो यजमानस्तुभ्यं हविर्लक्षणं
अन्नं दाशात् प्रयच्छेत्। दाशृ दाने लेट्याडागमः। तमंहः पापं पापरूपं दारिद्र्यं वा नाश्नवत् न प्राप्नुयात्। अश्नो-
तेर्लेटि व्यत्ययेन परस्मैपदं। अडागमः। ब्रह्मद्विषः ब्राह्मणानां चाद्वेष्टुः तपनः तापकोसि। किंच मन्युमीः
मन्योः क्रोधस्य वा हिंसकोसि। मीङ् हिंसायां क्विप्। तत्तव तादृशं महि महत् महत्त्वं महित्वनं माहा-
त्म्यमस्ति॥ठ॥ अथ पंचमीमृचमाह॥ठ॥ ॥ न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वयाविनः।

१६ ६ विश्वाइदस्माध्वरसोविबाधसेयंसुगोपारक्षसिब्रह्मणस्पते॥छ॥ ॥हेब्रह्मणस्पतेसुगोपाःसुष्ठुपालयिता
त्वंयंजनंरक्षसिपालयसितंजनंअंहःआहंतव्यंदुःखंनबाधतेदुरितंतत्कारणंपापंचनबाधतेअरातयः
हिंसकाःतंजनंनकुतश्चनसर्वास्वपिदिक्षुनतितिरुःतिरतिर्हिंसाकर्मालिट्।नहिंसंति।तथाद्वयाविनःम
नस्यक्रियायांचान्यदित्येतद्द्वयंयेषामस्ति।तद्वयाविनोवंचकाःतेपितंजननबाधंते।किंचध्वरसोध्वाहिंस
काःविश्वाःसर्वाःसेनाःतदर्थंविबाधसे।विशेषेणबाधसएव॥छ॥इतिद्वितीयस्यषष्ठेएकोनत्रिंशोवर्गः॥
॥छ॥अथषष्ठीमृचमाह॥छ॥ ॥त्वंनोगोपाःपथिकृद्विचक्षणस्तवव्रतायमतिभिर्जरामहे।बृहस्प
तेयोनोअभिह्वरोदधेस्वातंमर्मर्तुदुच्छुनाहरस्वती॥छ॥ ॥हेबृहस्पतेत्वंनोस्माकंगोपाःपालयि ५८
तापथिकृत्सन्मार्गस्यकर्तासि।विचक्षणःविशेषेणद्रष्टासर्वज्ञस्त्वं।तवव्रतायत्वत्संबंधिनेयज्ञायनम

तिभिःस्तोत्रैःजरामहेस्तुमःजरतिःस्तुतिकर्मा।यःदुर्मान्नोस्मान्अभिलक्ष्यह्वरःह्वृकौटिल्येनावेअ
सुन्।कौटिल्यंदधेविदधातितंस्वास्वीयादुच्छुनादुर्बुद्धिःसरस्वतीवेगवतीसतीमर्मर्तुमारयतु।मृङ्प्रा
णत्यागे।अंतर्भावितण्यर्थस्ययङ्लुकिलोटिरूपं॥छ॥अथसप्तमीमृचमाह॥छ॥ ॥उतवायोनोमर्चया
दनागसोरातीवामर्तःसानुकोवृकः।बृहस्पतेअपतंवर्तयापथःसुगंनोअस्यैदेववीतयेकृधि॥छ॥
॥ ॥उतवाअपिचहेबृहस्पतेअरातीवाअतिसुखमागमनवानसानुकःसमुच्छ्रितःसानुसमुच्छ्रि
तमितियास्कः।वृकःवृकआदानेधनादीनामादातायोमर्त्योमनुष्यःअनागसोपराधीनान्नोस्मान्
समर्चयात्।मर्चयतिर्हिंसाकर्मा।हिंस्यात्।तंतंमर्त्यंपथोवैदिकान्मार्गादपवर्तयनिवर्तयनोस्माकंअस्यै
देववीदइत्यर्थः॥छ॥अथाष्टमीमृचमाह॥छ॥ ॥त्रातारंत्वातनूनांहवामहेवस्पर्तरधिवक्तारमस्म

द्वि० ६

पुं।बृहस्पतेदेवनिदोनिबर्हयमाऽरेवाउत्तरंसुम्नमुन्नशन्॥७॥ ॥अवस्यवेउपद्रवेभ्यःपारयितःयस्मै
अवमारक्षणेनआपद्भ्यःपारयितःहेब्रह्मणस्पतेतन्ननामंगानांशत्रादीनांशत्रादीनांबाधानारंपाजयिता
रंअधिवक्तारंअस्मासुपक्षपातेनअधिवक्तारंअस्मयुक्तांइविःप्रदानस्मान्कामयमानंत्वांइवामहे
अस्मिन्कर्मणिआह्वयामःकिंचदेवनिदोदेवनिंदकानसुरान्निबर्हयविनाशयदुरेवाःदुष्टगमनाः
दुर्हृयःशत्रवःउत्तरंसुम्नंसुखंमाउन्नशन्माव्याप्नुवंतु॥८॥अथनवमीमृचमाह॥८॥ ॥त्वयावयं
सुवृधाब्रह्मणस्पतेस्पार्हावसुमनुष्यादवीमहि।यानोदूरेतळितोयाअरातयोभिसंतिजंभयाता
अनप्नसः॥९॥ ॥हेब्रह्मणस्पतेसुवृधासुष्ठुवर्द्धयित्रात्वयाइंद्रेनावयंस्पार्हास्पृहणीयानिव
सुधनानिमनुष्यासुपांसुलुगितिचतुर्थबहुवचनस्याकारःमनुष्येभ्योदातृभ्यःआददीमहि॥ ६०

DR BHAU DA

ह्लीमहिआङोदोनास्यविहरणइत्यात्मनेपदं।दूरेदूरदेशेयाअरातयःयाश्चतळितोंतिकेनाअरातयःनो
स्मानभिसंतिअभिभवंतिअनप्नसःकर्महीनान्अरातीःतान्शत्रूनजंभयनाशयजभिनाशानसुरादि
।अत्रनिरुक्तं।त्वयावयंसुवर्द्धयित्राब्रह्मणस्पतेस्पृहणीयानिवसूनिमनुष्येभ्यआददीमहि।याश्चनो
दूरेतळितोयाश्चांतिकेरातयोदानकर्माणोवादानप्रज्ञावाजंभयताअनप्नसोप्नइतिरूपनामेति॥९॥
अथदशमीमृचमाह॥८॥ ॥त्वयावयमुत्तमंधीमहेवयोबृहस्पतेपप्रिणासस्निनायुजा।मानोदुः
शंसोअभिदिप्सुरीशतप्रसुशंसामतिभिस्तारिषीमहि॥१०॥ ॥हेबृहस्पतेपप्रिणापूपालनपूरणयोः
आदृगमइनेतिकिप्रत्ययःछांदसोयणादेशःकामानांपूरकेनसस्निनाशुद्धेनयुजासहायेनत्वयादे
विलब्धेनमन्नंवयंधीमहेधारयामःधीधारणेदेवादिकःदुःशंसःदुःशंसनीयःअभिदिप्सुःअभिदंभितु

ऋ॰ ६ अतिनिविद्धमित्सुःअरुषःनोस्माकंईशतमाईशिष्टईश्वरोमाभवतु।ईशऐश्वर्येलिङ्युडागमः।वयंमत्तिनिःश्रो
त्रैःसुशंसाःशोभनसनोपेताःसंतःप्रतारिषीमहिप्रकर्षेणवर्द्धिमहि॥छ॥ ॥इतिद्वितीयस्यषष्ठेत्रिंशोव
र्गः॥छ॥ ॥अथैकादशीमृचमाह॥छ॥ ॥अनानुदोवृषभोजग्मिराहवंनिष्टप्ताशत्रुंपृतनासुसास
हिः।असिसत्यऋणयाब्रह्मणस्पतउग्रस्यचिद्दमितावीळुहर्षिणः॥छ॥ ॥हेब्रह्मणस्पतेअनानुदः
अनुपश्चाद्ददातीत्यनुदःदात्रंतरःशून्यइत्यर्थः।अतएववृषभःकामानांवर्षिताअहवंआस्त्यतेत्रेतिआ
हवोयुद्धंआङिद्युद्धइतिअप्प्रत्ययःसंप्रसारणंचात्तइधक्ङ्जग्मिःगंता।आहृगमहनेकिप्रत्ययःलिङ्व
द्भावादद्विर्वचनमित्यत्रषष्ठीप्रतिषेधः।शत्रुंशातयितारंनिष्टप्तानितरांतस्यतापकःतृन्नंतत्वात्षष्ठीप्रति ८२
षेधः।निसस्तपतावनासेवनइतिषत्वं।तादौचनितीतिगतेःस्वरः।पृतनासुसंग्रामेषुसासहिःशत्रूणाम

भिभविता।एतादृशस्त्वंसत्यःसत्यपराक्रमःसत्यप्रज्ञोवासि।ऋणयाःऋणस्ययावयितासि।युमिश्रणयोः।ण्यंत
स्यक्विपिणिलोपेलोपोव्योर्वलीतिवलोपः।किंचउग्रस्यचित्।उद्गूर्णस्यापिदमिताउपशमयितावीळुहर्षिणः
दृढहर्षस्यकामुकस्यनास्तिकस्यचिदमितासि॥छ॥अथद्वादशीमृचमाह॥छ॥ ॥अदेवेनमनसायोरि
षण्यतिशासामुग्रोमन्यमानोजिघांसति।बृहस्पतेमाप्रणक्तस्यनोवधोनिकर्ममन्युंदुरेवस्यशर्धतः॥छ॥
॥ ॥यःपुमानदेवेनदेवानमन्यमानेन।यद्वाआसुरवृत्तिनिविष्टेनमनसास्मान्रिषण्यतिहिनस्ति
दुरस्युद्रविणस्युवृषण्यतिरिषण्यतीतिनिपातितः।यश्चायंपापविन्नःमन्यमानःआत्मानंबहुमन्यमा
नःपुमान्शासांअध्यस्यशासितारंयद्वाअस्माकमाशंसांशंसांआशासितृणांउग्रइतिवायोजनीया।अ
स्मान्जिघांसतिहंतुमिच्छतिहंतेःसनिसंअज्झनगमांसनीतिदीर्घः।हेबृहस्पतेतस्यवधःवध्यतेनेनिवध

१६॰ ६ आयुधंनोस्मान्माप्टणक्स्पृष्ट्वासंपर्केश्नमविकरणीव्यत्ययेनअमागमःचादिलोपइतिननिघातः।व्यत्य
येनाद्युदात्तः।किंचद्रेवस्यदुष्टंगमनस्यशार्द्धोबलवतः।यद्वाउष्टानिसंधेःस्वर्गंकुर्वतःनस्यमन्यंक्रोधं
तवानितिनिकर्मत्वस्मादाविराक्रमस्थ॥ब॥अथत्रयोदशीमृचमाह॥ग॥ ॥भरेषुहव्योनमसोपस
द्योगंतावाजेषुसनिताधनंधनं।विश्वाइदर्योअभिदिप्सोमृधोबृहस्पतिर्विववर्हारथांइव॥ब॥ ॥बृह
स्पतिःभरेषुसंग्रामेषुहव्यःह्वातव्यःस्तोतृभिःस्वरक्षणार्थमाह्वातव्यः।नमसोपसद्यःसर्वैर्नमसोपसदनीयःकिं
चवाजेषुगंतारक्षार्थंगमनशीलः।तथाधनंसनितासंभक्तादाता।छंदत्त्वात्षष्ठीप्रतिषेधः।तथाअर्यःस्वा
मीबृहस्पतिःअभिदिप्सुःअभिभवितुमिच्छावतः।विश्वाइवसर्वाएवमृधःहिंसिकाःसेनाःरथानिवयुद्धेवेगेन ६२
परकीयान्रथानिवविवर्हविशेषेणशिथिलीचकार।यद्वाइवशब्दश्चार्थेरथांश्चविववर्हलिड्थेलिट्॥

॥ब॥अथचतुर्दशीमृचमाह॥ब॥ ॥तेजिष्ठयातपनीरक्षसस्तपयेत्वानिदेदधिरेदृष्टवीर्यं।आविस्तत्कृष्वयद
सत्तउक्थ्यंबृहस्पतेविपरिरापोअर्दय॥ग॥ ॥हेबृहस्पतेतेजिष्ठयातिशयेनतिग्मयातपनीरक्षकारिण्या
हेत्यारक्षोरक्षसांतपनापयराक्षसाःदृष्टवीर्यंयुद्धेषुदृष्टपराक्रमंत्वांनिदेनिंदायाविषयंदधिरेक्र
नवंतःतान्तापयतिसमन्वयः।तेनवउक्थ्यंसार्वैःप्रशंसनीयंयद्वीर्यमसत्सर्वमासीत्तदधुनाआवि
ष्कृधप्रकटीकुरुतेनचवीर्येणपरिरायःपरिरापःपरिरापःपरिवदतोनिंदकानसुरान्व्यर्दयविशेषेण
बाधस्वबार्हस्पत्येपत्येपशौएषाइतिपोनुवाक्याप्रदानानामितिखंडेसूत्रितं।बृहस्पतेअतियदर्योअ
र्हादितिपरिधानीयेति॥ग॥सैषासूक्तेपंचदशीमृचमाह॥ग॥ ॥बृहस्पतेअतियदर्योअर्हाद्युमद्विभाति
क्रतुमज्जनेषु।यद्दीदयच्छवसऋतप्रजाततदस्मासुद्रविणंधेहिचित्रं॥ग॥ ॥ऋतप्रजातसत्येनोत्पन्न

दि० ६ बृहस्पतेअर्यःश्रेष्ठोब्राह्मणःसर्वान्कामानतीत्ययद्ब्रह्मवर्चसंविभातिविशेषेणदीप्यतेयच्चशवसाबले
नस्वश्रेयंतंजनंदीदयत्दीदयतिर्दीप्तिकर्मा।दीपयतिचित्रंचायनीयंतद्ब्रह्मवर्चसंरूपंद्रविणंअस्मासुधे
हिनिधेहि।यद्वाअर्यउदारोचित्वयादत्तंधनंअतीवार्हन्नर्हद्भातियच्चत्वद्दत्तंधनंजनेषुऋतवस्तोत्रंक्रवणो
द्युदीप्तियुक्तंकर्मसाधनंचविभाति।यच्चधनंशवसान्नादिसमृध्यादीदयत्स्वाश्रयंदीपयतितादृशंधनं
मस्मासुधेहि।तथाचब्राह्मणं॥बृहस्पतेअतियदर्योअर्हादित्येतयापरिदध्यात्तेजस्कामोब्रह्मवर्च
सकामोनीवान्यान्ब्रह्मवर्चसमर्हतीतिद्युमदितिद्युमदिवावैब्रह्मवर्चसंविभातिवावैब्रह्मवर्चसं
जनातियद्दीदयच्छवसऋतप्रजातेतिदीप्तेयेवावैब्रह्मवर्चसंतदस्मासुद्रविणंधेहिचित्रमितिचित्रमि ८२
वावैब्रह्मवर्चसंब्रह्मवर्चसीब्रह्मयशासीभवतीति॥१॥इतिद्वितीयस्यषष्ठेएकत्रिंशोवर्गः॥१॥ ॥ ॥

अथषोडशीमृचमाह॥१॥ ॥मानस्तेनेभ्योयेअभिद्रुहस्पदेनिरामिणोरिपवोन्नेषुजागृधुः।आदेवाना
मोहतेविव्रयोहृदिबृहस्पतेनपरःसाम्नोविदुः॥१६॥ ॥हेबृहस्पतेनोस्मान्स्तेनेभ्यःस्त्यानमस्त्येषांति
तेनश्चोराःतेभ्योमादाःतान्दर्शयति।येचोराःद्रुहःआणद्रोहस्यपदेस्थानेनिरामिणःनितरांरमणशीलाः
रिपवःहिंसकाःसंतःअन्नेषुपरकीयेषुअभिजागृधुःअभिकांक्षंति।गृधुरभिकांक्षायां।लिटिरूपं।येच
देवानांव्रयःविवेशेषेणवर्जनंव्रास्फीइतिधातुरमर्जानिवर्त्ततायएवंविशान्दक्षिणांव्रास्फीनातीति
एकस्यवर्जनार्थेद्विष्टस्यापिवर्जनार्थत्वं।नतद्धृदिस्वकीयेहृदयेआ।उहतेआवहंतिदेवानांयागान्स्खु
नाश्वनकरवामेतिमन्यतइतियावत्तेभ्योस्मान्मादाइतिसमन्वयः।येषुमांसःसर्वंसाम्नःसाममया
त्वंनःपरःपरस्तादन्यद्उत्कृष्टंसमयद्धत्तोप्रांसामेविरक्षोदेनविग्रसामामावेदुर्नजानंति।किंतुसर्वंसाधकं

हि.६ सामस्त्वामवविद्योम्मात्स्तेनेन्योमादाः॥ठ॥ अथसप्तदशीमृचमाह॥ठ॥ ॥विश्वेभ्योहित्वाभुवनेभ्यस्प
रित्वष्टाजनत्साम्नःसाम्नःकविः॥ठ॥सऋणचिदृणयाब्रह्मणस्पतिर्द्रुहोहंतामहऋतस्यधर्तरि॥ठ॥ ॥
हेब्रह्मणस्पतेब्रह्मणस्पतिंमहोमहतऋतस्ययज्ञस्यधर्तरिधारकेयजमानेत्वष्टाप्रजापतिःविश्वेभ्योभु
वनेभ्यस्परिसर्वेभ्योभूतजातेभ्यउत्कृष्टंअजनत्हिअजीजनत्खलुततस्त्वंसाम्नःसाम्नःसर्वस्यापिसा
म्नःकविः।उच्चारयिताकर्त्तासियद्वाकविःक्रांतदर्शीत्वष्टासाम्नस्साम्नःस
र्वस्यापिसाम्नःसारेणत्वामजीजनत्किंचसब्रह्मणस्पतिःमहोमहतऋतस्ययज्ञस्यधर्तरिधारकेयजमाने
ऋणचित्स्तोतृकामऋणमिवचिनोतीतिऋणचित्।किंचऋणयाःपापरूपस्यऋणयस्ययावयिताष्टथक्कर्ता ६४
त्वंद्रुहःकर्मणोद्रोग्धुरसुरस्यहंतानवेति॥ठ॥ अथाष्टादशीमृचमाह॥ठ॥ ॥तवश्रियेव्यजिहीतपर्वतोग

वांगोत्रमुतस्सृजोयदंगिरः।इंद्रेणयुजातमसापरीवृतंबृहस्पतेनिरपामौब्जोअर्णवं॥ठ॥ ॥अंगिरःअंगि
रसहेबृहस्पतेगवामावारकोवलेनाधिष्ठितःपर्वतःतवश्रियेआयणार्थंव्यजिहीतविहृतक्षारतामगच्छ
त्ततस्त्वंयद्यदागोत्रंइतित्रकद्यकश्चेतिसम्प्रत्यर्थेत्रप्रत्ययःगवांसमूहमुदसृजोनिरगमयःतदातदा
इंद्रेणयुजासहायेनयुक्तस्त्वंतमसावृत्रासुरेणपरीवृतंपरितआक्रांतंअपामर्णवंस्थानभूतंमेघंनिरो
ब्जःनितरामधोमुखमकार्षीः॥ठ॥ अथैकोनविंशीमृचमाह॥ठ॥ ॥ब्रह्मणस्पतेत्वमस्ययंतासूक्तस्य
बोधितनयंचजिन्व।विश्वंतद्भद्रंयदवंतिदेवाबृहद्वदेमविदथेसुवीराः॥ठ॥ ॥हेब्रह्मणस्पतेत्वमस्यं
यंतासूक्तस्यबोधितनयंचजिन्व।विश्वंतद्भद्रंयदवंतिदेवाबृहद्०॥ ॥हेब्रह्मणस्पतेब्रह्मणांस्तोत्राणामधि
पतेअस्यजगतोयंतानियामकस्त्वंसूक्तस्यअस्मदीयमिदंब्राह्मणस्पत्यंबोधिबुध्यस्वत्वंतनयंपुत्रपौ

१६६ चादित्कल्याणसंतानंजित्वा। त्रिविःप्राणनार्थः जोदिरूपं। प्राण्या। भवाहृशादेवायद्वंनिरर्हंतिनत्वाहृशंविश्वं
सर्वंभद्रंकल्याणंभवति। अतोवयंविदथेस्मिन्यज्ञेसुवीराःशोभनपुत्रपौत्राःसंतःबृहत्प्रभूतमिदंस्तोत्रं
वदेमब्रूयाम॥ ६॥ ॥इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्रा
ज्यधुरंधरेणसायणाचार्यविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येद्वितीयाष्टकेषष्ठोध्यायः
समाप्तः॥ ॥६॥ ॥यादृशामितिन्यायात्त्रमेदोषः॥६॥ ॥श्री॥ ॥ ॥६॥ ॥श्री॥

DR. BHAU DAJI MEMORIAL

द्वितीयाष्टकषष्ठाध्यायभाष्यं। ६५

१६०७

द्वितीयाष्टकसप्तमाध्यायभाष्यंप्रारंभः॥

१६०७

द्वि॰ ७

॥उ॥ यस्यनिश्वसितंवेदायोवेदेभ्योखिलंजगत्। निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥छ॥ ॥श्री॥ ॥ ॥
अथऋष्यादिदेवताविनियोगःपुरःसरंसमस्तमोव्याख्यायते। गार्त्समदस्यद्वितीयमंडलस्यतृतीयेनुवाके
दशसूक्तानि। तत्रैकंसूक्तं। व्याकृतं। सेमामितिषोडशर्चंद्वितीयंसूक्तं। अत्रानुक्रम्यतेसेमांषोडशांत्यात्रि
ष्टुब्द्वादशीचसैंद्रीत्रिष्टुब्विनि। मंडलद्रष्टागृत्समदऋषिः। द्वादश्यैकादशीषोडश्यौत्रिष्टुभौ। शिष्टाश्चतुर्दशजगत्यः
ब्राह्मणस्पत्यंइत्युक्तत्वात्तुह्यादिपरिभाषयाइदमासामान्यविनियोगःपूर्वमेवोक्तः। विशेषतस्तुलिंगा
द्वगंतव्य॥छ॥ तत्रप्रथमामृचमाह॥छ॥ ॥सेमामविड्ढिप्रभृतिंयईशिषेयाविधेमनवयामहागिरा।
यथानोमीढ्वांस्तवतेसखातववृहस्पतेसीषधःसोतनोमतिं॥छ॥ ॥हेब्रह्मणस्पतेयस्त्वंईशिषेसर्वस्य १
जगतस्यईश्वरोभवसिसत्वंइमामस्मदीयांप्रभृतिंप्रकर्षेणभृतांस्तुतिंअविड्ढिप्राप्नुहिअवतेःप्राप्तस्य

लोपेतद्रूपं। वयंचत्वांअयाअनयाछांदसोवर्णलोपः। नवयानूतनयाप्रत्यग्रयामहत्यागिरावेदरूपयास्तुति
लक्षणयावाचाविधेमपरिचरेम। विधतिःपरिचरणकर्मा। अपिचनोस्माकंमध्येमीढ्वानसेक्तास्तुतेव
पिताकर्त्तेतियावत्तवसखामित्रभूतःसन्यथायेनप्रकारेणयजमानयास्तवतेत्वांस्तौति। हेवृहस्पतो
ब्रह्मणोमंत्रस्यस्वामिन्सत्वंनोस्माकं। अस्यसूक्तस्यद्वादशीऐंद्रीइंद्रदेवत्याचशिष्टाब्राह्मणस्पत्यान
मतिंतन्निमित्तंफलंसीषधःसाधयछांदसेलुङिचङिएतद्रूपं॥छ॥ अथद्वितीयामृचमाह॥छ॥ ॥
योनन्त्वांन्यनमन्योजसोतादर्दमन्युनाशंबराणिवि। प्राच्यावयदच्युताब्रह्मणस्पतिराचाविशद्वसुमं
तंविपर्वतं॥छ॥ ॥योब्रह्मणस्पतिःनंत्वानिनमनीयानिओजसाओजसाबलेनन्यनमत्नितराम
नमयत्प्रह्वीकृतान्यकरोत्। उतअपिचसब्रह्मणस्पतिर्मन्युनामनुक्रोधेनवमेन्यमन्यतेदीप्तिकर्म

द्वि० भा०७

णाःक्रोधकर्मणोवेतियास्कः।शंबराणिमेघनामैतत्।मेघातत्।व्यवर्दःपूर्णार्थंविदारितवान्।दृविदारणे।
ऽस्माद्यङ्लुगंताल्लङ्येतद्रूपं।तदनंतरंअच्यवत्तानिनिश्चल्येनामघेवस्थितान्युदकानिप्राच्यावयत्प्रक
र्षेणागमयत्।मेघान्निरगमयदित्यर्थः।तथावसुमंतंगोरूपधनवंतंपर्वतंबलनाम्नासुरेणबिलद्वार
।पिधानादिशिलोच्चयंआचआभिमुख्येनचेत्चशब्दश्चेदर्थसमुच्चयार्थत्वेऽपिचवायोगेप्रथमेतिसर्वस्या
च्यावयदित्यस्याप्युदात्तत्वंस्यात्।अस्यचसर्वानुदात्तत्वंचेदर्थेनिपातैर्यद्यदिहंतेतिनिघातप्रतिषे
धः।मिध्यानिव्योविशत्विशेषेणप्रविशत्तदानींतद्गोरूपंधनंप्राप्नोदित्यर्थः॥२॥अथतृतीयामृचमाह
॥३॥ ॥यद्देवानांदेवतमायकर्त्वमश्रथ्नन्दृह्लाव्रदंतवीळिता।उद्गाआजदभिनद्ब्रह्मणावलमगूहत्त २
मोव्यचक्षयत्स्वः॥३॥ ॥देवानामिंद्रादीनांमध्येदेवतमायअतिशयेनदानादिगुणयुक्तायपञ्चम्यर्थे

चतुर्थी।इदृशस्यब्रह्मणस्पतेस्तत्कर्तव्यंकर्मकिंपुनस्तदितिचेदुच्यते।दृह्लादृह्लानिपर्वतादीनिअश्रथ्नन्श्र
थविमोचनप्रतिहर्षणयोः।अस्यबलेनश्रथितानिविश्लिष्टान्यभवन्।तथावीळितानिसंस्तंभितानिदृढीकृ
तानिदृढत्वादीनिवीळयतिश्चव्रीळयतिश्चसंस्तंभकर्माणाविति यास्कः।अव्रदंतमृदून्यभवन्।व्रदतिर्मृदू
भावकर्मा।अपिचसब्रह्मणस्पतिर्बलेनापिहितागाउदाजत्।अजगतिक्षेपणयोः।देवान्प्रत्यगम
यत्।तथाब्रह्मणाआत्मीयेनमंत्रेणबलंसर्वस्यावरकमसुरंअभिनत्मंत्रसामर्थ्येनानेसीत्।तदनंत
रंबलेनोत्पादितंअगूहत्।गुहूसंवरणे।दृढमदृश्यमकरोत्।तदनंतरंस्वरादित्यंव्यचक्षयत्तमसा
निराकरणेनतत्स्थमदर्शयत्।चष्टिःपश्यतिकर्मा॥३॥अथचतुर्थीमृचमाह॥४॥ ॥अश्मास्यमवतंब्र
ह्मणस्पतिर्मधुधारमभियमोजसातृणत्।तमेवविश्वेपपिरेस्वर्दृशोबहुसाकंसिसिचुरुत्समुद्रिणं॥४॥ ॥

द्वि० अ० ७ ब्रह्मणस्पतिः ब्रह्मणो मंत्रस्य पतिः पालयिता देवः अश्मवद्दृढतरास्यं यास्कस्त्वाह। अशनवंतमास्यंदनवं
तमितिव्यापनवंतं आसेचनमिति तस्यार्थः मधुधारं मधुमाद्रपिनी उपधायस्यताहृशं अवत अवस्तात्ततं
यंमेघं उज्जावलेन अभ्यतृणत् उत्रं दिरहिमानादृरयोः अहिंसीत्वर्षणार्थमवधीदित्यर्थः तमेवमेवं
विश्वेसर्वे स्वर्दृशः स्वरादित्यः तस्य संबंधिनो द्रष्टारो रश्मयः पपिरे घर्मकाले पिबंति मेघेन दृष्टस्योदकस्य
पानात्तमेव पिबंतीत्युच्यते। तेच रश्मयो वर्षासु उत्सं उत्सेचनवंतं उद्रिणं उदकवंतं मेघं माकं सह युगपदे
व बहु सिंचुः घर्मकाले यत्पीतं ततोपि बहुतरं सहस्रगुणितं सिंचंतीत्यर्थः ॥छ॥ अथ पंचमीमृचमाह ॥छ॥
॥ ॥सनाताकाचिद्भुवनाभवीत्वामाद्भिःशरद्भिर्दुरोवरंतवः। अयतंताचरतोअन्यदन्यदिद्याचकारव २
युनाब्रह्मणस्पतिः ॥छ॥ ॥हेऋत्विग्यजमानावो युष्मदर्थं सनाता सनातनानि कानिचित्कानिचित् ब्रह्मण

स्पतेः प्रज्ञानानि भुवना भुवनानां सुपां सुलुगिति षष्ठ्या लुक् भुवनानां उदकानां भवतीत्वा नाव्यानां द्वारोश्च
राणि माद्भिः मासैः पद्दन्नित्यादिना मासशब्दस्य मास्भावः स्वतवस्मासोषसां च तद्भ्येत इति तत्वा शर
द्भिः संवत्सरैश्च वरंत विवृण्वंति तत्काले वर्षणार्थं मेघद्वाराण्युद्घाटयंतीत्यर्थः कानि पुनस्तानि ब्रह्मणस्प
तेर्याया निवयुनान्यानमैतत्प्रज्ञानानि मंत्रविषयाणि चकार कृतवान्। तदनंतरं अयतंता अयतमानौ
प्रयत्नोउभानो लोकौ द्यौश्च पृथिवी च अन्यदन्यदित् अन्यदन्यदेव पृथिवी हविर्भिर्नां दिव्यमुदकं द्यौः उदक
कार्यं हविर्लक्षणं पार्थिवमन्नं एवं परस्परव्यतिहारेण चरतोनुज्ञाते चरगतिभक्षणयोः ॥छ॥ अथ षष्ठीमृ
चमाह ॥छ॥ ॥अभिनक्षंतो अभियेतमानशुर्निधिं पणीनां परमं गुहाहितं। ते विद्वांसः प्रतिचक्ष्यानृता पु
नर्यतउआयंतदुदायुराविशं ॥छ॥ ॥गोसमूहरूपाणि निरुद्धारे रपहृते सति पणीनां स्थानं सरमाख्ययादेव

द्वि० ७

अन्याज्ज्ञात्वाब्रह्मणस्पतिनाप्रेरिताअंगिरसस्तत्स्थानंप्राप्यगोसमूहंपणिभिर्निर्मितायामायांदृष्ट्वाअसुरनिवा
सस्थानंस्वहस्तोद्धृतेनाग्निनादग्ध्वाप्रत्यागच्छन्‌तदेतदृचेनोच्यते।अभिनक्षंतःअभितोगच्छंतोयेऽगिरसःतं
धनंगोसमूहरूपंनिधानंधनंपरममुत्कृष्टंपणीनांतृतीयार्थेषष्ठी।पणिभिःगुहायांनिहितंस्थापितंअभ्यानशुः
अभिव्यानशिरेप्राप्तवंतःविद्वांसोपिज्ञास्तेऽगिरसःअनृताअनृतानिअसुरैःकृतामायाःप्रतिचक्ष्य
दृष्ट्वाआविशंआवेष्टुंप्रवेष्टुंयतउयतएवस्थानादायन्‌आगच्छन्‌तत्स्थानंपुनरुदीयुःउदगच्छन्‌उत्कर्षेण
प्राप्ताः॥६॥अथसप्तमीमृचमाह॥६॥ ॥ऋतावानःप्रतिचक्ष्यानृतापुनरातआतस्थुःकवयोमहस्पथः
तेबाहुभ्यांधमितमग्निमश्मनिनकिःषोअस्त्यरणोजहुर्हितं॥७॥ ॥ऋतावानःऋतमितिसत्यनामधेयं
तद्वंतःकवयःक्रांतदर्शिनःसर्वज्ञाअंगिरसःअनृताअनृतानिप्रतिचक्ष्यापूर्वोक्तप्रकारेणदृष्ट्वाअतअ

स्मात्स्थानात्पुनराजिगमिषवःमहस्पथोमहतोमार्गान्प्रतिआतस्थुःअवतस्थिरेअवतिष्ठमानाश्चतेतेबा
हुभ्यांहस्ताभ्यांधमितमथतोत्पादितंप्रज्वलितमग्निंअश्मनिपणीनांनिवासभूतेशिलोच्चये।जहुर्दग्धुंत्य
क्तवंतःखलुहित्वाअस्त्यर्थः॥७॥अथाष्टमीमृचमाह॥७॥ ॥ऋतज्येनक्षिप्रेणब्रह्मणस्पतिर्यत्रवष्टिप्रतदश्नो
तिधन्वना।तस्यसाध्वीरिषवोयाभिरस्यतिनृचक्षसोदृशयेकर्णयोनयः॥८॥ ॥ऋतंसत्यमेवज्यायस्यते
नक्षिप्रेणइषूणांक्षेपकेनधन्वनाधरणान्धनुषाहेब्रह्मणस्पतेत्वयाप्रेरिताःब्रह्मणस्पतिःब्रह्मणोमंत्र
स्यपालयितादेवःयत्रयस्मिन्विषयेवष्टिकामयतेतत्प्राश्नोतिकर्षेणव्याप्नोति।अश्नोतेर्व्यत्ययेनपरस्मैप
दं।तस्यधनुषःसाध्वीःसाधिकास्ताइषवोभवंतियाभिरिषुभिःब्रह्मणस्पतिरस्यतिराक्षसादीन्क्षिपति।कीदृ
शास्ताःनृचक्षसःनॄन्पश्यतःउपलक्षणमेतत्सर्वज्ञस्यब्रह्मणस्पतेःदृशयेदर्शनायज्ञानायजाताःकर्ण

द्वि०७ योनयःश्रोत्रेंद्रियेणयायामंत्ररूताआकर्णदृष्ट्वाबाणाःब्रह्मणस्पतिर्मंत्रैरेवसर्वंसाधयतीतिभावः॥
॥ठ॥अथनवमीमृचमाह॥ठ॥ ॥ससंनयःसविनयःपुरोहितःससुष्टुतःसयुधिब्रह्मणस्पतिःचाक्ष्मोयद्वा
जंभरतेमतीधनादित्सूर्यस्तपतितपसावृथा॥ठ॥ ॥पुरोहितादेवैःपुरतोत्रस्थापितःसब्रह्मणस्पतिःसं
नयःविश्लिष्टानांमंत्रैःसंगमयिताभवतिविनयःसंगतानांविभेत्तेनापृथक्कर्तापिसएव।तथाससुष्टुतःशो
भनंस्तोतृभिःस्तुतश्वभवति।तथायुधिसंग्रामेसस्तोतृणामनुग्रहायप्रादुर्भवती।विशेषःयद्यदाचाक्ष्मःच
ष्टःक्षमतेवाभिर्वस्यद्रष्टासर्वस्मद्रोवाब्रह्मणस्पतिःवाचमन्नंमतीमननीयंप्रशस्तंधनाधनंवस्तोतृणा
मर्थायभरतेविभर्तिद्विष्टिकारापोषयति।आदिदानंतरमेवदृष्टस्तापकःसूर्यःवृथाअनायासवचनम ५
नत्रअनायासेनतपतिदीप्यतेब्रह्मणस्पतिनादत्तैरत्नैर्धनिश्चयत्रस्यासिद्धत्वात्स्वयंकेवलंरविर्विषिंतुंजान

एववर्त्तनइत्यर्थः॥ठ॥अथदशमीमृचमाह॥ठ॥ ॥विभुप्रभुप्रथमंमेहनावतोबृहस्पतेःसुविदत्राणिराध्या
।इमासातानिवेन्यस्यवाजिनोयेनजनाउभयेभुंजतेविशः॥ठ॥ ॥विभुविभूनिव्याप्तानिप्रभुप्रभूणिप्रो
द्गानिप्रथमंप्रथमानिमुख्यानिएवंभूतानिमेहनावतःवर्षणवतोवृष्टिप्रदस्यबृहस्पतेःबृहतोमंत्रस्यपा
लयितुःसंबंधीनिसुविदत्राणिविभूलानेसुविदेरक्कभूसुपुल्लवव्यानिसुविदत्रंधनंभवतीतियास्कः।राध्या
राध्यानिसम्यक्साधयानिप्राप्तव्यानीतियावत्।इमातानीमानिधनानिवेन्यस्यकमनीयस्यवाजिनोन्न
वतोब्रह्मणस्पतेःदत्तायायार्थेषष्ठी॥ब्रह्मणस्पतिनादत्तानियेनधनेनउभयेउभयधनाजनाःस्तोतारो
यजमानाश्वदेवामनुष्याश्ववाविशोनिविष्टाःसंतोभुंजतेभोगान्लभंतेतत्सर्वंब्रह्मणस्पतिनादत्त
मित्यर्थः॥ठ॥ ॥इतिद्वितीयस्यसप्तमेद्वितीयोवर्गः॥ठ॥अथैकादशीमृचमाह॥ठ॥ ॥योवरेवृजनेवि

६०७

ष्वथाविभुर्महासुरःवःशवसाववक्षिथ।सदेवोदेवान्प्रतिपप्रथेपृथुविश्वेदुतापरिभूर्ब्रह्मणस्पतिः॥ठ॥ ॥
विश्वथासर्वप्रकारेणविभुर्व्याप्तःरण्वोरमयितास्तोतव्योवायोब्रह्मणस्पतिःअवरेनिकृष्टेवृजनेवर्जन
हेतुभूतेबलेवर्त्तमानंदुर्बलमितियावत्महानुमहान्तंचछांदसोवर्णलोपःअमयविधंस्तोतारंशवसात्मा
त्मीयेनबलेनविवक्षियवोढुमिच्छतिसर्वदावहतीतियावत्।वहतेःसनंतस्यलिट्येतद्रूपंपुरुषव्यत्ययः
सदेवोदानादिगुणयुक्तःदेवान्प्रतिसर्वेषांदेवानांप्रतिनिधिःसन्पृथुपप्रथेअत्यंतंप्रथतेयशसावि
ख्यातोभवतीतियावत्।यस्मादेवंतस्मात्विश्वेसर्वाणिभूतजातानिपरिभूःपरिभवन्अभिभवन्व
र्त्ततइतिशेषः॥ठ॥अथद्वादशीमृचमाह॥ठ॥ ॥विश्वंसत्यंमघवानायुवोरिदापश्चनप्रमिनंतिव्र ६
तंवां।अच्छेन्द्राब्रह्मणस्पतीहविर्नोऽन्नंयुजेववाजिनाजिगातं॥ठ॥ ॥हेमघवानामघमितिधननाम

तद्वन्तौइन्द्राब्रह्मणस्पतीयुवोरितियुवयोरेवविश्वंसर्वंस्तोत्रंसत्यंयथार्थंस्तुत्यायद्गुणजातंप्रतिपाद्यते
तत्सर्वंयुवयोर्विद्यमानंएवनत्वारोपितमित्यर्थः।तथाचनेत्यनेननत्यब्द्वयसमुदायःएकपद्यंत्वध्यापक
सांप्रदायिकंयद्वेवशब्दस्यपूर्वपदेनआपश्चआपोऽपिभपलक्षणमेतत्एतदुपलक्षितानिसर्वाण्यपिभू
तानिवांयुवयोर्व्रतंकर्मनप्रमिनंतिनहिंसंतिमीङ्हिंसायांक्रैयादिकःनिगमइतिह्रस्वत्वं।हेइन्द्राब्रह्म
णस्पतीनोऽस्माकंहविरच्छाभिमुख्येनजिगातंगच्छतंआगच्छतमितियावत्।जिगातिर्गतिकर्माजोहोत्या
दिकः।तत्रदृष्टांतः।युजेववाजिनायुजारथेनियुक्तौवाजिनवेजनवन्तावश्वौअन्नंघासंप्रतियथास्वयमे
वशीघ्रंगच्छतःतद्वत्शीघ्रमागच्छतमित्यर्थः।युजेवेत्यत्रसुपांसुलुगितिप्रथमाद्विवचनस्याकारःवेतिका
रःइतायांहिंसावेकावेइतिविभक्तेरुदात्तत्वं॥ठ॥अथत्रयोदशीमृचमाह॥ठ॥ ॥उताशिष्ठाअनुशृण्वं

५६०७ निवक्षयः सनेयो विप्रो धनते मना धना। वीळुद्वेषा अनुवश ऋणमाददिः स ह वाजी समिथे ब्रह्मणस्पतिः॥७॥ ॥
उत अपि च आशिष्ठाः आशुतराः शीघ्रगामिनो वह्नयः अश्वनामैतत्। वोढारो ब्रह्मणस्पतेरश्वा अनुष्ट एवंति
अस्माभिः कृतं स्तोत्रं अनुक्रमेण शृण्वंति। यद्वा ब्रह्मणस्पतिना कृतमनुशासनं शृण्वंति। अतस्तेन मस्मदीयं
यशः प्रापयंत्विति शेषः। सनेयः सनायां साधुः छंदसो ढक्। विप्रो मेधावी अध्वर्युर्होता वा मती मत्या मन
नीयेन स्तोत्रेण सुपां सुलुगिति सवर्णदीर्घः। धना धनार्विलक्षणानि धनानि तस्मै ब्रह्मणस्पतये नरते बिन
र्निष्पादयतीत्यावत्। यद्वा स्तोत्रेण धनानि नरते बिनर्तिः पोषयति। अतो वीळुद्वेषाः वाळुर्दृढान् प्रब
लान् साह्यसीदानद्वेष्टीति तादृशो ब्रह्मणस्पतिः वशा वशाया गेः सुपां सुलुगिति पध्यालुक्। ऋणस्य क इति ३
प्रकृतिना वः ऋणं अस्माभिर्यज्ञभिः प्रदेयं अवदानात्मकं अनु अनुक्रमेण आददिः आदाता भवत्विति शेषः॥

अवदानस्य ऋणत्वं च त्रैत्तिरीये त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्य इत्यादिना स्पष्टमाम्नातं। यद्वारानुगु
णे वशावशस्य कामस्याभिलाषस्यानुगुणं अदाता भवत्विति योज्यं इगशदः प्रसिद्धौ। स खलु ब्रह्मणस्पतिः
समिथे संयंति संगच्छंते अस्मिन्नाकृतिभिर्देवा इति समिथो यज्ञः तस्मिन् वाजी अन्नवान् तस्माद्धविष आदान
वत्वित्यर्थः॥७॥ अथ चतुर्दशी॥७॥ ॥ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्युर्महि कर्मा करिष्यतः। यो
गा उदाजत्स दिवे वि चाभजन्महीव रीतिः शवसासरत्पृथक्॥७॥ ॥महि महत्कर्म करिष्यत ब्रह्मणस्प
तेर्मन्युः मननसाधनो मंत्रः क्रोधो वा यथा वशं यथाकामं सत्यो अवितथो भवत्। स यथा कामयते तथा करोतीत्य
र्थः। यो ब्रह्मणस्पतिः पणिभिरपहृता गाः उदाजत् उदगमयत् गुहाया निरगमयदित्यर्थः। स ब्रह्मणस्पतिः दि
वे द्युलोकाय तत्रत्येभ्यो देवेभ्य इत्यर्थः। व्यभजत् ता गा विभक्ताश्चाकरोत् स च गोसमूहः मही वरी देवष्टरंष्ट

द्वि०७ यकविभिन्नंसरत्असरत्अगच्छत्॥छ॥अथपंचदशीमृचमाह॥छ॥ ॥ब्रह्मणस्पतेसुयमस्यविश्वहारायः
स्यामरथ्योवयस्वतः।वीरेषुवीरांउपपृङ्धिनस्त्वंयदीशानोब्रह्मणावेषिमेहवं॥छ॥ ॥हेब्रह्मणस्पतेमंत्रा
धिपतेसुयमस्यसुष्ठुनियंतव्यस्यवयस्वतोन्नयुक्तस्यरायोधनस्यविश्वहाविश्वेषुसुरथ्योधिपतयःस्यामभू
यास्मरथ्याएषांसतीतिरथ्यःछंदसीवनिपावितिमत्वर्थीयईकारः।अपिचनोस्माकंवीरेषुवीर्यजातेष्वस्म
दीयपुत्रेषुवीरान्पुत्रान्त्वंउपपृङ्धिसंपृक्तान्कुरुतउत्पादयपृचीसंपर्केरोधादिकः।वयंपौत्रानपिल
भेमहीतियावत्।ईशानःसर्वस्येश्वरस्त्वंब्रह्मणाअन्ननामैतत्हविर्लक्षणेनान्नेनसहमेहवंमदीयंस्तुति
लक्षणमाह्वानंवेषिकामयसेवीगतिप्रजननकांत्यशनखादनेषु।अतोमयोक्तंकुर्वित्यर्थः॥छ॥अथषो ८
डशीमृचमाह॥छ॥ ॥ब्रह्मणस्पतेत्वमस्ययंतासूक्तस्यबोधितनयंचजिन्व।विश्वंतद्भद्रंयदवंतिदेवा

बृहद्वदेमविदथेसुवीराः॥छ॥ ॥हेब्रह्मणस्पतेयंतासर्वस्यजगतोनियंतात्वंअस्येदंसूक्तंक्रियायहणंक
र्तव्यमितिकर्मणःसंप्रदानत्वाच्चतुर्थ्यर्थेषष्ठी।बोधिबुध्यस्वबुधातनयंपुत्रंचास्मभ्यंजिन्वप्रेरय।जिवि
प्रीणनार्थः।अत्रप्रेरणेवर्त्तते।धातूनामनेकार्थत्वात्।यद्भद्रंकल्याणंदेवाःसर्वेअवंतिरक्षंति।विश्वंसर्वं
तद्भद्रंचजिन्वेतिशेषः।वयंवसुवीराःशोभनैर्वीरैःपुत्रपौत्रादिभिरुपेताःसंतःबृहत्प्रौढंस्तोत्रंविदथेवदं
तियष्टव्यतयास्मिन्देवान्जानंतीतिविदथोयज्ञःतस्मिन्वदेमब्रवाम॥छ॥इतिद्वितीयस्यसप्तमेद्वती
योवर्गः॥छ॥ ॥इंधानइतिपंचर्चंद्वितीयंसूक्तंगार्त्समदंजागतंब्राह्मणस्पत्यं।तथाचानुक्रांतं॥इंधानः
पंचजागतंत्विति।लैंगिकोविनियोगः॥छ॥तत्रप्रथमा॥ ॥इंधानोअग्निंवनवद्वनुष्यतःकृतब्रह्माशू
शुवद्रातहव्यइत्।जातेनजातमतिसप्रसर्स्रतेयंयंयुजंकृणुतेब्रह्मणस्पतिः॥छ॥ ॥अग्निमिंधानःब्र

५६०७

ह्मणस्पतेर्यागार्थंअग्निंप्रज्वलयन्यजमानःवनुष्यतोहिंसिष्यतोहिंसांकुर्वाणान्शत्रून्वनवत्वनु
यात्हिंस्यात्वनुष्यतिर्हिंसाकर्मेतियास्कः।इदितिचार्थेकृतब्रह्माब्रह्मस्तोत्रंकृतंयेनसतथोक्तः
रातहव्यःरातंदत्तंहव्यंहविर्येनसएवंभूतःसन्शूशुवत्वर्द्धतां।टुओश्विगतिवृद्ध्योः।अस्मात्ण्यंतात्लुङि
चङिरूपं।तथायजमानःजातेनपुत्रेणजातंजनितंउत्पादितंस्वस्यापौत्रंअतिप्रसर्स्रतिअतीत्यभृ
शंप्रसरतिपौत्रमपिपश्यन्चिरकालंजीवेदित्यर्थः।सर्त्तेर्यङ्लुगंतात्व्यत्ययेनात्मनेपदं।यंयंयजमा
नंब्रह्मणस्पतिःस्तोत्रहविषास्वीकरणेनयुजंसखायंकृणुतेकुरुतेससमानएवभवतीत्यर्थः॥छ॥
अथद्वितीयामृचमाह॥छ॥ ॥वीरेभिर्वीरान्वनवद्वनुष्यतोगोभीरयिंपप्रथद्बोधतित्मना।तोकंच
तस्यतनयंचवर्द्धतेयंयंयुजंकृणुतेब्रह्मणस्पतिः॥छ॥ ॥सयजमानःवीरेभिर्वीरैरात्मीयैःपुत्रैः

वनुष्यतोहिंसतःवीरान्शत्रुपुत्रान्वनवत्वनुयात्हिंस्यात्।अपिचगोभिःसहितंधनंपप्रथत्प्रथयति
प्रथयतेर्लुङिचङ्युतंरूपं।तथात्मनाआत्मनैवबोधतिसर्वंजानातिअनन्याधीनज्ञानोभवतीत्यर्थः।किं
चतस्ययजमानस्यतोकंपुत्रःतनयंविभक्तिव्यत्यर्थःतनयस्तत्पुत्रश्चवर्द्धतेप्रवृद्धोभवति।तथातोकं
तनयंपुत्रंपौत्रंचब्रह्मणस्पतिर्वर्द्धयतिवृधिरंतर्भावितण्यर्थोद्रष्टव्यः।अन्यद्गतं॥छ॥अथतृतीयामृ
चमाह॥छ॥ ॥सिंधुर्नक्षोदःशिमीवांऋघायतोवृषेववध्रींरभिवष्टिओजसा।अग्नेरिवप्रसितिर्नाहव
र्तवेयंयंयुजंकृणुतेब्रह्मणस्पतिः॥छ॥ ॥सिंधुःस्पंदनशीलानदीक्षोदोभक्षुयमाणंकूलंयथाभि
नत्तिनयानिनत्तितथाशिमीवान्शिमीतिकर्मनामब्रह्मणस्पतेःपरिचरणात्मनाकर्मणायुक्तोयजमा
नःऋघायतोहिंसतःशत्रून्ओजसाबलेनअभिवष्टिहंतुमभितःकामयते।वशकांतौ।इदमपरंनि

DR. BHAU DAJI MEMORIAL

दर्शनं।वृषेववध्रीनवध्रयोनिष्पिष्टमुष्कानिर्वीर्याबलीवर्दाःतान्यथावृषासेचनसमर्थःसवीर्योवृषभो
निवर्तितद्वच्छत्रूनभिभवतीत्यर्थः।अपिचास्यअग्नेरिवप्रसितिःप्रसीयतेबध्यतेअनयेतिप्रसितिर्ज्वा
लाषिञ्बंधने।करणोक्तिः।यथाअग्नेर्ज्वालाअप्रतिहतप्रसराएवमपिनोवर्त्तावारयितुंनिवर्त्तयि
तुंवानैवशक्यते।अहशब्दोवधारणे।हणातेरंतरंनमावितएयथर्तिवर्त्तनंवार्त्तिमर्थेनवेत्यत्ययः।अन्यद्गतं।
॥छ॥अथचतुर्थीमृचमाह॥छ॥ ॥तस्माअर्षंतिदिव्याअसश्चतःससत्वभिःप्रथमोगोषुगच्छति।अनि
भृष्टतविषिर्हंस्योजसायंयं॥छ॥ ॥तस्मैयजमानायदिव्यादिविभवावृष्टिलक्षणाःआपःअसश्चतः
असज्यमानाःअनिरुद्धाःसत्यःअर्षंतिगच्छंतिप्राप्नुवंतिअर्तेर्लेटिरूपं।तथासयजमानःसत्वभिःसत्वा १०
नस्मोदकाःपरिचारकाःतैःसहितःप्रथमोअन्येभ्योयजमानेभ्यःसर्वेभ्योवीसनगोषुगच्छतिगवादिधनंप्रा

प्नोतीत्यर्थः।किंचअनिभृष्टतविषिःतविषीतिबलनाम।अनिभृष्टापरैरबाधितातविषीबलंयस्यतादृशःसन्
त्वंजसाबलेनहंतिशत्रून्॥छ॥अथपंचमीमृचमाह॥छ॥ ॥तस्माइद्विश्वेधुनयंतसिंधवोच्छिद्राशर्मद
धिरेपुरूणि।देवानांसुम्नेसुभगःसएधतेयं॥छ॥ ॥तस्माइत्तस्माएवयजमानायविश्वेसिंधवःसर्वाः
स्पंदनशीलानद्यःधुनयंतचलयंतिएतदभीष्टफलसिध्यर्थंप्रवहंतीत्यर्थः।तथाअच्छिद्राअच्छिद्राणिच्छि
द्ररहितानिसंततानिपुरूणिबहूनिशर्मशर्माणिसुखानिदधिरेतस्माएवधारयंति।यद्वाशर्मेतिगृहनाम
छिद्ररहितानिबहूनिसदनानिधारयंति।सुभगःशोभनधनःदेवानांसुम्नेदेवैःप्रत्तेसुखेवर्त्तमानःसन्एध
तेवर्द्धतेशिष्टंस्पष्टं॥छ॥ ॥इतिद्वितीयस्यसप्तमेचतुर्थोवर्गः॥छ॥ ॥ऋजुरितिपंचर्चंचतुर्थंसूक्तं
गृत्समदस्यार्षदेवयंतमन्यमसत्।सुद्रावीरिद्वनवन्मसुउष्टरंयज्ञेदयन्योविभजातिभोजनं।ऋजुरित्याद्ये

६० वयुक्तएव।यद्वाजजनत्।प्रसाधनकर्मा।स्तोत्राणांप्रसाधकएवशंसःब्रह्मणस्पतेःस्तोतावनुष्यतोहिंस
तःशत्रूनवतत्वनुयात्हिंस्यात्वनोतेरीतिकर्मणएतद्रूपं।तथादेवयन्तिनदेवंदानादिगुणयुक्तंब्र
ह्मणस्पतिमात्मनइच्छन्नेवअदेवयंतंतद्विपरीतंपुरुषंअभ्यसत्अभिभवेत्।अस्तेर्लेट्यतइपांतथा
सुप्रावीरित्यवतेस्तृप्त्यर्थात्दोणादिकईकारःप्रत्ययःसुष्ठुप्रकर्षेणब्रह्मणस्पतेस्तर्पयितेवा।दुष्टरःपृ
तनासंग्रामेषुदुस्तरंतरीतुमशक्यःवनवत्हिंस्यात्।तथायज्ञेनब्रह्मणस्पतिंहविषाइष्टवानेवअ
यज्योःअयज्वनःभोजनंभोगसाधनंविभजातिविशेषेणभजतेत्यर्थः॥ब॥अथद्वितीयामृचमाह॥ग॥
॥ ॥यजस्ववीरप्रविहिमिनायतोभद्रंमनःकृणुष्ववृत्रतूर्ये।हविष्कृणुष्वसुभगोयथाससिब्रह्मणस्प ११
तेरवआवृणीमहे॥ब॥ ॥ऋषिरात्मीयंपुरुषंशास्तिदेवीरविशेषेणस्तुतीनांप्रेरकसखेयस्त्वब्रह्मण

स्पतिंस्तुत्याइळयमानायतःमनइवशीघ्रंप्रवर्तमानान्हिंसकान्।यद्वाअभिमन्यमानान्शत्रून्अ
भिप्रविशतइडिप्रकर्षेणयुद्धार्थंगच्छ।वागत्यादिषुछांदसोलुक्।वृत्रतूर्येवृत्राणामावरकाणांशत्रूणांहिं
साहेतुभूतेसंग्रामेभद्रंकल्याणंधार्ष्ट्योपेतंमनःकृणुष्वकुरु।ब्रह्मणस्पतेरनुग्रहात्त्वंविजयोभविष्य
ति।तथास्वब्रह्मणस्पतयेहविश्चरुपुरोडाशादिकंतत्परतोकृणुष्वकुरु।यथात्वंसुभगःशोभनधनोअ
सिसंभवेःअस्तेर्लेट्यडागमः।ब्रह्मणस्पतेर्योगेनत्वंशोभनधनोभविष्यतीतियावत्।अपिचवयंब्रह्म
णस्पतेरवोरक्षणंआभिमुख्येनवृणीमहेप्रार्थयामहे॥ग॥अथतृतीयामृचमाह॥ब॥ ॥सइज्जनेनस
विशासजन्मनासपुत्रैर्वाजंभरतेधनानृभिः।देवानांयःपितरमाविवासतिश्रद्धामनाहविषाब्रह्मणस्पतिं।
॥ब॥ ॥योयजमानःश्रद्धामनाःश्रद्धामनसियस्यतादृशःसन्देवानांपितरंपालयितारंब्रह्मणस्पतिं

द्वि० ७ हविषाचरुपुरोडाशादिनाआविवासतिपरिचरति।विवासतिःपरिचरणकर्मा।सइत्सएवयजमानःज
नेनजातेनसर्वेणलोकेनवाजमन्नंभरते।बिभर्तिसंभरतिवा।सएवविशाप्रजयाआत्मीयेनबंधुजने
नवाजंभरते।सएवपुत्रैरात्मीयैरपत्यैर्वाजंभरते।तथानृभिःनेतृभिःरन्यैःपरिचारकैःधनधनानिभ
रतेबिभर्तिसंपादयतिवा।ब्रह्मणस्पतिमिष्टवतोयजमानस्यसर्वताजनाअन्नधनयोःसाधकाभ
वंतीतितियावत्॥४॥अथचतुर्थीमृचमाह॥४॥ ॥योअस्मैहव्यैर्घृतवद्भिरविधत्प्रतंप्राचानयति
ब्रह्मणस्पतिःउरुष्यतीमंहसोरक्षतीरिषोअंहोश्चिदस्माउरुचक्रिरद्भुतः॥४॥ ॥योयजमानः
अस्मैब्रह्मणस्पतयेक्रियायाग्रहणंकर्तव्यमितिकर्मणःसंप्रदानत्वाच्चतुर्थी॥ ॥इमंब्रह्मणस्पतिं १२
घृतवद्भिःउपस्तरणाभिघारणात्मकेनाज्येनोपेतैर्हविर्भिःअविधत्परिचरतिविधानेतौदादिकः

अयंपरिचरणकर्मसुपठितः।सतंयजमानंब्रह्मणस्पतिःप्राचाप्राचीनेनऋजुनामार्गेणप्रणयतिप्र
शस्तंफलंप्रापयति।अपिचइमेनंअंहसःपापात्उरुष्यतिरक्षति।उरुष्यतीरक्षाकर्मेतियास्कः।त
थारुषोहिंसकादीनंरक्षति।अंहोश्चित्अवद्यादरिष्टात्यद्वाआगत्यदुःखादपिरक्षति।अपिचास्मै
यजमानायअद्भुतःमहत्त्वामितत्आचार्यःततोमहान्ब्रह्मणस्पतिःउरुचक्रिःउरोर्विस्तीर्णस्यो
पकारस्यकर्त्ताभवति॥४॥ ॥इतिद्वितीयस्यसप्तमेपंचमोवर्गः॥ ॥इमागिरइतिसप्तदशर्चंपं
चमंसूक्तंगृत्समदपुत्रस्यकूर्मस्यार्षंगृत्समदस्यैववात्रैष्टुभमादित्यदेवताकं।तथाचानुक्रांतं
॥इमागिरःसप्तनाकूर्मोगार्त्समदोहिवादित्यमिति।सूक्तविनियोगोलैंगिकः।आदित्यदेवताकेप
शौपुरोडाशस्यइमागिरइत्येकानुवाक्या।अग्नीषोमावितिखंडेसूत्रितं॥इमागिरआदित्येभ्यो
घृतस्नूस्नआदित्यासउरवोगभीराइति।४।सैषासूक्तेप्रथमा॥ ॥इमागिरआदित्येभ्योघृतस्नूःस

द्वि० ७ नाम्राजभ्योहविंजुह्वाजुहोमि। शृणोतुमित्रोअर्यमाभगोनस्तुविजातोवरुणोदक्षोअंशः॥छ॥ ॥आ
दित्येभ्यः अदितेःपुत्रेभ्यः राजमानेभ्यः ईश्वरेभ्योवामित्रादिभ्यः घृतस्नूः घृतप्रस्राविनीः घृतंक्षरंतीः इ
मागिरः स्तुतिलक्षणावाचः सनात्सर्वदाजुह्वा वाङ्नामैतत् वागिंद्रियेणजुहोमिकरोमीतियावत् अथ
वाजुहूःस्रुक्स्थानीयेनघृतंक्षरंतिचाज्यरूपाणिहवींषिजुहोमिआदित्यानुद्दिश्यत्यजामिमंत्राणांपयोघृ
तादिक्षरणहेतुत्वंचयऋचोधीतेपयसःकुल्याअस्येत्यादिनातैत्तिरीयेस्पष्टमाम्नातं। नोस्माकं
यास्तागिरःमित्रादयःप्रत्येकंशृणोतु। तच्चतैत्तिरीयेअष्टौपुत्रासोअदितेरित्यस्यप्रपंचस्यस्पष्टमनुक्रां
ताः मित्रश्चवरुणश्चधाताचार्यमाचअंशश्चभगश्चइंद्रश्चविवस्वांश्चेत्येतइति। मित्रःप्रमीतेस्त्राय
कः पद्मासर्वेषांनिग्रहः आरीन्यच्छतिनियच्छतीत्यर्थः। भगोभजनीयोभजनक्रियार्होयोनारःसोवै १२
कथितोऽस्मिन्नितीसमोनेजंवायोदेवस्तुवातिबहुनामा। बहुषुदेशेषुअनुप्रसूतार्थंप्रादुर्भूतःवरुणवि

शेषेणमेतत्पापस्यनिवारणाद्वरुणः एतत्त्रोडास्यविशेषणं॥छ॥ स्वर्वोक्तएवपशौइमंस्तोममित्येषावपायायागस्य
याज्या सूत्रितंच। इमंस्तोमंसक्रतवोमेअद्यास्तिस्रोभूमीर्धारयन्निति॥छ॥ सैषासूक्तेद्वितीया॥छ॥ ॥इ
मंस्तोमंसक्रतवोमेअद्यमित्रोअर्यमावरुणोजुषंत। आदित्यासःशुचयोधारपूताअवृजिनाअनवद्याअ
रिष्टाः॥छ॥ ॥इममस्मदीयंस्तोमंस्तोत्रंसक्रतवःसमानकर्माणःसमानप्रज्ञावामित्रादयःअद्येदानींजु
षंतांजुषंतांसेवंतांकीदृशास्तेआदित्यासःअदितेःपुत्राःशुचयोदीप्यमानाःधारपूताःउदकधाराभिःपवित्री
ताःनिर्मलाइत्यर्थःअवृजिनाःवृजावर्जनोअवर्जितारःसर्वानुग्राहकाइत्यर्थःअनवद्याःअवद्येनग
र्ह्येणपापेनरहिताःअरिष्टाःकेनाप्यहिंसिताः तस्मिन्नेवपशौतआदित्यासइतिहविषोनुवाक्या। सूत्रंतुपू
र्वमेवोदाहृतं॥छ॥ सैषातृतीयाऋचमा॥३॥छ॥ ॥तआदित्यासउरवोगभीराअदब्धासोदिप्संतोभूर्यक्षाः॥ अं

६० ७ तः पश्यंति वृजिनोत साधु सर्वं राजभ्यः परमा चिदंति ॥३॥ ॥ त आदित्यासः अदितेः पुत्रा उरवो महांतः ग
भीराः गांभीर्योपेताः अदब्धासः शत्रुभिरहिंसिताः अंतः दिप्संतः शत्रून्दंभितुमिच्छंतः । दंभु दंभे । अ
स्मादिच्छासनि सनीवंतर्द्धेनाइडभावपक्षे तदत्त इत्येताकारः दंभेर्हल्वित्यइणस्य जातिविचाकत्वात्सिद्धमि
तिसनः कित्वे अनुनासिकलोपः । तथा भूर्यक्षाः भूरीणि बहून्यक्षीणि चक्षूंषि येषां ते तथोक्ताः बहुतेऽसो
वा बहुव्रीहौ सक्थ्यक्ष्णोरिच समासांतः एवंभूता आदित्याः अंतः मध्ये प्राणिनां हृदि प्रेरकतया वर्तमानाः सं
तः वृजिना वृजितानि पापानि उत अपि च साधु साधूनि पुण्यानि च प्राणिभिः कृतानि पश्यंति जानंति परमा
चित् परमाणि दूरदेशावस्थितान्यपि सर्वं सर्वाणि दृश्यमानानि राजभ्यः राज्ञामीश्वराणामादित्यानां अंति
के समीपे वर्तंत इति शेषः । कादिलोपो बहुलमित्यंतिकशब्दस्य कादिलोपः । मात्रिचित्येकतौ दाक्षायणीया

यां आदित्ययागस्य धारयंत इत्यादिके द्वे याज्यानुवाक्ये । अत एव भुवद्वनपतिविशेषणविशिष्टादित्यया
गेऽपि तथा च दाक्षायणीयायामिति खंडे सूत्रितं । धारयंत आदित्यासो जगत्स्था इति द्वे इति एते एव भुवद्वद्भ्यो
भुवनपतिभ्यो वेति । तयोराद्या सूक्ते चतुर्थ्येषा । धारयंत आदित्यासो जगत्स्था देवा विश्वस्य भुवनस्य गो
पाः दीर्घाधियो रक्षमाणा असुर्यमृतावानश्चयमाना ऋणानि ॥४॥ ॥ जगज्जंगमं स्थाः स्थावरं च तिष्ठ
तेः कर्तर्यसुन् । एतदुभयविधं भूतजातं धारयंतः अवस्थापयंतः देवाः दानादिगुणयुक्ताः विश्वस्य भुवनस्य
सर्वस्य लोकस्य गोपाः गोपयितारो रक्षकाः दीर्घाधियः दीर्घाणि धियः कर्माणि ज्ञानानि वा येषां तादृशाः ॥
अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घः । असुर्यं असवः प्राणाः तेन च तद्धेतुभूताः अपो लक्ष्यंते । अपां
नद्धेतुत्वं च छांदस्ये प्रमाम्नातं । आपोमयः प्राण इति । असुमुदकं ददातीत्यसुरो मेघः तत्र भवं मेघांतव

१४

MEMORIAL

५६०७ र्त्तमानमुदकंरक्षमाणाः। तत्रकालेहृकृत्यावनायस्त्वंतः। असुरशाक्षाज्ञवेछंदसीतियत्कृतावानः सत्यवं
तोयज्ञवंतोवाछंदसीवनिपावितिमत्वर्थीयोवनिप्। सर्ववेदार्धः। ऋणानिऋणानिस्त्राहृतिः। अन्येभ्यः प्र
देयानिचयज्ञमानाः। अपगमयंतः। वयगातोन्नौवादिकोनुदात्तेत्। एवंगुणविशिष्टायद्वानुवाअस्मद
धानाभवंत्वितिशेषः॥ब॥ अथपंचमीमृचमाह॥ब॥ ॥विद्यामादित्याअवसोवोअस्यपदर्यमन्न
यत्राचिन्मयोलुयुष्माकंमित्रावरुणाप्रणीतापरिश्वित्रेवडुरितानिवृज्यां॥ब॥ ॥हेआदित्याः अदि
तेःकर्माणिषष्ठी॥इदंरक्षणंविद्यामलभेयभयेराक्षसादिभ्यः आगतेसतियरक्षभदीयंरक्षणं। चिछष्ट
श्वार्येभयोलुमयसःसुरवभावयितुचातदिदंलभेयेत्यन्वयः। हेअर्यमन्हेमित्रावरुणौयुष्माकंप्रण २५
तोअस्मद्विषयेप्रकृष्टेनयनेसतिश्वभ्रेवश्वभ्रणीवस्थानभयोग्यानिगर्त्तवंतिस्थलानीवडुरितानिपापा

निपरिवृज्यांपरित्यजेयं। वृजीवर्जनेबहुलंछंदसीतिविकरणस्यलुक्॥ब॥ इतिद्वितीयस्यसप्तमेषष्ठोव
र्गः॥ब॥ अथषष्ठीमृचमाह॥ब॥ ॥सुगोहिवोअर्यमन्मित्रपंथाअनृक्षरोवरुणसाधुरस्ति। तेनादित्या
अधिवोचतानोयच्छतानोदुष्परिहंतुशर्म॥ब॥ ॥हेअर्यमन्मित्रावरुणयोवोयुष्माकंसुगः सुरवेनगंतव्यः
अनृक्षरःकंटकरहितेरिति। तदुक्तिः साधुःसाधकःशोभनोवाएवंगुणविशिष्टः पंथामार्गोस्तिविद्यतेरव
लुअतस्तेनयथाअस्मान्शोभनंतयतेतिशेषः। हेआदित्याः नोस्माकंअधिवोचतअधिवचनंपक्षपातेन
वचनंकुरुत। अपिनोस्मभ्यंदुष्परिहंतुपरिहंतुंविनाशयितुमशक्यंशर्मसुखंयच्छतदत्तदाणदानेत्य
पिपाघ्रेत्यादिनायच्छादेशः॥ब॥ अथसप्तमीमृचमाह॥ब॥ ॥पिपर्तुनोअदितीराजपुत्रातिद्वेषांस्य
र्यमासुगेभिः। बृहन्मित्रस्यवरुणस्यशर्मोपस्यामपुरुवीराअरिष्टाः॥ब॥ ॥राजपुत्राः राजानोराजमाना

द्वि० ७ मित्रादयःपुत्रायस्याःतादृशीअदितिरदीनाअखंडनीयावादेवीनोस्मान्द्वेषांसिद्वेष्टीणिरक्षांसिमित्र
निपिपर्तुअतिपारयतुअतिक्रम्यतद्रहितंदेशंप्रापयतित्यर्थः।अर्यमाचसुगेभिःसुष्टुगंतव्यैर्मार्गै
रस्मान्पारयतु।अपिचवयंपुरुवाराःबहुभिर्वरैःपुत्रादिभिरुपेताःअरिष्टाःकेनाप्यहिंसिताश्चसं
तःमित्रस्यवरुणस्यचमहत्परिवृढंशर्मसुखंउपस्यामउपगताभवेम।सर्वोक्तिपरशौनित्रीन्भूमीरिति।
पुरोडाशस्ययाज्यासूक्तंशर्वामिवोदाहृतं॥७॥सैषासूक्तेष्टमीमृचमाह॥७॥ ॥तिस्रोभूमीर्धारयन्त्रीरु
तद्यून्त्रीणिव्रताविदथेअंतरेषां।ऋतेनादित्यामहिवोमहित्वंतदर्यमन्वरुणमित्रचारु॥८॥ ॥तिस्रो
भूमीःअत्रभूमिशब्दोलोकत्रयेवर्तते।योद्वितीयस्यांतृतीयस्यांपृथिव्यामित्यत्रयथापृथिवीशब्दः।भूम्यंत १६
रिक्षंस्वर्गंत्रीन्लोकान्आदित्याःधारयंतिउतअपिचद्यून्दीप्तान्ततउपरितनान्महरादिकानपित्रीन्

लोकान्धारयंति।यद्वादीप्तान्अग्निंवायुंसूर्यंचधारयंति।अपिचैषामादित्यानांविदथेयज्ञेअंतर्मध्ये
त्रीणिव्रतासवनत्रयनिष्पाद्यानित्रीणिकर्माणिसंति।यद्वाएषांलोकानामंतर्मध्येविदथेयज्ञेनिमित्त
भूतेसतिएषामादित्यानांत्रीणिकर्माणिरसादानधारणविसर्जनलक्षणानिसंति।उत्तरोर्द्धर्चःप्रत्यक्षकृ
तःहेआदित्याःऋतेनसत्येनयज्ञेनवाहेमहांतःवोयुष्माकंमहित्वंमहत्त्वंयन्महाभाग्यंहेअर्यमन्व
रुणमित्रतन्महाभाग्यंचारुशोभनंसर्वोत्कृष्टमित्यर्थः॥८॥अथनवमीमृचमाह॥८॥ ॥त्रीरोचनादिव्या
धारयंतहिरण्ययाःशुचयोधारपूताःअस्वप्नजोअनिमिषाअदब्धाउरुशंसाऋजवेमर्त्याय॥९॥ ॥त्रीरो
चनात्रीणिरोचनानिरोचमानान्यादीनितेजांसिदिव्यादीनिदिविभवानिधारयंतआदित्याअवस्थापयन्किम
र्थंऋजवेऋजीकायस्तोत्राणांमर्त्यायमनुष्यायभोगमिश्र्यर्थमितियावत्कीदृशाआदित्याःहिरण्ययाःहिर

६०

रमयाः हिरण्यालंकृतसर्वांगाः यद्वा हितरमणीयवेषाः शुचयो दीप्यमानाः धारपूता उदकधाराप्रक्षालिता इव
निर्मलाः अस्वप्नजः अप्रसंजातस्वप्नाः सुपां सुलुगिति जसः सुः ॥ अपर आह ॥ अस्वप्नजः अस्वपंतः विगतनिद्राः
स्वपितृषोर्नजिङिति नजिङ्प्रत्ययः इति तदृतन्त्यदकारस्यानभिमतं ॥ अनिमिषाः निमेषरहिताः अदब्धाः
असुरादिभिरहिंसिताः उरुशंसाः उरुभिर्बहुभिः शंसनीयाः स्तोतव्याः एवंगुणविशिष्टा अधारयंतेत्यन्व
यः ॥छ॥ अथ दशमीमृचमाह ॥छ॥ ॥ त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्ताः ॥ शतं नो रास्व श
रदो विचक्षेऽश्यामायूंषि सुधितानि पूर्वा ॥छ॥ ॥ हे असुर शत्रूणां क्षेपक वरुण त्वं विश्वेषां सर्वेषां राजासि
केषां ॥ ये च देवा देवजनाः ये च मर्ता मरणधर्माणो मनुष्याः तेषामित्यर्थः ॥ अतस्त्वं नोऽस्मभ्यं शतं शरदः श १७
तसंख्याकान् संवत्सरान् विचक्षे विशेषेण दर्शनाय रास्व प्रयच्छ ॥ रा दाने व्यत्ययेनात्मनेपदं ॥ वयं च पूर्वा

पूर्वैर्दिवैः सुधितानि सुष्ठु हितानि शतं संवत्सरलक्षणान्यायूंषि अश्याम व्याप्नुयाम ॥ सुधितवसुधितने
मधितधिष्वधिषीय चेति निपात्यते ॥ गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥ पूर्वा सुपां सुलुगिति तृतीयाया डा
देशः ॥छ॥ ॥ इति द्वितीयस्य सप्तमे सप्तमो वर्गः ॥छ॥ ॥ आदित्यदेवताके पशौ न दक्षिणेत्येषाऽनुविषाया
ज्या ॥ तिस्रो भूमीर्धारयन् त्रीरुत द्यून् न दक्षिणा विचिकिते न सव्येति ॥छ॥ मैषा एकादशीमृचमाह ॥छ॥ ॥ न
दक्षिणा विचिकिते न सव्या न प्राचीनमादित्या नोत पश्चा ॥ पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्यो
तिरश्यां ॥ हे आदित्याः दक्षिणा दक्षिणो भागः न विकिचिते मया न विज्ञायते सव्या सव्यो वामभागोपि न ज्ञा
यते ॥ अत्र सुपां सुलुगिति सो राजा देशः ॥ तथा प्राचीनं पुरस्तादपि न ज्ञायते विभाषांचेरदिक्स्त्रियामिति
स्वार्थे खः ॥ उत अपि च पश्चा पश्चात् पृष्ठभागोपि न ज्ञायते नैशेन तमसा आवृतत्वात् आंतरादज्ञानाद्वा पश्चा

द्वि० ७ नुत्तुछंदसीतिनिपात्यते।किंबहुनापाक्याचित्पाक्यःपक्तव्यःपरिपक्वज्ञानोऽपि।डुपचष्पाके।ऋह
लोर्ण्यत्तिस्वरितः।धीर्याचित्धीरेणनेतव्यत्वेनत्तवोधार्यः।कातरःनवेछंदसीतियत्कातरोऽपि।उप
पत्रसुपांसुलुगित्याकारः।हेवसवोवासयितारआदित्यायुष्मानीतःयुष्माभिर्नीतःशोभनतेनमा
र्गेणप्रापितःसन्अभयंभयरहितंज्योतिःसौरंतेजःआंतरंवाज्ञानात्मकंअश्यांप्राप्नुयां॥छ॥अ
थैकादशीमृचमाह॥छ॥ ॥योराजभ्यऋतनिभ्योददाशयंवर्द्धयंतिपुष्टयश्चनित्याःसरेवान्याति
प्रथमोरथेनवसुदावाविदथेषुप्रशस्तः॥छ॥ ॥योयजमानःराजभ्योराजमानेभ्यःऋतनिभ्यः
ऋतस्यसत्यस्यवानेतृभ्यःआदित्येभ्योददाशचरुपुरोडाशादिकंददाति।यंयजमानंपुष्टयःपो १८
षकाःनित्याःशास्वताःआदित्याश्चवर्द्धयंति।सयजमानोरेवान्नवान्प्रथमःप्रथितःप्रख्यातःव

सुदावावसूनांपुष्टयःपोषकाःनित्याःशास्वताःआदित्याश्चवर्द्धयंति।सयजमानोरेवान्धनवान्प्रथमः
प्रथितःप्रख्यातःवसुदावावसूनांधनानांदातासन्प्रशस्तःसर्वैःप्रशस्यमानःविदथेषुवयेषुजन्ये
षुरणेषुरथेनवाहनेनयातिगच्छति॥छ॥अथत्रयोदशीमृचमाह॥छ॥ ॥शुचिरपःसुयवसाअद
ब्धउपक्षेतिवृद्धवयाःसुवीरः।नकिष्टंघ्नंत्यंतितोनदूराद्यआदित्यानांभवतिप्रणीतौ॥छ॥ ॥सयज
मानःशुचिर्दीप्यमानःशुद्धोवाअदब्धःसपत्नैरनबाधितःवृद्धवयाःप्रभूतान्नःसुवीरःशोभनपुत्रश्चस
न्सुयवसाःशोभनसस्यान्यपःवृष्टिलक्षणान्युदकान्युपक्षेतिउपनिवसतिसर्वदासुसस्यानामपां
समीपेनिवसतीत्यर्थः।तथानकिर्नचयंघ्नंतिहिंसंतिअंतितोनअंतिकात्समीपदेशाद्दूराद्विप्रकृष्टा
द्देशादागताबाधकाः।अंतिकस्यतसिकादिलोपइतिलोपः।योयजमानःआदित्यानांअदितेःपुत्रा

६० ७

णांमित्रादीनांप्रणीतौप्रकृष्टेनयतेप्रापणेभवतिवर्त्तातमइतिसर्वत्रसंबंधः॥छ॥अथचतुर्दशीमृचमाह॥छ॥
॥ ॥अदितेमित्रवरुणोतमृळयद्वोवयंचकृमाकच्चिदागः।उर्वश्यामभयंज्योतिरिंद्रमानोदीर्घाअभि
नशंतमिस्राः॥छ॥ ॥उतअपिचहेअदितेमित्रवरुणआमंत्रितंसर्वस्यामंत्रितस्याविद्यमानवत्त्
वात्सर्वेषांषाष्ठिकमामंत्रितस्येत्याद्युदात्तत्वं।स्वयंप्रत्येकंमृळअस्माकंसुखदयाकुरुतेत्यर्थः।यद्व
यद्यपिवयंवोयुष्माकंकच्चित्किंचिदागोपराधंचकृमअकर्मतथापिमृळेत्यर्थः।हेइंद्रपरमैश्वर्ययोगिता
दिकुरुविस्तीर्णंअभयंभयरहितंज्योतिस्त्वदीयंप्रकाशंज्ञानात्मकंवाअश्यांअहंप्राप्नुयांदीर्घाविस्तृतास्त
मिस्राःतमसायुक्तानिशाः।ज्योत्स्नातमिस्रेत्यादिनिपात्यते।तानोस्मान्माभिनशन्माभिमुख्येनप्रा
प्नुवंतु॥छ॥अथपंचदशीमृचमाह॥छ॥ ॥उभेअस्मैपीपयतःसमीचीदिवोवृष्टिंसुभगोनामपुष्यन्॥उ

DR BHAU DAJI

नाक्षयावाजयन्यातिपृत्सुनावर्द्धौभवतःसाधुअस्मै॥छ॥ ॥येआदित्यानांभवतिप्रणीतावितिव्यवहितो
पत्तेदंशब्देनपरामृश्यते।अस्मैयजमानायसमीचीसंगच्छमानेउभेद्यावापृथिव्यौपीपयतःप्याययतःका
मान्वर्द्धयतः।प्यायीवृद्धौअस्माएयंता।छांदसोलुक्।व्यत्ययेनतमसमामादेशाभावः।धातोःपीभावश्चासच
सुभगःशोभनधनःदिवोद्युलोकादागतांवृष्टिंपुष्यन्वर्द्धयन्भवति।नामेतिप्रसिद्धिर्द्योत्यते।किंचपृत्सु
पृतनासुसंग्रामेषुआजयन्शत्रून्नाभिमुख्येनाभिभवन्।उभाक्षयाउभौनिवासौ।क्षियंतिनिवसंत्यस्मि
न्नितिक्षयोनिवासस्थानं।पुंसिसंज्ञायांघःप्रायेणेत्यधिकरणेघः।क्षयोनिवासइत्याद्युदात्तत्वं।तोपरेरना
क्रांतंस्वकीयंनिवासस्थानंवयातिगच्छति।तथास्मैयजमानायउभावर्द्धौजगतोभागौचराचरात्मकौमर्त्या
मर्त्यात्मकौवासाधूसाधकौभवतः॥छ॥अथषोडशीमृचमाह॥छ॥ ॥यावोमायाअभिद्रुहेयजत्राःपाशा

द्वि० ७ आदित्यारिपवेविचृत्ताः।अश्वीवतांअतियेषंरथेनारिष्टाउरावाशर्मन्स्याम॥छ॥ ॥हेयजत्राःयष्टव्याःआ
दित्याःवोयुष्माकंयामायाःअभिद्रुहेअभितोद्रोहंकुर्वतेराक्षसादयेनिर्मिताःयाश्चपाशाःरिपवेशत्रवेविचृ
त्ताःवृतीहिंसार्थंथनयोःप्रसारिताइत्यर्थः।तान्पाशान्मायाश्चरथेनअतियेषंअतीत्यप्रयतेयंअतितार
यमित्यर्थः॥तत्रदृष्टांतः॥अश्वीवयथाशोभनेनाश्वःकश्चिद्दुस्तरान्मार्गात्शीघ्रमतिक्रामतितद्वत्।येषप्रय
त्नेभौवादिकोनुदात्तेत्।छांदसोलङ्व्यत्ययेनपरस्मैपदं।तथावयंअरिष्टाःशत्रुभिरहिंसिताःसंतःउरो
विस्तीर्णेशर्मन्शर्मेतिगृहनामतत्रयादन्तेसुखेवागृहेवाआसमंतात्स्याम वर्तमाना भवेम॥छ॥ अथसप्त
दशीमृचमाह॥छ॥ ॥माहंमघोनोवरुणप्रियस्यभूरिदाव्नआविदंशूनमापेः।मारायोराजन्त्सुयमादवस्थां २०
बृहद्वदेमविदथेसुवीराः॥छ॥ ॥हेवरुणमघोनोधनवतःप्रियस्यानुकूलस्यभूरिदाव्नोभूरिदानस्यदा

दातुराढ्यस्याहंमाअविदंआवेमादयामि।आवेदनंविज्ञापनंमाकरवाणि।किंतदनावेद्यं।आपेर्ज्ञातेःशून्यं
शून्यंदारिद्र्यंवर्णलोपश्छांदसः।यद्वाशूनंगतंप्राप्तंदारिद्र्यं।टुओश्विगतिवृद्ध्योः।श्वादितो।निष्ठायामितीट्प्रति
षेधः।यजादित्वात्संप्रसारणं।ओदितश्चेतिनकारः।हृषादित्वादाद्युदात्तत्वं।एतदुक्तंभवति।अस्मदीयाःस्तु
त्यादयःक्षुधिताइतिप्रभुप्रभुसमीपेनिवेदयेयाचमानोमाभूवमिति।हेराजन्सुयमान्सुष्ठुनियम्यते
अनेनपुरुषोगृहइतिसुयमः।इषद्दुःसुषिरिवखल्।तादृशानार्हशाद्रायोधनान्मावस्थांअवयुत्यस्थितो
माभूवंवयंसुवीराःशोभनपुत्राविदथेयज्ञेगृहेवर्त्तमानाःसंतोबृहत्प्रौढस्तोत्रंवदेमउच्चारयाम॥छ॥
॥इतिद्वितीयस्यसप्तमेष्टमोवर्गः॥छ॥ ॥इदमित्येकादशर्चंषष्ठंसूक्तं।अत्रानुक्रम्यते।इदमेकादशवारुण
मिति।पूर्वसूक्तेकूर्मोगार्त्समदोद्विवेत्युक्तत्वादस्योत्तरस्यकूर्मोगृत्समदोवाऋषिः।त्रिष्टुप्छंदः।वरुणोदेव

ऋ० ७

ना॥विनियोगोलैंगिकः॥अत्रकेचिदाहुः॥इदमेकादशर्चंतुवारुणंभयपापनुत्॥ऋणाद्दारिद्र्याद्दुःस्वप्ननाश
नंचेतिशुभ्रमिति॥छ॥तत्रैषाप्रथमामृचमाह॥छ॥ ॥इदंकवेरादित्यस्यस्वराजोविश्वानिसांत्यभ्यस्तुम
ह्ना॥अतियोमंद्रोयजथायदेवःसुकीर्तिंभिक्षेवरुणस्यभूरेः॥छ॥ ॥कवेःक्रांतदर्शिनआदित्यस्यअदि
तेःपुत्रस्यस्वराजःस्वयमेवराजमानस्यचावारुणस्येदंहविःस्तोत्रंवायजमानःकरोतीतिशेषः॥सचविश्वा
निसर्वाणिसंतिद्वितीयभावविकारभांजिभूतजातानिमह्नामहिम्नावरुणप्रसादाद्भृष्टेनअभ्यस्तुअभि
भवतुयोदेवोद्योतमानोवरुणःयजथाययज्ञायपुरुषायअतिअतिशयेनमंद्रःस्तुत्योहर्षयितावाभवति
तस्यभूरेःभर्तुर्वरुणस्यसुकीर्तिंशोभनांस्तुतिंभिक्षेप्रार्थयामियद्वावरुणस्येतितृतीयार्थेषष्ठी॥तेनवरुणे २१
नदातव्यांशोभनांकीर्तिमहंयाचे॥याचतेर्जनिकेर्चेतिवा॥छ॥अथद्वितीयामृचमाह॥छ॥ ॥तवव्रतेसु

भगासस्यामःस्वाध्योवरुणतुष्टुवांसः॥उपायनउषसांगोमतीनामग्नयोनजरमाणाअनुद्यून्॥छ॥ ॥हेवरु
णस्वाध्यःशोभनाध्यानाःतुष्टुवांसःस्तुतवंतोवयंतवव्रतेत्वदीयेपरिचरणाख्येकर्मणिवर्तमानाःसुभगासस्यामशो
भनधनाभवेमअपिचगोमतीनांरश्मिभिर्युक्तानामुषसांउपायनेउपागमनेसतिअग्नयोऽग्निहोत्रादिकमार्थंस
मिध्यंते॥एवमनुद्यून्अनुदिनंजरमाणास्त्वांस्तुवंतोवयंदीप्यमानाभवेम॥छ॥अथतृतीयामृचमाह॥छ॥ ॥
तवस्यामपुरुवीरस्यशर्मन्नुरुशंसस्यवरुणप्रणेतः॥यूयंनःपुत्राअदितेरदब्धाअभिक्षमध्वंयुज्यायदेवाः॥छ
॥ ॥हेप्रणेतःसर्वस्यजगतःप्रकर्षेणनेतःवरुणपुरुवीरस्यपुरुभिर्बहुभिर्वीरैरुपेतस्य॥यद्वापुरूणांबहूनां
शत्रूणांविशेषेणप्रेरकस्यउरुशंसस्यउरुभिर्बहुभिःशस्यमानस्यतवशर्मन्शर्मणिसुखेगृहेवास्यामअ
दितेःपुत्राःमित्रादयःपरमपिछंदसीतिपरस्यषष्ठ्यंतस्यशर्वमनांगकत्वावेनानुप्रवेशात्पदद्वयसमुदायस्या

द्वि० ७ ष्टमिकंसर्वानुदात्तत्वं।अदब्धाःशत्रुभिरहिंसिताःएवंभूताहेदेवायूयंनोस्मान्कृतापराधानान्मुमुज्यायसखा
यत्रनिहितमध्येअस्माभिःकृतपराधंमृदध्वं॥ब॥अथचतुर्थीमृचमाह॥ब॥ ॥प्रसीमादित्योअसृजद्विधर्ता
ऋतंसिंधवोवरुणस्ययंति।नश्राम्यंतिनविमुचंत्येतेवयोनपप्तूरघुयापरिज्मन्॥ब॥ ॥विधर्तासिंतुरवि
जलस्यनिधारयिता।आदित्योअदितेःपुत्रोवरुणःऋतंविधारणाद्धेतुःऋतंसत्यं।यद्वानदीनामुपादानभूत
मुदकंसीमर्वतःसर्वतःप्रकर्षेणसृष्टवान्।अणोप्रगृह्यस्यानुनासिकइत्याकारःसानुनासिकः
तेनवरुणस्यऋतंनिमित्तंसिंधवःस्पंदनशीलानद्योयंतिगच्छंतिप्रवहंति।एतेसिंधवःनश्राम्यंतिश्रांतिनप्राप्नुवं
तिनविमुंचंतिउपरतानभवंतिअलसाःसर्वोदकरूपेणप्रवहंतीत्यर्थः।एतदेवोच्यते।वायोनवयःपक्षि २२
णइवरघुयाशीघ्रगामिनःपरिज्मन्परिज्मनिभूम्यांपप्तुःपतंतिगच्छंति।पत्लृगतौ।लिटिकसितनिपत्योः

छंदसीरूपधालोपःस्थानिवद्भावाद्विर्वचनादिःरघुयाइत्यत्रसुपांसुलुगितिजसोयाजादेशः॥ब॥अथपंच
मीमृचमाह॥ब॥ ॥विमच्छ्रथायरशनामिवागऋध्यामतेवरुणखामृतस्य।मातंतुश्छेदिवयतोधियंमे
मामात्राशार्यपसःपुरऋतोः॥ब॥ ॥हेवरुणमत्तःमत्सकाशात्रशनामिवरज्जुमिवआगःकृतानुष्ठा
नजनितपापंविश्रथयशिथिलीकुरु।विमोचयेत्यर्थः।तेत्वत्संबंधिनःऋतस्योदकस्यखांखानिंनदीं।खाइतिन
दीनामानीत्युक्तत्वात्।ऋध्यामवर्धयेम।किंचअपिचधियंकर्मवयतःसंतन्वतोमेममतंतुःकर्मसंततिर्माछेदिछिन्नोमाभूत्
नैरंतर्येणास्त्वित्यर्थः।तथाऋतोःसमाप्तिकालात्पुरापूर्वंअपसःकर्मणःमात्राशरीरंप्राच्योदीच्यांगत्वे
णमाशारिशीर्णाविकलंमाभूत्।शॄहिंसायांकर्मणिलुङ्।पुरऋतोरित्यत्रऋत्यकइतिप्रकृतिभावः॥ब॥
इतिद्वितीयस्यसप्तमेनवमोवर्गः॥ब॥अथषष्ठीमृचमाह॥ब॥ ॥अपोसुम्यक्षवरुणभियसंमत्सम्रा

द्वि० ७

र्तावोनुमाग्रभाय।दामेववत्साद्विमुमुग्ध्यंहोनहित्वदारेनिमिषश्चनेशे॥६॥ ॥हेवरुणनियमेन
यंमत्मत्तःसुसुभ्यंआपामपहृअपगमय।हेसम्राट्सम्यग्राजमान।हेऋतावःसत्यवन्यज्ञवन्त्वंव
रुणमामांअनुग्रभायअनुगृहाण।छंदसिशायजपीतिहेःशायजादेशः।ऋयरुोर्नइतिनत्वं।अपिच
दामेवचवत्सात्यथादोग्धावरुणमामांअनुग्रभायअनुगृहाण।छंदसिशायजपीतिहेःशायजा
देशः।ऋयरुोर्नइतिनत्वं।अपिचदामेववत्सात्यथादोग्धावत्सस्सकाशाद्बंधनींरज्जुंविमुंचति।त
थाअंहःपापंमत्सकाशाद्विमुमुग्धिविमुंच।छांदसःशपःश्लुः।पृथक्कुरु।त्वदारेत्वत्तोदूरेदेशेवर्तमा
नस्त्वदन्यइत्यर्थः।त्वत्तोन्यःकश्चित्निमिषश्चननिमेषस्यापिअक्षिपक्ष्मचलनस्यापिनहिईशेनेष्टे २२
त्वमेवईश्वरइत्यर्थः।लोपस्तआत्मनेपदेष्वितितलोपः॥६॥अथसप्तमीमृचमाह॥७॥ ॥मानोव

धैर्वरुणयेतइष्टावेनःकृण्वंतमसुरभ्रीणंति।माज्योतिषःप्रवसथानिगन्मविषूमृधःशिश्रथोजीवसेनः॥७॥
॥ ॥हेवरुणनोस्मान्वधैःहननसाधनैरायुधैर्माहिंसीरितिशेषः।हेअसुरपापहंतःनिरसितनेत्वदीये
इष्टौयज्ञेएनःविहितानुष्ठानेनअपितंपापंकृण्वंतंपुरुषंयेवधाभ्रीणंतिहिंसंतितेइतिश्रुतेस्संबंधः।
बंधः।भ्रीषहिंसायांक्र्यादिकः।अपिचज्योतिषःप्रकाशमानादस्मात्सौरप्रकाशात्प्रवसथानिप्रवासान्मा
गन्ममागच्छामसर्वदास्यदेवजनमानःसूर्यंपश्यंश्चिरकालंजीवेयमित्यर्थः।गमेर्लुङिमंत्रेघसेतिच्लेर्लुक्।तथा
नोस्माकंजीवसेजीवनायमृधोहिंसकान्सुसुष्ठुविशिश्रथविश्लेषयनाशयस्वेत्यर्थः॥७॥अथाष्टमीमृच
माह॥८॥ ॥नमःपुरातेवरुणोतनूनमुतापरंतुविजातब्रवाम।त्वेहिकंपर्वतेनश्रितान्यप्रच्युतानिदूळ
भव्रतानि॥८॥ ॥हेवरुणपूर्वस्मिन्कालेतेतुभ्यंनमःनमस्कारप्रतिपादकंनमइतिशब्दमवादिभ।

२८.७ उतअपिचनूनमद्यापिब्रवाम।उतअपिचहेतुविजातबहुप्रदेशेषुप्रादुर्भूतवरुणअपरंकालआगामिन्य
पिकालेनमःशश्वद्ब्रवामउच्चारयाम।कस्मादितिचेदुच्यतेहेदूलभदुर्दभदुर्हिंसितुमशक्य।दुरोदाश
नाशदभध्येष्वितिरेफस्योत्वमुत्तरपदादेष्टुत्वंच।कमित्येतत्पदपूरणं।हियस्मात्त्वेत्वयिपर्वतेनशि
लोच्चयइवअप्रच्युतानिअन्यैःप्रच्यावयितुमशक्यानिव्रतानिकर्माणिविधरणानिश्रितानिश्रितानि
आश्रितानितस्मादित्यर्थः॥छ॥अथनवमीमृचमाह॥छ॥ ॥परऋणासावीरधमत्कृतानिमाहंराजनन्य
कृतेनभोजं।अव्युष्टाइन्नुभूयसीरुषासआनोजीवान्वरुणतासुशाधि॥छ॥ ॥हेवरुणऋणाऋणानि
पित्रादिभिःकृतान्यस्माभिर्देयानिपरासावीःपरासुवपराचीनंप्रेरय।षूप्रेरणे।छांदसोलुङ्।अधअधुनाम २८
त्कृतानिमयानिष्पादितानिऋणानिपरासुव।अपिचहेराजन्स्वामिन्वरुणअहंअन्यकृतेनअन्यैरर्जिते

नधनेनमाभोजंभोगंमालभेयंकिंकारणमितिचेदुच्यतेभूयसीःभूयस्योबहुतराःउषसःअव्युष्टाइन्नु
सत्यंअव्युष्टाइन्नुसत्यंअव्युष्टाएवअपररात्रेष्वृद्धायऋणानिचिंतयतोजाग्रतोममव्युष्टकल्पाआस
न्हेवरुणतासूषस्सुनास्मान्जीवान्जीवनवतःआशाधिअसमंतादनुशिष्टान्कुरुऋणान्यपकृत्य
भोगपर्याप्तंधनंप्रयच्छेत्यर्थः॥छ॥अथदशमीमृचमाह॥छ॥ ॥योमेराजन्युज्योवासखावास्वप्नेभयं
भीरवेमह्यमाह।स्तेनोवायोदिप्सतिनोवृकोवात्वंतस्माद्वरुणपाह्यस्मान्॥छ॥ ॥हेराजन्वरुणमेम
ह्यंयोयुज्योयोजनसमर्थःपित्रादिर्वासखासमानख्यातोन्योबांधवोवास्वप्नेदृष्टंत्वद्विषयंभयंभीरवे
भयशीलायमह्यंआहब्रूतेतथास्तेनश्चोरोवावृकोरण्यश्वावायोनोस्मान्दिप्सतिजिघांसति।स्तेनोवे
नष्टीतिविकल्पाविकल्पनाद्विर्भावःदस्युश्चवनीत्वंहेवरुणत्वंतस्मात्सर्वस्मादस्मान्पाहिरक्ष॥छ॥अ

टी० ७ थैकादशीमृचमाह॥६॥ ॥माहंमघोनोवरुणप्रियस्यभूरिदाव्नआविदंशूनमापेः।मारायोराजन्त्सुय
मादवस्थांबृहद्वदेमविदथेसुवीराः॥६॥ ॥हेराजन्सुष्टुनियामकाद्दनात्माभूवंशोननप्रात्यंयज्ञे
गृहेवावर्त्तमानाहप्रोढंस्तोत्रमुच्चारयाम॥६॥ ॥इतिद्वितीयस्यसप्तमेदशमोवर्गः॥६॥ ॥धृतव्रताइ
तिसप्तर्चंसप्तमंसूक्तंगार्त्समदस्यकूर्मस्यगृत्समदस्यवार्षंत्रैष्टुभंवैश्वदेवं।तथाचानुक्रांतं।धृतव्रताः
सप्तवैश्वदेवमिति।गतोविनियोगः॥६॥तत्रप्रथमामृचमाह॥६॥ ॥धृतव्रताआदित्याइषिराआरेम
त्कर्त्तरहसूरिवागः।शृण्वतोवोवरुणमित्रदेवाभद्रस्यविद्वाँअवसेहुवेवः॥६॥ ॥हेधृतव्रताःधृतकर्मा
णःआदित्याःअदितेःपुत्राःइषिराःगमनशीलाःसर्वैरन्वेषणीयाःप्रार्थनीयावाहेविश्वदेवाःमदारेमत्तो २५
दूरदेशेआमःविहितानुष्ठानादिजनितंपापंकर्त्तृकृतकरोतेश्छांदसोविकरणस्यलुक्।तमनतनथना

श्चेतिनवादेशः।तत्रदृष्टांतः।रहसूरिवरहसिअज्ञैरज्ञातेप्रदेशेसूयतइतिरहसूः।व्यभिचारिणीसायथागर्भंपा
तयित्वादूरदेशेपरित्यजतितद्वत्।हेवरुणमित्रदेवाः।वायुष्मदीयस्यभद्रस्ययुष्माभिःकरणीयंश्रेयोविद्वान्
जानन्नहंशृण्वतःमद्कृतानिस्तोत्राणिश्रोत्रेणजानंतोवोयुष्मान्अवसेरक्षणार्थंहुवेआह्वयामि॥६॥अथद्वि
तीयामृचमाह॥६॥ ॥यूयंदेवाःप्रमतिर्यूयमोजोयूयंद्वेषांसिसनुतर्युयोत।अभिक्षत्तारोअभिचक्षमध्वम
द्याचनोमृळयतापरंच॥६॥ ॥हेदेवाःप्रमतिःप्रकृष्टामतिःप्रकृष्टमतिर्यस्यपित्रादेस्तादृशापियूयमेवअ
पिचयूयंद्वेषांसिद्वेष्टॄणिरक्षःपिशाचादीनिसनुतरित्यव्ययंअंतर्हितेनामैतत्।अंतर्हितेप्रदेशेयुयोतपृथक्कु
रुतायुमिश्रणे।मिश्रयोश्छांदसःप्रत्ययःश्लुः।पूर्ववत्तस्यतबादेशः।अभिक्षत्तारः।अभितःशत्रूणांहिंसितारोयूयंअ
भिभवतचशत्रून्अद्यास्मिन्दिनेनोस्मान्मृळयतसुखयत।अपरंचअपरमपिकालंआगामिन्यपिकालेअ

द्वि० ७ स्मान्मृळयत॥छ॥अथतृतीयामृचमाह॥छ॥ ॥किमूनुवःकृणवामापरेणकिंसनेनवसवआप्येन।यू
यंनोमित्रावरुणादितेचस्वस्तिमिंद्रामरुतोदधात॥छ॥ ॥हेदेवाःवोयुष्माकंनुअद्येदानींकिंनुकृणवाम
किंखलुकर्तुंशक्नवामतेकिमपीत्यर्थः।तथाअपरेणअपकृष्टेनभाविनाकर्मणाकिंकर्तुंशक्ताः।तथाहेवसवो
वासयितारोदेवाःसनेनसनातनेनआप्येनआप्तव्येनकर्मणायुष्माकंकिंकर्तुंशक्ताः।सर्वदापियुष्मदनुगुण
परिचरणंकर्तुंनशक्ताइत्यर्थः।हेमित्रावरुणौहेअदितेहेइंद्रामरुतदेवताद्वंद्वेचेतिपूर्वपदस्यानङ्।तेच
सर्वेयूयंस्वस्तिअविनाशंनोस्मभ्यंदधातधत्तप्रयच्छत।लोटितस्यतबादेशोङित्वाभावेनातोलोपाभावः॥
॥छ॥अथचतुर्थीमृचमाह॥छ॥ ॥ह्येदेवायूयमिदापयस्थतेमृळततनाधमानायमह्यं।मावोरथोमध्य २६
मवाळृतेभून्मायुष्मावत्स्वापिषुश्रमिष्म॥छ॥ ॥ह्येदेवाःछांदसोवर्णोपजनः।हेदेवाःयूयमित्यूय

मेवआपयतःधनस्यप्रापयितारोबंधवःवास्थभवथ।तेयूयंनाधमानायअभिमतंफलंयाचमानायमह्यंस्तो
त्रेमृळततथाचोयुष्माकंरथयज्ञेतेस्मदीयेयज्ञेनिमित्तेऋतेमध्यमवाट्माभूत्मध्यमेनमंदंनगमनेनवाह
कोमाभूत्वशीघ्रंयुष्मान्वहत्वित्यर्थः।वयंयुष्मावत्सुयुष्मत्सदृशेष्वापिषुबंधुषुमत्सुमश्रमिष्मश्रांतामाभूम॥
वत्वप्रकरणेयुष्मदस्मदोश्छंदसिसादृश्यउपसंख्यानमितिवतुप्।आसर्वनाम्नइत्यात्वं॥छ॥अथपंचमीमृ
चमाह॥छ॥ ॥प्रवएकोमिमयभूर्यागोयन्मापितेवकितवंशशास।आरेपाशाआरेअघानिदेवामामा
धिपुत्रेविमिवग्रभीष्ट॥छ॥ ॥हेदेवाःवोयुष्माकंमध्येअहमेकःसन्भूरिबहुलंआगःपापंप्रमिमयअ
हंप्रकर्षेणाहिंसिषंकथमस्माकंमध्येत्वमेवइति।चेदुच्यते।यद्यस्मात्मोपितेवकितवंयथाअपथप्रवृत्तंपुत्रं
पितानुशास्तितथाशशासअनुशिष्टंचत्वद्भिः।शासुअनुशिष्टावित्यनुशिष्टाल्लिटिमध्यमस्यरूपं।अपिच

द्वि० ७ हेदेवायुष्मद्दायाःपद्मोः।आरेअस्मत्तोदूरंदेशेमत्तअघानिपापानिचआरेमंत्रमामाअधिभूत्तेअधिःसप्तम्यर्था
नुवादीभूत्तेपश्यतिसतिनिपतिरंसंतंविमिवपक्षिणमिवव्याधःमायमीष्टमाग्रस्तीध्वं।माश्वःश्वःऋग्यहोर्धनइतिन
त्वा।।६।।अथषष्ठीमृचमाह।।६।। ।।अर्वांचोअद्याभवतायजत्राआवोहार्दिभयमानोव्ययेयं।त्राध्वंनोदेवा
निजुरोवृकस्यत्राध्वंकर्त्तादवपदोयजत्राः।।६।। ।।हेयजत्राःयष्टव्यादेवाःअद्येदानीमर्वाचोस्मदभिमु
खाभवतायायुष्माकंहार्दिहृदयेवस्थितंरक्षणंभयमानोबिभ्यदहंआव्ययेयंआभिमुख्येनप्राप्नुयां।व्यय
गतौभौवादिकः।हेदेवाःवृकस्यतस्करस्यअरण्यश्वनोवासंबंधिनःनिजुरोनिहननात्।शरिहिंसार्थः।अ
स्मात्संपदादिलक्षणोभावेक्विपृछांदसोह्रस्वः।नोस्मान्त्राध्वंत्रायध्वं।।६।।अथसप्तमीमृचमाह।।६।। २७
।।माहमघोनइति।। ।।व्याख्यातेयं।।६।। ।।इतिद्वितीयस्यसप्तमेएकादशोवर्गः।।६।। ।।ऋतंदेवायेत्ये

कादशर्चमष्टमंसूक्तंगार्त्समदंअंत्याजगती।शिष्टास्त्रिष्टुभः।प्रतिकृत्तमित्येषाइंद्रासोमादेवताकासरस्वतीत्व
मस्मानित्यर्द्धर्चःसारस्वतः।योनःसनुत्यइत्येषाबार्हस्पत्या।अंत्यामारुती।शिष्टाऐंद्र्यः।तथाचानुक्रांतं।ऋतमेका
दशाजगत्यंतंषष्ठ्यैंद्रासोमीसरस्वतित्वमितिसारस्वतोर्द्धर्चोयोनोबृहस्पतिस्तवोंत्यामारुतीति।गतोविनि
योगः।।६।।तत्रैषाप्रथमामृचमाह।।६।। ।।ऋतंदेवायकृण्वतेसवित्रइंद्रायाहिघ्नेनरमंतआपः।अहरहर्या
त्यक्तुरपांकियात्याप्रथमःसर्गआसां।।६।। ।।ऋतमुदकंवृष्टिलक्षणंकृण्वतेकुर्वतेदेवायद्योतमानाय
सवित्रेसर्वस्यप्रेरकायअहिघ्नेअहिवृत्रंहतवतेइंद्रायययागार्थं।आपोनरमंततस्माद्धेतोर्नत्यानोपरता
भवंतीतस्माद्यत्ययेनचतुर्थी।अपितासामपांअक्तुःसेचकंस्रोतःअहरहःप्रत्यहंयातिगच्छति।आसांप्रथ
मःसर्गःप्राथमिकंजन्मकियात्या।कियतिकालेनिष्पन्नं।आकारःप्रश्नेकिंशब्दआत्तेपेयावतिकालेता।अजा

५६०७

यन्नसकालः कियान् किंपरिमाणं तस्य कालस्य न किमपि नित्या एव हिता इत्यर्थः॥छ॥ अथ द्वितीयामृचमाह॥छ॥
॥ ॥यो वृत्राय सिनमत्राभरिष्यत् प्र तं जनित्री विदुष उवाच। पथो रदंतीरनु जोषमस्मै दिवेदिवे धुनयो यंत्यर्थं॥
॥छ॥ ॥यः पुरुषो वृत्राय असुराय सितमन्नं अत्र पाकस्थाने आहर्तुमभरिष्यत संपादितवान् तं पुरुषं जनित्री
जनयित्री इंद्रस्य माता अदितिः विदुषे अभिज्ञायेंद्राय प्रोवाच प्रोक्तवती प्रवचनस्य हननार्थत्वात् वृत्रं हतवा
निति शेषः। अपि चास्मै अस्येंद्रस्यानुजोषमनुक्रामं इच्छामनुसृत्य पथो मार्गान् रदंतीः विलिखंती धुनयो नद्यः
दिवेदिवे प्रदिवसं अर्थं अर्तव्यं गंतव्यं समुद्रं प्रतियंति गच्छंति॥छ॥ अथ तृतीयामृचमाह॥छ॥ ॥ऊर्ध्वो ह्यस्था
दध्यंतरिक्षेधा वृत्राय प्र वधं जभार। मिहं वसान उप हीमदुद्रोत्तिग्मायुधो अजयच्छत्रुमिंद्रः॥छ॥ ॥ह्ईतात। २८
यस्मादयं वृत्रः अंतरिक्षे ऊर्ध्वः सन् सर्वमावृत्याध्यस्थात् अधिष्ठितोऽभूत् अध अतः कारणात् वृत्राय वृत्रं प्रति वधं

हननसाधनं वज्रं इंद्रः जभार प्रतिप्रचिक्षेप रूप्यरोर्नः स इत्ववृत्रो मिहं वृष्टेः सेक्तारं मेघं वसान आच्छादयन् ई
मेनमिंद्रं उपादुद्रोत् उपागमत् दु द्रु गतौ लङि छांदसः शपः श्लुः तिग्मायुधः तीक्ष्णायुधः इंद्रः शत्रुं शातयिता
रं तं वृत्रं अजयत् जितवान्॥छ॥ अथ चतुर्थीमृचमाह॥छ॥ ॥बृहस्पते तपुषाश्नेव विध्य वृकद्वरसो असुर
स्य वीरान्। यथा जघंथ धृषता पुरा चिदेवा जहि शत्रुमस्माकमिंद्र॥छ॥ ॥हे बृहस्पते बृहतां परिवृढानां पा
लयितरिंद्र तपुषा तापकेन दीप्तेन वज्रेण अश्मेव अशन्या इव वृकद्वरसः संहतद्वारस्यासुरस्य वीरान् शत्रा
वायकान् संहतद्वारान् असुरस्य वीरान् विध्य ताडय। वृणोतेः सृवृभूषिमुषिभ्यः किदिति कर्मणि कप्रत्ययः
द्रु गतौ अस्मादौणादिको असन् प्रत्ययः वृकाणि संवृतानि द्वाराणि येषां बहुव्रीहौ पूर्वपदप्रकृतिस्व
रत्वं। हे इंद्र पुरा चित् पुरापि धृषता धर्षकेण वज्रेण यथा जघंथ त्वं हतवान् एवमेवास्माकं शत्रुं जहि नाशय

ऋ० ७ नेतः इति द्वोजादेशः॥ ॥अथ पंचमीमृचमाह॥ ॥ ॥अवक्षिप दिवो अश्मानमुच्चा येन शत्रुं मंदसानो नि
जूर्वाः। तोकस्य साता तनयस्य भूरेरस्माँ अर्धं कृणुतादिंद्र गोनां॥ ॥ ॥हे इंद्र दिवो नभसः प्रकाशाद्वा अस्मा
नमश्मवत्कठिनं वज्रं उच्चा उच्चैर्वर्तमानं त्वं अवक्षिप अस्मदीयान्शत्रूनुद्दिश्याधस्तात्प्रक्षिप येन व
ज्रेण मंदसानः स्तोतृभिः स्तूयमानः सन् शत्रून्निजूर्वाः त्यहिंसीः। जुर्वी हिंसार्थः लेट्याडागमः। तथा तोकस्य पु
त्रस्य नप्तृव्यस्य तनयस्य पौत्रस्य साता सातौ संभजने निमित्तसप्तम्येषा। संभजनार्थः। तथा हे इंद्र गोनां गवां संभ
जनार्थं वास्मान् अस्माकं विभक्तिव्यत्ययः। अर्धं समृद्धिं कृणुतात् कुरु। गोः पादांत इति सुपः शस्यामो नुडा
गमः॥ ॥इति द्वितीयस्य सप्तमे एकादशो वर्गः॥ ॥ ॥अथ षष्ठीमृचमाह॥ ॥ ॥प्र हि क्रतुं वृहथो यं २९
वनुथो रध्रस्य स्थो यजमानस्य चोदौ। इंद्रासोमा युवमस्माँ अविष्टमस्मिन्भयस्थे कृणुतमु लोकं॥ ॥ ॥हे

इंद्रासोमौ यं वैरिणं वृहथः हिंसिथः वनुष्यतिर्हिंसाकर्मेति यास्कः। तं क्रतुं द्वेषस्य कर्तारं प्र हि वृहथः हि प्रकर्षेणै
व खलु उन्मूलयथा इत्यर्थः। वृहू उद्यमने तौदादिकः। तथा रध्रस्य राधकस्य यजमानस्य चोदौ शत्रूणां प्रे
रकौ स्थो भवथः। तथा हे इंद्रासोमौ युवं युवां अस्माँ अविष्टमवतं अस्मिन्भयस्थे भयस्थाने घञर्थे कविधा
नमित्यधिकरणे कप्रत्ययः। मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं। तस्मिन्काले लोकं भयरहितं स्थानं कृणुतं। उ
इति पूरणः॥ ॥अथ सप्तमीमृचमाह॥ ॥ ॥न मा तमन्न श्रमन्नोत तंद्रन्न वोचाम मा सुनोतेति सोमं। यो
मे पृणाद्यो दद्यो निबोधाद्यो मा सुन्वंतमुप गोभिरायत्॥ ॥ ॥स इंद्रो मां न तमत् न तमयतु न ग्लपय
तु तथा न श्रमत् श्रांतं मा करोतु। तमु ग्लानौ श्रमु तपसि खेदे च। अनयोर्णिजभावः तयोर्लेट्यडागमः। छंदस्युभ
यथेति शप आर्द्धधातुकत्वात् णेरनिटीति णिलोपः। उत अपि च मा नं तंद्रत् न तंद्रयतु। तंद्र आलस्येन युक्तं मा

द्वि० ७ करोतु।तंद्राशब्दात्तत्करोतीतिणिच्।णाविष्ठवत्प्रातिपदिकस्येतिटिलोपः।अन्यत्पूर्ववत्।इंद्रायागायसोमंमा
सुनोतमाभिषुणुतेति।अन्यान्यजमानान्प्रतिनवोचामनब्रवाम।वक्तेश्छांदसोलुङस्थनोवेत्यत्रतथन
मतथानाश्वेनितस्यतबादेशः।तस्यपित्वेनङित्वाभावाद्गुणः।यइंद्रोमेममपृणात्कामान्पूरयेत्।यश्चद
दत्।अभीष्टंफलंदद्यात्।यश्चनिबोधात्।अस्मदीयंस्तोत्रंयावोगंअवगच्छेत्।यइंद्रःसुन्वंतंसोममभिषुण्वंतं
मांअस्मभ्यंदातव्यैर्गोभिःसहउपयात्।उपागच्छेत्।सइंद्रइतिशर्वत्रावयःपृणादित्यादिषुलेट्याडागमः॥
॥छ॥अथाष्टमीमृचमाह॥छ॥ ॥सरस्वतित्वमस्माँअविड्ढिमरुत्वतीधृषतीजेषिशत्रून्।त्यंचिच्छर्धंतंत
विषीयमाणमिंद्रोहंतिवृषभंशंडिकानां॥छ॥ ॥हेसरस्वतिसरणपतिदेवित्वंअस्मान्स्तोतॄन्अवि
ड्ढिरक्ष।रक्षार्थस्यावतेर्लेट्येतद्रूपं।तथामरुत्वतीमरुत्वतीमरुद्भिर्युक्तामध्यमस्थानावाक्सरस्वतीम
रुतश्चमध्यमस्थानस्थाः।अतस्तद्वतीमतीवधर्षयंती।शत्रून्शातयितॄन्।वितरणोजेषिजय।जयतेश्छांदसःश
पस्तु।किंचायमिंद्रःत्यंचितमसुरइंतिहतवान्।व्यत्ययेनभूतार्थेलट्।कीदृशं।शर्धंतंप्रहसनशीलं।भृशप्र
हसनात्तविषीयमाणंतविषाबलमिवोच्चरंतंसर्वस्यभंजनेशक्तंशंडिकानां।शंडामर्कावसुरपुरोहितौ।
शंडवंश्यानांमध्येवृषभंप्रधानं॥छ॥अथनवमीमृचमाह॥छ॥ ॥योनःसनुत्यउतवाजिघत्नुरभिख्यायतं
तिगितेनविध्य।बृहस्पतआयुधैर्जेषिशत्रून्द्रुहेरिषंतंपरिधेहिराजन्।हेबृहस्पतेयोजनोऽस्माकंसनुत्यःसनु
तरित्यंतर्हितनाम।अंतर्हितदेशेनवश्चोरःसगर्भसदृशसनुताभवत्।उतवाअपिवायोनिःजिघत्नुर्जिघांसुर्भ
वतितमभिख्यायसंवीक्ष्यतिगितेनतीक्ष्णेनायुधेनविध्यताडय।तथास्मदीयान्आयुधैरायोधनसाधनैरि
षादिभिर्जेषिजय।तथाहेराजन्राजमानबृहस्पतेद्रुहेद्रोग्ध्रेशत्रवेरिषंतंहिंसंतंवज्रंपरिधेहिपरितोधा ३०

Dr. Bhau Daji Memorial
डाक्टर भाऊदाजी स्मारक

ऋ० ७ यमद्धिपेत्यर्थः॥छ॥ अथ दशमीमृचमाह॥छ॥ ॥अस्माकेभिः सत्वभिः शूर शूरैर्वीर्या कृधि यानि ते कर्त्वानि।
ज्योगभूवन्ननुधूपितासो हत्वी तेषामा भरा नो वसूनि॥छ॥ ॥हे शूर शौर्यवन्निंद्र अस्माकेभिरस्माकीनैः
सत्वभिः परेषां सादकैः शूरैः शौर्योपेतैर्भटैः तानि वीर्याणि वीरकर्माणि कृधि कुरु यानि ते त्वया कर्त्वा
नि करणीयानि। इत्यर्थः। तेतावोकनिति करोतेस्त्वप्रत्ययः। ज्योक चिरकालं अभूवन् अनुधूपितासः धूपायमानहृ
दया मदीयाः शत्रवो भूवन्नासन् इत्वी तान् हत्वा स्नात्व्यादयश्चेतीकारः। तेषां शत्रूणां वसूनि धनानि नोऽस्म
भ्यं आ भर आहार॥छ॥ अथैकादशीमृचमाह॥छ॥ ॥तं वः शर्द्धं मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं ज
नं। यथा रयिं सर्ववीरं नशामहा अपत्यसाचं श्रुत्यं दिवेदिवे॥छ॥ ॥हे मरुतः वो युष्माकं शर्द्धं बलं मारु ३१
तं मरुत्सम्बद्धरूपं दैव्यं देवेभ्यो द्रुणां सम्बद्धं जनं प्रादुर्भूतं एवं गुणविशिष्टं बलं नमसा नमस्कारेण हविषा

वा गिरा स्तोत्रेण उपब्रुवे स्तौमि। यथा येन प्रकारेण वयं सर्ववीरं सर्वैर्वीरैर्विशेषणं शत्रूणां प्रेरकैर्भटैरु
पेतं अपत्यसाचं अपत्यैरपतनहेतुभूतैः पुत्रादिभिरुपेतं श्रुत्यं श्रवणीयं प्रशस्यं भूरवं भूतं रयिं दिवेदिवे
प्रतिदिवसं नशामहै व्याप्नवाम नशतिर्व्याप्तिकर्मा लिङ्ग्यडागमः वितोन्यत्रेत्येकारः॥छ॥ ॥इति द्वितीय
स्य सप्तमे त्रयोदशो वर्गः॥छ॥ ॥अस्माकमिति सप्तर्चं नवमं सूक्तं गृत्समदस्यार्षं वैश्वदेवं अंत्या त्रिष्टुप्
शिष्टा जगत्यः। तथा चानुक्रांतं। अस्माकं सप्त वैश्वदेवं त्रिष्टुबंतमिति। विनियोगो लैंगिकः॥छ॥ तत्र प्रथमा
मृचमाह॥छ॥ ॥अस्माकं मित्रावरुणावतं रथमादित्यै रुद्रैर्वसुभिः सचाभुवा। प्र यद्वयो न पप्तन्वस्मनस्प
रि श्रवस्यवो हृषीवंतो वनर्षदः॥छ॥ ॥मित्रावरुणा हे मित्रावरुणौ आदित्यैः धात्रर्यमादिभिः द्वादशभिः
रुद्रैः एकादशसंख्याकैः वसुभिः ध्रुव इत्यादिभिः अष्टसंख्याकैः एवं त्रिभिर्देवगणैः सचाभुवा सहभवौ तौ स

दि० ७ इवर्त्तमानोयुवांअस्माकंरथंअन्नलाभायप्रवृत्तंअवतं।यद्यदास्मदीयारथाःवनस्पतिवसंत्यस्मिन्नितिव
नस्पतिवस्यतिनिवासस्थानंअणादिकोमनिम्।तस्मात्स्थानात्परित्तिपरिदेशांतरेपंचम्याःपरावध्यर्थेइति
सत्वं।अध्यर्थेउपर्यइतिवृत्तिः।वयोनपक्षिणइवप्रअपप्तन्प्रपतंतिप्रकर्षेणगच्छंति।पतेश्छांदसोलुङिलिदि
त्वात्त्रेरुआदेशः।पतःपुमितिपुमागमः।कीदृशावयंश्रवस्यवोन्नकामाःशुष्मीवंतःप्राप्तहर्षाःविनर्षदःव
नेवृक्षोदोनिषण्णाःसांदितिकश्छांदसोरेफोपजनः॥छ॥अथद्वितीयामृचमाह॥छ॥ ॥अधस्मानउदव
तासजोषसोरथंदेवासोअभिविक्षुवाजयुं।यदाशवःपद्याभिस्तित्रतोरजःपृथिव्याःसानोजंघनंतपाणि
भिः॥छ॥ ॥इसजोषसःसमनंप्रीयमाणाःदेवासोदेवाःअधअधुनानोस्माकंवाजयुंवाजमन्नंकाम ३२
यमानंगातिविशिषयुक्तंवारथंविक्षुप्रजासुजनपदेषुअभिअभिमुखंउदवतउदगमयते।अवतिरत्रग

त्यर्थः।यद्यदाभित्रयेयुक्ताःआशवोव्यापनशीलाअश्वापद्याभिःपादसाध्याभिर्गतिभिःरजोरजकंमार्गंति
त्रतःतरंगःतरतेःशानरिबहुलंछंदसीतिशपःश्लुः।बहुलंछंदसीत्यन्यासस्येत्वं।अन्यस्त्तानामादिरित्याद्यु
दात्तत्वं।पृथिव्याःप्रथितायाःभूमेःसानोसमुच्छ्रितेप्रदेशेपाणिभिःपाण्युपलक्षितैःपादैःजंघनंतअ
त्यर्थंगच्छंतिहंतेर्यङ्लुगंताच्छांदसोलङ्।व्यत्ययेनात्मनेपदं।बहुलंछंदसीतिशपोलुगभावः॥छ॥अथतृ
तीयामृचमाह॥छ॥ ॥उतस्यनइंद्रोविश्वचर्षणिर्दिवःशर्द्धेनमारुतेनसुक्रतुः।अनुनुस्थात्यवृकाभिरू
तिभिरथंमहेसनयेवाजसातये॥छ॥ ॥उतअपिचविश्वचर्षणिःविश्वस्यसर्वस्यद्रष्टा।यद्वाविश्वेचर्ष
णयमनुष्यायस्यपरिचारकाः।अथवाविश्वेसर्वेलोकाःचर्षणयोद्रष्टव्यायेनबहुव्रीहौविश्वंसंज्ञायामि
तिपूर्वपदांतोदात्तत्वं।मारुतेनमरुत्समूहरूपेणशर्द्धेनबलेनमहसुक्रतुःशोभनकर्माशोभनप्रज्ञो

दि० ७ वास्यस्पइइः अवृकाभिः हिंसकारहिताभिः ऊती रक्षाभिः सहितः सन् दिवो द्युलोकादागत्य नुञ्च
घनोस्माकं रथं अनुस्थासि आनुगुण्येनाधितिष्ठतु। छांदसः शपो लुक्। किमर्थं महे समं नाये महते ध
नाय तथा वाजसातये वाजस्यान्नस्य सातये संभजनार्थं ॥३॥ अथ चतुर्थीमृचमाह ॥३॥ ॥उत स्य
देवो भुवनस्य सक्षणिस्त्वष्टा ग्नाभिः सजोषा जूजुवद्रथं। इळा भगो बृहद्दिवोत रोदसी पूषा पुरंधिरश्विना
वधापती ॥३॥ ॥उत अपि च स्य सः देवो दानादिगुणयुक्तः भुवनस्य भूतजातस्य सक्षणिः सेवनीयः स
व्यः ग्नाभिर्देवपत्नीभिः छंदांसि वै ग्ना इति तैत्तिरीयकं। गायत्र्यादीनि छंदांसि च देवपत्न्य इत्युक्तं। सजोषाः
समानप्रीतिः एवंगुणविशिष्टस्त्वष्टा अस्मदीयं रथं जूजुवत् प्रेरयतु। जु इति सौत्रो धातुर्गत्यर्थः। अस्माण्यं ३२
तात् लुङि रूपं। तथा इळा तिसृणां देवीनां मध्ये इडाख्या देवी च रथं प्रेरयतु। बृहद्दिवा बृहन्महद्दीप्यतिद्यो

ततइति बृहद्दिवः इगुपधलक्षणः सुपां सुलुगिति विभक्तेराकारः तादृशो भगश्च प्रेरयतु। उत अपि च रो
दसी द्यावापृथिव्यौ पुरंधिर्बहुधीः पूषा पोषको देवश्च अध अधशब्दश्चार्थे पती सूर्याया भर्तारौ अश्विनौ च
एते सर्वे अस्मदीयं रथं प्रेरयंत्वित्यर्थः ॥३॥ अथ पंचमीमृचमाह ॥३॥ ॥उत त्ये देवी सुभगे मिथूदृशो
षासानक्ता जगतामपीजुवा। स्तुषे यद्वां पृथिवि नव्यसा वचः स्थातुश्च वयस्त्रिवया उपस्तिरे ॥३॥ ॥उत
अपि च त्ये ते प्रसिद्धे देवी द्यौ देव्यौ देवनशीले सुभगे शोभनधने मिथूदृशा मिथः परस्परं पश्यंत्यौ एवं
भूते उषासानक्ताश्वरात्रिश्च जगतां जंगमानां अपीजुवा प्रेरयित्र्यौ भवतः तस्मादस्मदीयमपि रथं प्रेर
यतां। उत तरोह्यावा द्यावापृथिव्यः प्रत्यक्षकृतः इह पृथिव्यः प्रत्यक्षकृतः इह पृथिवि वां युवां त्वा दिवं च नव्यसा न
वीयसा नवतरेण प्रशस्येन वचः वचसा सुपां सुलुगिति टाया लुक्। यद्यदा स्तुषे स्तुवे उत्तमस्य व्यत्यये

पृ० ७

नमध्यनः।तदानींस्थातुःस्थावरस्यव्रीह्यादेःसंबंधिपयोन्नंचरुपुरोडाशादिलक्षणं।त्रिवयाःवयइत्यन्न
नामसु।ओषधयश्चसोमात्मकानिहविर्लक्षणान्यन्नानियस्यतादृशोइंद्रयस्तिष्ठपस्तृणे।आज्येनोपस्तरणा
भिघारणैश्चसर्वप्रयच्छामीत्यर्थः।स्तृञ्आच्छादनेलङिउत्तमेछांदसोविकरणस्यलुक्।अत्रत्यस्वशब्दश्चस्त्र
णीतिनिपातानंतरंपदद्वयंपूरणः।उत्तरश्चातोरिति।ल्वनिपातेनयद्विहंतेतिनिपातप्रतिषेधः॥८॥ अथषष्ठीमृच
माह॥८॥ ॥उतवअंशंवसुभिराज्ञामिवस्मस्यहिर्बुध्न्योअजएकपादुत।त्रितऋभुक्षाःसविताचनोदधे
पांनपादाशुहेमाधियाशमि॥८॥ ॥उतअपिचहेदेवाःवशिष्ठामिवश्वेतिसंप्रत्यर्थश्चयः।अस्मत्त
स्तुतिकामयमानानांवोयुष्माकंशंसंस्तुतिंसंप्रतिशमसिकामयामहे।वशकांतौ।इदंतोमसिःआदि ३४
प्यादिनासंप्रसारणंछांदसोवर्णलोपः।उतअपिचअहिर्बुध्न्यः।बुध्नमंतरिक्षंतत्रभवोहीनादेवःअजए

कपात्।नजायतइत्यजःएकएवपद्यतेगच्छतीत्येकपात्।अत्रएकपात्संज्ञकःसूर्यःत्रितस्त्रीर्णतमःऋभुक्षाः
उरुक्षयउरुनिवासःऋभूणांनिवासयितावाइंद्रश्चसवितासर्वस्यप्रसविताचनोस्मदंदधेविदधातु।अस्म
भ्यंकरोतु।तथाआशुहेमाशीघ्रगामी।हिगतावित्यस्मादन्येभ्योपिदृश्यंतइतिमनिन्।तादृशःअपांनपा
त्।अपांपौत्रीयस्थानीयोग्निः।अद्भ्यओषधिवनस्पतयोजायंतेओषधिवनस्पतिभ्यश्चायमग्निर्जायतइत्य
ग्नेरपांपौत्रत्वं।सचधियास्तुत्याशमिशमीतिकर्मनाम।यज्ञकर्मणिप्रीतोभवत्वितिशेषः।यद्वाधियाक
र्मणाअस्मदीयेनपरिचरणलक्षणेनशमिशंसुखंतंनिमित्तंभवत्वितिशेषः॥८॥ अथसप्तमीमृचमाह॥
॥८॥ ॥एतावोवश्म्युद्यतायजत्राअतक्षन्नायवोनव्यसेसं।श्रवस्यवोवाजंचकानाःसप्तिर्नरथ्योअह
धीतिमश्याः॥८॥ ॥हेयजत्रायजनीयाविश्वेदेवाःवोयुष्मदीयानिएतानिउद्यतानिवचांसिवश्मि

द्वि० ७ कामयेनव्यसेनवतरायस्तुत्यतमाययुष्मद्गणाय।हेआयवोमनुष्याःकमितातिस्तोत्राणि
समनन्दन्समस्कुर्वन्।किमिच्छंतःश्रवस्यवःश्रवणीयंयशोन्नंवाआत्मनइच्छंतःवाजंबलंचकानाःका
मयमानाःकन्नदीभिकोतिगतिष्ठालिटःकानच्।रथ्योरथसंबंधीसमितिर्नसर्पणशीलोश्वइवयुसभगः
धीतिमस्मदीयंकर्मत्रिरश्याःआप्नोत्।अश्नुव्याप्तौव्यत्ययेनपरस्मैपदम्‌अध्यामो।बहुलंछंदसीतिविकरण
स्यलुक्॥८॥ ॥इतिद्वितीयस्यसप्तमेचतुर्दशोवर्गः॥८॥ ॥अस्यमेत्यष्टर्चंदशमंसूक्तं।गृत्समदस्या
र्षंषष्ठ्याद्यास्तिस्रोनुष्टुभःशिष्टाःपंचगत्याःप्रथमाद्यावापृथिवीयाततोद्वेऐंद्र्योत्वाष्ट्र्यौवाततोद्वेराका
देवत्येद्वेसिनीवालीदेवत्येअंत्यागुंग्वादिषड्देवताका।तथाचानुक्रांतं।अस्यमेष्टौगात्संत्र्यनुष्टुबंतं ३५
द्यावापृथिव्यैकाद्वेऐंद्र्योवाद्वेद्वेराकासिनीवाल्योरंत्यालिंगोक्तदेवतेति।आभिप्लविकेचतुर्थेहनिवैश्व

देवशस्त्रेआद्यस्तृचोद्यावापृथिवीयनिविद्धानः।तथाचसूत्रितं।अस्यमेद्यावापृथिवीइतितिस्रस्तंमेअपइति
वैश्वदेवमिति॥८॥तत्रैषाप्रथमामृचमाह॥८॥ ॥अस्यमेद्यावापृथिवीऋतायतोभूतमवित्रीवचसःसिषा
सतः।ययोरायुःप्रतरंतेइदंपुरउपस्तुतेवसूयुर्वांमहोदधे॥८॥ ॥द्यावापृथिवीहेद्यावापृथिव्यौऋताय
ऋतंयज्ञमात्मनइच्छतःसिषासतःयुवांसंभक्तुमिच्छतःवचसःवक्तीतिवचाःस्तोताअसुन्।स्तोतास्यमेम
मअवित्रीअवित्र्यौपालयित्र्यौभूतंभवतंययोर्द्यावापृथिव्योरायुरन्नंप्रतरंप्रकृष्टतरंस्तुत्यमतइतिशेषः
इदमिदानींतेद्यावापृथिव्यौउपस्तुतेतत्रस्थितेःस्तोत्रेनिःस्तुतेवांयुवांवसूयुःधनकामोहंमहोमहतःवि
भक्तिव्यत्ययःमहतास्तोत्रेणपुरोदधेपुरस्करोमि॥८॥अथद्वितीयामृचमाह॥८॥ ॥मानोगुह्यारिपआयो
रह्नंदभन्मानआभ्योरीरधोदुच्छुनाभ्यः॥८॥श्रीपर॥ मानोवियोःसख्याविद्धितस्यनःसुम्नायतामनसातत्वमे॥

रु० ७ ॥७॥ ॥हे इंद्रत्वष्टर्वा आयोर्मनुष्यस्य शत्रुभूतस्य गुह्या गोप्याः ज्ञातुमशक्याः रिपो हिंसारूपाः मायाः नो
स्मान् अहन् नु उपजन्महणमेतत्। अहनि रात्रौ च मा दभन् मा हिंसिषुः तथा नोस्मान् आभ्यो दुच्छुनाभ्यः शुनमि
ति सुखनाम दुःशुनाः दुच्छुनाः सुखकारिणीभ्यः नोस्मान् मा रीरधः वशं मा नैषीः रध्यतिर्वशगमन इति यास्कः
रध हिंसासंराध्योः अस्मा एयं ताच्छुद्रिरूपं। अपि च नोस्माकं सख्या सख्यानि सखित्वानि मा वियोः त्वया वि
युक्तानि मा कार्षीः। अपि तु नोस्माकं नस्य तत् सखित्वं सुम्नायता सुखमस्माकमिच्छता मनसा विद्धि जा
नीहि क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी॥७॥ ॥तव त्वा तादृशं त्वां ईमहे
अनिमितफलं याचामहे। सुपां सुलुगिति तच्छब्दादुत्तरस्या विभक्तेर्लुक्॥७॥ ॥अथ तृतीयामृचमा ३८
ह॥७॥ ॥अहेळता मनसा श्रुष्टिमा वह दुहानां धेनुं पिप्युषीमसश्चतं। पद्याभिराशुं वचसा च वाजिनं

D: BHAU DAJI
MEMO...

त्वां हिनोमि पुरुहूत विश्वहा॥७॥ ॥हे इंद्रत्वष्टर्वा अहेळता अक्रुध्यता मनसा श्रुष्टिं सुखकरीं दुहानां दो
ग्ध्रीं पिप्युषीं प्रवृद्धां पीनाप्यायी वृद्धौ लिटः क्वसुः लिङ्यङोश्चेति पीभावः उगितश्चेति ङीप् संप्रसारणमिति
संप्रसारणं शासिवसिघसीनां चेति षत्वं। असश्चतं असक्तावयवां एवंभूतां धेनुं गां आ वह आनीय सुखयेन प्रा
पय। अपि च हे पुरुहूत बहुभिराहूतेंद्र त्वष्टर्वा पद्याभिः पादगतिभिः आशुं व्यापनशीलं त्वं वचसा वाचा च
वाजिनं वेगवंतं त्वां विश्वहा सर्वेष्वहस्सु हिनोमि निघुतिभिः प्रेरयामि। हिनोतेर्ह्वा च। पत्नीसंयाजेषु गृहपतेः
प्राक् सिनीवाल्यौ यष्टव्ये। तत्र राकाया राकामहमित्याद्या याज्यानुवाक्ये सूत्रितं च राकामहं सिनी
वालीं कुहूमहमिति द्वे याज्यानुवाक्ये इति। तथा असिमारुतेप्येतेध्याये सूत्रितं च। राकामहमिति द्वे इति॥
॥७॥ तयोराद्यामत्र चतुर्थीमृचमाह॥७॥ ॥राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना। सीव्यत्व

द्वि० ७ पः सूच्याछिद्यमानया ददातु वीरं शतदायमुक्थ्यं ॥ ॥ ॥ सं० पौर्णमासी राकानामदेवी सुहवां स्वाह्वा
नां आह्वानप्रयोजनकारिणीं सुष्टुता शोभनया स्तुत्या अहं हुवे आह्वयामि सुष्टुती शब्दात्तृतीयैकवचनस्य सु
पां सुलुगिति पूर्वसवर्णदीर्घ ईकारः। सा च सुभगा शोभनधना नोस्माकमाह्वानं शृणोतु श्रुत्वा च त्मना आत्मना स्वय
मेव बोधतु अस्मदभिप्रायं बुध्यतां च अपः कर्म पुत्रोत्पादनलक्षणं सूच्या सूचिस्थानीयया अछिद्यमानया अ
विछिन्नयानुग्रहबुध्या सीव्यतु संतनोतु। यथा वस्त्रादि सूच्या स्यूतं चिरं तिष्ठति एवमिदं करोतु कृत्वा च वी
रं विक्रांतं शतदायं बहुधनं बहुप्रदं वा उक्थ्यं प्रशस्यं पुत्रं ददातु ॥ ॥ अथ पंचमीमृचमाह ॥ ॥ ॥ या
स्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि। ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सु ३७
भगे रराणा ॥ ॥ ॥ हे राके देवि सुपेशसः शोभनरूपास्ते तव याः सुमतयः शोभना बुद्धयः याभिर्मतिभिः

दाशुषे हविर्दत्तवते यजमानाय वसूनि धनानि ददासि प्रयच्छसि अद्येदानीं ताभिर्मतिभिः सहिता त्वं सुमनाः शो
भनमना भूत्वा उपागहि उपागच्छ। गमेश्छांदसः शपो लुक्। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। असिद्ध
वदत्राभादित्यस्यासिद्धत्वाद्धेर्लुगभावः। किं कुर्वती। हे सुभगे शोभनधने सहस्रपोषं सहस्रसंख्याकस्य धनस्य
पुष्टिं रराणा ददती। रादाने व्यत्ययेन शानच् छांदसः शपः श्लुः। अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥ ॥ सिनीवा
ल्या यागे सिनीवालीत्यादिके द्वे याज्यानुवाक्ये सूत्रितं तृ पर्षुदारुदर्तां तत्रानुवाक्या ॥ ॥ सूक्ते षष्ठीमृचमा
ह ॥ ॥ ॥ सिनीवालि पृथुष्टुके या देवानामसि स्वसा। जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ॥ ॥ ॥ दृष्टचंद्रा अ
मावास्या सिनीवाली हे सिनीवालि पृथुष्टुके पृथुजघने पृथुसंहते वा या त्वं देवानां स्वसासि स्वयं सारिणी भगिनी वा भव
सि सा त्वं आहुतं आभिमुख्येनाग्नौ प्रक्षिप्तं हव्यं अस्मदीयं हविः जुषस्व सेवस्व। किंच हे देवि सिनीवालि नोस्माकं

द्वि॰ ७ प्रजां पुत्रादिकां दिदिड्ढि उपचिनु अतिसर्जय वा देहीत्यर्थः। दिह उपचये लोटि छांदसः शपः श्लुः। दिश अतिसर्ज
नइत्यस्माद्वा॥६॥ अथ सप्तमीमृचमाह॥ ॥या सुबाहुः स्वंगुरिः सुषूमा बहुसूवरी। तस्यै विश्पत्न्यै
हविः सिनीवाल्यै जुहोतन॥७॥ ॥या सिनीवाली सुबाहुः शोभनबाहुः स्वंगुरिः शोभनांगुलिः सुषूमा सुष्ठु प्र
सवित्री॥ षूङ् प्राणिप्रसवे। अन्येभ्योपि दृश्यत इति मनिन्। उत्तरपदप्रकृतिस्वरत्वं। तस्यै सिनीवाल्यै विप
श्पत्न्यै विशां पालयित्र्यै विभाषा सपूर्वस्येति पत्युर्नकारांतादेशः। अस्मयादित्वेन भत्वाद्विशो जश्त्वाभावः। परा
दिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। हे ऋत्विग्यजमानाः हविर्जुहोतन जुहुत। तमतनप्तनथनाश्चेति
तनबादेशः॥७॥ अथाष्टमीमृचमाह॥ ॥या गुंगूर्या सिनीवाली या राका या सरस्वती। इंद्राणीमह्व ऊतये ३९
वरुणानीं स्वस्तये॥८॥ ॥अत्र गुंगूशब्देन राकासिनीवाल्योः साहचर्यात् कुहूरुच्यते। या गुंगूस्तामह्वे आ

ह्वयामि एवमुत्तरत्रापि योज्यं। इंद्राणीमिंद्रस्य पत्नीं ऊतये रक्षणार्थं आह्वे आह्वयामि तथा वरुणानीं वरुणस्य प
त्नीं स्वस्तये अविनाशायाह्वयामि। इंद्रवरुणेत्यादिना ङीप्। आनुगागमश्च॥८॥ ॥इति द्वितीयस्य सप्तमे पंच
दशो वर्गः॥ ॥इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयमंडले तृतीयोनुवाकः
॥चतुर्थेनुवाके एकादश सूक्तानि तत्रा ते पितरिति पंचदशर्चं प्रथमं सूक्तं गृत्समदस्यार्षं त्रैष्टुभं रौद्रं। अनुक्रां
तं च। आ ते पंचोना रौद्रमिति। शूलगवादिषु इदं सूक्तं अनेन सूक्तेन प्रतीपेक्षितपशुं यायात् इति तत्र। कद्रुद्राय इमा
रुद्राय आ ते पितरिति रुद्रविषोनुवाका। सूत्रितं च। आ ते पितर्मरुतां सुम्नमेतु प्रवत्रवे वृषभाय श्वितीचे इति द्वे
इति। अत्र शौनकः चतुर्दश्यामुपोष्यैकं च्छन्नसूक्तं रुद्रस्य जुहुयाच्छतं। आ ते सूक्तेन रौद्रेण प्रत्यृचं वाग्यतः शुचिः॥१॥ प्र
भ्यांयजं चरुं स्तुत्वा भावाद्विपश्च ज्ञानं करां। हविः शेषेण वर्तेत्तेनिकांतरमतंद्रितः॥२॥ षण्मासाज्जयेन्मृत्युं रोगेष्ट

द्वि० ७ पस्तिच्यतइति॥छ॥सेषासूक्ते प्रथमामृचमाह॥छ॥ ॥आतेपितर्मरुतांसुम्नमेतुमानःसूर्यस्यसंदृशोयु
योथाः।अभिनोवीरोअर्वतिक्षमेतप्रजायेमहिरुद्रप्रजाभिः॥छ॥ ॥हेमरुतांपितःमरुत्संज्ञानांदेवानामु
त्पादकरुद्रपरमपिछंदसीतिषष्ठ्यंतस्यपूर्वामंत्रितांगवद्भावात्सर्वानुदात्तत्वं।तेत्वदीयंअस्मभ्यंदातव्यं
सुम्नंसुखंएतुआगच्छतु।रुद्रस्यचमरुतांपितृत्वमिदंपित्रेमरुतामाख्यायिकासुखेनावदिष्म।तथात्वंनोस्मा
न्सूर्यस्यसंदृशःसंदर्शनान्मायुयोथाःमापृथक्कार्षीः।युमिश्रणामिश्रणयोः।लङिश्लौछांदसःशपःश्लुः।छंदस्य
नयथेत्यार्द्धधातुकत्वेनङित्त्वाभावाद्गुणः।अर्वतिशत्रोरर्त्तव्योवाअर्वेतिश्रुतेः।नोस्माकंवीरःवीर्यवान्पु
त्रादिःअभिक्षमेतअभिभवतु।यद्वावीरस्त्वंनोस्मान्अभिक्षमेथाःअस्मान्कृतापराधान्अभिक्षमस्व।हेरु ३९
द्रप्रजाभिःपुत्रपौत्रादिभिःप्रजायेमहिप्रभूतास्याम॥छ॥अथद्वितीयामृचमाह॥छ॥ ॥त्वादत्तेभीरुद्रशंत

मेभिःशतंहिमाअशीयभेषजेभिः।व्यस्मद्द्वेषोवितरंव्यंहोव्यमीवाश्चातयस्वाविषूचीः॥छ॥ ॥हेरुद्रत्वादत्तेभिः
त्वयादत्तैःशंतमेभिःअतिशयेनसुखकारैर्भेषजैरौषधैः।शतंहिमाःशतंहेमान्शतसंवत्सरान्अशीयव्याप्नु
यां।अश्नोतेर्लिङिछांदसोविकरणस्यलुक्।अपिचअस्मदस्मत्तःद्वेषोद्वेष्टॄन्विचातयस्वविनाशय।तथाअंहः
पापंवितरमत्यंतंविचातयस्व।अमीवारोगान्विषूचीःविष्वग्गमनाःअंचतीःकृत्स्नशरीरव्यापकान्रोगान्विचात
यस्वअस्मत्तःपृथक्कृत्यविनाशाय॥छ॥अथतृतीयामृचमाह॥छ॥ ॥श्रेष्ठोजातस्यरुद्रश्रियासितवस्तम
स्तवसांवज्रबाहो।पर्षिणःपारमंहसःस्वस्तिविश्वाअभीतीरपसोयुयोधि॥छ॥ ॥हेरुद्रजातस्योत्पन्नस्यस
र्वस्यजगतोमध्येश्रियाऐश्वर्येणश्रेष्ठःप्रशस्यतमोसिभवसि।तथाहेवज्रबाहोआयुधहस्तरुद्रतवसांप्र
वृद्धानांमध्येतवस्तमःअतिशयेनप्रवृद्धोसि।सत्वंनोस्मान्अंहसःपापस्यपारंतीरंस्वस्तिक्षेमेणपर्षिपारय

द्वि० ७ तथारपसःपापस्यअमीतिरनिगमनानियुयोधिपृथक्कुरु।योतछांदसःशपःश्लुः।वांछंदसीत्यनित्यत्वस्यविक
ल्पनाद्भित्वाभावेअङ्गिन्तश्चेतिदीर्घः॥छ॥अथचतुर्थीमृचमाह॥छ॥ ॥मात्वारुद्रचुक्रुधामानमोभिर्मादुष्टुती
वृषभसहूती।उन्नोवीरांअर्पयभेषजेभिर्भिषक्तमंत्वाभिषजांशृणोमि॥छ॥ ॥हेरुद्रत्वात्वांनमोभिः
अयथाक्रियमाणैर्नमस्कारैर्हविर्भिर्वामाचुक्रुधाममाक्रोधयामक्रुद्धमाकाभक्रुधयाकोपेअस्माएणंता
दुष्टुतिरूपंहेवृषभकामानांवर्षितःदुष्टुतीदुष्टुत्याअशोभनयास्तुत्यामाचुक्रुधामेत्येवतयासहूती
सहूत्याविसदृशैरन्यैर्देवैःसहाह्वानेनमक्रोधयाम।अथोदित्वस्मानन्यूनेनसहाह्वानेनक्रुद्धोनवति।मत्वंनो
स्माकंवीरान्पुत्रान्भेषजेभिःत्वदीयैर्भेषजैरौषधैःउदर्पयउन्नतंसंयोजय।हेरुद्रत्वात्वांभिषजांचिकित्सा ४०
विज्ञानांमध्येभिषक्तमंअतिशयेनभिषज्यस्यकर्त्तारंशृणोमिप्रथमोदैव्योभिषगितिचमंत्रांतरेणुक्तं॥छ॥

॥अथपंचमीमृचमाह॥छ॥ ॥हवीमभिर्हवतेयोहविर्भिरवस्तोमेभीरुद्रंदिषीय।ऋदूदरःसुहवोमानोअस्यैबभ्रुः
सुशिप्रोरीरधन्मनायै॥छ॥ ॥योरुद्रःहविर्भिश्चरुपुरोडाशादिभिःसहितैर्हवीमभिराह्वानैःस्तुतिलक्षणैःहव
तेआहूयते।हूयतेर्व्यत्ययेनकर्मणिकर्तृप्रत्ययः।बहुलंछंदसीतिह्वयतेःसंप्रसारणं।तंरुद्रंस्तोमेभिःस्तो
त्रैरवदिषीयअवखंडयामिपृथक्करोमि।अपगतक्रोधंकरोमीत्यर्थः।दोअवखंडने।व्यत्ययेनात्मनेपदं।बहु
लंछंदसीतित्वं।ऋदूदरःऋदूदरोमृदूदरइतियास्कः।सुहवःशोभनाह्वानःबभ्रुःभर्त्तासर्वस्यबभ्रुवर्णोवा।सुशि
प्रःशिप्रेहनूनासिकेवाशोभनशिप्रःएवंगुणविशिष्टःसरुद्रःअस्यैमनायैहन्मीतिमन्यमानाबुद्धिर्मतातस्यै
नोस्मान्मारीरधत्मावशंनैपीत्।रध्यहिंसासंराध्योः।अस्माएणंतादुष्टुतिरूपं।रध्यतिर्वशगमनइतियास्कः॥
॥छ॥ ॥इतिद्वितीयस्यसप्तमेषोडशोवर्गः॥छ॥ ॥अथषष्ठीमृचमाह॥छ॥ ॥उन्मामंदवृषभोमरुत्वान्

द्वि० ७

क्षीयसावयसानाधमानं।घृणीवछायामरपाअशीयाविवासेयंरुद्रस्यसुम्नं॥छ॥ ॥वृषभनःकामानांवर्षि
तामरुत्वान्मरुद्भिःयुक्तोरुद्रःनाधमानंयाचमानंमामांत्वक्षीयसादीप्तेनवयसान्नेनउन्ममंदउत्कर्षे
णतर्पयत्‌अपिचाहंघृणीवछायांयथासूर्यकिरणसंतप्तःछायांप्रविशतिएवंरुद्रस्यसुम्नंसुखंअरपाअ
पापःसन्अशीयव्याप्नुयांतदर्थंतंरुद्रमाविवासेयंपरिचरेयंविवासतिःपरिचरणकर्मा॥छ॥अथस
प्तमीमृचमाह॥छ॥ ॥क्वस्यतेरुद्रमृळयाकुर्हस्तोयोअस्तिभेषजोजलाषः।अपभर्तारपसोदैव्यस्या
भीनुमावृषभचक्षमीथाः॥छ॥ ॥हेरुद्रतेतवमृळयाकुःसुखयितास्यःसहस्तःक्वकुत्रवर्ततियोहस्तो
भेषजःभेषजस्यहेतुःजलाषःसर्वेषांसुखकरोस्तिभवंतिसहस्तोविद्यतएवतेनहस्तेनमांरक्षेतिभावः।अ ४१
पिचहेवृषभकामानांवर्षितः।दैव्यस्यदेवकृतस्यरपसःपापस्यअपभर्ताअपहर्ताविनाशयितात्वं

कृतापराधंमांनुक्षिप्रंअभिचक्षमीथाः।अभिचक्षमस्वाक्षमस्वसहस्वेतेलिङिछांदसःशपःश्लुः।बहुलंछंदसी
तिईडागमः।रुद्रादेवास्यपाशोवपापुरोडाशाद्विषांक्रमेणबभ्रवइत्याद्याधस्तिस्रोयाज्याःप्रबभ्रवेवृषभा
यश्वितीचइतितिस्रआपश्वानान्नासत्याःपुरस्तादिति।छ।तत्राद्यासूक्तेअष्टमीमृचमाह॥छ॥ ॥प्रब
भ्रवेवृषभायश्वितीचेमहोमहींसुष्टुतिमीरयामि।नमस्याकल्मलीकिनंनमोभिर्गृणीमसित्वेषंरुद्रस्य
नाम॥छ॥ ॥बभ्रवेविश्वस्यभर्त्रेबभ्रुवर्णायवावृषभायकामानांवर्षित्रेतद्दनुग्रसह्यकारिणेवाश्विती
चेश्वेत्यमंचते।श्विताधर्णेवअणादिकइन्प्रत्ययः।श्वितामंचतीति।अंचतेर्ऋत्विगित्यादिनाक्विन्।चतुर्थ्येकव
नेअचइत्यकारलोपेचावितिदीर्घत्वं।उदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वं।एवंगुणविशिष्टायमहतेमहीम
हतोपिमहतींसुष्टुतिंशोभनस्तुतिंप्रेरयामिप्रकर्षेणोच्चारयामि।हेस्तोतः।कल्मलीकिनंज्वलतोनामधेय

रु॰ ७ मेतद्वाह्वलेतं। कलयत्यपगमयतीति कलयमिति कल्मलीकं तेजः। तद्वंतं रुद्रं नमोभिर्नमस्कारैर्हविर्भिर्वा
नमस्यः स्तुत्य वयं च रुद्रस्य महादेवस्य त्वेषं दीप्तं नाम सुम्नमभिसुम्नाभिः संकीर्तयामः। दृशाष्टेकर्त्र्यादि
कः। इदं नोमसिद्यादीनां ह्रस्वः॥छ॥ अथ नवमीमृचमाह॥छ॥ ॥स्थिरेभिरंगैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः
पिपिशे हिरण्यैः। ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यं॥छ॥ ॥स्थिरेभिः स्थिरैर्दृढैरंगैः अ
वयवैर्युक्तः पुरुरूपः अष्टमूर्त्यात्मिकैर्बहुभी रूपैरुपेतः उग्रः उद्गूर्णः तेजस्वी बभ्रुर्भर्ता बभ्रुवर्णो वा
रुद्रः शुक्रेभिर्दीप्तैः हिरण्यैर्हिरण्मयैर्हितरमणीयैर्वा अलंकारैः पिपिशे दीप्यते पिश अवयवे कर्म
णि लिट्। ईशानादीश्वरात् अस्य भुवनस्य भूतजातस्य भूरेर्भर्तुः रुद्रात् असुर्यं असु क्षेपणे अस्मेरुरन् ४२
असुरः क्षेप्ता तत्र साधुः असुर्यं बलं न वा उ योषत् नैव पृथग्भवति। यौतेर्लेट्यडागमः। सिब्बहुलं लेटीति

सिप्॥छ॥ अथ दशमीमृचमाह॥छ॥ ॥अर्हन्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपं। अर्हन्निदं
दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति॥छ॥ ॥हे रुद्र त्वं अर्हन् अर्हो योग्य एव सन् सायकानि शरान्
धनुश्च बिभर्षि धारयसि। तथा अर्हन्नेव यजतं यजनीयं पूजनीयं विश्वरूपं बहुविधरूपयुक्तं निष्कं हारं बि
भर्षि तथा अर्हन्नेव इदं विश्वं सर्वं अभ्वं अहन्नाम्मेतत् अतिविस्तृतं जगत् दयसे रक्षसि। दय रक्षणे। रु
द्र त्वत्त्वत्तोऽन्यत् किंचित् ओजीयः ओजस्वितरं बलवत्तरं न वा अस्ति न खलु विद्यते अतस्त्वमेवाक्रव्यापा
रेषु योज्य इत्यर्थः। ओजस्शब्दात्मत्वर्थीयो विनिः तत आतिशायनिक ईयसुन्। विन्मतोर्लुक्। टेरिति टिलोपः॥छ॥
॥ ॥इति द्वितीयस्य सप्तमे सप्तदशो वर्गः॥छ॥ ॥प्रयाणे मृगस्यामनोज्ञस्य वचः श्रुत्वा स्तुहि श्रुतमित्येतां
जपेत्स्वस्त्रि तं च। स्तुहि श्रुतं गर्तसदं युवानमिति मृगस्येति॥छ॥ सेषा त्रैकादशीमृचमाह॥छ॥ ॥स्तुहि श्रु

रु० ७ तंगर्त्तसदंयुवानंमृगंनभीममुपहत्नुमुग्रं।मृळाजरित्रेरुद्रस्तवानोन्यंतेअस्मन्निवपंतुसेनाः॥ग॥ ॥हे
स्तोतःश्रुतंविश्रुतंप्रख्यातंरुद्रंस्तुहि।कीदृशंगर्त्तसदंगर्त्तोरथस्तत्रसीदंतंयुवानंनित्यतरुणंमृगंनभीमं
मृगंसिंहमिवभयंकरंउपहंतुंउपहंतारंशत्रूणांउग्रमुद्गूर्णं।हेरुद्रत्वंस्तवानःअस्माभिःस्तूयमानःसन्जरि
त्रेस्तोत्रेमह्यंमृळसुखयतेत्वदीयाःसेनाःअस्मदन्यंअस्मद्व्यतिरिक्तंपुरुषंनिवपंतुनिघ्नंतु॥ब॥अथद्वाद
शीमृचमाह॥ग॥ ॥कुमारश्चित्पितरंवंदमानंप्रतिनानामरुद्रोपयंतं।भूरेर्दातारंसत्पतिंगृणीषेस्तुतस्त्वं
भेषजारास्यस्मे॥ब॥ ॥वंदमानंआयुष्मान्भवसौम्येतिस्तुवंतंपितरंकुमारश्चित्यथाकुमारश्चिदित्थं
तदुपमार्थे।रुद्रउपयंतमस्मत्समीपेगच्छंतंत्वांप्रतिननामप्रतिनतोस्मि।अपिचभूरेर्बहुनोधनस्यदाता ४२
रंसत्पतिंसतांपालयितारं।पत्यावैश्वर्यइतिशब्दपदप्रकृतिस्वरत्वं।हेरुद्रएवंभूतंत्वांगृणीषेस्तोमिमियपस्ति

उत्तिंडोनवंतातिसेआदेशाः।स्तुतस्त्वंअस्मेअस्मभ्यंभेषजानिरासिदेहि॥ग॥अथत्रयोदशीमृचमाह॥ब॥
॥ ॥यावोभेषजामरुतःशुचीनियाशंतमावृषणोयामयोभु।यानिमनुरवृणीतापितानस्ताशंचयोश्चरु
द्रस्यवश्मि॥ग॥ ॥इमरुतोरुद्रपुत्रावोयुष्माकंयायानिभेषजाभेषजानिअस्मदारोग्यहेतुभूतान्योषधा
निशुचीनिशुद्धानिनिर्मलानिसंति।हेवृषणःकामानांवर्षितामरुतःयायानिचयुष्मदीयानिचयुष्मदीयानिचभेष
जानिशंतमाअतिशयेनसुखकराणियायानिचभेषजानिमयोभुमयोभूनिमयसःसुखस्यभावयितॄणिनो
स्मान्पितामनुःयानिभेषजानियुष्मदीयान्यवृणीतवानृतातानिभेषजानिरुद्रस्यमहादेवस्यसंबंधिशंच
योश्चयपश्मनीयानांरोगाणामपशमनंयावनीयानांभयानांयद्यावनंअस्मत्तःपृथक्करणंतदुभयंववश्मि
कामये।वशकांतो।आदादिकः॥ग॥अथचतुर्दशीमृचमाह॥ब॥ ॥परिणोहेतीरुद्रस्यवृज्याःपरित्वेषस्य

द्वि० ७ दुर्मतिर्महीगात्।अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयायमृळ॥छ॥ ॥रुद्रस्यमहादेवस्यहेतिरा
युधंनोस्मान्परिवृज्यात्परिवर्जयतुतथात्वेषस्यदीप्तस्यरुद्रस्यमहीमहतीदुर्मतिःदुःखकारिणीबुद्धिश्च
परिगात्अस्मान्वर्जयित्वान्यत्रगच्छतु।अपपरीवर्जने।हेमीढ्वःसेचनसमर्थरुद्रस्थिरास्थिराणित्वदीयानि
धनूंषिमघवद्भ्यःहविर्लक्षणधनयुक्तेभ्योयजमानेभ्यःअवतनुष्वअवततज्यानिकुरुतथातोकायास्मत्पु
त्रायतनयायतत्पुत्रायचमृळसुखंकुरु॥छ॥अथपंचदशीमृचमाह॥छ॥ ॥एवाबभ्रोवृषभचेकिता
नयथादेवनहृणीषेनहंसि।हवनश्रुन्नोरुद्रेहबोधिबृहद्०॥छ॥ ॥हेबभ्रोजगतोभर्तःबभ्रुवर्णवावृषभ
कामानांवर्षितःचेकितानसर्वज्ञानतद्देवद्योतमानरुद्रयथायेनप्रकारेणनहृणीषेनक्रुध्यसिनचहं ४४
सिहृणीङ्लज्जायांअयंतुक्रुध्यतिकर्मणि।एवंहवनश्रुत्अस्मदीयमाह्वानांशृण्वन्नोस्मान्हेरुद्रइह

स्मिन्देशेबोधिबुध्यस्वविदस्वविदथेयज्ञेस्मदेवासुवीराःशोभनपुत्राःशोभनपुत्राःसंतःबृहत्प्रौढंत्वयंदत्तो
त्रंवदेमउच्चारयाम॥छ॥ ॥इतिद्वितीयस्यसप्तमेष्टादशोवर्गः॥छ॥ ॥धारावराइतिपंचदशर्चंद्वितीयंसू
क्तं।गार्त्समदंमारुतंअंत्यात्रिष्टुप्।शिष्टाजगत्यः।तथाचानुक्रांतं।धारावरामारुतंत्रिष्टुबंतमिति।पृष्ठ्याभिप्ल
वषडहयोस्तृतीयेहन्याग्निमारुतशस्त्रस्यइदंमारुतनिविद्धानं।सूत्रितंचवैश्वानरायधिषणांधारावरामा
रुतंत्रिष्टुबंतमिति।पृष्ठ्याभिप्लवषडहयोस्तृतीयेहन्याग्निमारुतशस्त्रस्यइदंमारुतनिविद्धानं।सूत्रितंचवै
श्वानरायधिषणांधारावरामारुतस्त्वमग्नेप्रथमोअंगिराइत्याग्निमारुतमिति।छ।तत्रप्रथमामृचमाह॥छ॥
॥ ॥धारावरामरुतोधृष्ण्वोजसोमृगानभीमास्तविषीभिरर्चिनः।अग्नयोनशुशुचानाऋजीषिणोभृमिंधम
तोअपगाअवृण्वत॥छ॥ ॥धारावराःउदकधारयांनरिद्धिमावृण्वंतायक्षाधारणंधृतानांस्थिराणांहर्त्रादी

५६०

नांनिवारयितारोवाजनयितारः धृष्ण्वोजसः धारषांधर्षकेणबलेनयुक्ताःअतएवमृगानभीमाःसिंहाइवभयंक
राःतविषीभिरात्मीयैर्बलैर्वृष्टिप्रदानादिनाअर्चिनःसर्वंजगत्पूजयंतःअग्नयानशुशुचानाःदीप्ताग्नयइवदी
दीप्यमानाःशुचदीप्तौलिटःकानच्।ऋजीषिणःऋजीषमुदकंतद्वंतः।यद्वाऋजीषोपगतसारःसोमःतेनयु
क्ताःतृतीयसवनेह्याग्निमारुतेमरुतःस्तूयंतेतत्रचासवनद्वयेअभिषुतंगतसारंसोममभिषुण्वंति।अ
तस्तेषांतद्वत्त्वं।एवंभूतामरुतःभृमिंभ्राम्यंतंमेघंधमंतःवर्षणार्थंइतस्ततःप्रेरयंतःगाःतदंतर्गता
वृष्ट्याख्याआपःअपावृण्वतअपावृतान्कुर्वंतियथासावेर्दर्शयंतेतथाप्रवर्षंतीत्यर्थः।यद्वाभृमिणाख्यावाणा
विशेषंधमंतोवादयंतःगाःवलनाम्नासुरेणापिहिताःअपावृण्वतअपगतावरणाअकुर्वन्॥१॥अथद्वि ४५
तीयामृचमाह॥२॥ ॥द्यावोनस्तृभिश्चितयंतखादिनोव्यभ्रियानद्युतयंतवृष्टयः।रुद्रोयद्वोमरुतोरु

क्मवक्षसोवृषाजनिपृश्न्याःशुक्रऊधनि॥२॥ ॥स्तृभिर्नक्षत्राणामितिनक्षत्रैर्द्यावोनयथाद्युलोकाश्चितयं
तंचितयंतिस्वात्मानंज्ञापयंति।चितीसंज्ञाने।प्रकाशयंतइत्यर्थः।तथाखादिनःशत्रूणांखादकामरुतःस्वकी
येराभरणैर्ज्ञातयंते।यद्वाखादःकटकंतद्वंतःसंतःप्रकाशंतेतथावृष्टयोवर्षकामरुतःअभ्रियानअ
भ्रेषुभवाविद्युतइव।विद्युतयंतसर्वंजगद्विद्योतयंतिप्रकाशयंति।अभ्रशब्दात्भवार्थेसमुद्राभ्राद्घइति
घप्रत्ययःशेषः।प्रत्यक्षकृतः।रुक्मवक्षसःरुक्मंरोचमाणंभरणंवक्षस्युरसियेषांतादृशाहेमरुतःयद्य
स्माद्वोयुष्मान्वृषा।सेचनसमर्थोरुद्रोमहादेवःपृश्न्याःपृश्निर्माध्यमिकावाक्तस्याःसंबंधिनिशुक्रेनिर्मले
ऊधनिउधस्थप्रदेशेअजनिअजनयततदानीमितिसर्वत्रसंबंधः।यद्वापृश्निर्नानावर्णाइयंभूमिःपुरागोरू
पधरासीत्तस्यांमहेशोवृषोभूत्वामरुतउत्पादयामासेत्याचक्षते।तदत्रोच्यते।हेमरुतोयद्यस्माद्वोयु

दि० ७ स्मान्वृषावृषावृषरूपोरुद्रःपृश्न्यागोःशुक्रेनिर्मलेऊधसिपयसउत्पत्तिस्थानेअजनिअजीजनततस्मा
द्युयंएवंमहानुभावाजाताइत्यर्थः।तथाचतैत्तिरीयकं।पृश्नियैवैपयसोजाताइति॥ब॥अथतृतीयामृच
माह॥ब॥ ॥उक्षंतेअश्वाँअत्याँइवाजिषुनदस्यकर्णैस्तुरयंतआशुभिः।हिरण्यशिप्रामरुतोदविध्व
तःपृक्षंयाथपृषतीभिःसमन्यवः॥ब॥ ॥मरुतःअश्वान्व्यापकान्लोकान्उक्षंतेसिंचंति।अश्व्याप्तौ
औणादिकःक्वन्प्रत्ययः।आजिषुसंग्रामेषुअत्यानिवसततगामिनस्तुरगानयथाखेदापनोदायउदकैः
सिंचंतितद्वत्अपिचतेमरुतःआशुभिःशीघ्रमातेरश्वैःनदस्यशब्दतोमेघस्यकर्णैःछातेर्मध्यंप्रदेशैस्तु
रयंतेवर्षणार्थंविशुक्रस्यादनायत्वरितंगच्छंति।तुरत्वरणे।शेषःप्रत्यक्षकृतः।हेहिरण्यशिप्राःशिप्रंशिर ५६
स्त्राणंसुवर्णमयंशिरस्त्राणंयेषांतेसमन्यवःसमानवयस्काःसमानक्रोधावाहेमरुतःदविध्वतःमहीरुहादि

Dr. BHAU DAJI

कंकंपयतोयूयं।धूञ्कंपनइत्यस्माद्यङ्लुगन्ताद्यस्यादौवेतद्रूपंनिपात्यते।पृषतीभिःयुष्मद्रथोयोजिताभिःश्वेतबि
दुंकिताभिःमृगीभिःवडवाभिर्वावृक्षंअन्ननामैतत्हविर्लक्षणमन्नवंतंयजमानंअर्शआदित्वादच्॥
याथगच्छथ॥ब॥अथचतुर्थीमृचमाह॥ब॥ ॥पृक्षेताविश्वाभुवनाववक्षिरेमित्रायवासदमाजीरदा
नवः।पृषदश्वासोअनवभ्रराधसऋजिप्यासोनवयुनेषुधूर्षदः॥ब॥ ॥पृक्षवतिहविर्लक्षणान्नयुक्ताय
यजमानायताताविश्वासर्वाणिभुवनान्युदकानिमित्रायवाशब्दउपमार्थः।मित्रायेवसदंसदाआववक्षिरेम
रुतआवहंति।यद्वावाशब्दोऽवधारणेमित्रभूतायजमानायैवपृक्षेत्रेनिमित्तभूतेसतिवृष्ट्युदकान्यावहंतिकीदृ
शामरुतःजीरदानवःक्षिप्रदानाःपृषदश्वासःपृषद्भिःश्वेतबिंदुभिर्युक्ताअश्वायेषांतेतथोक्ताःअनवभ्रराधसः
भ्रशाभ्रंशेअधःपतनेअकत्रंशानमवभ्रःडोन्यत्रापिदृश्यतइतिडप्रत्ययः।नास्त्यवभ्रंशोयस्येतिबहुव्रीहौ

ऋ॰ ७ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं।अनवभ्रत्वंशानरहितंराधोधनोपशांतेबहुव्रीहौपूर्वपदप्रकृति
स्वरत्वं।जिगीषासोनऋजुअकुटिलंप्राप्नुवतोगच्छंतोश्वाइववयनेषुमध्येस्पर्द्धिःधुरिमेधस्यवहनेसी
दंतोनिषण्णाइत्यर्थः॥ब॥ ॥अथपंचमीमृचमाह॥ब॥५ ॥इंधन्वभिर्धेनुभीरप्शदूधभिरध्वस्मभिःप
थिभिर्भ्राजदृष्टयः।आहंसासोनस्वसराणिगंतनमधोर्मदायमरुतःसमन्यवः॥ब॥ ॥समन्यवःसमा
नमनस्काःसमानक्रोधाःसमानतेजसोवाहेमरुतःभ्राजदृष्टयोदीप्यमानायुधाःयूयंइंधन्वभिःसमिंधन
वद्भिःइंधनशब्दाच्छंदसीवनिपावितिमत्वर्थीयोवनिप्।छांदसोवर्णलोपः।धेनुभिःप्रीणयित्रीभिःरप्शा
दूधभिःविरप्शीतिमहन्नाममहोधस्कैःऊधांसिजलस्रोतोमार्गाः।यद्वारपालपर्यंकायांवाचि।शब्दायमा ४७
नोभूतप्रदेशैःअध्वस्मभिःध्वंसनरहितैःपथिभिःपतंतिगच्छंतिपंथानोमेघाःएवंभूतोमघैःसद्मार्गैरेव

वाआगतंनआगच्छत।किमर्थंमधोर्मदायसोमस्यमदार्थं।तत्रदृष्टांतःहंसोनयथाहंसाःस्वसराणिस्वकी
यानिवासस्थानानितोप्राप्नुवंतितद्वत्॥ब॥ ॥इतिद्वितीयस्यसप्तमेएकोनविंशोवर्गः॥ब॥अथषष्ठीमृचमाह
॥ब॥ ॥आनोब्रह्माणिमरुतःसमन्यवोनरांनशंसःसवनानिगंतन।अश्वामिवपिप्यतधेनुमूधनिकर्ता
धियंजरित्रेवाजपेशसं॥ब॥ ॥समन्यवःसमानमनसःसमानक्रोधावाहेमरुतधनास्माकंब्रह्माणिअन्न
नामेतत्।अन्नानिसवनानिअनिषुतसोमलक्षणानिहवींषिआगंतन।आगच्छत।गमेर्लोटिछांदसःशपो
लुक्।तप्तनप्तनथनाश्चेतितस्यतनबादेशः।अतएवङित्वाभावादनुनासिकलोपाभावः॥तत्रदृष्टांतः॥नराशं
सःनरामस्माकंशंसःशंसनीयंस्तोत्रंयथाआगच्छतद्वत्।नरशब्दात्षष्ठीबहुवचनस्यानित्यमारामशासन
मितिनुडभावः।शंसःकर्मणिघञ्।तत्रआद्युदात्तः।सुपांसुलुगित्यमःसुआदेशः।आगत्यचधेनुंउदकदानेनप्री

६१.७ णाधितारमंतत्वामिवपिप्यतयथाश्वापीनाचयवानवंतितद्वन्मेघंवर्षणसमर्थंआप्यायितंकुरुतेत्यर्थः॥
अपिवज्ररिन्नैःस्तोत्रैर्वाउपेशसंवाप्नेरन्नैराशिष्टंपिशअवयवोधियंकर्मकर्तृकुरुतकरोतेश्छांदसःशपो
लुक।हर्नवित्तछहस्यतवादेशः॥छ॥ अथसप्तमीमृचमाह॥छ॥ ॥तन्नोदातमरुतोवाजिनंरथआपानं
ब्रह्मचितयद्दिवेदिवे।इषंस्तोतृभ्योवृजनेषुकारवेसनिंमेधामरिष्टंदुष्टरंसहः॥छ॥ ॥हेमरुतःतंयुत्रं
नोस्मभ्यंदातदत्तप्रयच्छतछांदसः।शपोलुक्।कीदृशंवाजिनमन्नवंतंवारथेरंहणोयुष्मदीयेआगमान
निमित्तभूतेसतिदिवेदिवेप्रतिदिवसंचिंतयन्प्रज्ञापयन्युष्मद्गुणप्रख्यापकंब्रह्मस्तोत्रंआपानंआप्नुवं
तंअपिचइषमन्नंस्तोतृभ्योस्मभ्यंदातप्रयच्छततथावृजनेषुसंग्रामेषुकारवेस्तोत्रेवचनव्यत्ययः।शत्रुनि ५८
रहिंसितंदुस्तरंशत्रुभिस्तरीतुमशक्यंसहोबलंचप्रयच्छत॥छ॥ अथाष्टमीमृचमाह॥छ॥ ॥यद्युंजतेमरु

तोरुक्मवक्षसोश्वान्रथेषुभगआसुदानवः।धेनुर्नशिश्वेस्वसरेषुपिन्वतेजनायरातहविषेमहीमिषं॥छ॥ ॥
रुक्मवक्षसः।रोचमानानरणोरस्काः।सुदानवःशोभनदानामरुतःयद्यदारथेषुभगेभजनीयेस्थानेधुरीत्यर्थः।
अश्वानायुंजतेआभिमुख्येनयुक्तान्कुर्वन्तितदानीमेवरातहविषेदत्तहविष्काययजमानायमहीमहतीमि
षमन्नंतत्कारणभूतमुदकंवास्वसरेषुस्वकीयेषुगृहेषुपिन्वतेसिंचंतिकरंतिपिविसेचने।तत्रदृष्टांतः।
धेनुर्नशिश्वेयथाधेनुप्रस्नुतस्तनीमनास्तकीयायवत्सायवत्सायक्षीरंप्रयच्छतितद्वत्॥छ॥ अथनवमीमृच
माह॥छ॥ ॥योनोमरुतोवृकतातिमर्त्योरिपुर्दधेवसवोरक्षतारिषः।वर्त्तयततपुषाचक्रियाभितमव
रुद्राअशसोहंतनावधः॥छ॥ ॥हेमरुतःयोमर्त्योमनुष्यःवृकतातिआदानेवृकज्येष्ठाभ्यांतिलतातिलौ
चछंदसीतिस्वार्थिकस्तातिल्प्रत्ययः।तादृशःसन्नोस्मान्रिपुर्दधेरिपुतयाआत्मानंधारयति।हेवसावा

द्वि० ७ वासयितारोमरुतः।रिषोहिंसकादस्मान्रक्षतपालयतअस्माकंशत्रुभूतंमर्त्यंतपुषातापयित्र्याचक्रिया
कृष्याव्ययाशक्त्याअभिवर्त्तयत।हेरुद्राःरुद्रपुत्राःयद्वारोरूयमाणाद्रवंतः।अशसोनक्षकस्यअशसोज
नस्त्यस्माद्दोणादिकोसिप्रत्ययः।तादृशस्यराक्षसादेर्वधःहननसाधनमायुधंअवहंतनअवयुत्यास्म
त्तःपृथक्कृत्यनाशयत।हंतेर्लोटितिप्तनप्तनथनाश्चेतितनप्।।छ।।अथदशमीमृचमाह।।छ।। ।।चित्रंतद्वो
मरुतोयामचेकितेपृश्न्यायदूधरप्यापयोदुहुः।यद्वानिदेनवमानस्यरुद्रियास्त्रितंजरायजुरतामदाभ्याः
।।छ।। ।।हेमरुतःवोयुष्माकंचित्रंचायनीयंयामप्रापणंचेकितेसर्वैर्ज्ञायते।इदानींपरोक्षवदाह।अपिश
ब्दःप्रसिद्धौ।यद्यदाखलुपृश्न्याःमाध्यमिकायावाचःसंबंधिनंऊधःउदकंमेघंआपयःप्रापयितारोमरुतः ४९
दुहुःदुहंतिदुहेश्छांदसोलिट्बहुलंछंदसीतिचेतिवक्तव्यमितिद्विर्वचनाभावः।यद्वायदाचनवमानस्यस्तुवतःत्रि

तस्यनिदेनिंदकायशत्रवेहिंसायांऋतवंतइतिशेषः।निदिकुत्सायांक्विप्चेतिक्विप्।तदानींहेअदाभ्याःअहिं
स्याःरुद्रियाःरुद्रस्यपुत्रामरुतःत्रितमृषिंजुरताहिंसताशत्रूणांजरायजरणायविनाशायअभूतेतिशेषः
।।छ।। ।।इतिद्वितीयस्यसप्तमेविंशोवर्गः।।छ।। ।।अथैकादशीमृचमाह।।छ।। ।।तान्वोमहोमरुतएवयाव्नो
विष्णोरेषस्यप्रभृथेहवामहे।हिरण्यवर्णान्ककुहान्यतस्रुचोब्रह्मण्यंतःशंस्यंराधईमहे।।छ।। ।।हेमरु
तःएवयाव्नःएवंगंतव्यंस्तोत्रंयज्ञंवागच्छंतःमहइतिमहानुभावांस्तान्वोयुष्मान्विष्णोर्व्यापकस्यइद
चमसादिषुसर्वत्रव्याप्यवर्त्तमानस्यएषणीयस्यप्रार्थनीयस्यसोमस्यप्रभृथेप्रहरणेअभिषवादिनिःप्र
कर्षेणसंपादनेसतिहवामहेआह्वयामहिरण्यवर्णान्हितरमणीयवर्णत्वात्ककुहान्श्रेष्ठान्स्तुत्यात्वा
एवंभूतान्स्तोतायतस्रुचःयागायोद्यतस्रुचःब्रह्मण्यंतःब्रह्मस्तोत्रंतदिच्छंतोवयंशंस्यंप्रशंसनीयंराधोध

६० ७

नेईमहेयाचामहे॥ब॥ अथद्वादशीमृचमाह॥ब॥ ॥तेदशग्वाःप्रथमायज्ञमूहिरेतेनोहिन्वंतूषसोव्युष्टिषु
उषानरामीररुणैरपोर्णुतमहोज्योतिषाशुचतागोअर्णसा॥ब॥ ॥इमेरुतःदशग्वाःयेदशभिर्मासैःसि
द्धिंगताअंगिरसस्तपःकृत्वाप्रथमाआदित्येभ्यःप्रथमभाविनःसंतःयज्ञमूहिरेअवहन्‌आदित्यानामंगि
रसांचस्वर्गमिनंप्रतिस्पर्द्धमानानांमध्येपूर्वमेषामंगिरसोयागाननुष्ठायेस्वर्गंप्राप्ताःतथाचश्रूयते।आ
दित्याश्चैवह्वासन्नंगिरसश्चतेनेग्निनाग्निमयजंतेतितादृशास्तेउषसोव्युष्टिषुविवासेषुप्रभातेषुसंसुनो
स्मानहिन्वंतुप्रेरयंतुइंगितोदृष्टांतः।रामीःकृष्णवर्णाःरात्रीःउषानयथाउषाःअरुणैरारोचमानैःस्वतेजोभिः
अपोर्णुतेअपवृणोतेत्यपसारयतितथामहोमहताशुचतादीप्यमानेनगोअर्णसागच्छदुदकेनज्योति ५०
षासूर्यस्येनतमोनिवारयंतिसूर्यमंडलमावृतोवृत्रादीन्हत्वासर्वंजगत्प्रकाशयंतीत्यर्थः॥ब॥ अथत्रयो

दशीमृचमाह॥ठ॥ तेक्षोणीभिररुणेभिर्नांजिभीरुद्राऋतस्यसदनेषुवावृधुः।निमेघमानाअत्येनपाजसासुश्चंद्रं
वर्णंदधिरेसुपेशसं॥ठ॥ ॥रुद्रारुद्रपुत्रास्तेमरुतःक्षोणीभिःशब्दकारिभिर्वाणाख्यैःकृष्णवाणाविशेषैःअ
रुणेभिर्नांजिभिःनशब्दःसमुच्चयेआरोचमानैरुक्मवर्णैर्वारूपाभिव्यंजकैरलंकारैश्चसममन्विताःसंतःऋतस्यो
दकस्यसदनेषुनिवासस्थानेषुमेघेषुवावृधुःवर्द्धंतअपिचअन्येनसततगामिनाशीघ्रंव्याप्नुवतायाज
साआत्मीयेनबलेननिमेघमानाःनितरामेधाःइदंकंचिंतयंतःस्तेसुश्चंद्रंशोभनाह्लादनेषुपेशसंपे
शःसंपेशःइतिरूपनामशोभनरूपंवर्णंदधिरेकांतिंधारयंति॥ठ॥ अथचतुर्दशीमृचमाह॥ठ॥ ॥
तांइयानोमहिवरूथमूतयउपघेदेनानमसागृणामसि।त्रितोनयान्पंचहोतॄनभिष्टयआववर्तदव
राञ्चक्रियावसे॥ठ॥ ॥तान्मरुतोमहिमहत्वरूथ्यंवरणीयंप्रशस्तंधनंतन्मरुतःऊतयेरक्षणार्थं

१६० ७ इयानः इयानाः याचमाना वयं।सुपां सुलुगिति जसः सुः।एना अनेन नमसा नमस्कारेण स्तोत्रेण वा उपेत्य
पेत्य स्तृणीमसि स्तुमः।षेति पदस्सरणः।एनेत्यत्र सुपां सुलुगिति तृतीयाया आजादेशः।सप्तु च ये त्रितस्त्रिषि
ष्वयेनान् मरुतः पंचदशोदृन् अध्यात्मं प्राणापानादि पंचवृत्त्यात्मना वर्तमानान् अतएव ह्योमनिष्पा
दकान् अनिष्टये अभिलषितसिद्ध्यर्थं च क्रियानातिचक्रेण अवसे अवनं संगच्छ आवर्तनास्वस्मान्निर्जि
गमिश्र प्राणान् स्वात्माभिमुखमावर्तयेत्।यद्वा चक्रियास्त्र शूरव्येनायुधेन युक्तात् अवासं स्तुत्यादिभिः
तर्पयित्वमावर्तयत्।तान्सुमइतिशब्दस्रसंबंधः।वर्तवदिति निष्टनेस्यंताच्छुचि चंउरूपं॥७॥ अथ पंचदशी
मृचमाह॥७॥ ॥ययारधं पारयथात्यंहो यया निदो मुंचथ वंदितारं।अर्वाची सा मरुतो या व ऊतिरोषु ५१
वाश्रेव सुमतिर्जिगातु॥७॥ ॥हेमरुतः यया ऊत्या रधं मारकं यजमानं अंहः पापं अतिक्रमयथ।यया

ऊत्या वंदितारं स्तोतारं निंदो निंदकस्य शत्रोः सकाशात् मुंचथ मोचयथ।इमरुतो वो युष्मदीया या ऊतिः
सा अर्वाची अस्मदभिमुखा न वतु।तथा सुमतिर्युष्मदीया शोभना मतिः अनुग्रहात्मिका बुद्धिः स्ववाश्रे
व हंभारवं कुर्वती।धेनुरिव वत्सं सुष्ठु जिगातु एव गच्छतु।अस्मान् प्रतिसर्वथा आगच्छत्वित्यर्थः॥७॥
॥ ॥इति द्वितीयस्य सप्तमे एकविंशो वर्गः॥७॥ ॥उपेमिति पंचदशर्चं तृतीयं सूक्तं गार्त्समदं त्रैष्टुभमपां
नपाद्देवताकं।तथाचानुक्रांतं।उपेमपोन त्रियमिति।सूक्तविनियोगो लैंगिकः॥७॥ ॥तत्रेषा प्र
थमामृचमाह॥७॥ ॥उपेमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो गिरो मे।अपांनपादाशुहेमा कुवि
त्स सुपेशसस्करति जोषिषद्धि॥७॥ ॥वाजयुः वाजमन्नमात्मन इच्छन् अहं इमे नां वाचस्यां वचसः स्तो
त्रस्येच्छां उपासृक्षि उपासृजामि उत्पादयामि।अपांनपातं स्तोतुं प्रवृत्तोस्मीत्यर्थः।सृजेश्छांदसो लुङ्।

ऋ० ७ लिङ्सिचावात्मनेपदेष्विति सिचः कित्वाद्गुणाभावः स्वनाद्योनदीनांशब्दकारिणीनामेषस्थानमपांसंबंधी आ
शुहेमा आशुशीघ्रंगंता हिगतावित्यस्मादन्येभ्योपिदृश्यंतइतिमनिन्।एवंभूतोपांनपात् अपांपौत्रस्तू
नायन्।अद्भ्यओषधिवनस्पतयोजायंतेओषधिवनस्पतिभ्यएषोग्निर्जायतइतिपौत्रत्वं।एतत्संज्ञकोदेवः
गिरःगृणातीतिगीःस्तोत्राणिस्याममक्तकुवित्बहुनामैतत्।बहुलंचनःअन्नंदधात्दधातुविदधात्वप्र
यच्छत्वित्यर्थः।अपिवास्मान्सुपेशसःशोभनरूपान्शोभनालंकारान्वाकरतिकरोतु।करोतेर्व्यत्यये
नशप्।कःकरतकरतिरुधिरतेष्वनदितेविसर्जनीयस्यसत्वं।हियस्मादयंदेवःजोषिषत्स्तोत्राणि
सेवतेतस्मात्स्मानेवमनुगृह्णात्वित्यर्थः।जुषीप्रीतिसेवनयोः।लेट्यडागमः।विकरणःसिब्इडागमश्च ५२
हिचेतिनिघातप्रतिषेधः॥१॥अथद्वितीयामृचमाह॥१॥ ॥इमंस्वस्मैहृदआसुतष्टंमंत्रंवोचेमकु

विदस्यवेदत्।अपांनपादसुर्यस्यमह्नाविश्वान्यर्योभुवनाजजान॥१॥ ॥अस्मैअपांनपात्संज्ञकाये
देवायहृदोहृदयात्सुतष्टंसुष्ठुनिर्मितंइमंमंत्रंसुष्ठुआभिमुख्येनवोचेमब्रवाम।अस्यअस्मानिरुक्तमिमंमं
त्रंकुवित्।विदत्वेदत्बहुलंजानातु।वर्त्तेत्विड्डागमः।निपातैर्यद्यदिहंतेतिनिघातप्रतिषेधः।किंस्तोत्रमिति
चेदुच्यते।अयंस्वामीअपांनपात्संज्ञकोवैद्युतोग्निःअसुर्यस्यअसुरःशत्रून्हंतातस्यस्वभूतस्यबल
स्यमह्नामहिम्नामहत्वेनविश्वासर्वाणिभुवनाभुवनानिहृष्टकदकानिहृष्टक्रन्त्यादनेनभूतजातानिवा
जजानजनयामास।आपोनप्त्रीयेवसतीवरीसमापेवाधनाक्षुपामाक्षुसमन्यायंतीत्येषानुवक्तव्या।स्र
पितंत्वसमन्यायंत्स्फपयंत्यन्याइतितार्थदेशाइतिइतिसारस्वतेचशास्त्रेयद्यसुअभ्यानिपन्नंतदानीमपो
नप्त्रीयस्वरुःकार्यः।तात्रैषैवयाज्या।सूत्रितंच।समन्यायंत्यन्याइत्यातःसमानंसर्वेषामिति।१॥सैषास्तू

DR BHAU DAJI

५६० ७ कृतीयामृचमाह॥ब॥ ॥समन्यायंत्युपयंत्यन्याःसमानमूर्वंनद्यःपृणंति।तमूशुचिंशुचयोदीदि
वांसमपांनपातंपरितस्थुरापः॥ब॥ ॥अन्यावरिष्याआपःसंयंतिभूम्यासंगच्छंते।अन्याश्चपूर्वंतत्राव
स्थिताउपयंतिउपगच्छंतितानाःसर्वाःआपःसमानंसहनद्योनदीभूताःसर्वाःसमुद्रमध्येवर्त्तमानंवडवान
लंपृणंति।पृणप्रीणने।तोदादिकाः।तमुतामेवामांनपातंशुचिनिर्मलंदीदिवांसंदीप्यमानंदीप्यमानदी
देतिछांदसोदीप्तिकर्मा।लिटःक्वसुःवस्वेकाजाद्धसामितिनियमादिडभावः।छंदसिचेतिवक्तव्यमिति
वचनाद्द्विर्वचनाभावः।एवंभूतंशुचयःशुद्धाआपःपरितस्थुःपरिवृत्यतिष्ठंति।एषहिवैद्युताग्निरूपेणमे
घेवर्त्तमानोस्मानूर्जाजनदितिबुध्वावडवानलरूपेणवर्त्तमानंतंपर्युपासतइत्यर्थः।यद्वा।अन्याएकध ५२
नाख्याआपःसंयंतिचात्वालोत्करयोर्मध्येवसतीवरीभिःसंगच्छंते।अन्याःवसतीवर्याख्याआपश्चउपयं

तिउपगच्छंति।एकमत्यभासाभवंति।एताश्चमिलित्वायज्ञंसाधयंत्यस्यचाध्यदृष्टिद्वारानयोर्भूत्वाकुर्वंपृणं
तीत्यादिसमानं।एवंह्याम्नायोवाअस्पर्द्धंतवयंपूर्वंयज्ञंवक्ष्यामइत्यादिकंब्राह्मणंविनियोगश्चानुसृष्यते
॥ब॥अथचतुर्थीमृचमाह॥ब॥ ॥तमस्मेरायुवतयोयुवानंमर्मृज्यमानाःपरियंत्यापः।सशुक्रेभिःशि
क्वभीरेवदस्मेदीदायानिध्मोघृतनिर्णिगप्सु॥ब॥ ॥तमपांनपातमग्निंअस्मेराअस्मयमानाःदर्परहि
तायुवतयःयुवानंयुवराजमिवमर्मृज्यमानाःअत्यर्थमलंकुर्वाणाआपःमृजूशौचालंकारयोःपरि
यंतिपरितोगच्छंति।प्राप्नुवंति।घृतनिर्णिक्क्षरणशीलोदकनिर्णेजनः।यद्वानिर्णिगितिरूपनाम।दीप्ति
रूपःसोपांनपादग्निःअप्सुमेघांतर्गतासुसमुद्रगतासुवामध्येअनिध्मःइंधनरहितएवसन्सन्अस्मे
अस्माकंरेवद्धनयुक्तमन्नंयथाभवतितथाशुक्रेभिःशुभ्रैर्निर्मलैःशिक्वभिस्तेजोभिःदीदायदीप्यते॥

द्वि० ७ ॥अथपंचमीमृचमाह॥छ॥ ॥अस्मैतिस्रोअव्यथ्यायनारीर्देवायदेवीर्दिधिषंत्यन्नं॥कृताइवोपहि
प्रसर्स्रेअप्सुसपीयूषंधयतिपूर्वसूनां॥छ॥ ॥नारीर्नेत्र्यःतिस्रोदेवीर्देव्यःइळासरस्वतीभारत्या
ख्याःअव्यथायअव्यथनायास्मैदेवायापांतेअन्नंसोमाख्यंदिधिषंतिधारयंति।धिषशब्दे।जौहोत्यादिक
व्यत्ययेनांतादेशः।धातूनामनेकार्थत्वादत्रधारणार्थः।अप्सूदकेषुकृताइवउपप्रसस्रे।प्रसरंति।सृ
गतौ।लिटिईरयोरेइतिरेआदेशः।छांदसोइलादिशेषाभावः।यस्मादेवंतस्मात्पूर्वसूनांपूर्वब्रह्मणः
सकाशादुत्पन्नानामपांपीयूषंसारभूतंसोमाख्यममृतंसोपांनपादग्निर्धयतिपिबति॥छ॥ ॥इतिद्वि
तीयस्यसप्तमेद्वाविंशोवर्गः॥छ॥ ॥अथषष्ठीमृचमाह॥छ॥ ॥अश्वस्यात्रजनिमास्यचस्वर्द्रुहोरिषः ५४
संपृचःपाहिसूरीन्।आमासुपूर्षुपरोअप्रमृष्यंनारातयोविनशन्नानृतानि॥छ॥ ॥अत्रास्मिन्नपांन

पात्संज्ञकेदेवेअश्वस्यजनिमजन्मभवति।अपांनप्त्राचेतिष्ठितात्समुद्राच्चैश्रवसोजातत्वात्।किंबहुना
अस्यचस्वःसुष्ठुअरणीयस्यसर्वस्यजगतोजन्मास्मिन्नेवभवति।अयंहिमेघमध्येवर्त्तमानोवृष्टिक्षारे
णासर्वंजगज्जयतितादृशोपांनपात्वंद्रुहःद्रोग्धुरपद्रोग्धुरिषोहिंसकस्यचसंपृचःसंपर्कात्सूरीन्स्तोतॄनस्मा
न्पाहिरक्षआमासुअपरिपक्वासुपूर्षुपूरयितव्यासुप्सुपरःपरस्तात्वर्त्तमानंअप्रमृष्यंअप्रधृष्यमानं
देवंअरातयःअदातारःपुरुषाःनविशन्ननप्राप्नुवंति।नशतिर्व्याप्तिकर्मालेट्यडागमः।अनृतानिमा
यिनरक्षांसिचनप्राप्नुवंति॥छ॥अथसप्तमीमृचमाह॥छ॥ ॥स्वआदमेसुदुघायस्यधेनुःस्वधांपी
पायसुभ्वन्नमत्ति।सोअपांनपादूर्जयन्नप्स्वअंतर्वसुदेयायविधतेविभाति॥छ॥ ॥योअपांनपात्
स्वेदमेस्वकीयेगृहेअंतरिक्षेआसादनि।यस्यचधेनुर्माध्यमिकावाक्सुदुघासुखेनदोग्ध्व्याभवति॥

६०.७ सदेवःस्वधांहिऋद्कंपीपायवर्द्धयति।प्यायिवृद्धौ।लिटिछंदसिपीभावः।स्वन्तुस्वस्वरूपं।वृष्टेःसकाशमुत्प
न्नंहविर्लक्षणमन्नंचअत्तिभक्षयति।सोयांनपात्संज्ञकोदेवःऊर्जयन्बलंकुर्वन्अप्संतःमेघस्थास्वप्सुम
ध्येविभ्रतेपरिविरते।यजमानायवसुदेयायधनदानार्थंविभातिविशेषेणदीप्यते॥७॥अथाष्टमीमृचमा
ह॥८॥ ॥योअप्स्वाशुचिनादैव्येनऋतावाजस्रउर्वियाविभाति।वयाइदन्याभुवनान्यस्यप्रजायंतेवीरुधः
श्चप्रजाभिः॥८॥ ॥योअपांनपात्ऋतावाऋतमित्युदकनामतद्वान्सत्यवान्वाअजस्रोनित्यःएकरूपेण
सदावर्तमानःउर्वियाउरुविस्तीर्णःअप्सुमेघस्थास्वप्सुमध्येशुचिनाशोचकेनदैव्येनदेवसंबंधिनातेजसाआसमंता
द्विभातिविशेषेणप्रकाशते।अस्यापांनपातःअन्याअन्यानिभुवनानिसर्वाणिभूतजातानिवयाइत्शाखावय ५५
वाधनुंउषधयःप्रजाभिःपुष्पफलादिभिःसहअस्मादेवप्रजायंते।एवोक्तिःसारस्वतसत्रस्यापोनप्त्रीयेचरावपां

नपादाहीत्येषानुवाक्या।सूत्रितंच।अपांनप्त्रेचरुमपांनपादाह्यस्थादुपस्थमिति॥७॥सैषासूक्तेनवमीमृ
चमाह॥७॥ ॥अपांनपादाह्यस्थादुपस्थंजिह्मानामूर्ध्वोविद्युतंवसानः।तस्यज्येष्ठंमहिमानंवहंतीर्हिर
ण्यवर्णाःपरियंतियह्वीः॥८॥ ॥अपांनपादित्संज्ञकोग्निःउपस्थंअपामुपस्थानंअंतरिक्षंअपांह्यस्थात्आ
स्थितवानारूढवान्खलुकिंकुर्वन्जिह्मानांकुटिलगतीनामपांमध्येऊर्ध्वःस्वयमूर्ध्वंज्वलन्विद्युतंविद्यो
तमानंमेघंवसानःआच्छादयन्अंतरिक्षमास्थायवर्षणंकृतवान्तस्यवर्षितुरपांनपातःज्येष्ठंप्रशस्य
तमंमहिमानंमाहात्म्यंवहंतीःवहंत्यःसर्वत्रप्रापयंत्यःयह्वीर्यह्व्यःमहत्यःहिरण्यवर्णाःनदीनामैतत्।हि
रण्यवर्णानिर्मलरूपानद्यःपरियंतिपरितोगच्छंति।अपांनपात्रामइत्याहशिरसाकंप्रवरुणायोत्पादिताइतिकृ
तज्ञतयदीयंमहात्म्यंसर्वत्रप्रकटयंत्यइवनद्यःप्रवहंतीत्यर्थः॥८॥अथदशमीमृचमाह॥७॥ ॥हिर

५६० ७ ण्यरूपःसहिरण्यसंदृगपांनपात्सेदुहिरण्यवर्णः।हिरण्ययात्परियोनेर्निषद्याहिरण्यदाददत्यन्नमस्मै॥ब॥
॥ ॥सोऽपांनपात्हिरण्यरूपःरूप्यतइतिरूपंशरीरंसुवर्णमयशरीरःहितरमणीयःशरीरोवातथाहिरण्य
संदृक्सम्यक्पश्यंतीनिसंदृशइंद्रियाणिसुवर्णमयेंद्रियःहितरमणीं।यद्वियोवासङ्सएवापांनपात्
हिरण्यवर्णःहिरण्यसदृक्कांतियुक्तःएवंभूतःसन्हिरण्ययात्सुवर्णमयाद्योनेःस्थानात्पर्युपरिनिष
द्योपविश्यराजतइतिशेषः।अस्मैईदृग्विधायापांनपातेहिरण्यदाःदक्षिणारूपस्यसुवर्णस्यदातारोय
जमानाःअन्नंहविर्लक्षणंददातिप्रयच्छंति॥ब॥ ॥इतिद्वितीयस्यसप्तमेत्रयोविंशोवर्गः॥ग॥ ॥अथै
कादशीमृचमाह॥ग॥ ॥तदस्यानीकमुतचारुनामापीच्यंवर्धतेनप्तुरपां।यमिंधतेयुवतयःसमित्था ५६
हिरण्यवर्णंघृतमन्नमस्य॥ग॥ ॥अस्यापांनपुर्देवस्यअनीकंरश्मिसमूहरूपंशरीरंचारुशोभनं

उतअपिचअस्यनामसंज्ञाचचारुशोभनंपातयतिनचविनाशयतीतिनपादितितत्कल्पत्रेःतडुभयंअपा
च्यंअंतर्हितंसंवर्धतेयुवतयःसंगमनस्वभावाआपःहिरण्यवर्णंहिरण्यसमानतेजसंयमपांनपातमिद्धा
अत्रांतरिक्षेसमिंधतेसम्यग्दीपयंतिअस्यचदेवस्यघृतंरक्षणशीलमुदकमन्नंनत्वयंअबिंधनोह्यसौ
विद्युतोऽग्निः॥ब॥अथद्वादशीमृचमाह॥ब॥ ॥अस्मैबहूनामवमायसख्येयज्ञैर्विधेमनमसाहविर्भिः
संसानुमार्ज्मिदिधिषामिबिल्मैर्दधाम्यन्नैःपरिवंदऋग्भिः॥ब॥ ॥अस्मैप्रोवर्त्तिनबहूनांदेवानाम
वमायाधायसख्येअस्माभिःसमानाख्यानायापांनपातेयज्ञैर्यागसाधनैर्हविर्भिःचरुपुरोडाशादिभिः
नमसानमस्कारेणचविधेमपरिचरेमअस्यांनपातःसानुसमुच्छ्रितप्रदेशंसंमार्ज्मिसम्यक्शोधयामि
अलंकरोमिवा।मृजेःशौचालंकारयोःचादिलोपेविभाषेत्यस्यनिघातप्रतिषेधः।दिधिषारयामिचनित्यै

५६०७ र्भसानेःकाष्ठेरेनंधिषणाहे अयंधारणार्थो पिञ्जुहोत्यादित्वात्‌शपःश्लुः मिपोव्यत्ययेनाऽऽगमः अन्यस्या
नामादिरित्याग्रह दात्तत्वं दधामि धारयामि चेनं गार्हपत्यादिरूपेण अन्नैर्हविर्लक्षणैः तथाऽऽहुतिभिस्तिमि
त्रैः परिवीर्दपरिस्तोमि॥१२॥ अथत्रयोदशीमृचमाह॥१३॥ ॥स ईं वृषाजनयत्तासुगर्भंस ईं शिशुर्धयति
तंरिहंति। सोअपांनपादनभिम्लातवर्णोन्यस्येवेहतन्वाविवेष॥१३॥ ॥स ईं सोयमपांनपात्संज्ञ
कोदवः वृषासेक्ता भूत्वातासुमेघस्थास्वप्सुगर्भमजनयत्स्वात्मानमेवरूपेण वर्षणार्थंकृतवानित्य
र्थः गर्भोभूत्वाचस ईं सोयंमाध्यमकोविद्युतोग्निः तासांशिशुः पुत्रः सन्धयतिमेघस्थास्ताः पिबति अ
पिंधनोघ्नसौतंपुत्रस्थानीयमग्निंआपश्चरिहंतिलिहंति। लिहआस्वादने कपिकत्वादित्वाल्लत्वविकल्पः
सोयमपांनपात्इहास्मिन्‌लोकेनिपतितः अनभिम्लानवर्णः अनितोम्लानोम्लानः क्षीणोवर्णोयस्यतादृ

परीतोस्वयं दीप्यमानः सन्निहाद्यास्मिंल्लोके अन्यस्येव इवशब्दोवधारणे॥ अन्यस्यपार्थिवस्यैवाग्नेस्तन्वाशरी
रेण काष्ठेंधनलक्षणेन विवेशव्याप्नोबभूव। विष्टृव्याप्तौ॥१४॥ अथचतुर्दशीमृचमाह॥१५॥ ॥अस्मिन्प
देपरमेतस्थिवांसमध्वस्मभिर्विश्वहादीदिवांसं। आपोनप्त्रेघृतमन्नंवहंतीः स्वयमत्कैःपरिदीयंतियह्वीः॥१४॥
॥ ॥परमेउत्कृष्टेस्मिन्पदेंतरिक्षलक्षणेस्थानेतस्थिवांसंस्थितवंतं अध्वस्मभिःध्वंसनरहितैस्तेजोभिः वि
श्वहासर्वाण्यहानि दीदिवांसंदीप्यमानमपांनपातंयह्वीर्यह्व्योमहत्यः आपःस्वयमात्मानेवअत्कैरत
तनशीलैःसततगंतृभिःस्वकीयैरूपैःपरिदीयंतिपरिगच्छंति। दीयतिर्गतिकर्मा। दीङ्क्षयेव्यत्ययेनपरस्मै
पदं किंकुर्वत्यःनप्त्रेअपांनपातेघृतंक्षरणशीलोदकात्मकं अन्नंवहंतीर्वहंत्य॥१५॥ अथपंचदशीमृचमा
ह॥१६॥ ॥अयांसमग्नेसुक्षितिंजनायायांसमुमघवद्भ्यःसुवृक्तिं। विश्वंतद्भद्रंयदवंतिदेवाबृहद्वदेमवि

DR BHAU DAJI ५५

द्वि० ७ दथेसुवीराः॥छ॥ ॥हेअग्नेसुक्षितिशोभननिवासत्वांअयंसमुपागच्छंकिमर्थंजनायास्मदीयपुत्रादिज
नार्थंतथामघमघःइतिधननामधनयुक्तेभ्योयजमानेभ्यश्चसुवृक्तिंशोभनावर्जकंत्वद्विषयंस्तोत्रंअयंसमु
पागच्छंयमंपरमे।अतःकारणात्यद्वदइदंसर्वेदेवाअवंतिरक्षंतिविश्वंसर्वंतत्इदमस्माकंसनवत्।सुवीराःसुपु
त्रावयंविदथेयज्ञेबृहद्वाबहुप्रौढंस्तोत्रंवदेमउच्चारयाम॥छ॥ ॥इतिद्वितीयस्यसप्तमेचतुर्विंशोवर्गः॥
॥छ॥ ॥तुभ्यमितिषळृचंचतुर्थंसूक्तंगार्त्समदंजागतंप्रथमायाइंद्रोमधुश्चदेवताद्वितीयामरुतोमाध
वश्चतृतीयायास्त्वष्टाशुक्रश्चचतुर्थ्याअग्निःशुचिश्चपंचम्याइंद्रोनभश्चषष्ठ्यामित्रावरुणौनभस्यश्च॥छ॥तथा
चानुक्रांतं।तुभ्यंषळृतव्यंजागतमिति॥दशरात्रेषष्ठेहनिऋतुयागेषुऋतुकराकैःप्रैषैःप्रैषितव्यंयष्टव्यं ५८
च।तत्राद्यानांषण्णांप्रैषाणामुपरिष्टाद्देवताःषळृचोद्रोणाद्यादिभिःक्रमेणावपनीयान्तथाचसूत्रितं।उपरि

ष्टाद्धृचस्तत्रयाज्यानामित्यकपक्रम्यतुभ्यंहिन्वानोवसिष्टगाअपइतिद्वादशेत्यंतेन॥छ॥तत्रैषाप्रथमामृचमा
ह॥छ॥ ॥तुभ्यंहिन्वानोवसिष्टगाअपोधुक्षन्सीमविभिरद्रिभिर्नरः।पिबेंद्रस्वाहाप्रहुतंवषट्कृतंहोत्रा
दासोमंप्रथमोयईशिषे॥छ॥ ॥हेइंद्रतुभ्यंत्वदर्थंहिन्वानःप्रेर्यमाणःसोमःगाःगोविकाराणिदधिपयःप्र
भृतानिश्रयणद्रव्याणिवसतावसतीवर्याख्याअपश्चवसिष्टवस्तेआच्छादयतितैःसंयुज्यतइत्यर्थः।नारायज्ञस्य
नेतारोध्वर्यवश्चसीमेनंसोमंअविभिःअवेर्वालमयैर्दशापवित्रैःअद्रिभिर्ग्रावभिश्चअधुक्षन्अक्षारयन्॥
ग्रावभिरभिषुत्यदशापवित्रेणपुनंतीत्यर्थः।हेइंद्रयस्त्वमाईशिषेसर्वस्यजगतईश्वरोभवसित्वंप्रथमःअ
न्येभ्योदेवेभ्यःपूर्वभावीसन्स्वाहाकारेणप्रहुतंप्रकर्षेणाग्नौहिप्रंवषट्कृतंवषट्कारेणचत्यक्तंसोमंहोत्रा
त्होतुर्यागादासमंतात्पिब॥छ॥अथद्वितीयामृचमाह॥छ॥ ॥यज्ञैःसंमिश्लाःपृषतीभिरृष्टिभिर्यामंछुभ्रा

८ हू० ७ सोमंजिष्ठ प्रियावत । आसद्या बर्हिर्भरतस्य सूनवः पोत्रादा सोमं पिबता दिवो नरः ॥७॥ ॥ हे मरुतो ये इं
र्यागैः संमिश्लाः संयुक्ताः स्थत । भिः स्ववाहनभूताभिः पृषद्भिर्वडवाभिर्युक्ते यमिन्यामनि गमनसा
धने रथे वस्थिताः शुष्टिभिः स्वकार्यैरायुधैः शुभ्रा मरुतः शुभ्राः शोभमनाः भवनशब्दश्चार्थे । अंजिषु आभरणेषु प्रि
याश्च हे नरः तस्य सूनवः सर्वस्य जगतो नेतुः रुद्रस्य पुत्राः दिवो नरः दिवोंतरिक्षस्य नेतारः एवंभूता हे मरु
तः ते यूयं बर्हिः आस्तीर्णे बर्हिषि आसद्य उपविश्य पोत्रात् पोतुर्यागात् सोममापिबत । तृतीयसवने अ
मेव न इत्येषा नेष्टुः प्रस्थितयाज्या । तथा च सूत्रितं । अमेव नः सुहवा आ हि गंतनेत्याविष्टू पिबतं मध्वो अ
स्येति ॥७॥ सैषा तृतीया ऋगमाह ॥७॥ ॥ अमेव नः सुहवा आ हि गंतन नि बर्हिषि सदतना रणिष्टन । अ ५९
था मंदस्व जुजुषाणो अंधसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ॥७॥ ॥ इवशब्दो वधारणे । हे सुहवाः शो

भनाह्वानाः त्वष्टृप्रभृतयः नोस्मान् अमेव सा इव आ गंत आगच्छत । गमेश्छांदसः शपो लुक् । तप्तनप्तनथनाश्चे
ति तनबादेशः । हि शब्दः पूरणः । आगत्य च बर्हिषि विद्यामास्तीर्णे निषदन निषण्णा भवत । सदेश्छांदसः सीदादेशा
भावः । उपविश्य च रणिष्टन रमध्वं । रणः शब्दार्थः । अत्र क्रीडायां वर्तते धातूनामनेकार्थत्वात् । अस्माच्छांदसो लुङ् । इट
र्व वत्तनबादेशः । अथानंतरं हे त्वष्टः देव जिनिभिः अन्यैर्देवैः जनिभिर्देवपत्नीभिश्च सुमद्गणः शोभनगणस्त्वं अंधसः
सोमलक्षणस्यान्नस्य द्वितीयार्थे षष्ठी । सोमलक्षणमन्नं जुजुषाणः सेवमानो मंदस्व हृष्टो भव ॥७॥ अथ चतुर्थी
मृचमाह ॥७॥ ॥ आ वक्षि देवाँ इह विप्र यक्षि चोशन्होतर्नि षदा योनिषु त्रिषु । प्रति वीहि प्रस्थितं सोम्यं मधु
पिबाग्नीध्रात्तव भागस्य तृप्णुहि ॥७॥ ॥ हे विप्र मेधाविन्नग्ने देवान् यष्टव्यान् इंद्रादीन् आवक्षि आवह । य
क्षि च तान् यज च । हे होतः देवानामाह्वातः त्वं च उशन् अस्मदीयं कामयमानः सन् त्रिषु योनिषु स्थानेषु गार्हपत्या

दृ॰७ दक्षिणेभ्युनिषीदतउपविशउपविश्यचप्रस्थितंहोमार्थमुत्तरवेदिंप्रत्यानीतंसोम्यंसोममयंमधुप्रतिवीहि
प्रतिवीहिप्रतिकामयस्वकामयित्वाचआग्नीध्रादग्नीधोयागात्सोमंविषपीत्वाचतवजावगाम्यत्वदीये
नभागेनतृप्नुहिसोमव॥छ॥ अथपंचमीमृचमाह॥छ॥ ॥एषस्यतेतन्वोनृम्णवर्द्धनःसहओजःप्रदि
विबाह्वोर्हितः।उभ्यंसुतोमघवन्तुभ्यमाभृतस्त्वमस्यब्राह्मणादातृपत्पिब॥छ॥ ॥हेइंद्रस्यःसःएष
सोमःतेतवतव शरीरस्यनृम्णवर्द्धनःबलस्यवर्द्धकःउभ्यंसुतइत्यत्रसंबंधःयेनसोमेनप्रदिविबाहु
वोस्त्वयिबाह्वोर्हस्तयोःसहःपरेषामभिभवनलक्षणंसामर्थ्यंओजस्तत्कारणभूतंबलंचहितःनिहितंभ
वतिलिंगव्यत्ययःहेमघवन्धनवन्निंद्रउभ्यंत्वदर्थंतादृशःसोमःसुतोध्वर्युभिरभिषुतःउभ्यंतेआभृतः ६०
उत्तरवेद्यांप्रत्याहृतश्चअस्यइमंसोमंब्राह्मणात्ब्राह्मणाछंदसिनोपोगात्दातृपतदृप्यस्त्वंआपिबआभि

मुख्येनक्रियायग्रहणंकर्तव्यमितिकर्मणःसंप्रदानत्वादस्येतिचतुर्थ्यर्थेषष्ठी॥छ॥ अथषष्ठीमृचमाह॥छ॥ ॥
जुषेथांयज्ञंबोधतंहवस्यमेसत्तोहोतानिविदःपूर्व्याअनु। अच्छाराजानानमएत्यावृतंप्रशास्त्रादापिबं
तंसोम्यंमधु॥छ॥ ॥हेमित्रावरुणौमदीयमिमंयज्ञंजुषेतांसेवेतांथां।मेममहवस्यहवमाह्वानंहव
वत्कर्मणिषष्ठी।बोधतमवगच्छतं।तथासत्तानिषण्णोस्मदीयोहोतापूर्व्याश्चिरंतनीःनिविदःवाङ्नामेतत्।
शास्त्रलक्षणावाचःअनुशंसतीतिशेषःउक्तादभिःस्तुतस्यस्तोत्रस्यानुगुण्येनआख्यादीनिशास्त्राणिशंस
तीत्यर्थःअपिचनमःसोमलक्षणमन्नंआवृतंआवृत्विग्भिर्वेष्टितंराजानाराजमानौयुवांअच्छाभिमुख्ये
नएतिगच्छतिप्राप्नोतितादृशंसोम्यंसोममयंमधुमादकंहविःप्रशास्त्रात्प्रशास्तुर्यागात्आपिबतंआ
भिमुख्येनपिबतं॥छ॥ ॥इतिद्वितीयस्यसप्तमेपंचविंशोवर्गः॥छ॥ ॥छ॥ ॥इतिश्रीमद्राजाधिरा

द्वि० ७ जपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कनृपालसाम्राज्यधुरंधरेणसायणाचार्यविरचितेमाध
वीयेवेदार्थप्रकाशेऋक्संहिताभाष्येद्वितीयाष्टकेसप्तमोऽध्यायः॥ ॥समाप्तः॥छ॥ ॥छ॥
॥छ॥ ॥श्री॥ ॥यादृशमितिन्यायान्नमेदोषः॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥

द्वितीयाष्टकसप्तमाध्यायभाष्य।

६१

द्वि० ८

द्वितीयाष्टकाष्टमाध्यायभाष्य।

द्वि० ८

ऋ॰ ८

॥छ॥ ॥इतिद्वितीयस्याष्टकस्याष्टमोऽध्यायआरभ्यते॥छ॥ ॥यस्यनिःश्वसितंवेदायोवेदेभ्योऽखिलंजगत्।निर्-
ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥छ॥ ॥द्वितीयमंडलस्यचतुर्थानुवाकेमंदस्वेतिषडृचंपंचमंसूक्तंगार्त्स-
मदं।मंदस्वेत्यनुक्रांतं।पूर्वत्रऋतव्यंतुजागतंत्वितितुशब्दप्रयोगादिदमपिजागतमृतव्यं।तत्राद्याश्चतस्र
ऋचोद्रविणोदोदेवताकाःपंचम्याश्विनीषष्ठ्याग्नेयी।दशरात्रेषष्ठेहनिऋतुयाजेषुप्रैषादिकशिरस्कानृतूनला
तेःप्रैषेःप्रैषितव्यंयष्टव्यंचतत्रसप्तम्यादीनांप्रैषाणामुपरिष्टात्मंदस्वेत्याद्याःषडृचोव्यत्क्रमेणप्रक्षेपणी-
याःसूत्रंतुपूर्वामवोदाहृतं॥छ॥तत्रप्रथमामृचमाह॥छ॥ ॥मंदस्वहोत्रादनुजोषमंधसोऽध्वर्यवःसपूर्णां
वष्ट्यासिचं।तस्माएतंभरततद्वशोददिर्होत्रात्सोमंद्रविणोदःपिबऋतुभिः॥छ॥ ॥हेद्रविणोदःद्रविणसो
धनस्यदातःएतन्नामकदेवअंधसःदेवानामन्नरूपस्यसोमस्यसोमेनहोत्रात्होतृकर्तृकाद्यागात्अनु

DR. BHAU DAJI MEMORIAL

जोषंप्रीतिमनुमंदस्व।हेअध्वर्यवःसद्रविणोदाःपूर्णांआसिचंसिच्यमानाहुतिंवष्टिकामयतेअतस्तस्मै
द्रविणोदसेऽग्नयेएतंसोमंभरतआपयततद्वशस्तत्कामोद्रविणोवाःददिर्ददातियुष्माकमभीष्टफलस्य
दाताभवतीतिशेषः।किंचहेद्रविणोदःहोत्रात्होतृयागात्ऋतुभिःइषमासादिभिःऋतुदेवैःस
हसोमंपिब॥छ॥अथद्वितीयामृचमाह॥छ॥ ॥यमुपूर्वमहुवेतमिदंहुवेसेदुहव्योददिर्योनामप-
त्यते।अध्वर्युभिःप्रस्थितंसोम्यंमधुपोत्रात्सोमंद्रविणोदःपिबऋतुभिः॥छ॥ ॥हेद्रविणोदःयमुयं
त्वामेवपूर्वंहोतृकर्तृकेसोमयागेहुवेआहूतवानस्मिइदंसंप्रतितंत्वामेवपोतृकाकेसोमयागेहुवे
आह्वयामि॥सतुसएवद्रविणोदाःहव्यःह्वातव्यःउइतिपूरणः।ददिरभीष्टफलस्यफलस्यदातायोना
मयःखलुपत्यतिदेवतात्वेनेष्टेतस्मैद्रविणोदसेसोम्यंसोमात्मकंमधुअध्वर्युभिःप्रस्थितंप्रणीतमा

५६०८ सीतहेद्रविणोदपोत्रात्पोतुर्यागात्ऋतुभिःऋतुसंज्ञकैःसहसोमंपिब॥७॥अथतृतीयामृचमाह॥
॥७॥ ॥मेद्यंतुतेवह्नयोयेभिरीयसेरीषण्यन्वीळयस्वावनस्पते।आयूयाधृष्णोअभिगूर्यात्वंने
ष्ट्रात्सोमंद्रविणोदःपिबऋतुभिः॥७॥ ॥हेद्रविणोदःयेभिर्येर्वह्निभिःईयसेप्राप्नोषितेतववह्नयोवो
ढारइतियास्केनोक्तत्वात्।तोमद्यंतुहृष्यंतुहेवनस्पतेवनानांपतेअरिषण्यन्अहिंसन्वीळयस्वदृढी
भव।हेधृष्णोधर्षकत्वंआयूयआगत्यअभिगूर्यउद्यम्यनेष्ट्रात्नेष्टुर्यागात्ऋतुभिःसहसंज्ञाकैःस
हसोमंपिब॥७॥अथचतुर्थीमृचमाह॥७॥ ॥अपाद्धोत्रादुतपोत्रादमत्तोतनेष्ट्रादजुषतप्रयोहितं॥
तुरीयंपात्रममृक्तममर्त्यंद्रविणोदाःपिबतुद्राविणोदसः॥७॥ ॥अच्छावाकस्यैवायंद्रविणोदाःहो २
त्रात्होतुर्यागात्सोमस्यपानंपीतवान्उतकिंचपोत्रात्पोतुर्यागात्अमत्तसोमंपीत्वाअमाद्यत्॥

उतअपिचनेष्ट्रात्नेष्टुर्यागात्हितंदत्तंप्रयःदेवानामन्नरूपंसोमंअजुषत।असेविष्ट।सद्रविणोदसःद्र
विणसःद्रविणस्यप्रदातुःऋत्विग्भ्योहितःऋत्विजोत्रद्रविणोदसउच्यंतेहविषोदातारश्चेतियास्केनोक्तत्वा
त्।तादृशोद्रविणोदाःअमृक्तंदशापवित्रेणामृष्टंअमर्त्यंअमरणसाधनंतुरीयंपात्रंचतुर्थंपात्रस्थंसोमं
पिबतु॥७॥अथपंचमीमृचमाह॥७॥ ॥अर्वांचमद्ययय्यंनृवाहणंरथंयुंजाथामिहवांविमोचनं।पृ
ङ्क्तंहवींषिमधुनाहिकंगतमथासोमंपिबतंवाजिनीवसू॥७॥ ॥हेअश्विनौअद्यास्मिन्नहनिययं
यिंगंतारंनृवाहणंनेत्रोयुवयोर्वोढारंइहयज्ञेवायुवायोर्विमोचनंविमोचयितारंरथंअर्वांचिपथावर्ति
वतितथायुंजाथां।किंचमधुनास्वादुरसेनहवींषिपृक्तंसंयोजयतंअथचआगतंआगच्छतं।हिकमितिपू
रणे।अथानंतरंहेवाजिनीवसूवाजएवाजिनीअन्नेनवासयितारौबलवर्द्धनौवासोमंपिबतं॥७॥ ॥

६०८ अथषष्ठीमृचमाह॥७॥ ॥जोष्यग्नेसमिधंजोष्याहुतिंजोषिब्रह्मजन्यंजोषिसुष्टुतिं।विश्वेभिर्विश्वाँ
ऋतुनावसोमहउशान्देवाँउशतःपाययाहविः॥७॥ ॥हेअग्नेसमिधंजोष्याहुतिंजोषिजुषस्वब्रह्म
शास्त्रंजन्यंजनेभ्योहितंजोषिजुषस्वसुष्टुतिंशोभनस्तोत्रंजोषिजुषस्व।किंचवसोसर्वेषामावासभूत
हेअग्नेउशतःकामयमानान्महःमहतःविश्वान्सर्वान्देवान्उशत्कामयमानस्त्वंऋतुनांतपस्य
संज्ञकेनसहतथाविश्वेभिःसार्वादिवैःसहहविःहवीरूपंसोमंपायय॥७॥ ॥इतिद्वितियस्याष्टमेप्र
थमोवर्गः॥७॥ ॥उडुष्यइत्येकादशर्चंषष्ठंसूक्तंगार्त्समदंत्रैष्टुभंसवितृदेवताकं।अत्रानुक्रमणिका।
उडुष्यएकादशसावित्रमिति।व्यूढेदशरात्रेषष्ठेहनिवैश्वादेवशस्त्रएतत्सूक्तंसावित्रनिविद्धानियं।व्यू २
ढश्वेदितिखंडेसूत्रितं।एष्ठस्योडुष्यदेवइतिगार्त्समदंशंसि॥७॥तत्रप्रथमामृचमाह॥७॥ ॥उडुष्यदेवः

सवितादिसवायशश्वत्तमंतदपावह्निरस्थात्।रत्नंदेवेभ्योविदधातिरत्नमथाभजद्वीतिहोत्रंस्वस्तौ॥७॥ ॥
स्यःसदेवोद्योतमानःसवितासवायलोकानांप्रसवायअनुज्ञायशश्वत्तमंप्रतिदिनंउदस्थात्उत्तिष्ठति।की
दृशःसवितातदपातत्प्रसवकर्म।अपःअप्नइतिकर्मनामसुपाठात्।वह्निर्वोढाजगतां।किंचनूनंसंप्रति
देवेभ्यःस्तोतृभ्योरत्नंधनंविदधातिप्रयच्छति।दातिश्रवणात्।अथअपिचवीतिहोत्रंकांतयज्ञंयजमानंस्वस्तौ
अविनाशेक्षेमेआभजाभागिनंकरोतु।यद्यपिस्वस्तिशब्दोविभक्त्यंतनिर्दिष्ट।शाब्दःपरस्तथाप्यपर्यवसा
नादर्थपरोभवति॥७॥अथद्वितीयामृचमाह॥७॥ ॥विश्वस्यहिश्रुष्टयेदेवऊर्ध्वःप्रबाहवापृथुपाणिः
सिसर्ति।आपश्चिदस्यव्रतआनिमृग्राअयंचिद्वातोरमतेपरिज्मन्॥७॥ ॥देवोद्योतमानःसवितापृथु
पाणिःमहत्करःविश्वस्यश्रुष्टयेजगतःसुखायऊर्ध्वउन्नतःसन्बाहवाबाहूप्रसिसर्तिप्रसारयतिआपश्चि

ऋ०८ त्रआपोपिअस्यव्रतेप्रसवाख्येकर्मणिसतिव्रतंकर्वरमितितन्नामसुपाठात्।आस्यंदनइतिशेषः।ताश्च
निमृग्राःनितरांशोधयित्र्यःगंगादिरूपेणजगत्पावयंतीत्यर्थः।अयंचिद्वातःअयमपिवायुःपरिज्मन्परि
तोगतेव्याप्तेंतरिक्षेरमते॥ग॥अथतृतीयामृचमाह॥ग॥ ॥आशुभिश्चिद्यान्विमुचातिनूनमरीरमद
तमानंचिदेतोः।अह्यर्षूणांचिन्न्ययाँअविष्यामनुव्रतंसवितुर्मोक्यागात्॥ग॥ ॥यान्गच्छन्सवि
ताआशुभिश्चित्शीघ्रगामिभिरपिरश्मिभिर्विमुचातिविमुच्यतेनूनमितिस्मरणः।अतमानंचित्सततं
गच्छंतमपिजनंएतोर्गमनात्अरीरमत्उपरमयति।किंचअह्यर्षूणांअहिमानंहंतारंशत्रुंअर्षतिअभि
गच्छंतीत्यह्यर्षवः।तेषामपिअविष्यांगमनेच्छांन्ययान्नियच्छतिसवितुःप्रेरकस्यसूर्यस्यव्रतंकर्मअनु ४
पश्चात्।मोकीरात्रिःमोकीशोकीतिरात्रिनामसुपाठात्।आगात्आगच्छतिसवितुश्चेष्टापरतोरात्रिरागच्छतीति

यावत्॥ग॥अथचतुर्थीमृचमाह॥ग॥ ॥पुनःसमव्यद्विततंवयंतीमध्याकर्तोर्न्यधाच्छक्मधीरः।उत्सं
हायास्थाद्व्यृतूँरदर्धररमतिःसवितादेवआगात्॥ग॥ ॥वयंतीवस्त्रंवयंतीनारीवरात्रिःविततमा
लोकंपुनःसमव्यत्संवेष्टयतेपुनःशब्दःपूर्वेद्युरप्येवमकार्षीदितिद्योतयति।धीरःप्राज्ञोपिसर्वो
लोकःकर्तोःक्रियमाणंकर्मकर्तोःकर्तव्यइतितन्नामसुपाठात्।शक्यंकर्तुंशक्यमपिमध्यामध्ये
प्रक्रांतंकर्मअपरिसमाप्येतीत्यर्थः।न्यधात्निहितवान्सवितर्युपरतइतिशेषः।सर्वोलोकःसंहा
यशय्यांविहायउदस्थात्अवशिष्टंकर्मकर्तुंपुनरुत्तिष्ठति।संहर्त्ताजहातिःशय्यापरित्यागेवर्त
ते।तथाचश्रूयते।कलिःशयनोभवति।संजिहानस्तुद्वापरइति।सवितासर्वस्यप्रसवितासूर्यःअरम
तिःअनुपरतिःदेवःद्योतमानःआगात्।आगच्छति।उदेतीतियावत्।ऋतून्कालविशेषांश्चव्यदर्धीत्।

६०८ विदारयतीति॥छ॥अथपंचमीमृचमाह॥छ॥ ॥नानौकांसिदुर्योविश्वमायुर्वितिष्ठतेप्रभवःशोकोअ
ग्नेः।ज्येष्ठंमातासूनवेभागमाधादन्वस्यकेतमिषितंसवित्रा॥छ॥ ॥प्रभवःप्रभूतःअग्नेःशोकःते
जः।दुर्यःगृह्यःगृहेभवः।नानौकांसियजमानानांपृथग्भूतान्गृहान्वितिष्ठतेअधितिष्ठति।विश्वमायुःसर्वम
न्नंचाधितिष्ठति।आयुरन्नमित्यन्ननामसुपाठात्।माताउषाःसवित्राअन्विषितंप्रेषितंअस्यकेतं
प्रज्ञापकंअग्नेःज्येष्ठंप्रथमंअग्निहोत्राख्यंभागंसूनवेअग्नयेअधात्आदधाति॥छ॥ ॥इतिद्वि
तीयाष्टमेद्वितीयोवर्गः॥छ॥ ॥अथषष्ठीमृचमाह॥छ॥ ॥समाववर्तिविष्ठितोजिगीषुर्विश्वेषां
कामश्चरताममाभूत्।शश्वाँअपोविकृतंहित्व्यागादनुव्रतंसवितुर्दैव्यस्य॥छ॥ ॥जिगीषुःवि ५
जयेछुर्योद्धाविष्ठितःयुद्धार्थंप्रस्थितःसमाववर्तिसमाववर्तयतिविश्वेषांसर्वेषांचरतांजंगमानां

अमाअमादमइतिगृहनामसुपाठात्।गृहंप्रतिकामोभूत्भवतिशश्वान्नित्यंकर्मरतोअपःकर्मविकृ
तंअर्धकृतंहित्वीहित्वाआगात्गृहमागच्छतिएतत्सर्वंदिव्यस्यदिविभवस्यसवितुःप्रेरकस्यसूर्यस्य
व्रतंअस्तमयाख्यंकर्मानुज्ञायतइत्यर्थः॥छ॥अथसप्तमीमृचमाह॥छ॥ ॥त्वयाहितमप्यमप्सु
भागंधन्वान्यामृगयसोविशुः।वनानिविभ्योनकिरस्यव्रतानिव्रतादेवस्यसवितुर्मिनंति॥छ॥ ॥
हेसवितस्त्वयाअप्सुअंतरिक्षेआपःपृथिवीतिअंतरिक्षनामसुपाठात्।जलाधारत्वाद्धितंअप्यम
प्स्वसंबंधिनंभागंधन्वानुनिर्जलप्रदेशेषुअरण्येषुयथामृगयसोमृगयमाणामृगाःआसमंतात्वि
तस्थुरधितिष्ठंतिकिंचवनानिवृक्षान्विभ्यःपक्षिभ्यःआवासादिरूपेणत्वयाभागोदत्तःअस्यईशःता
नितादृशानिव्रतानाव्रतानिकर्माणिनकिर्मिनंतिकोपिनहिंसंति॥छ॥अथाष्टमीमृचमाह॥छ॥ ॥

द्वि० ८ याद्राध्यंवरुणोयोनिमप्यमनिशितंनिमिषिजर्भुराणः।विश्वोमार्तंडोव्रजमापशुर्गात्स्थशोजन्मानि
सविताव्याकः॥ब॥ ॥वरुणःयाद्राध्यंयातांगछतांराध्यंसंराधनीयंअप्यप्राप्तंयोग्यंअनिशितं
अतीक्ष्णंसुखकरमितियावत्।योनिंस्थानंनिमिषिनिमेषसवितरस्तमयेसतिविश्रमार्थंप्राणिभ्यःप्र
यच्छतिवरुणस्यरात्रेनिवेशिकत्वात्।जर्भुराणोभृशंगच्छन्विश्वःसर्वोमार्तंडोमृतान्निन्नादंडादुत्प
द्यमानःपक्षीआगात्आगच्छति।विश्वःपशुरपिव्रजंगोष्ठमागात्सवितापेरकःस्थशःस्थानेस्थानेज
न्मानिजातानिभूतानिव्याकःस्थशःस्थानेस्थानेजन्मानिजातानिभूतानिव्याकःपृथक्कार्षीत्॥ब॥
अथनवमीमृचमाह॥ब॥ ॥नयस्येंद्रोवरुणोनमित्रोव्रतमर्यमानमिनंतिरुद्रः।नारातयस्तमि ६
दंस्वस्तिहुवेदेवंसवितारंनमोभिः॥ब॥ ॥यस्यसवितुर्देवस्यव्रतंप्रसवाख्यंकर्मइंद्रोनमिनाति

नहिनस्तिवरुणश्चनमिनातिमित्रश्चार्यमानमिनातिरुद्रश्चनमिनातिअरातयोसुराश्चनमिनंतिमिनातीति
क्रतमाख्यातं।यथायोगंविपरिणामेनप्रत्येकमभिसंबध्यते।तंसवितारंसर्वस्यप्रेरकंदेवंद्योतमानंइद
मिदानींनमोभिरन्नरूपैर्हविर्भिःसहनमःआयुरित्यन्ननामसुपाठात्।स्वस्तिक्षेमायहुवेस्तौमि॥ब॥अथ
दशमीमृचमाह॥ब॥ ॥भगंधियंवाजयंतःपुरंधिंनराशंसोग्नास्पतिर्नोअव्याः।आयेवामस्यसंगथेरयीणां
प्रियादेवस्यसवितुःस्याम॥ब॥ ॥भगंभजनीयंधियंध्यातव्यंपुरस्यधारयितारंबहुप्रज्ञंवासवितारंपुरं
धिर्बहुधीरितियास्कः।वाजयंतःवाजिनंबलिनंकुर्वंतःविभक्तिव्यत्ययः।नःस्तुवतोस्मान्नराशंसःनरैःशं
सनीयःपतिःदेवपत्नीनांपतिःछांदसांपतिर्वा।तथाचश्रूयते।छंदांसिवैग्नाइतिजनग्नाव्यंतुदेवपत्नीरितिच।
सविताअव्याःअव्यात्।किंचवामस्यधनस्यरयीणांपशूनांच।तथाचश्रूयतेपशवोवैरयिरिति।आयेआगमने

BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

ऋ॰ ८ संगमेसंग्रामनेचनिमित्तेदेवस्यद्योतमानस्यसवितुःप्रेरकस्यवयंप्रियास्यामभवेम॥छ॥अथैकाद
शीमृचमाह॥छ॥ ॥अस्मभ्यंतद्दिवोअद्भ्यःपृथिव्यास्त्वयादत्तंकाम्यंराधआगात्।शंयत्स्तोतृभ्यआपये
भवात्युरुशंसायसवितर्जरित्रे॥छ॥ ॥हेसवितःअस्मभ्यंत्वयादत्तंतत्प्रसिद्धंकाम्यंकमनीयंराधो
धनंदिवःद्युलोकात्अद्भ्योंतरिक्षलोकात्पृथिव्याभूमेश्चआगात्आगच्छतु।किंचस्तोतृभ्यस्तोतॄणामाप
येबंधयेतद्धनंशंसुखकरंभवातिभवेत्।उरुशंसायबहुस्तुत्येजरित्रेस्तोत्रेमह्यंजरिता
कारुरितिस्तोतृनामसुपाठात्।हेसवितःतत्प्रयच्छतु॥छ॥ ॥इतिद्वितीयाष्टकेष्टमाध्यायस्यतृतीयो
वर्गः॥छ॥ ॥ग्रावाणेवेत्यष्टर्चंसप्तमंसूक्तंगार्त्समदंत्रैष्टुभमाश्विनं।ग्रावाणेवाष्टावाश्विनमित्यनुक्रां
तत्वात्।प्रवर्ग्येभिष्टवेसर्वेपरत्वेस्यविनियोगः।सूत्रितंचग्रावाणेवेलेद्यावापृथिवीइति।प्रातरनुवाकाश्वि ९

नशस्त्रयोरपीदंसूक्तंसूत्रितंच॥ग्रावाणेवनासत्याभ्यामितित्रीणिति॥छ॥तत्रप्रथमामृचमाह॥छ॥ ॥
ग्रावाणेवतदिदर्थंजरेथेगृध्रेववृक्षंनिधिमंतमच्छ।ब्रह्माणेवविदथउक्थशासादूतेवहव्याजन्यापुरुत्रा
॥छ॥ ॥हेअश्विनौग्रावाणेवअरातिंप्रतिप्रतिप्रेषितौपाषाणाविवतदर्थंअर्थेर्धातोरथशब्दःअर्थोत्र
तियास्कः।नमरातिमित्यर्थः।इदितिशरणः।जरेथेजरयेथेअरातिंबाधेथां।यद्वायथागुरूग्रावाणौक्षिप्तौतदा
नीमेवशीघ्रंगच्छतः।तथाततनमर्थंगंतारंजरेशीघ्रंगत्वास्तुतमित्यर्थः।जरतिस्तुतिकर्मा।किंचगृध्रेवगृध्रा
विपक्षिणाविवतद्वृक्षंफलितंवृक्षंनिधिमंतंधनवंतंयजमानं।अच्छआगच्छतामितिशेषः।विदथेयज्ञेविद
थःसवनमितियज्ञनामसुपाठात्।उक्थशासाउक्थशंसितारोब्रह्माणेवब्राह्मणाविवजन्याजनपदेभृ
तिवराज्ञाप्रेषितोदूतावविपुरुत्राबहुभिःपुरुषैर्व्याह्वानव्यौयुवां।अत्रउपमेयद्विनानुसारेणोपमानद्वि

५६०८ त्वं॥ब॥ अथद्वितीयामृचमाह॥ब॥ ॥प्रातर्यावाणारथ्येववीराजेवयमावरमासचेथे।मेनेइवतन्वा३
शुंभमानेदंपतीवक्रतुविदाजनेषु॥ग॥ ॥हेअश्विनौप्रातर्यावाणाप्रातरेवयज्ञार्थंगंतारौरथ्येवर
थिनाविववीरोस्वकर्मणिशूरौअजेवअजाविवछागाविवयमायमलौमेनेइवनार्याविवतन्वाशरीरेण
शुंभमानेशोभमानौदंपतीविवजायापतीइवसंगतौजनेषुविषयेषुक्रतुविदाकर्मविदौयुवांवरं
संभक्तारंआमचेथेआगच्छथः॥ब॥ अथतृतीयामृचमाह॥ब॥ ॥शृंगेवनःप्रथमागंतमर्वाक्छफाववि
जर्भुराणातरोभिः।चक्रवाकेवप्रतिवस्तोरुस्रार्वांचायातंरथ्येवशक्रा॥ब॥ ॥हेअश्विनौशृंगेवप
शोःशृंगेवप्रथमादेवानांप्रथमौशफाविवअश्वादेःखुराविवतरोभिर्वेगेर्जर्भुराणाभृशंगच्छंतौयुवांनोस्मा ८
न्प्रतिअर्वागभिमुखंआगंतमागच्छतं।किंचहेअश्विनौवस्तोःप्रतिअहःप्रतिचक्रवाकेवचक्रवाविव

इउस्राउशाकृणानुसारेकौगमनशीलौवारथ्येवरथिनाविवशक्राःस्वकर्मणिशक्तौअर्वांचौअस्मदभि
मुखौयातंगच्छतं॥ब॥ अथचतुर्थीमृचमाह॥ब॥ ॥नावेवनःपारयतंयुगेवनभ्येवनउपधीवप्रधीव।श्वा
नेवनोअरिषण्यातनूनांखृगलेवविस्रसःपातमस्मान्॥ब॥ ॥हेअश्विनौनावाइवनावाविवसिंधुंनो
स्मान्दुर्गाणिपारयतंयुगाइवयथारथ्यस्ययुगेनभ्याइवयथाचरथचक्रनाभिफलकेउपधीइवयथात
त्पार्श्वस्थफलकेप्रधीइवयथावाचक्रवाह्यवलयोरथंपारयततथानोस्मान्दुर्गाणिपारयतं।किंचश्वा
नाइवश्वानाविवयथाश्वानौबाधकेभ्योरक्षंतौतततोहिंसामपनयतःतथानोस्माकंतनूनांपोषंगामंगा
नामरिषण्यावहिंसकौनवतं।शृंगलाइवतनुत्राणेतनुहिंसायारक्षतःतथाविस्रसःजरायाःअस्मान्
युवांपातं॥ब॥ अथपंचमीमृचमाह॥ब॥ ॥वातेवाजुर्यानद्येवरीतिरक्षीइवचक्षुषायातमर्वाक्।हस्ता

विवतन्वेशंनविष्ठापादेवनोनयतंवस्योअछ॥छ॥ ॥हेअश्विनोवाताइवताविवअजुर्याजरित्वि
मशाकेनेनयाइवतयाविवरीतिःव्यत्ययेनैकवचनं।शीघ्रंगंतारौयुवांअक्षीइवचक्षुषादर्शनेनअ
र्वागस्मदभिमुखंआयातमागछतं।किंचहस्ताइवहस्ताविवपादाइवपादाविवतन्वेशरीरायशंनवि
ष्ठासुखस्यनावयितृतमौयुवांनोस्मान्वस्यःवसीयःश्रेष्ठंधनंअछप्रतिनयतंप्रापयतं॥छ॥ ॥इति
द्वितीयाष्टमेष्टमाध्यायस्यचतुर्थोवर्गः॥छ॥ ॥अथषष्ठीमृचमाह॥छ॥ ॥ओष्ठाविवमध्वास्नेवदंता
स्तनाविवपिप्यतंजीवसेनः।नासेवनस्तन्वोरक्षितारोतोकर्णाविवसुश्रुताभूतमस्मे॥छ॥ ॥हेअश्विनौ
ओष्ठाविवआस्नेआस्यायमधुरसवद्वचनंवदंतौस्तनाविवनःअस्मान्जीवनायपिप्यतंपाययतं।किं ९
चनासेवनासिकेइवनःअस्माकंतन्वतनोःरक्षितारारक्षितारौभूतंभवतं।अपिचकर्णाविवअस्मे

अस्माकंसुश्रुतासुश्रवणौयुवांभूतंभवतं॥छ॥अथसप्तमीमृचमाह॥छ॥ ॥हस्तेवशक्तिमभिसंददी
नःक्षामेवनःसमजतंरजांसि।इमागिरोअश्विनायुष्मयंतीःक्ष्णोत्रेणेवस्वधितिंसंशिशीतं॥छ॥ ॥हे
अश्विनौहस्ताइवहस्ताविवशक्तिंसामर्थ्यंनोस्माकंअभिसंददीअभिमुख्येनसम्यक्प्रयछंतौभवतं।किं
चक्षामाइवरजांसिस्थानानिउदकानिवाउदकंरजउच्यतइतियास्कः।नोस्माकंसमजतंप्रेरयतं।अपिचअ
श्विनाहेअश्विनौइमागिरःअस्माभिःकृतास्तुतीःयुष्मयंतीःयुवामिछंतीस्वधितिमसिंक्ष्णोत्रेणेवतेजन
शाणेवनसंशिशीतंसम्यक्तीक्ष्णीकुरुतं॥छ॥अथाष्टमीमृचमाह॥छ॥ ॥एतानिवामश्विनावर्धनानि
ब्रह्मस्तोमंगृत्समदासोअक्रन्।तानिनराजुजुषाणोपयातंहं॥छ॥ ॥अश्विनाहेअश्विनौवांयुवयोःए
तानिवर्धनानिवृद्धिसाधनानिब्रह्माणिमंत्रान्स्तोमंस्तोत्रंचगृत्समदाअक्रन्अकुर्वन्तानिब्रह्माणिनरा

५६०८ नेतारौजनुषाणामृशांप्रीयमाणौयुवांउपयांतंउपगछतं।किंचसुवीराःशोभनपुत्रावयंविदथेय
ज्ञेयुवांबृहद्वदेमप्रकृतंस्तुतं॥७॥ ॥इतिद्वितीयाष्टकेऽष्टमाध्यायस्यपंचमोवर्गः॥७॥ ॥सोमापू
षणेतिषळृचमष्टमंसूक्तंगार्त्समदंत्रैष्टुभंसोमापूषदेवताकं।तथाचानुक्रांतं।सोमापूषणाषट्सो
मापौष्णमंत्योर्द्धर्चोप्यदितेरिति।अत्रउदव्युदितितिन्यस्यांत्यार्द्धस्यादितिर्देवता।सोमापौष्णेपशौ
वपापुरोडाशहविषामाद्यास्तिस्रःक्रमेणा॥जननारयीणांजननादिवोजननापृथिव्याःजातौवि
श्वस्यभुवनस्यगोपौदेवाअकृण्वन्नमृतस्यनाभिं॥७॥ ॥सोमापूषणाहेसोमापूषणौयुवांरयीणां
धनानांजननाजनयितारौदिवःद्युलोकस्यापिजनयितारौपृथिव्याःप्रथितायाश्चजनयितारौ
भवतः।किंचजातौजातमात्रावेवयुवांविश्वस्यभुवनस्यकृत्स्नस्यजगतःगोपौपारौदेवाअमृतस्य १०

मरस्यनाभिंहेतुंमकृण्वन्नकार्षुः॥७॥अथद्वितीयामृचमाह॥७॥ ॥इमौदेवौजायमानौजुषंतेमौतमां
सिगूहतामजुष्टा।आभ्यामिंद्रःपक्वमामास्वंतःसोमापूषभ्यांजनदुस्रियासु॥७॥ ॥इमौसोमापूषणौ
देवौद्योतमानौजायमानौजायमानौउत्पन्नमात्रावेवजुषंतसर्वेदेवाअजुषंतसेवितवंतइतियाव
त्।किंचइमौसोमापूषणौअजुष्टाअसेव्यानितमांसिसर्वस्यगूहतांनाशयतः।किंचआभ्यामेताभ्यां
सोमापूषभ्यांसहइंद्रःआमासुतरुणीषुउस्रियासुगोषुअंतर्मध्येऊधःप्रदेशेपक्वंपरिपक्वंपयोजन
त्।जनयति॥७॥अथतृतीयामृचमाह॥७॥ ॥सोमापूषणारजसोविमानंसप्तचक्रंरथमविश्वमिन्वं।
विषूवृतंमनसायुज्यमानंतंजिन्वथोवृषणापंचरश्मिं॥७॥ ॥सोमापूषणाहेसोमापूषणौरजसोलोक
स्यलोकारजांस्युच्यंतइतियास्कः।विमानंपरिच्छेदकंसर्वमनमित्यर्थः।सप्तचक्रंसप्तउचक्रत्रयोदशोमा

६०८ सःसप्तमऋतुः॥अस्तित्रयोदशोमासइतिश्रुतेः॥अविश्वस्यापरिच्छेद्यंविषुवृतंविषूकंसर्वत्रपरिवर्त्त
मानंपंचरश्मिंपंचरश्मिं॥हेमंतशिशिरयोःसमासेनवर्त्तवःपंच॥तथाश्रूयते॥द्वादशवैमासाःपंच
र्त्तवोहेमंतशिशिरयोःसमासेनेति॥मनसायुज्यमानंमनोमात्रेणयुज्यमानंतंप्रसिद्धंरथंजिन्वथः
अस्मान्प्रतिप्रेरयथः॥३॥अथचतुर्थीमृचमाह॥३॥ ॥दिव्य१न्यःसदनंचक्रउच्चापृथिव्यामन्यो
अध्यंतरिक्षे॥तावस्मभ्यंपुरुवारंपुरुक्षुंरायस्पोषंविष्यतांनाभिमस्मे॥३॥ ॥अन्यतयोरेकःपूषात्
च्चाउच्चैरुच्छ्रितदिविद्युलोकेसदनंस्थानंचक्रेचकार॥अन्योअपरःसोमःपृथिव्यामोषधिरूपेणअध्यं
तरिक्षेअंतरिक्षेचचंद्ररूपेणसदनंचक्रेसोमापूषणौयुवांपुरुवारंबहुभिर्वरणीयंपुरुक्षुंबहुकीर्त्ति
रायस्पोषंधनस्यपुष्टिंपश्वात्मकंधनमित्यर्थः॥तथाचब्राह्मणं॥पशवोवैरायस्पोषइति॥अस्मेअस्मा ११

कंनाभिंविश्वस्यभोगस्यहेतुभूतंअस्मभ्यंविष्यतांविमुंचतांप्रयच्छतामित्यर्थः॥३॥अथपंचमीमृचमाह॥३॥
॥ ॥विश्वान्यन्योभुवनाजजानविश्वमन्योअभिचक्षाणएति॥सोमापूषणाववतंधियंमेयुवाभ्यांविश्वाः
पृतनाजयेम॥३॥ ॥हेसोमापूषणौअन्यःयुवयोरेकःसोमःविश्वानिभुवनानिजजानअजनयत्॥त
थाचमंत्रः॥सोमःपवतेजनितामतीनामिति॥अन्यःअपरःपूषादित्योविश्वमभिचक्षाणःअभिपश्यन्नेति॥
तौयुवांसोमापूषणौमेधियंकर्मधीःशचीतिकर्मनामसुपाठात्॥अवतंरक्षतं॥किंचवयंयुवाभ्यांहेतुभ्यां
विश्वाःपृतनाःसर्वाःशत्रुसेनाःजयेमअभिभवेम॥३॥अथषष्ठीमृचमाह॥३॥ ॥धियंपूषाजिन्वतुवि
श्वमिन्वोरयिंसोमोरयिपतिर्दधातु॥अवतुदेव्यदितिरनर्वा॥३॥ ॥पूषादित्योविश्वमिन्वःविश्व
स्यप्राणयिताधियमस्माकंकर्मजिन्वतुतर्पयतु॥रयिपतिर्धनपतिःसोमःरयिंधनंददातुअस्मभ्यंददातु

२६०८ किंचदेवीद्योतमानाअनर्वाअप्रसृताकेनापिप्रातिकूल्यमप्रापिताअदितिःअवतुअस्मान्रक्षतु
अन्यत्सिद्धं॥८॥ ॥इतिद्वितीयाष्टकेष्टमाध्यायस्यषष्ठोवर्गः॥६॥ ॥वायोयेतइत्येकविंशत्यृचं
नवमंसूक्तंगार्त्समदंगायत्रंअश्विनमइतिषष्ठस्यतृचस्यआदितोद्वेअनुष्टुभौतृतीयाबृहतीवायो
येतइत्यादिकेद्वेऋचौवायव्यौशुक्रास्याद्येत्येषाऐन्द्रवायवी।अयंवांमित्रावरुणेतिपंचानांमित्रावरु
णावश्विनाविंद्रोविश्वेदेवाःसरस्वतीतिक्रमेणदेवताःप्रेतांयस्येत्यंतस्तृचोब्राह्मस्त्वयोर्हविर्धानि
प्रवर्तनद्यावापृथिव्यनिविधानसत्वेनचविनियुक्तत्वात्द्यावापृथिव्योर्हविर्धानदेवत्योवा।अग्निंच
हव्यवाहनमितिपादाग्निदेवत्योवा।तथाचानुक्रांतं।वायोसैकागायत्रंशुक्रादेवताःप्रउगेणाद्ये
तृचावैन्द्रवायवीद्यावापृथिव्यौंत्यस्तृचोवाहविर्धानौवातृतीयःपादोवाग्नेयोश्विनमेनुष्टुभौबृहती।

DR. BHAU DAJI MEMORIAL

विनियोगःअग्निष्टोमेवषट्कर्त्रोर्द्वितीयेऽहनिप्रउगेत्यतृचमज्जमेतत्सूक्तं।वायव्यतृचस्यवायोयेतेसहस्रिणइत्या
द्येद्वेऋचावैन्द्रवायवतृचस्यशुक्रस्याद्येत्येषातृतीया।तथाचसूत्रितं।वायोयेतेसहस्रिणइतिद्वेतत्रांसो
मासःआगह्यात्येकोनाद्दृवादिविस्पृशेतिद्वेशुक्रस्याद्यगवाशिरइत्येवा।अयंवांमित्रावरुणेतिपंचतृचाइ
ति।चातुर्विंशिकेऽहनिप्रातःसवनेमैत्रावरुणशस्त्रेअयंवांमित्रावरुणेतिषळृचःस्तोत्रियासंज्ञकः।चतुर्विं
शेहेतानजनिष्टेतिखंडेसूत्रितं।अयंवांमित्रावरुणेतिषळृचस्तोत्रियसंज्ञकः।अयंवांमित्रावरुणासुतरुण
विद्यस्तीति।आग्निष्ठोमिकेषड्हस्सुप्रातःसवनेमैत्रावरुणआनोमित्रावरुणेतितृचाइति।सूत्रितत्वात्॥
आद्यामैत्रावरुणप्रस्थानुवाक्यासूत्रितंचा।मैत्रावरुणस्यअयंवांमित्रावरुणेति।प्रातरनुवाकाश्वि
नशास्त्रयोर्गायत्रेछंदसिगोमदूषुणासत्येतितृचोविनियुक्तः।गोमदूषुनासत्येतितृचाइति।सूत्रितत्वात्।अतिरा

६०८ त्रेप्रथमेपर्यायेब्राह्मणाछंसिशस्त्रेइंद्रोअंगमहद्भयमितितृचः अतिरात्रेपर्यायाणामितिखंडेसूत्रितं।
इंद्रोअंगमहद्भयमभित्सूषुवाचमिति। आग्रयणोवैश्वस्यहविषोविश्वेदेवासइत्यनुवाक्या। आग्रयण
मितिखंडेसूत्रितं। विश्वेदेवासआगतेनयेकेचज्मामहिनोअहिमायाइति। दशरात्रेप्रथमेऽहनिप्रउगशा
स्त्रेअंबितमेनदीतमइतिसारस्वतःसप्तमस्तृचःचतुर्थेऽहनि। निखंडेसूत्रितं। अंबितमेनदीतमइत्यानु
ष्टुभंप्रउगमिति। व्यूढेदशरात्रेप्रथमेछंदोमेवैश्वदेवशस्त्रेप्रेतांयज्ञस्यशंभुवेतिद्यावापृथिव्यनिवि
द्धानीयस्तृचः अथछंदोमाइतिखंडेसूत्रितं। प्रेतांयज्ञस्यशंभुवायमेइवयनमानेयादेतंइति।।ब।।तत्रप्र
थमामृचमाह।।ब।। ।।वायोयेतेसहस्रिणोरथासस्तेभिरागहि। नियुत्वान्सोमपीतये।।ब।। ।।हेवा १३
योतेत्वदीयायेसहस्रिणःसहस्रसंख्याकारथासःरथाःतेभिस्तैर्नियुद्भिर्नियुद्भिर्युक्तस्त्वंसोमपीताय

सोमपानार्थमागह्यागच्छ। नानारूपत्वात्। वायोःसर्वाभिर्विभूतिभिःसहागमनंप्रार्थ्यतइतिभावः
।।ब।। अथद्वितीयामृचमाह।।ब।। ।।नियुत्वान्वायवागह्ययंशुक्रोअयामिते। गंतासिसुन्वतोगृहं।।ब।। ।।
हेवायोनियुतोवाहनानिवायोःतैर्युक्तस्त्वंआगह्यागच्छ। अयंशुक्रोदीप्यमानःसोमःतेतुभ्यंअयामिनि
यतोगृहीतआसीत्। यमेःकर्मणिलुङ्। सोमाभिषवंकुर्वतोयजमानस्यगृहंगंतासियातोभवसि।।ब।।
अथतृतीयामृचमाह।।ब।। ।।शुक्रस्याद्यगवाशिरइंद्रवायूनियुत्वतः। आयातंपिबतंनरा।।ब।। ।।
हेनरानेतारौहेइंद्रवायूअद्यास्मिन्नहनिनियुत्वतःविभक्तिव्यत्ययःनियुत्वंतौयुवांगवाशिरःगव्यं
पयःआशीराश्रयणंसाधनंयस्यतस्यशुक्रस्यदीप्तस्यसोमस्यपानार्थंआयातागच्छतं। आगत्यसोमंपि
बतं। अथचतुर्थीमृचमाह।।ब।। ।।अयंवांमित्रावरुणासुतःसोमऋतावृधा। ममेदिहश्रुतंहवं।।ब।।

५६॰८ ॥ ॥मित्रावरुणाहेमित्रावरुणौयुवाभ्यांअयंसोमःअभिषुतःऋतावृधाऋतस्यसत्यस्ययज्ञस्यवाव
र्द्धकौममेत्ममामेइवमाह्वानंश्रुतंशृणुतं॥छ॥अथपंचमीमृचमाह॥छ॥ ॥राजानावनभिद्रुहाध्रुवे
सदस्युत्तमे।सहस्रस्थूणआसाते॥छ॥ ॥राजानौईश्वरौदीप्यमानौवाअनभिद्रुहाअनभिद्रोग्धारौ
यौमित्रावरुणौध्रुवेस्थिरेउत्तमेउत्कृष्टेसहस्रस्थूणेसदसिस्थानेआसातेउपविशतः।तावागछत
मिति।शेषः॥छ॥ ॥इतिद्वितीयस्याष्टमेष्टमाध्यायस्यसप्तमोवर्गः॥छ॥ ॥अथषष्ठीमृचमाह॥छ॥ ॥
तासम्राजाघृतासुती।आदित्यादानुनस्पती।सचेतेअनवह्वरं॥छ॥ ॥संम्राजौआयज्ञोयेवसार्वेषां
शास्तारौघृतासुतीघृतान्नौयद्वासर्पिरिंघृतान्नौवास्वितिमंत्रांतरात्।आदित्याअदितेःपुत्रौदानुनस्प १४
तीदानुनोदानस्यवाधनस्यतास्वामिनौतौमित्रावरुणौअनवह्वरमकुटिलंयज्ञमासचेतसेवेते॥

॥छ॥अथसप्तमीमृचमाह॥छ॥ ॥गोमदूषुनासत्याश्वावद्यातमश्विना।वर्त्तीरुद्रानृपाय्यं॥छ॥ ॥अश्विना
हेअश्विनौ।हेनासत्याअनृतभाषणरहितौ।हेरुद्रारोदयमाणौ।इदंनोयुवांवर्त्तिर्मार्गः।तेनमार्गेणरथे
नवार्प्यंपातृभिःनरैःनिर्दिवेःपातव्यंसोमंगोमद्यथाभवतितथाअश्ववत्अश्ववच्चयथाभवतितथायातं
गछतंऊषितिनिश्राणो॥छ॥अथाष्टमीमृचमाह॥छ॥ ॥नयत्परोनांतरआदधर्षद्वृषण्वसू।दुःशंसोमर्त्यो
रिपुः॥छ॥ ॥वृषण्वसूहेधनस्यवर्षितारौयद्धनंपरोदूरस्थोदुःशंसःदुःशंसनायोग्योमर्त्योरिपुःयन्नादध
र्षत्।यथोक्तलक्षणेनरःअंतरःसमीपवर्त्तीमर्त्योरिपुरपियन्नादधर्षत्तद्धनमावावोल्हमितिशेषः॥छ॥
अथनवमीमृचमाह॥छ॥ ॥तानआवोल्हमश्विनारयिंपिशंगसंदृशं।धिष्ण्यावरिवोविदं॥छ॥ ॥धिष्णि
षणाहेअश्विनाइअश्विनौ।तातौयुवांपिशंगसंदृसंनानारूपंवरिवोविदंधनस्यलंभकंरयिंपशुनोस्मभ्यं

द्वि० ८

आवोल्हमावहतं॥छ॥अथदशमीमृचमाह॥छ॥ ॥इंद्रोअंगमहद्भयमभीषदपचुच्यवत्।सहिस्थि
रोविचर्षणिः॥छ॥ ॥इंद्रःमहत्अधिकंअभीषत्अभिभवत्भयंभयकारणंअपचुच्यवत्अप
च्याव्वयेत्हियस्मात्कारणात्सस्थिरःकेनोपिचालयितुमशक्यःविचर्षणिःविश्वस्यद्रष्टा॥छ॥ ॥
इतिद्वितीयस्याष्टकेअष्टमाध्यायस्यअष्टमोवर्गः॥छ॥ ॥अथैकादशीमृचमाह॥छ॥ ॥इंद्रश्चमृल
यातिनोननःपश्चादघंनशत्।भद्रंभवातिनःपुरः॥छ॥ ॥इंद्रश्चपरमैश्वर्यवानिंद्रश्चेत्नोस्मान्मृलया
तिसुखयत्।पश्चात्पृष्ठतःनोस्मान्अघंदुरितंननशत्नप्राप्नोतिनोस्माकंपुरःपुरस्तात्इंद्रंकल्याणं
भवातिभवति॥छ॥अथद्वादशीमृचमाह॥छ॥ ॥इंद्रआशाभ्यस्परिसर्वाभ्योअभयंकरत्।जेताशत्रू १५
न्विचर्षणिः॥छ॥ ॥विचर्षणिःविविधस्यद्रष्टाजेताशत्रून्असुरान्जेता।अन्नंतनान्षष्ठ्यभावःइंद्रः

परमैश्वर्यवान्सर्वाभ्यआशाभ्योदिग्भ्योस्माकंअभयंकरत्करोतु।परीतिपंचमीतकः॥छ॥अथत्रयो
दशीमृचमाह॥छ॥ ॥विश्वेदेवासआगतशृणुतामइमंहवं।एदंबर्हिर्निषीदत॥छ॥ ॥विश्वेदेवासः
हेविश्वेदेवाःआगतइहागच्छतममदीयंइमंहवमाह्वानंशृणुतइदंबर्हिरस्मिन्बर्हिषिआनिषीदत
उपविशत॥छ॥अथचतुर्दशीमृचमाह॥छ॥ ॥तीव्रोवोमधुमांअयंशुनहोत्रेषुमत्सरः।एतंपिबतका
म्यं॥छ॥ ॥हेविश्वेदेवाःतीव्रमदःमधुमान्रसवान्मत्सरोमदकरःसोमोयंयुष्मदर्थंशुनहोत्रेषुगृ
त्समदेषस्मासुस्थितःकाम्यंकमनीयमेतंसोमंपिबत॥छ॥अथपंचदशीमृचमाह॥छ॥ ॥इंद्रज्येष्ठा
मरुद्गणादेवासःपूषरातयः।विश्वेममश्रुतंहवं॥छ॥ ॥हेइंद्रज्येष्ठाःइंद्रप्रोगमाह्वानंशृणुतइंद्र
ज्येष्ठादयःसंबोधनांतः॥छ॥ ॥इतिद्वितीयस्याष्टमेनवमोवर्गः॥छ॥अथषोडशीमृचमाह॥छ॥ ॥

द्वि॰ ८

॥अंबितमेनदीतमेदेवितमेसरस्वति। अप्रशस्ताइवस्मसिप्रशस्तिमंबनस्कृधि॥छ॥ ॥अंबितमेमा
तृणांश्रेष्ठेनदीतमेनदीनांश्रेष्ठेदेवितमेदेवीनांश्रेष्ठेहेसरस्वति अप्रशस्ताइवधनाभावादयस्त
स्ताइववयंस्मसिभवामः। अंबहेमातःसरस्वतिनोस्मभ्यंप्रशस्तिंधनसमृद्धिंकृधिकुरुप्रयच्छेत्य
र्थः॥छ॥ अथसप्तदशीमृचमाह॥छ॥ ॥त्वेविश्वासरस्वतिश्रितायूंषिदेव्यां। शुनहोत्रेषुमत्स्वप्रजां
देविदिदिड्ढिनः॥छ॥ ॥हेसरस्वतिदेव्याद्योतमानायांत्वेत्वयिविश्वाविश्वानिसर्वाण्यायूंषिअन्ना
निआयुःस्तृतेत्पन्नानामस्मपागात। श्रिताश्रितानिमात्वंशुनहोत्रेषुगृत्समदेषुस्माकंविषयेषुम
त्स्वसोमपानेनतृप्य। किंचहेदेविसरस्वतिनःअस्मभ्यंप्रजांदिदिड्ढिपुत्रान्देहि॥छ॥ अथाष्टाद १६
शीमृचमाह॥छ॥ ॥इमाब्रह्मसरस्वतिजुषस्ववाजिनीवति। यातेमन्मगृत्समदाऋतावरिप्रियादे

वेषुजुह्वति॥छ॥ ॥वाजिनीवतिअन्नवतिऋतावरिउदकवतिहेसरस्वति इमाइमानिब्रह्माणिहवींषि
जुषस्वस्वीकुरु। यानिमन्मननीयानिदेवेषुप्रियादेवानांमध्येत्वत्यंप्रियाणिदेवेषुवातेत्वदर्थंगृत्समदा
जुह्वति॥छ॥ अथैकोनविंशीमृचमाह॥छ॥ ॥प्रेतांयज्ञस्यशंभुवायुवामिदावृणीमहे। अग्निंचहव्यवाह
नं॥छ॥ यज्ञस्ययागस्यशंभुवासुखसंपादकेइविद्वनिअनसीतरूपेद्यावापृथिव्यौप्रेतांउत्तरवेदेःपश्चिम
भागंप्रतिगच्छतां। अथप्रत्यक्षकृतः। युवामितयुवामेवआवृणीमहेप्रार्थयामहेहव्यवाहनमग्निंचआ
वृणीमहेअग्निरत्रनिपातभागिति॥छ॥ अथविंशीमृचमाह॥छ॥ ॥द्यावानःपृथिवीइमंसिध्रमद्यदिविस्पृ
शं। यज्ञंदेवेषुयच्छतां॥छ॥ ॥द्यावाद्यौःपृथिवीचउभेसिध्रंस्वर्गादेःसाधकंदिविस्पृशंदेवान्गच्छंतंनःअस्मा
कंइमंयज्ञंदेवेषुयच्छतांनियच्छतां॥छ॥ अथैकविंशीमृचमाह॥छ॥ ॥आवामुपस्थमद्रुहादेवाःसीदंतुयज्ञि

द्वि० ८ याःइन्द्रायसोमपीतये॥७॥ ॥अनुज्ञातोहविर्जिताद्धविर्धानतद्रूपेद्यावापृथिव्यौचात्वांयुवयोरुपस्थंस मीपंयज्ञियाययज्ञार्हादेवाःइयक्षेअद्यास्मिन्नहनिसोमपीतायसोमपानायआसीदंतु॥७॥ अथद्वितीयाष्टमेद्वादशोवर्गः॥७॥ ॥कनिक्रददितित्र्यृचंदशमंसूक्तंअत्रेवमनुक्रमणिका।कनिक्रदत्त्र्यृचमिति।मंडलद्रष्टागृत्समदोस्यऋषिःत्रिष्टुप्छंदःकपिंजलरूपीइंद्रोदेवता।वयसाममनोज्ञांवाचंश्रुत्वैतत्सूक्तंजपेत्।सूत्रितंच।वयसाममनोज्ञावाचःश्रुत्वाकनिक्रदज्जनुषंप्रब्रुवाणइतिसूक्तंजपेदिति॥७॥तत्रप्रथमामृचमाह॥७॥ ॥कनिक्रदज्जनुषंप्रब्रुवाणइयर्तिवाचमरितेवनावं।सुमंगलश्चशकुनेभवासिमात्वाकाचिदभिभाविश्व्याविदत्॥७॥ ॥कनिक्रदत्पुनःपुनःशब्दायमानःजनुषंजनिष्यमाणमर्थंप्रब्रुवाणःसूचयन्।कपिंजलःअरितेवकर्णधारइवनावमंवाचमियर्तिप्रेरयति।अयमर्थः।उक्तलक्षणःहेशकुने १७

कपिंजलत्वंसुमंगलःप्रशस्तकल्याणश्चभवासिभव।किंचकाचिदभिभाकोप्यभिभवःत्वात्वांविश्व्याविश्वतःसर्वस्माद्दिक्षुमाविदत्माप्रापत्।शकुनोत्पन्नेतुमात्मानंन्यक्कृत्यजन्मप्रब्रुवाणोयथास्यशब्दस्तथानामेरयतिवाचमीरयतिनावंसुमंगलश्चशकुनेभवकल्याणमंगलोमंगलंगिरतेर्गृणात्यर्थेगिरत्यनर्थानितिवेतियास्कः॥७॥अथद्वितीयामृचमाह॥७॥ ॥मात्वाश्येनउद्वधीन्मासुपर्णोमात्वाविददिषुमान्वीरोअस्ता।पित्र्यामनुप्रदिशंकनिक्रदत्सुमंगलोभद्रवादीवदेह॥७॥ ॥हेशकुनेत्वांत्वांश्येनःप्रबलःपक्षिविशेषोमावधीत्माहिंसीत्।तथाइषुमान्बाणवान्वीरःअस्ताशराणांक्षेप्ताधन्वीत्वात्वांमाविदत्प्रापत्।किंचपित्र्यांप्रदिशंदक्षिणांदिशमनुदक्षिणस्यांदिशीत्यर्थः।कनिक्रदत्पुनःपुनःशब्दंकुर्वन्सुमंगलःकल्याणमंगलःभद्रवादीशोभनवादीसन्इहअस्मद्विषयंवदमंगलंसूचय॥७॥अथतृती

६१०८ यामृचमाह॥७॥ ॥अवक्रंददक्षिणतोगृहाणांसुमंगलोभद्रवादीशकुंते।मानस्तेनईशतमाघशंसो
बृ०॥७॥ ॥शकुंतेहेकपिंजलत्वंसुमंगलोभद्रवादीचसन्गृहाणांदक्षिणतःदक्षिणस्यांदिशिअ
वक्रंदशब्दंकुरु।दक्षिणतःशब्दायमानःशकुंतोमंगलसूचकोहिनोस्माकंस्तेनस्तस्करोमाईशत
माईशिष्टअघशंसःअनर्थकानांशंसकोपिमेशिष्टउत्तमःपादोव्याख्यातचरः॥७॥इतिद्वितीयस्या
ष्टमेएकादशोवर्गः॥७॥ ॥प्रदक्षिणिदितित्र्यृचमेकादशंसूक्तंगार्त्समदंजागतंतथाचानुक्रांतंप्र
दक्षिणिज्जागतंमध्येतिशाक्कर्यष्टिर्वेति।द्वितीयातिशाक्करीअष्टिर्वाइतिरेजगत्यौ।कपिंजलरूपी
इंद्रोदेवतावयसाममनोज्ञांवाचंश्रुत्वाप्रदक्षिणिदितिसूक्तंजपेत्।सूत्रंप्रागेवोदाहृतं॥७॥तत्रप्र १८
थमामृचमाह॥७॥ ॥प्रदक्षिणिदभिगृणंतिकारवोवयोवदंतऋतुथाशकुंतयः।उभेवाचौवदति

सामगाइवगायत्रंचत्रैष्टुभंचानुराजति॥७॥ ॥शकुंतयःकपिंजलाःऋतुथाकालेकालेवायांनंवदंतः
सूचयंतःकारवःस्तोतारःइवप्रदक्षिणित्अभिगृणंतिअभिवदंतिबहुवचनंपूजार्थं।किंचउभेवाचौगा
नंचश्रोतव्यसामगायत्रंत्रैष्टुभंचसमनीचशकुंतिर्वदतिअनुराजतिचस्गएवतोनुरक्तान्करोतीत्य
र्थः॥७॥अथद्वितीयामृचमाह॥७॥ ॥उद्गातेवशकुनेसामगायसिब्रह्मपुत्रइवसवनेषुशंससि।वृ
षेववाजीशिशुमतीरपीत्यासर्वतोनःशकुनेभद्रमावदविश्वतोनःशकुनेपुण्यमावद॥७॥ ॥शकु
नेहेकपिंजलउद्गातेवसामयथोद्गातासामगायतितद्वत्त्वंगायसिमानस्वनंकरोषिब्रह्मपुत्रइवयथा
ब्राह्मणाच्छंसीसवनेषुशस्त्राणिशंसतिकालेषुसंसमिश्रोतस्वरंकरोषिवृषेववाजीमेवनसमर्थोश्वः
शिशुमतीर्वडवाअपीत्यर्थः।अभिगत्यशब्दंकरोतितथात्वमपिवदशिष्टंस्पष्टं॥७॥अथतृतीयामृचमा॥

६.८ ॥७॥ ॥आवदंस्त्वंशकुनेभद्रमावदतूष्णींमासीनःसुमतिंचिकिद्धिनः।यदुत्पतन्वदसिकर्करिर्यथाबृह०॥
७॥ ॥शकुनेहेकपिंजलत्वआवदन्शब्दंकुर्वंस्त्वंभद्रमादमंगलंवदतूष्णींमासीनःतूष्णींतिष्ठन्नपिनोस्मा
कंसुमतिंचिकिद्धिबुध्यस्व।यद्यदाउत्पतन्वदसितदाकर्करिर्यथाकर्करीवदसिकर्करिर्वाद्यविशेषः।अ
न्यद्व्याख्यातचरं॥७॥ ॥इतिद्वितीयस्याष्टादशोवर्गः॥७॥ ॥इतिद्वितीयेमंडलेचतुर्थोनुवाकः॥ ॥समा
प्तंचद्वितीयंमंडलं॥ ॥वैश्वामित्रेतृतीयेपंचानुवाकाः।तत्रप्रथमेनुवाकेद्वादशसूक्तानि।तत्रासामस्यमे
ति।त्रयोविंशत्यृचंप्रथमंसूक्तं।तत्रानुक्रांतं।सोमस्यत्र्यधिकेति।अस्यमंडलद्रष्टाविश्वामित्रऋषिः।अ
नुक्तत्वात्त्रिष्टुप्छंदः।मंडलादित्वादाग्नेयमितिपरिभाषयाग्निर्देवता।प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभेछंदसि १९
विनियोगः।तथाचसूत्रं।सोमस्यमातववंत्रप्रत्यग्निरितित्रीणि।७।तत्रप्रथमामृचमाह॥७॥ ॥सोम

स्यमातववंवक्ष्यग्नेवह्निंचकर्थविदथेयजध्यै।देवाँअच्छादीद्यद्युंजेअद्रिंशमायेअग्नेतन्वंजुषस्व॥७॥ ॥
हेअग्नेत्वंविदथेयज्ञेयजध्यैयष्टुंसोमस्यवह्निंवोढारंयमांचकर्थकृतवानसि।तमांतवसंतवास्विनंबलि
नंकह्निकामयस्व।किंचहेअग्नेदेवानच्छअभिदीद्यदीप्यमानोहंअद्रिंग्रावाणंयुंजेअभिषवणाययुनज्मि
शमायेशस्याभिच।तथाचमंत्रांतरं।ऋतेनदेवःसविताशमायतेति।यद्वाशमायतेति।यद्वाशमायेस्तौमि।
शशमानःऋरतीतिस्तुतिकर्मसुपाठात्।तथाचमंत्रांतरं।सोअग्नईजेशशमेचमर्तइति।किंचहेअग्नेतन्वंशरी
रंसुपस्वरक्षायेसेवस्व।यद्वाकर्माणितत्त्वंनंमासेवस्वेत्यर्थः॥७॥अथद्वितीयामृचमाह॥७॥ ॥प्रांचंयज्ञं
चकृमवर्धतांगीःसमिद्भिरग्निंनमसादुवस्यन्।दिवःशशासुर्विदथाकवीनांगृत्सायचित्तवसेगातुमीषुः॥७॥
॥ ॥हेअग्नेवयंयज्ञंप्रांचंप्रकर्षेणगच्छंतंचकृमअकार्ष्मगीःमदीयास्तुतिवर्धनांएधतांअग्निंसमिद्भिर्नि

६०.८ मसाऽविषाचदुवस्यन्। अस्मदीयाः परिचरेयुः। किंचदिवोद्युलोकादागत्यदेवाःकवीनांस्तोतॄणांविदथाज्ञा
नानिस्तोत्राणिवाशाशासुः अन्वशिषन् अपिचयष्टृस्तायष्टृणांतेरिदंरूपंस्तोतव्यायाग्नयेतवासेहृद्ययगातुं
स्तोतुंईषुश्चित्स्तोतारइच्छंतिचविदितिचार्थः॥ब॥ अथतृतीयामृचमाह॥ब॥ ॥मायादधेमेधिरःपूतदक्षो
दिवःसुबंधुर्जनुषापृथिव्याः॥ अविंदनुदर्शतमप्स्वंतर्देवासोअग्निमपसिस्वसॄणां॥ब॥ ॥मेधिरःमेधावा
न्प्राज्ञःपूतदक्षःशुद्धबलःजनुषाजन्मनामनुष्याणांचसुखंकरोतीतियावत्तंदर्शतंदर्शनीयमग्निंदेवासोदेवाः
स्वसॄणांसरणशीलानांनदीनामप्स्वंतर्मध्येस्थितंअपसियज्ञवाहनरूपेकर्मणिनिमित्ते। उशतिस्मरणः। अ
विंदन्लब्धवंतः॥ब॥ अथचतुर्थीमृचमाह॥ब॥ ॥अवर्धयन्सुभगंसप्तयह्वीःश्वेतंजज्ञानमरुषंमहि २०
त्वा॥ शिशुंनजातमभ्यारुरश्वादेवासोअग्निंजनिमन्वपुष्यन्॥ सप्तसर्पणशीलाःयह्वीर्यह्व्यःमहत्योनद्यः
सुभगंशोभनधनंश्वेतंशुभ्रंयत्जज्ञानंमहित्वामहत्त्वेनअरुषमारोचमानंअप्सुस्थितमग्निंअवर्द्धयन्स्वकार्य
कृतानिरोषधीर्निर्वृद्धिंप्रापितवत्यः। यद्वादिव्यमग्निंआपोवर्द्धयंतिअविंधनत्वादस्य। किंचशिशुंअश्वावडवाः
अभ्यारुःअभिगच्छंतितथानद्यःउत्पन्नमग्निंअभ्यारुःअभिजग्मुःअपिचदेवासःदेवाःअग्निंजनिमन्जन्म
न्युदकेवावपुष्यन्वपुष्मिमकुर्वन्॥ब॥ अथपंचमीमृचमाह॥ब॥ ॥शुक्रेभिरंगैरजआततन्वान्क्रतुंपु
नानःकविभिःपवित्रैः॥श॥ शोचिर्वसानःपर्यायुरपांश्रियोमिमीतेबृहतीरनूनाः॥ब॥ ॥अग्निःशुक्रेभिःशु
क्लैरंगैरंगैस्तेजोभिःरजोऽन्तरिक्षमाततन्वान्आतन्वन्व्याप्नुवन्क्रतुंकर्मणांकर्तारंयजमानंकविभिःक्रां
तैःप्राज्ञैःस्तोतव्यैर्वापवित्रैःशोधकैस्तेजोभिःपुनानःशोधयन्शोचिर्दीप्तिवस्त्रस्थानीयंपरिपरितोवसा
नआच्छादयन्अपांअपस्यतांकर्मवतांआयुरन्नंबृहतीःमहतीःअनूनाःअन्यूनाःसंपूर्णाःश्रियःसंपदश्चमिमी

द्वि०८ नेकरोति॥छ॥इतिद्वितीयस्याष्टमेत्रयोदशोवर्गः॥छ॥ ॥अथषष्ठीमृचमाह॥छ॥ ॥वव्राजासीमनदतीर
दब्धादिवोयह्वीरवसानाअनग्नाः॥सनाअत्रयुवतयःसयोनीरेकंगर्भंदधिरेसप्तवाणीः॥छ॥ ॥अनदतीः
अभक्षयंतीः अदब्धाः अहिंसिताः मातृभूताः अयोग्निःसींसर्वतोवव्राजति अग्निरपांशोषकः तंचापश्शम
येतितद्भयमिहनास्तीत्युक्तंभवति॥कीदृश्यस्ताः दिवोयह्वीः अंतरिक्षस्यापत्यभूताः अवसानाः वस्त्रम
नाछादयंत्यः वस्त्रस्थानीयस्यजलस्यविद्यमानत्वात्।अतएवअनग्नाः किंचताअपिसनाः सनातन्यः युव
तयःनित्यतरुणाः नित्यदृढा इत्यर्थः सयोनीः समानमंतरिक्षस्थानंयासांताः सप्तवाणीः नद्यः एकंअग्निगर्भं
गर्भस्थंदधिरेदधात॥छ॥अथसप्तमीमृचमाह॥छ॥ ॥स्तीर्णाअस्यसंहतोविश्वरूपाघृतस्ययोनौ २१
स्रवथेमधूनां।अस्थुरत्रधेनवःपिन्वमानामहीदस्मस्यमातरासमीची॥छ॥ ॥घृतस्योदकस्ययोनौस्था

नेतिअस्थुस्तिष्ठंति।पिन्वमानाः वर्धमानाः अत्रअग्नौआपः धेनवः सर्वेषांप्रीणयित्र्यः अभवन्।समीचीसमंचत्यौ
शोभमानेमहीमहत्यौद्यावापृथिव्यौदस्मस्यदर्शनीयस्ययस्याग्नेर्मातरामातरौअभवतां॥छ॥अथाष्टमीमृच
माह॥छ॥ ॥बभ्राणःसूनोसहसोव्यद्यौद्दधानःशुक्रारभसावपूंषि।श्चोतंतिधारामधुनोघृतस्यवृषायत्रवावृ
धेकाव्येन॥छ॥ ॥हेसहसःसूनोसहसस्पुत्रबभ्राणःसर्वैर्धार्यमाणेनत्वंशुक्राशुक्राणिशुभ्राणिरभसा
वेगवंतिवपूंषिअवबंऽपिदधानःपारयंस्त्वंव्यद्यौत्व्यद्योतत्सोहपाग्निःयत्रयस्मिन्यजमानेकाव्येनस्तोत्रेणाव
वृधेवृद्धिंप्राप्नोतितदानींमधुनःअत्यंतमधुरस्यघृतस्योदकस्यधाराश्चोतंतिस्रवंतिमदाययजमानस्तो
त्रेणअग्निवृद्धोभवति।तदानींवृष्टिर्भवतीत्यर्थः॥छ॥अथनवमीमृचमाह॥छ॥ ॥पितुश्चिदूधर्जनुषाविवे
दव्यस्यधाराअसृजद्विधेनाः।गुहाचरंतंसखिभिःशिवेभिर्दिवोयह्वीभिर्नगुहाबभूव॥छ॥ ॥पितुःअंतरिक्ष

५६.८ स्पउधः ऊधस्थानीयं जलप्रदेशं अयमग्निर्जनुषा स्वयमेव विवेद जानाति। किंचायमग्निः अस्योधसः संबंधि
न्यो धाराः पयोधारा व्यसृजत्। धनामा ध्मिकावाचश्चति सृजति। शिवभिः शिवंकारैः सखिभिः आत्मनः सखि
भूतैर्वायुभिः दिवोयह्वाभिः अंतरिक्षस्यापत्यभूताभिरद्भिः सह गुहायां स्थितः कोपि तवन्न प्राप्तुं समर्थो
नाभवत्॥छ॥ अथ दशमीमृचमाह॥छ॥ ॥पितुश्च गर्भं जनितुश्च बभ्रे पूर्वीरेको अधयत्पीप्यानाः। वृष्णे
सपत्नी शुचये सबंधू उभे अस्मै मनुष्ये३ नि पाहि॥छ॥ ॥अयमग्निः पितुः अंतरिक्षस्य गर्भं वृष्टिलक्षणं गर्भं च
तं जनितुः सर्वस्य लोकस्य जनयितुः आदित्यस्य लोकं भूम्यादिकं च बभ्रे बिभर्ति एक एवाग्निः पूर्वीर्ब
ह्वीः पीप्यानाः प्यायमानाः वृद्धिं प्राप्ता ओषधीः अधयत् धयति भक्षयति। सपत्नी समानएकः सूर्यः पतिर्ययोः २२
ते मनुष्ये मनुष्येभ्यो हिते उभे द्यावापृथिव्यौ वृष्णे वर्षित्रे अस्मै शुचये अग्नये सबंधू समानबंधू नवतः अनायाः अग्निर्

वबंधुरित्यर्थः। हे अग्ने त्वं ते द्यावापृथिवी निपाहि नितरां रक्ष॥छ॥ इति द्वितीयाष्टमे चतुर्दशो वर्गः॥छ॥ ॥अथै
कादशीमृचमाह॥छ॥ ॥उरौ महाँ अनिबाधे ववर्धापो अग्निं यशसः सं हि पूर्वीः। ऋतस्य योनावशयद्दमूना
जामीनामग्निरपसि स्वसॄणां॥छ॥ ॥महानयमग्निः अनिबाधे असंबाधे उरौ विस्तीर्णेंतरिक्षे ववर्धत।
अस्य वर्धनकारणमाह। हि यस्मात्कारणात् पूर्वीः बह्व्यः यशसः यशोन्नं तद्वत्यः आपः अग्निं एवं अभिवर्धि
द्धिं प्रा सोग्निः ऋतस्य उदकस्य योनौ अंतरिक्षे स्थितः स्वसॄणां स्वतः सरंतीनां जामीनां भगिनीस्थानीयानां
उद्भूते अपसि पयसि दमूनाः दांतमनाः सन् अशयत्शोनात॥छ॥ अथ द्वादशीमृचमाह॥छ॥ ॥अक्रो
नबभ्रिः समिथे महीनां दिदृक्षेयः सूनवे भाऋजीकः। उदुस्रिया जनिता यो जजानापां गर्भो नृतमो यह्वो अ
ग्निः॥छ॥ ॥जनिता सर्वस्य लोकस्य जनयिता अपां उदकानां गर्भः गर्भरूपः नृतमः नेतृतमः अतिशयेन

६.८ मनुष्याणांरक्षितायक्षःमहान्योग्निःअक्रःपरेषामाक्रमितापारेरनाक्रमणीयोवा।नेतिपादपूरणः।समि-
थेसंग्रामेमहीनांमहतीनांस्वसेनानांबभ्रिःभर्तादिदृक्षेयःसर्वैर्दर्शनीयःनाभ्यत्विजःस्वदीप्त्याप्रकाशमा-
नःसोग्निःसूनवेहविषांप्रदात्रेयजमानायतदर्थंउस्त्रियाःअपःउज्जजानउदजनयत्स्तनवेपुत्रे
णाश्स्यमाक्षातारोणादिकोनुप्रत्ययः॥ब॥अथत्रयोदशीमृचमाह॥ब॥ ॥अपांगर्भंदर्शतमोषधी-
नांवनाजजानसुभगाविरूपं।देवासश्चिन्मनसासंहिजग्मुःपनिष्ठंजातंतवसंदुवस्यन्॥ब॥ ॥सुभ-
गासुभाग्यावानामर्वैर्वननीयाअरणिःदर्शतंदर्शनीयंविरूपंनानाविधरूपंअपांओषधीनांचरूपं
चगर्भंअग्निंजजानअजनयत्देवासश्चित्सर्वेदेवाअपिपनिष्ठंस्तुत्यंतवसंवृद्धंजातंजातमात्रंत २३
मग्निंमनसास्तुत्यासंजग्मुःउपागच्छन्।हीतिपूरणः।तएवदुवस्यन्पर्यचरन्॥ब॥अथचतुर्दशीमृ-

चमाह॥ब॥ ॥बृहंतमिद्भानवोभाऋजीकमग्निंसचंतविद्युतोनशुक्राः।गुहेववृद्धंसदसिस्वेअंतरपा-
रऊर्वेअमृतंदुहानाः॥ब॥ ॥अपारेअगाधेऊर्वेसमुद्रेअंतर्मध्येअमृतंउदकंदुहानाः।बृहंतःबृह-
तःभानवःशुक्रादीप्यमानाःविद्युतोनविद्युदिवस्वेस्वकीयेसदसिसदनेअंतरिक्षेगुहेवगुहाया-
मिववृद्धंप्रवृद्धंभाऋजीकंप्रभनयदीप्यमानंअग्निंसचंतआश्रयंति॥ब॥अथपंचदशीमृचमाह॥
ब॥ ॥ईळेचत्वायजमानोहविर्भिरीळेसखित्वंसुमतिंनिकामः।देवैरवोमिमीहिसंजरित्रेरक्षाचनो
दम्येभिरनीकैः॥ब॥ ॥यजमानोहंहविर्भिःसाधनैःत्वांत्वांईळेचपश्वादिलक्षणंधनंचयाचेसुम-
तिंशोभनांमतिंधर्मविषयांबुद्धिंनिकामःनितरांकामयमानःत्वयासहसखित्वंईळेयाचेत्वंदेवैःस-
हजरित्रेस्तोत्रेस्तोत्रंकुर्वतेमह्यंअस्मदर्थंअवःपश्वादिविषयांरक्षांमिमीहिकुरु।दम्येभिर्दमनीये

MEMORIAL

१६.८ नियंतव्यैःप्रयत्ननियंतव्यतयाउग्रंखलनोक्ता।अनीकेस्तेजोभिःनःअस्मान्रक्षच।ठ॥इतिद्वितीयस्या
ष्टमेपंचदशोवर्गः॥ठ॥ ॥अथषोडशीमृचमाह॥ठ॥ ॥उपस्तेनारस्तवसुप्रणीतेग्नेविश्वानिधन्यादधा
नाःसुरेतसाश्रवसातुंजमानाअभिष्यामपृतनायूँरदेवान्॥ठ॥ ॥हेसुप्रणीतेशोभनप्रणयनहेअग्ने
तवउपस्तेतारःउपगंतारःस्तोतारइतिनिर्गत्यर्थेवर्तते।विश्वानिसर्वाणिधन्याधनानिपश्वादिधनप्राप्तिहेतू
तानिकर्माणिदधानाःकुर्वंतःतुंजमानाःहवींषिप्रयच्छंतोवयंसुरेतसाशोभनवीर्येणश्रवसात्वत्कृतेना
न्नेनअदेवान्देवेभ्योन्यान्वटिचयुक्तन्यायेनराक्षसाएवगृह्यंतेयज्ञविघ्नकारिणस्तान्पृतनायूंश्च
शरीरस्योपद्रवकारिणःशत्रूंश्चअभिष्यामअभिभवेम।यद्वादेवाःनसज्जयंतःशत्रूनितिवायोज्यं॥ठ॥ २५
अथसप्तदशीमृचमाह॥ठ॥ ॥आदेवानामभवःकेतुरग्नेमंद्रोविश्वानिकाव्यानिविद्वान्।प्रतिमर्ताँअ

वासयोदमूनाअनुदेवान्रथिरोयासिसाधन्॥ठ॥ ॥हेअग्नेमंद्रःस्तुत्यःकेतुर्यज्ञेषुदेवानांप्रज्ञापकस्त्वं
आभवआसमंताद्भवसिसर्वव्यापकोभवसीत्यर्थः।किंचविश्वानिसर्वाणिकाव्यानियजमानादिभिःकृ
तानिस्तोत्राणिविद्वान्जानन्त्वंमर्तान्मर्त्यान्स्तोतॄन्स्वाभिलषितवस्तुसंपादनेनप्रीतान्विधायगृ
हेषुप्रत्यवासयःप्रतिवासयसि।रथिरःरथीःसाधन्देवानांहितानिकर्माणिसाधयन्देवान्अनुयासि
चअनुगच्छसिच॥ठ॥अथाष्टादशीमृचमाह॥ठ॥ ॥निदुरोणेअमृतोमर्त्यानांराजाससादविदथानिसा
धन्।घृतप्रतीकउर्वियाव्यद्यौदग्निर्विश्वानिकाव्यानिविद्वान्॥ठ॥ ॥अमृतःनित्यःराजाराजमानोयोग्निः
विदथानियज्ञावसाधन्साधयन्मर्त्यानांअभिजेतृणांदुरोणेगृहेनिषसादनिषीदतिविश्वानिकाव्यानि
विद्वान्जानन्घृतप्रतीकःघृतेनसंधुक्षितावयवःउर्वियाविस्तीर्णःसोग्निःव्यद्यौत्व्यद्योतते॥ठ॥अथैको

६६.८ नविंशीमृचमाह॥७॥ ॥आनोगाहि सख्येभिः शिवेभिर्महान्महीभिरूतिभिः सरण्यन्॥ अस्मे रयिं बहुलं
संतरुत्रं सुवाचं भागं यशसं कृधी नः॥७॥ ॥सरण्यन् सर्वत्र सरणं गमनमिच्छन् महांस्त्वं शिवेभिः शिवंक
रैः सख्येभिः सख्यैः सखिकर्मभिः महतीभिरूतिभिः रक्षादिभिर्नोस्मान् प्रति आगहि आगहि आगच्छ। अस्मे
अस्मभ्यं बहुलं विस्तीर्णं संतरुत्रं सर्वेषामुपद्रवाणां संतारकं सुवाचं शोभनवाचं भागं सर्वैर्भजनीयं
यशसं यशसा कीर्त्या संयुक्तं रयिं धनं नोस्मभ्यं कृधि देहि। अस्मभ्यमिति द्विर्वचनं आदरातिशयार्थं॥७॥
अथविंशीमृचमाह॥७॥ ॥एताते अग्ने जनिमा सनानि प्र पूर्व्याय नूतनानि वोचं॥ महांति वृष्णे सवना कृ
तेमा जन्मञ्जन्मन्निहितो जातवेदाः॥७॥ ॥हे अग्ने पूर्व्याय पुरातनाय ते तुभ्यं सनानि सनातनानि म
हद्भिः संभजनीयानि वा कृतानि अन्येष्वविद्यमानानि अद्यतनानि वा एतानि एतानि त्वज्जन्मनि कर्माणि २५

स्तोत्राणि वा प्रवोचं जातवेदाः जातं प्रज्ञो जातधनो वा जन्मन्जन्मन्जायंत इति जन्मानः तेषु सर्वेषु मनु
ष्येषु निहितो यागार्थं तस्मै वृष्णे संपदां वर्षित्रे अग्नये इमा इमानि सवनानि कृतानि कृतानि॥७॥ अथैकवि
शीमृचमाह॥७॥ ॥जन्मञ्जन्मन्निहितो जातवेदा विश्वामित्रेभिरिध्यते अजस्रः॥ तस्य वयं सुमतौ यज्ञि
यस्यापि भद्रे सौमनसे स्याम॥७॥ ॥जन्मन्जन्मन् सर्वेषु मनुष्येषु निहितो जातवेदाः विश्वामित्रेभिः वि
श्वामित्रैः स्नायां बहुवचनं महर्षिणा विश्वामित्रेण यो जातवेदाः अजस्रः अजस्रं अनवरतं इध्यते दीप्य
ते सुमतौ वर्तमाना वयं तस्य यज्ञियस्य यज्ञार्हस्याग्नेर्नु भद्रे कृते यसौमनसे सुमनोभावे अनुग्रहबु
द्धौ अपि स्याम अपि नवेम प्रार्थनावाली ङ्॥७॥ अथ द्वाविंशीमृचमाह॥७॥ ॥इमं यज्ञं सहसावन् त्वं नो दे
वत्रा धेहि सुक्रतो रराणः॥ प्र यंसि होतर्बृहतीरिषो नो ग्ने महि द्रविणमा यजस्व॥७॥ ॥हे सहसावन् सहस्वन्

५६.८ बलवत्सुकृतोशोभनकर्मन्हेअग्नेरण्वःसर्वदारममाणःशश्वत्कृवाणोवात्वंनोस्मदीयमिमंयज्ञंदे
वत्रादेवेषुधेहि।इळाहोतःदेवानामाह्वातःबृहतीःमहतीःइषःअन्नानिनास्मभ्यंप्रयंसिप्रयच्छ।हेअ
ग्नेमहिमहत्द्रविणंपश्वादिलक्षणंधनंआयजस्वप्रयच्छ।अत्रयजिर्दानकर्मा।।७।।अथत्रयोविंशी
मृचमाह।।७।। ।।इळामग्नेपुरुदंसंसनिंगोःशश्वत्तमंहवमानायसाध।स्यान्नःसूनुस्तनयोविजा
वाग्नेसातेसुमतिर्भूत्वस्मे।।७।। ।।इयंसर्वेषांपशूनांपशुपुरोडाशस्यस्विष्टकृतःपुरोनुवाक्या।सूत्र्य
ते।इळामग्नेपुरुदंसंसनिंगोरित्येतायन्हृदग्निंपुरोडाशस्यस्वदस्वव्यामसिषोदिदीतिपुरोडाशस्विष्ट
कृतइति।हेअग्नेपुरुदंसंबहुकर्माणंगोःगवांसनिंप्रदात्रींइळांभूमिंहवमानायस्तुवतेमह्यंशश्वत्तमं २६
चिरकालंयथाभवतितथासाधसाधय।नोस्माकंसूनुःपुत्रःतनयःसंतानस्यविस्तारयिताविजावाप्र

त्रपौत्रादिरूपेणस्वयंविजायतइतिविजावास्यात्।हेअग्नेसाप्रसिद्धातेसुमतिःत्वदीयाअनुग्रहबुद्धिःअ
स्मेअस्मासुभूत्तुभवतु।।७।। ।।इतिद्वितीयस्याष्टमेषोडशोवर्गः।।७।। ।।वैश्वानरायेतिपंचदशर्चंद्विती
यंसूक्तंतथानुक्रांतं।वैश्वानरायपंचोना।वैश्वानरीयंतुजागतंत्विति।विश्वामित्रऋषिःजगतीछंदःवैश्वानरो
ग्निर्देवता।पृष्ठ्याभिप्लविकयोस्तृतीयेहन्याग्निमारुतेवैश्वानरायधिषणामितिवैश्वानरनिविद्धानीयंसूक्तं।तृ
तीयस्येतिखंडेसूत्रितं।वैश्वानरायधिषणांधारवरामरुतइति।।७।।तत्रप्रथमामृचमाह।।७।। ।।वैश्वानरा
यधिषणामृतावृधेघृतंनपूतमग्नयेजनामसि।द्विताहोतारंमनुषश्चवाघतोधियारथंनकुलिशःसमृण्वति
।।७।। ।।ऋतवृधेऋतस्योदकस्ययज्ञस्यवावर्द्धयित्रेवैश्वानरायवैश्वानरशब्दोयास्केनव्याख्यातःवैश्वा
नरःकस्माद्विश्वान्नरान्नयतिविश्वएनंनरानयंतीतिवा।अपिवाविश्वानरएवस्यात्प्रत्यृतःसर्वाणिभू

ऋ१०८ तानितस्यवैश्वानरःतस्यैषान्नवतीति। तस्यैमृतंघृतंतंघृतमिवधिषणांस्तुतिंजानामसिजनयाम। यथा
घृतंप्रीतिंजनयतितथाप्रीतिंकरोमीत्यर्थः। द्विताद्विधागार्हपत्याहवनीयरूपाभ्यांयुक्तंहोतारंदेवाना
माह्वातारमग्निंमनुषःमनुष्याःवाघतश्चऋत्विजश्चधियाकर्मणाऊशिजोवास्याद्दिःरथंनरथमिवस
म्यसम्यगेवतिसंस्तुवंति॥७॥ अथद्वितीयामृचमाह॥७॥ ॥सरोचयज्जनुषारोदसीउभेसमात्रोरभव
त्पुत्रईड्यः। हव्यवाळग्निरजरश्चनोहितोदूळभोविशामतिथिर्विभावसुः॥७॥ ॥सोग्निर्जनुषाजन्मना
उभेरोदसीद्यावापृथिव्यौरोचयत्। अरोचयत्प्रकाशयतिसमात्रोर्द्यावापृथिव्योःईड्यःस्तुत्यःपुत्रोभ
वत्। हव्यवाट्हव्यानांवोढाअग्निःअंगनादिगुणयुक्तःअजरःजरादिरहितःचनोहितःचन्नमा २७
नेनिहितःयेनासोचनोहितःदूळभःहिंसितुरशक्यःसायंविनावसुःप्रभाधनःविशामनुष्याणांअतिथि

रिवपूज्योभवति॥७॥ अथतृतीयामृचमाह॥७॥ क्रत्वादक्षस्यतरुषोविधर्मणिदेवासोअग्निंजनयंतचि
त्तिभिः। रुरुचानंभानुनाज्योतिषामहामत्यंनवाजंसनिष्यन्नुपब्रुवे॥७॥ ॥चित्तिभिर्ज्ञानैरुपलक्षिता
देवासःदेवाःतरुषःव्यसनेभ्यस्तारकस्यदक्षस्यबलस्यक्रत्वाकर्मणाविधर्मणिविधारकेयज्ञेअग्निं
जनयंतजनयन्। भानुनाभासमानेनज्योतिषामरुचानंरोचमानंमहांमहांतंअग्निंअत्यंतमारसदृश
श्वमिववाजमन्नंसनिष्यन्लिप्समानोहउपब्रुवेस्तौमि॥७॥ अथचतुर्थीमृचमाह॥७॥ ॥आमं
द्रस्यसनिष्यंतोवरेण्यंवृणीमहेअह्रयंवाजमृग्मियं। रातिंभृगूणामुशिजंकविक्रतुमग्निंराजंतंदि
व्येनशोचिषा॥७॥ ॥मंद्रस्यस्तुत्यस्यवैश्वानरस्यसंबंधिनंवरेण्यंवरणीयंअह्रयंअलज्जावहं
ऋग्मियंप्रशस्यवाजमन्नंसनिष्यतःलिप्समानावयंभृगूणांऋषीणांअभिलषितार्थप्रदातारंउशिजंआ

ऋ. ८ निखण्यंतंकविंक्रांतप्रज्ञंदिव्येनदिविभवेनशोचितारोचिषाराजंतंभ्राजमानमग्निंआवृणीम
हेसंभजामहे।।छ।।अथपंचमीमृचमाह।।छ।। ।।अग्निंसुम्नायदधिरेपुरोजनावाजश्रवसमिहवृक्त
बर्हिषः।यतस्रुचःसुरुचंविश्वदेव्यंरुद्रंयज्ञानांसाधदिष्टिमपसां।।छ।। ।।वृक्तबर्हिषःस्तीर्णबर्हिषःय
तस्रुचःप्राप्तस्रुचःऋत्विजःसुखायसुखार्थंवाजश्रवसंमनुष्येभ्यःप्रेरितान्नंसुरुचंप्रशस्तदीप्तिमंतं
विश्वदेव्यंविश्वेभ्योदेवेभ्योहितंरुद्रंदुःखानांद्रावकंअपसांकर्मवतांयज्ञानांयजंतीतियज्ञायजमाना
तेषांसाधदिष्टिंसाधितयज्ञंपुरोदधिरेस्तुवंति।।छ।। ।।इतिद्वितीयाष्टकेष्टमाध्यायस्यसप्तमोदशोवर्गः।।
।।छ।। ।।अथषष्ठीमृचमाह।।छ।। ।।पावकशोचेतवहिक्षयंपरिहोतर्यज्ञेषुवृक्तबर्हिषोनरः।अग्ने २८
दुवइच्छमानासआप्यमुपासतेद्रविणंधेहितेभ्यः।।छ।। ।।हेपावकशोचेशोधकदीप्तेहेहोतःदेवाना

DR. BHAU DAJI MEMORIAL

मान्हुतःयज्ञेषुपरिपरितःवृक्तबर्हिषःदुवःपरिचरणमिच्छमानासःइच्छंतोनरोनेतारोयजमानाआप्यं
आप्तुंयोग्यंतवबंधुसंबंधिनंक्षयंनिवासंयागगृहंउपासते।सत्वंतेभ्योद्रविणंधनंदेहिविधेहि।।छ।।अथ
सप्तमीमृचमाह।।छ।। ।।आरोदसीअपृणदास्वर्महज्जातंयदेनमपसोअधारयन्।सोअध्वरायपरिणी
यतेकविरत्योनवाजसातयेचनोहितः।।छ।। ।।रोदसीद्यावापृथिव्यौअपृणत्आपूरयत्तथाम
हन्महांतंस्वःअंतरिक्षंआपृणत्अपसःकर्मवंतोयजमानाःजातंयत्अयमेनमग्निंअधारयन्।अत्यो
नअश्वइवकविःक्रांतःसर्वत्रव्याप्तःचनोहितःनिहितान्नःसोयमग्निर्वाजसातयेवाजस्यअन्नस्यसं
निसातयेलाभायपरिणीयतेयज्ञार्थंनीयते।।छ।।अथाष्टमीमृचमाह।।छ।। ।।नमस्यतहव्यदातिं
स्वध्वरंदुवस्यतदम्यंजातवेदसं।रथीर्ऋतस्यबृहतोविचर्षणिरग्निर्देवानामभवत्पुरोहितः।।छ।। ।।

टि. ८

रथीर्नेताबृहतोमहतः ऋतस्ययज्ञस्यविचर्षणिः द्रष्टायोग्निः देवानांपुरोहितः पुरस्तात् दृष्टव्यनयास्थापि
तोभवत् हव्यदातिंदेवेभ्योहविषांदातारंस्वध्वरंशोभनयज्ञंदम्यंदामभ्योहितंजातवेदसंजातप्रज्ञंत
मग्निंमनस्यनमस्उज्जयन्तउवस्यनपरिचरत॥८॥अथनवमीमृचमाह॥८॥ ॥तिस्रोयह्वस्यसमिधःपरिज्म
नोग्नेरपुनन्नुशिजोअमृत्यवः।तासामेकामदधुर्मर्त्येभुजमुलोकमुद्वेउपजामिमीयतुः॥९॥ ॥उ
शिजःकामयमानाःअमृत्यवोमृत्युरहिताःदेवायह्वस्यमहतःपरिज्मनःपरितोगंतुःसमेधःसमेधि
काःप्रकाशिकास्तिस्रःपार्थिवीवैद्युतसूर्यरूपास्तिस्रस्त्वःअपुनन्अशोधयन्तेदेवाःऊर्जंसर्वेषांपा
लयित्रींतासांतन्नांमध्येएकांपार्थिवींतनुंमर्त्येमर्त्यलोकेअदधुःन्यदधुःउइतिपदपूरणःइतरोद्वे
न्नजामिलोकंआसन्नमंतरिक्षंउपेयतुःगच्छतःअथवातिस्रःसमिधःआधारसमिधोद्वेअनूयाजस २९

मिध्वेकेतितीसांसमिधांएकांअनूयाजसमिधंमर्त्येइहलोकेभोगरूपंअनूयाजपर्यंतमदधुःधारयं
तिमदधुःधारयंतिप्रजावाच्यनूयाजइतिप्रजात्वेनानूयाजानांस्वस्त्ववान्तदाश्रयत्वाच्चानूयाजस
मिधःइतरेद्वेसमिधौअंतरिक्षोदिव्यनागइरुउपेयतुः॥उपगच्छतःत्रीन्परिधींस्तिस्रःसमिधइतिनि
दनिगमः॥८॥अथदशमीमृचमाह॥८॥ ॥विशांकविंविश्पतिंमानुषीरिषःसंसीमकृण्वन्स्वधितिं
नतेजसे।सउद्वतोनिवतोयातिवेविषत्सगर्भमेषुभुवनेषुदीधरत्॥१०॥ ॥इषःपश्वादिलक्षणंधनमि
च्छंत्यःमानुषीःमनुष्यप्रजाःविशांप्रजानांविश्पतिंप्रभुंकविंमेधाविनंसीमेनंस्वधितिंनअसिमिवते
जसेतीक्ष्णार्थंसमकृण्वन्एवंसमस्कुर्वन्सोग्निःउद्वतःउन्नयवतःनिवतोनिवेर्नाविवतश्चप्रदेशान
विवेषत्व्याप्नुवन्यातिगच्छतिसएषुभुवनेषुदीधरत्।अधारयत्॥८॥ ॥इतिद्वितीयस्याष्टमेष्टाद

६०.८

शोवर्गः॥छ॥ ॥अथैकादशीमृचमाह॥छ॥ ॥सजिह्वतेजठरेषुप्रजज्ञिवान्वृषाचित्रेषुनानदन्न
सिंहः॥वैश्वानरःपृथुपाजाअमर्त्योवसुरत्नादयमानोविदाशुषे॥छ॥ ॥प्रजज्ञिवान्जातःवृषावर्षकः
सवैश्वानरःचित्रेषुनानाप्रकारेषुजठरेषुप्राणिनांभेदाज्जठराणांभेदः।तेषुजिह्वतेवर्द्धतेचित्रेषुना
नाविधेष्वरण्येषुनानदत्अत्यर्थंशब्दंकुर्वन्कुर्वन्सिंहानसिंहइव।किंविधोवैश्वानरःपृथुपाजाःपृ
थुतेजाःअथवापृथुवेगःअमर्त्यःमरणधर्मरहितःवैश्वानरइति॥सुमन्मभिःस्तोत्रैःभंदमानःस्तूय
मानःवैश्वानरःजातमात्रएवप्रत्नथाप्रत्नइवचिरंतनइवनाकं।कंसुखंअकंदुःखंनविद्यतेअकंयस्मि
न्तत्नाकंदिवःअंतरिक्षस्यपृष्ठंउपरितनप्रदेशंसवितोभिःआरुहत्आरोहतिसवैश्वानरःपूर्वव ३०
त्पूर्वेभ्यऋषिभ्यइवेज्यंतवस्तोत्रेयजमानायधनंपश्वादिलक्षणंअजनयन्संपादयन्जागृविभ

दाःपृष्ठःसमानंसर्वेषांदेवानांसाधारणंअज्मंआकाशमार्गंपर्येतिसूर्यरूपेणगच्छंति॥छ॥अथत्र
योदशीमृचमाह॥छ॥ ॥ऋतावानंयज्ञियंविप्रमुक्थ्य१मायंदधेमातरिश्वादिविक्षयं।तंचित्रयामंह
रिकेशमीमहेसुदीतिमग्निंसुवितायनव्यसे॥छ॥ ॥ऋतावानंबलवंतंयज्ञियंयज्ञार्हंविप्रंमेधाविनं
उक्थ्यंस्तुत्यंदिविद्युलोकेक्षयंनिवसंतंयमग्निंमातरिश्वावायुःद्युलोकादाहृत्यपृथिव्यांआदधेआहित
वान्चित्रयामंनानाविधगमनंहरिकेशंपिंगलार्चिषंसुदीतिंशोभनदीप्तिंमग्निंनव्यसेनवतरायसु
वितायसुष्ठुप्रासव्यायधनायतंतदर्थंईमहेयाचामहे॥छ॥अथचतुर्दशीमृचमाह॥छ॥ ॥शुचिंनया
मन्निषिरंस्वर्दृशंकेतुंदिवोरोचनस्थामुषर्बुधं।अग्निंमूर्धानंदिवोअप्रतिष्कुतंतमीमहेनमसावाजिनंबृ
हत्॥छ॥ ॥नतिसंप्रत्यर्थेशुचिंदीप्तियामन्यामनियज्ञेइषणीयंएषणीयंस्वर्दृशंसर्वदृशंसर्वप

द्वि० ८ दार्थविज्ञानयुक्तंदिवःद्युलोकस्यकेतुंप्रज्ञापकंरोचनस्थांरोचनस्थंरोचनःसूर्यःतस्मिन्तिष्ठंतंउ
षर्बुधंअग्निहोत्रिकरूपेणउषसिप्रबुध्यमानंदिवःस्वर्गस्यमूर्द्धनिप्रधानंअप्रतिष्कुतंअप्रतिशब्दं
हृता।वाजिनमन्नवंतंमइनमस्यंतंतमग्निंतमसास्तोत्रेणईमहेयाचामहे॥ब॥ अथपंचमीमृचमा
ह॥ब॥ ॥मंद्रंहोतारंशुचिमद्वयाविनंदमूनसमुक्थ्यंविश्वचर्षणिं।रथंनचित्रंवपुषायदर्शतंम
नुर्हितंसदमिद्रायईमहे॥ब॥ ॥मंद्रंस्तुत्यंहोतारंदेवानामाह्वातारंशुचिंसर्वदाशुद्धंअद्वयावि
नंअद्वयहीनंअकुटिलंदमूनसंदानमनसंउक्थ्यंश्रेष्ठंविश्वचर्षणिंविश्वस्यद्रष्टारंचित्रंनानाविधं
वर्णरथंनरथमिववपुषायरूपार्थंदर्शतंदर्शनीयंसदमित्सदैवमनुर्हितंसर्वेभ्योमनुष्येभ्यो ३१
हितंतमग्निंराधोधनानिईमहेयाचामहेअत्रयात्रार्थवादस्यद्विकर्मकत्वं॥ब॥ ॥इतिद्वितीयस्या

ष्टमेएकोनविंशोवर्गः॥ब॥ ॥वैश्वानरायेत्येकादशर्चंतृतीयंसूक्तंवैश्वामित्रं।अत्रेयमनुक्रमणिका
।वैश्वानरायैकादशेति।पूर्वसूक्ते।वैश्वानरीयंतुजागतंत्वित्युक्तत्वादस्यापिसूक्तस्यजगतीछंदः।वैश्वा
नरोग्निर्देवता।अस्यसूक्तस्यअग्निष्टोमेआग्निमारुतेशास्त्रविनियोगःसूत्रितंहि।वैश्वानरायपृथुपा
जसेशंनःकरत्यर्वतइति॥ब॥तत्रप्रथमामृचमाह॥ब॥ ॥वैश्वानरायपृथुपाजसेविपोरत्नाविधं
तधरुणेषुगातवे।अग्निर्हिदेवाँअमृतोदुवस्यत्यथाधर्माणिसनतानदूदुषत्॥ब॥ ॥विपोमेधावि
नःस्तोतारःपृथुपाजसेबहुबलायबहून्नायवापाजःशब्दस्यबलान्ननामत्वात्।वैश्वान
रायाग्नयेधरुणेषुधर्मेषुयज्ञेषुरत्नारमणीयानिस्तोऽत्राणिगातवेसन्मार्गलाभायविधंतपरिचरं
तिकुर्वंतिअमृतःमरणरहितोग्निःदेवान्दुवस्यतिहविषांप्रदानेनपरिचरतिहिःप्रसिद्धौ।अथ

पृ॰ ८ अतःकारणात्कोपिसनतासनातनानिधर्माणियज्ञानन्नदूषत्नदूषयति॥ब॥अथद्वितीयामृच
माह॥ब॥ ॥अंतर्दूतोरोदसीदस्मईयतेहोता॰ निषत्तोमनुषःपुरोहितः॥क्षयंबृहंतंपरि
षतिद्युभिर्देवेभिरग्निरिषितोधियावसुः॥ब॥ ॥दस्मोदर्शनीयोहोताग्निःदूतःदेवानांदूतःसन्
रोदसीरोदस्योर्द्यावापृथिव्योःअंतर्मध्येईयानगच्छतिमनुषःमनोर्जातस्यमनुष्यस्यपुरोहितःआ
हवनीयादिरूपेणपुरतःस्थापितःनिषत्तोनिषण्णःसन्अग्निर्द्युभिःदीप्तिभिःबृहंतंमहांतंयज्ञक्षयं
यज्ञगृहंपरिभूषति॥अलंकुरुतेदेवेभिःदेवैःइषितःप्रेषितोधियावसुःप्रज्ञयाव्याप्तःएतेद्वेअग्नि
विशेषणे॥ब॥अथतृतीयामृचमाह॥ब॥ ॥केतुंयज्ञानांविदथस्यसाधनंविप्रासोअग्निंमहयंत ३२
चित्तिभिः॥अपांसियस्मिन्नधिसंदधुर्गिरस्तस्मिन्सुम्नानियजमानआचके॥ब॥ ॥यज्ञानांकेतुं

प्रज्ञापकंविदथस्ययज्ञस्यगृहस्यवासाधनंप्राप्तिसाधनंअसाधारणकारणंसंतमग्निंविप्रासोविप्राःचि
त्तिभिःस्वकर्मभिःमहयंतपूजयंति॥किंचगिरःस्तोतारःयस्मिन्नग्नौअपांसिस्वानुष्ठियाकर्माणिअधि
संदधुःसंदधतेयजमानःतस्मिन्नग्नौसुम्नानिआचकेकामयते॥ब॥अथचतुर्थीमृचमाह॥ब॥ ॥पि
तायज्ञानामसुरोविपश्चितांविमानमग्निर्वयुनंचवाघतां॥आविवेशरोदसीभूरिवर्पसापुरुप्रियोभं
दतेधामभिःकविः॥ब॥ ॥यज्ञानांपितापालयिताविपश्चितांविदुषांस्तोतॄणांअसुरोबलप्रदःवा
घतांऋत्विजांवायुनंज्ञानसाधनंविमानंविमीयतेकल्पमितिविमानंयज्ञादिकर्मसाधनंसोअग्निः
भूरिवर्पसापार्थिववैद्युतादिबहुविधरूपेणरोदसीद्यावापृथिव्योआविवेशप्रविशतिपुरुप्रियःम
नुष्येषुअधिकंप्रियःअथवाबहूनांश्रेष्ठानांपुरुप्रियःधामभिस्तेजोभिर्युक्तःकविरग्निर्नंदतेय

५६०८ जमानेनस्तूयते॥५॥अथपंचमीमृचमाह॥५॥ ॥चंद्रमग्निंचंद्ररथंहरिव्रतंवैश्वानरमप्सुषदंस्वर्वि
दं॥विगाहंतूर्णिंतविषीभिरावृतंभूर्णिंदेवासइहसुश्रियंदधुः॥५॥ ॥देवासोदेवाःचंद्रमाल्हादक
रंचंद्ररथंचंद्रमाल्हादकोरथोयस्येतितथोक्तंहरिव्रतंपिंगलवर्णंहरित्वंचवाहरित्वंचमितिशाखांत
रं।अप्सुषदंतंस्वर्विदंसर्वज्ञंविगाहंविगाहमानंसर्वत्रव्याप्तं।तूर्णिंक्षिप्रगामिनंशत्रूणांहिंसितारं
वातविषीभिर्बलैरावृतंतूर्णिंभर्तारंसुश्रियंशोभनदीप्तिंवैश्वानरंइहइहलोकेदधुःआदधुः॥५॥
॥ ॥इतिद्वितीयस्याष्टमेविंशोवर्गः॥५॥ ॥अथषष्ठीमृचमाह॥५॥ ॥अग्निर्देवेभिर्मनुषश्चजं
तुभिस्तन्वानोयज्ञंपुरुपेशसंधिया॥रथीरंतरीयतेसाधदिष्टिभिर्जीरोदमूनाअभिशस्तिचातनः॥६॥ ३३
॥ ॥पुरुपेशसंबहुरूपंपेशइतिरूपनाम॥पुरोडाशपशुसोमहविर्भेदैःएकादशानसत्रात्मक

भेदैश्चनानाविधरूपंयज्ञंतन्वानःकुर्वन्रथीःसर्वस्यलोकस्यनेताजीरःक्षिप्रकारीदमूनाःदांतम
नाःदानमनावाअभिशस्तिचातनःअभिशस्तीनामरातीनांयज्ञविघ्नकारिणांरक्षसांचातयितांना
शयिताग्निःअंतःद्यावापृथिव्योर्मध्येईयतेगच्छति॥६॥अथसप्तमीमृचमाह॥६॥ ॥अग्नेजरस्व
स्वपत्यआयुन्यूर्जापिन्वस्वसमिषोदिदीहिनः॥वयांसिजिन्वबृहतश्चजागृवउशिग्देवानामसिसु
क्रतुर्विपां॥७॥ ॥हेअग्नेस्वपत्येसुपुत्रेआयुनिआयुषिनिमित्तसप्तम्येषा।आयुषिनिमित्तेनर
स्वदेवान्स्तुतिहोतारमधिष्ठायजज्जारिसेनअन्नेनवापिन्वस्वदेवान्प्रीणय।नोस्माकंइषःसस्या
र्थंदृष्टीःसंदिदीपयवयांसिअन्नानिचवयइत्यन्ननामसुपाठात्।जिन्वदेहि।जागृवेसर्वदा
जागरणशीलबृहतःमहतोयजमानस्यजिन्वेतिसंबंधः।सुक्रतुःशोभनकर्माशोभनयज्ञोवात्वंवि

२१०.८ पामेधाविनांदेवानांउशिकक्रांतोसि॥ठ॥ अथाष्टमीमृचमाह॥ठ॥ ॥विश्पतिंयह्वमतिथिंनरःसदा
यंतारंधीनामुशिजंचवाघतां॥अध्वराणांचेतनंजातवेदसंप्रशंसंतिनमसाजूतिभिर्वृधे॥ठ॥ ॥
नरानेतारःस्तोतारोवाविश्पतिंविशांमनुष्याणांपतिंविश्वस्यपतिमितिवायह्वंमहांतंअतिथिंसर्व
स्यातिथिभूतंधीनांकर्मणांवायंतारंनियंतारंवाघतांचऋत्विजांचउशिजंकांतमनोयज्ञंअध्वरा
णांयागानांचेतनंप्रज्ञापनंजूतिभिर्वेगयुक्तंजातवेदसंमग्निंवृधेवर्द्धयेनमसानमस्कारेणस्तुतिभि
श्चप्रशंसंतिप्रशंसंतिप्रशंसांकुर्वंति॥ठ॥ अथनवमीमृचमाह॥ठ॥ ॥विभावादेवःसुरणःपरिक्षि
तीरग्निर्बभूवशवसासुमद्रथः॥तस्यव्रतानिभूरिपोषिणोवयमुपभूषेमदमआसुवृक्तिभिः॥ठ॥ ॥ ३४
विभावादीप्तिमान्देवःस्तूयमानःसुरणःअत्रवर्णलोपश्छांदसःशोभनंरमयतीतिसुरमणःसुमद्रथःशो
भनरथःअग्निःशवसाबलेनक्षितीःसर्वाःप्रजाःपरितोभूत्॥अत्रभवतेरुपसर्गवशात्परिग्रहार्थत्वं॥
भूरिपोषिणःबहूनांपोषयितुःदमेयज्ञगृहेदमइतिगृहनामसुपाठात्॥निवसतःतस्याग्नेर्व्रतानिक
र्माणिवयंसुवृक्तिभिःस्तोत्रैःउपभूषेमउपभूषयामःप्रकाशयामः॥ठ॥ अथदशमीमृचमाह॥ठ॥ ॥
वैश्वानरतवधामान्याचकेयेभिःस्वर्विदभवोविचक्षण॥जातआपृणोभुवनानिरोदसीअग्नेताविश्
वापरिभूरसित्मना॥ठ॥ ॥हेवैश्वानरतवधामान्याचाकेयेभिःस्वर्विदभवोविचक्षण॥नित्यसंबंधी
नितेजांसिआचकेअभिष्टौमिहेविचक्षणप्राज्ञत्वंयेभिःयैस्तेजोभिःस्वर्वितिसर्वंवित्सर्वज्ञोभवः
भवसि॥जातमात्रस्त्वंभुवनानिभूतजातानिरोदसीद्यावापृथिव्योअपृणःआपूरयः॥हेअग्नेविश्वानि
सर्वाणिभूतानिभूतजातानित्मनाआत्मनापरिभूरसिपरिगृहीतासि॥ठ॥ अथैकादशीमृचमाह॥ठ॥ ॥

BHAU DAJI MEMORIAL

ऋ० ८ ॥ ॥विश्वानरस्यदंसनाभ्योबृहदरिणादेकःस्वपस्ययाकविः।उभापितरामहयन्नजायताग्निर्द्यावापृथिवी
भूरिरेतसा॥७॥ ॥वैश्वानरस्याग्नेःदंसनाभ्यःतोषकारीभ्यःक्रियाभ्यःबृहन्महद्धनंभवतीतियत्तात्तद्
वितथायतनःकारणात्एकोमुख्यःकविरग्निःस्वपस्ययाशोभनयज्ञादिकर्मेच्छयायजमानादिभ्योधन
मरिणात्ददातिसोयमग्निःभूरिरेतसाबहुरेतसाबहुरेतस्कोउभाउभौपितरापितरौमातापितरौद्या
वापृथिव्यौमहयन्पूजयन्नजायत॥७॥ ॥इतिद्वितीयस्याष्टमेएकविंशोवर्गः॥७॥ ॥समित्समिदि
त्येकादशर्चंचतुर्थंसूक्तंवैश्वामित्रंत्रैष्टुभं।अत्रानुक्रमणिका।समित्समिदाप्रियइति।इध्मादिस्वाहा
न्तस्यंताःसूक्तोक्ताःअस्यर्चंदेवताःपशौवैश्वामित्राणांआप्रीसूक्तौ।दर्शपूर्णमासयोःपत्नीसंयाजेषुत्व ३५
ष्टुर्यज्ञियवमित्येषा।सूत्रितंच।इहत्वष्टारमग्रियंमनस्तुरीपमधपोषयित्विति।त्वाष्ट्रेपशौपुरोडाशस्या

नुवाक्या।सूत्रितंच॥तन्नस्तुरीपमधपोषयित्नुदेवस्त्वष्टासविताविश्वरूपइति॥७॥तत्रप्रथमामृचमाह॥
॥७॥ ॥समित्समित्सुमनाबोध्यस्मेशुचाशुचासुमतिंरासिवस्वः।आदेवदेवान्यजथायवक्षिसखास
खीन्सुमनायक्ष्यग्ने॥७॥ ॥समित्समित्अत्यर्थंसमिध्यमानस्त्वंसुमनाःबोधिबुध्यस्व।शुचाशुचाअत्यर्थं
प्रसर्पकेणज्योतिषायुक्तःत्वंवस्वोवसुनोधनस्यतद्विषयांसुमतिंशोभनांबुद्धिंअस्मेअस्मभ्यंरासि
देहि।हेदेवद्योतमानदेवान्यजमानीयान्यजथाययज्ञायतदर्थंआवक्षिआवहसि।हेअग्नेसखादे
वानांसखात्वंसुमनाःसन्सखीन्देवान्यक्षियजस्व॥७॥अथद्वितीयामृचमाह॥७॥ ॥यंदेवास
स्त्रिरहन्नायजंतेदिवेदिवेवरुणोमित्रोअग्निः।सेमंयज्ञंमधुमंतंकृधीनस्तनूनपाद्घृतयोनिंविधंतं॥७॥
॥ ॥वरुणोमित्रोअग्निःएतेत्रयोदेवाःयमग्निंदिवेदिवेप्रतिदिवसंअहन्अहनित्रिःप्रातर्मध्यान्हस

ऋ० ८ यंतनेषुसवनेषुत्रिवारंआयजंते।इततनूनपात्तनूनांशरीराणांपातःसत्वंहुतयोनिंहुतस्योदकस्यका
राणांविधंतविधीयमानंक्रियमाणंनोस्मदीयमिमंयज्ञंमधुमंतंमध्वित्युदकनाम।वृष्ट्यादिफलयुक्तं।
कृधिकुरु॥छ॥अथतृतीयामृचमाह॥छ॥ ॥प्रदीधितिर्विश्ववाराजिगातिहोतारमीळःप्रथमंयजध्यै॥
अछानमोभिर्वृषभंवंदध्यैसदेवान्यक्षदिषितोयजीयान्॥छ॥ ॥विश्ववाराविश्वैर्जनैर्वरणीयादीधि
तिःस्तुतिःदीप्तिर्वाहोतारंदेवानामाह्वातारंदेवानामाह्वातारमग्निंप्रजिगातिजिगातुप्रकर्षेणागच्छतु
प्रथममुख्यंअछआभिमुख्येनवृषभंसंपदावर्षितारंवंदध्यैवंदितुंयोग्यमितिशेषः।अग्निंनमोभिः
नमस्कारैःसइळःईषःहवीरूपाण्यन्नानियजध्यैयष्टुंप्राणयितुंप्रजिगातुईषितःअस्माभिःप्रेरितः ३६
यजीयान्यष्टृतमःसोग्निर्देवान्यक्षत्यजतु॥छ॥अथचतुर्थीमृचमाह॥छ॥ ॥ऊर्ध्वोवांगातुरध्वरे

अकारिऊर्ध्वाशोचींषिप्रस्थितारजांसि।दिवोवानाभान्यसादिहोतास्तृणीमहिदेवव्यचाविबर्हिः॥छ॥ ॥
वायुवयोः।अग्निश्चबर्हिश्चउभौवामित्युच्यते।समिदादिभिःसहितस्यैवाग्नेर्वाह्वेवतात्वात्।ऊर्ध्वः
उन्नतगातुर्यज्ञमार्गोध्वरेयज्ञेअकारिआश्रयःक्रियते।शोचींषिअर्चिषिभांतिरजांसिहवींषिऊर्ध्वा
र्ध्वप्रस्थिताहोताग्निर्दिवःदीप्यमानस्ययागगृहस्यनाभानाभौमध्यप्रदेशेन्यसानिषीदति।देवव्यचाःदे
वैर्व्याप्तंबर्हिश्चार्थेवाशब्दःविस्तृणीमहिविशेषेणास्तृणीमः॥छ॥अथपंचमीमृचमाह॥छ॥ ॥सप्तहो
त्राणिमनसावृणानाइन्वंतोविश्वंप्रतियन्नृतेन।नृपेशसोविदथेषुप्रजाताअभीमंयज्ञंविचरंतपूर्वीः
॥छ॥ ॥मनसावृणानाःप्रार्थ्यमानाःऋतेनउदकेनविश्वंत्वंतःप्राणयंतःदेवाःसप्तहोत्राणिहोतॄ
णांवषट्कर्तॄणांप्रमाणिप्रतियन्प्रतिगच्छंतिअतःपरंपरोक्षस्तुतिः।नृपेशसःनररूपाःविदथेषुयागेषु

ऋ॰ ८

जातःउत्पन्नाःसर्वेदेवाःविश्वेदेवास्तोयज्ञस्याभिमानिनोदेवताःइममस्मदीयंयज्ञंविचरंतु॥ठ॥ ॥इति
द्वितीयस्याष्टमेद्वाविंशोवर्गः॥ठ॥ ॥अथषष्ठीमृचमाह॥ठ॥ ॥आनंदमानेउषसाउपाकेउतस्मये
तेतन्वाउविरूपोयथानोमित्रोवरुणोजुजोषदिंद्रोमरुत्वांउतवामहोभिः॥ठ॥ ॥आनंदमानेस्मय
मानेउपाकेपरस्परसंगतेउषसानक्तपेक्षयाद्विवचनांनक्तोषासौराज्यइन्वाआगछतांउतअपिचवि
रूपेपृथग्रूपेतन्वाप्रकाशरूपेणशरीरेणास्मयोतप्रकाशेतेमित्रोवरुणश्चउतवाअपिवइंद्रःमरुत्वा
श्चनोस्मान्यथाजुषोजोषतप्रयासेवेततथामहोभिर्युक्तिइमद्यावापृथिव्योकुरुतां॥ठ॥अथसप्त
मीमृचमाह॥ठ॥ ॥दैव्याहोतारापथमान्यजेसप्तपृक्षासःस्वधयामदंति॥ऋतंशंसंतऋतमित्तआ ३७
हुरनुव्रतंव्रतपादीध्यानाः॥ठ॥ ॥दैव्यादिव्यौप्रथमाप्रथमौमुख्यौहोताराआक्तारौअग्नीन्

जेप्रसाधयामिऋतमुदकंशंसंतःआशंसमानाःसप्तपृक्षासःपृक्षमन्नंतद्वंतऋत्विजःतमग्निंस्वधयासोमेन
हविषामदंतिमादयंतिव्रतानांकर्मणांरक्षितारःदीध्यानादीप्यमानःअथवास्वकर्मभिरग्निंदीपयंतःऋ
त्विजःअनुव्रतंव्रतेभ्यऋतमित्अग्निमेवमाहुःअग्निमेवऋतमनृतमृतमाहुरित्यर्थः।एवकारार्थेइच्छब्दः
॥ठ॥अथाष्टमीमृचमाह॥ठ॥ ॥आभारतीभारतीभिःसजोषाइळादेवैर्मनुष्येभिरग्निः।सरस्वतीसार
स्वतेभिरर्वाक्तिस्रोदेवीर्बर्हिरेदंसदंतु॥ठ॥ ॥भारतीभिःभरतस्यसूर्यस्यसंबंधिनीभिःसजोषाःसंगताभा
रतीवाक्आगछतुदेवैर्मनुष्येभिःमनुष्यैश्चसंगतात्यस्यइळाचवृष्टिश्चआगछतुअग्निश्चसारस्वतेभिः
सरस्वतासंबंधिभिःमध्यमस्थानैःसहसरस्वतीमाध्यमिकावाकश्चआगछतुतिस्रोदेव्यःवाग्निलारत्यः
आगछंतुआयातिगत्यर्थःएतद्बर्हिःसदंतुआसीदंतु॥ठ॥अथनवमीमृचमाह॥ठ॥ ॥तन्नस्तुरीपमध

ऋ॰ ८

पोषयित्नुदेवत्वष्टर्विरराणःस्यस्व।यतोवीरःकर्मण्यःसुदक्षोयुक्तग्रावाजायतेदेवकामः॥छ॥ ॥इदेदे
वत्वष्टःस्रष्टिंकर्त्तःविरराणःरममाणस्त्वं।अथअनंतरंनोस्मान्तुरीपंतारकंतेपोषयित्नुपोषकंतत्प्रसि
द्धंरेतःविष्यस्वमोचय।यतोविमोचनाद्वीरःसत्ववान्कर्मण्यःकर्मकुशलःयुक्तग्रावाअभिषवाअ
भिषवार्थग्रावायुक्तःसोमसुदित्यर्थःदेवकामःदेवान्कामयमानःपुत्रोजायतेजायत॥छ॥अथदश
मीमृचमाह॥छ॥ ॥वनस्पतेवसृजोपदेवानग्निर्हविःशमितासूदयाति।सेदुहोतासत्यतरोयजाति
यथादेवानांजनिमानिवेद॥छ॥ ॥हेवनस्पतेदेवानुपावसृजसमीपेकुरुशमितापशोःसंस्कर्त्ता
अग्निःवनस्पतिश्चहविःसूदयातिदेवान्प्रति।प्रेरयतुसश्चतरःअत्यर्थंसत्यःसत्यतरःअत्यर्थंसत्यः ३८
सत्यतरःसत्यस्वरूपःसइत्सएवहोतायजातियजतुयथायतःकारणात्सएवाग्निर्देवाग्निर्देवा

नांजनिमानिवेदवेत्तिअतःसएवयजत्वित्यर्थः॥छ॥अथैकादशीमृचमाह॥छ॥ ॥आयाह्यग्नेस
मिधानोअर्वाङिंद्रेणदेवैःसरथंतुरेभिः।बर्हिर्नआस्तामदितिःसुपुत्रास्वाहादेवाअमृतामादयं
तां॥छ॥ ॥हेअग्नेअर्वाक्अस्मदभिमुखंसमिधानःसमिध्यमानःज्वालारूपेणदीप्यमानःत्वंआ
याहिदेवतारूपेणागच्छ।कथमितिउच्यते।नोस्माकयज्ञंइंद्रेणदेवैश्चतुरेभिःत्वरमाणैर्देवैःसरथं
समानरथंयथाआयाहि।किंचसुपुत्राअदितिरपिनोबर्हिःआस्तांअध्यास्तांस्वाहाकारेणयुक्ताअमृ
ताःनित्यादेवाःमादयंतांतृप्यंतु॥छ॥इतिद्वितीयस्याष्टमेत्रयोविंशोवर्गः॥छ॥ ॥प्रत्यग्निरुषस
इत्येकादशर्चंपंचमंसूक्तंवैश्वामित्रंत्रैष्टुभमाग्नेयं।अत्रानुक्रमणिका॥छ॥प्रत्यग्निरिति।प्रातरनु
वाकाश्विनशस्त्रयोरिदमादिसूक्तेयस्यविनियोगःसूत्रितंच।प्रत्यग्निरुषसइतित्रीणि।इत्यामग्नइति॥

ऋ॰ ८

अस्यउक्तोविनियोगः॥छ॥तत्रप्रथमामृचमाह॥छ॥ ॥प्रत्यग्निरुषसश्चेकितानोबोधिविप्रःपदवीःकवी
नां॥पृथुपाजादेवयद्भिःसमिद्धोपद्वारातमसोवह्निरावः॥छ॥ ॥उषसःचेकितानोज्ञानन्विप्रःमेधावी
कवीनांक्रांतदर्शांपदवीःमार्गन्निगच्छन्नयोग्निःप्रत्यबोधिप्रतिबोधिप्रतिबुध्यतेप्रतिपाजाःपृथुतेजाःदेव
यद्भिर्देवकामैःसमिद्धःसम्यग्दीप्तःसवह्निःतमसःअज्ञानस्यद्वाराणिअपावःअपावृणोति॥छ॥अथ
द्वितीयामृचमाह॥छ॥ ॥प्रेद्वग्निर्वावृधेस्तोमेभिर्गीर्भिस्तोतॄणांनमस्यउक्थैः॥पूर्वीरृतस्यसंदृशश्चका
नःसंहोताअद्यौदुषसोविरोके॥छ॥ ॥नमस्यःस्तुत्योयोग्निःस्तोतॄणांस्तोतॄणांत्रैःगीर्भिर्वाग्भिरुक्थैः
शस्त्रैश्चप्रववृधेवृद्धिंप्राप्नोतिऋतःदेवानांहृतःसःपूर्वीःबह्वीःऋतस्यादित्यस्यसंदृशःदीप्तीःचकानः ३७
कामयमानःसन्उषसःविरोकेविरोचनेप्रातःकालेसमद्यौत्द्योतते॥छ॥अथतृतीयामृचमाह॥छ॥

Dr. BHAU DAJI MEMORIAL

॥ ॥अधाय्यग्निर्मानुषीषुविक्ष्वपांगर्भोमित्रऋतेनसाधन्॥आहर्यतोयजतःसान्वस्थादभूदुविप्रो
हव्योमतीनां॥छ॥ ॥मित्रःयजमानानांमित्रभूतःऋतेनसत्येनसाधनकामान्साधयन्अपांगर्भो
ग्निःमानुषीषुमनोःसंबंधिनीषुविक्षुप्रजासुअधायिआदावराहितःकिंचहर्यतःस्पृहणीयःयजतोयष्ट
व्यःससानुउच्छ्रितंधिष्ण्यंउत्तरवेद्याख्यंआस्थात्अध्यतिष्ठत्विप्रःप्राज्ञःअग्निःमतीनांमातॄणांहव्यःस्तु
त्यःअभूत्॥छ॥अथचतुर्थीमृचमाह॥छ॥ ॥मित्रोअग्निर्भवतियत्समिद्धोमित्रोहोतावरुणोजातवे
दाः॥मित्रोअध्वर्युरिषिरोदमूनामित्रःसिंधूनामुतपर्वतानां॥छ॥ ॥मित्रोभवतिसूर्योभवतिमित्रए
वसन्होताभवतिवरुणोभवतिजातवेदाःजातप्रज्ञःसमित्रःअध्वर्युर्भवतिदमूनाःदानमनाःदांत
मनावासएवइषिरःप्रेरकोवायुर्भवतिउतअपिचसिंधूनांनदीनांपर्वतानांचमित्रःसहायोभवति॥छ॥

दि० ८

॥अथपंचमीमृचमाह॥ब॥ ॥पातिप्रियंरिपोअग्रंपदंवेःपातियह्वश्चरणंसूर्यस्य।पातिनाभासप्तशी
र्षाणमग्निःपातिदेवानामुपमादमृष्वः॥ब॥ ॥ऋष्वोदर्शनीयोग्निःवेर्गंत्र्याःसर्वव्याप्तयाःरिपोभूम्याः
प्रियंअग्रंप्रथमंपदंस्थानंपातिरक्षतियह्वोमहान्सूर्यस्यचरणंचरंत्यत्रेतिचरणमंतरिक्षंपातिनाभा
नाभौअंतरिक्षस्यमध्येसप्तशीर्षाणंमरुद्गणंपातिदेवानामुपमादंउपमादंउपमादकंयज्ञंपातिरक्ष
ति॥ब॥ ॥इतिद्वितीयस्याष्टमेचतुर्विंशोवर्गः॥ब॥ ॥अथषष्ठीमृचमाह॥ब॥ ॥ऋभुश्चक्रईड्यंचारु
नामविश्वानिदेवोवयुनानिविद्वान्।ससस्यचर्मघृतवत्पदंवेस्तदिदग्नीरक्षत्यप्रयुच्छन्॥ब॥ ॥ऋ ४०
भुर्महान्विश्वानिसर्वाणिवयुनानिज्ञातव्यानिपदार्थानिविद्वान्जानन्देवोग्निःईड्यंस्तुत्यंचारुमनो
ज्ञंनामजलंचक्रेकरोतिनामानामेतिउदकनामसुपाठात्।वेर्व्याप्तस्यससस्यस्वपतःशांतज्वालस्य

पयेःचर्मरूपंघृतवद्दीप्तिमद्भवतिसोग्निःतज्जलमप्रयुच्छन्अप्रमाद्यन्रक्षतिपालयति॥ब॥अथसप्तमी
मृचमाह॥ ॥आयोनिमग्निर्घृतवंतमस्थात्पृथुप्रगाणमुशंतमुशानः।दीद्यानःशुचिरृष्वःपावकःपुनः
पुनर्मातरानव्यसीकः॥ब॥ ॥उशानःकामयमानोग्निःघृतवंतंदीप्तिमंतंपृथुप्रगाणंपृथुगतिंउशंतंका
मयमानंयोनिंस्थानमायतनंआअस्थात्अतिष्ठतिदीद्यानोद्योतमानःशुचिर्दर्शनीयःशुद्धोवाऋष्वोमहा
न्पावकःअन्येषांशोधयिताग्निःमातरामातरौद्यावापृथिव्यौपुनःपुनःनव्यसीनवतरेकःकरोति॥
॥ब॥अथाष्टमीमृचमाह॥ब॥ ॥सद्योजातओषधीभिर्ववक्षेयदीवर्धंतिप्रस्वोघृतेन।आपइवप्रवताशुं
भमानाउरुष्यदग्निःपित्रोरुपस्थे॥ब॥ ॥सद्योजातोग्निःयदियदाओषधीभिःववक्षेउह्यतेतदाप्रवता
प्रवणेनमार्गेणगच्छंत्यःआपइवशुंभमानाःशोभमानास्ताओषध्यःप्रस्वफलानिप्रसुवानाःघृतेनोदके

६०८ नवर्द्धंतिवर्द्धयंति। पित्रोर्द्यावापृथिव्योरुपस्थेमध्यप्रदेशेवर्द्धमानोग्निः उरुष्यत्। अस्मान्रक्षतु॥ब॥
अथनवमीमृचमाह॥ब॥ ॥उदुष्टुतःसमिधायह्वोअद्यौद्वर्ष्मन्दिवोअधिनाभापृथिव्याः। मित्रोअग्नि
रीड्योमातरिश्वाहूतोवक्षद्यजथायदेवान्॥ब॥ ॥उदितिपदस्मरणं। स्तुतः अस्माभिःस्तुतःसमिधासमिंधनेन
यह्वोमहान्अग्निःपृथिव्याउत्तरवेद्यांनाभानाभौमध्यप्रदेशेस्थितःसन्दिवःअंतरिक्षस्यवर्ष्मन्वर्ष्मणिरू
पेउदद्यौत्द्योततेमित्रःसर्वेषांमित्रभूतःईड्यःस्तुत्यःमातरिक्षेश्वसितिप्राणितिसूर्यरूपेणचेष्टतइतिमा
तरिश्वा। अथवामातरिअरण्यांश्वसितिनिवसतीतिमातरिश्वा। तथाचयास्कः मातर्यंतरिक्षेश्वसीतिमा
तर्याश्वसितीतिवा। हूतःदेवानांहूतःसन्यजथायज्ञायदेवान्वक्षत्आवहतु॥ब॥ अथदशमीमृच ५१
माह॥ब॥ ॥उदस्तंभीत्समिधानाकमृष्वोग्निर्भवन्नुत्तमोरोचनानां। यदीभृगुभ्यःपरिमातरिश्वा

गुहासंतंहव्यवाहंसमीधे॥ब॥ ॥ऋष्वोमहानग्निःसमिधातेजसानाकंस्वर्गंउदस्तंभीत्उदस्तभ्ना
त्रोचनानांशोभनानांतेजसांमध्येउत्तमोभवत्उत्कृष्टतमोभवत्मातरिश्वावायुःभृगुभ्यःआदित्य
स्यरश्मिभ्यःआदित्यगुहागुहायांसंतंहव्यवाहंहव्यानांवोढारमग्निंयदियदासमीधेसमेधनतदा
नाकंअस्तभ्नादितिसंबंधः॥ब॥ अथैकादशीमृचमाह॥ब॥ ॥इळामग्नेपुरुदंसंसनिंगोःशश्वत्तमंह
वमानायसाध। स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे॥ब॥ ॥सर्वंव्याख्यातं॥ब॥ ॥इतिद्वि
तीयस्याष्टमेपंचविंशोवर्गः॥ब॥ ॥प्रकारवइत्येकादशर्चंषष्ठंसूक्तं। वैश्वामित्रमाग्नेयं। प्रकारवइत्यनुक्रां
तंत्वात्। प्रातरनुवाकाश्विनशस्त्रयोःसूक्तविनियोगः। सर्वसूक्तएवप्रत्यग्निरुषसस्त्राणीत्यनेनोक्तः। आद्या
ग्नेयपशौहविषोयाज्या। सूत्रितंच। प्रकारवोमननावच्यमानाएकाचेतत्सरस्वतीनदीनामिति। एभिरग्न

दि० ८

इतिपत्नीवतग्रहस्ययाज्या॥सूत्रितंच॥आग्नीध्रःपात्नीवतस्ययजत्यैभिरग्नेसरथंयाह्यर्वाङितीति॥ब॥
तत्रप्रथमामृचमाह॥ब॥ ॥प्रकारवोमननावच्यमानादेवद्रीचींनयतदेवयंतः॥दक्षिणावाड्वाजि
नीप्राच्येतिहविर्भरंत्यग्नयेघृताची॥ब॥ ॥हेकारवःकर्तारःदेवयंतःदेवकामाःयूयंमननामनेनमं
त्रेणवच्यमानाःप्रेर्यमाणाःसंतःदेवद्रीचींदेवानांचनींस्रुचंप्रणयतप्रकर्षेणनयतप्रापयतदक्षि
णावाट्आहवनीयस्यदक्षिणेनःउह्यमानावाजिनीअन्नवतीप्राचीप्रागग्राअग्नयेअग्न्यर्थंहविर्भरं
तीहविर्बिभ्रतीघृताचीघृतेनाक्ताग्निकंएतिनिगच्छति॥ब॥अथद्वितीयामृचमाह॥ब॥ ॥आरोदसी
अपृणाज्जायमानउतप्ररिक्थाअधनुप्रयज्यो॥दिवश्चिदग्नेमहिनापृथिव्यावच्यंतांतेवह्नयःसप्तजि ४२
ह्वा॥ब॥ ॥हेअग्नेजायमानस्त्वंरोदसीद्यावापृथिव्यौआअपृणाः॥आपूरय॥किंचहेप्रयज्योयष्टव्य

दिवश्चित्दिवश्चअंतरिक्षात्पृथिव्याश्चमहिम्नाप्ररिक्थाः॥अतिरिक्तस्त्वासिअनेनवह्नेरतिशयउक्तःए
वंविधस्यतेनवह्नयःअग्नयःअंशभूतावह्नयःआहवनीयादयःवच्यंतांकिंचिधास्तेसप्तजिह्वात्मकः
॥ब॥अथतृतीयामृचमाह॥ब॥ ॥द्यौश्चत्वापृथिवीयज्ञियासोनिहोतारंसादयंतेदमाय॥यदीवि
शोमानुषीर्देवयंतीःप्रयस्वतीरीळतेशुक्रमर्चिः॥ब॥ ॥द्यौश्चअंतरिक्षंपृथिवीचयज्ञियासःयज्ञार्हा
देवाश्चहोतारंत्वांत्वांदमायदमोयज्ञःतास्मैअर्थंनिषादयंति॥उपशामयंति॥यदियदामानुषीःमनोः
संबंधिन्यःदेवयंतीःदेवकामाःप्रयस्वतीःहविष्मत्यःविशःप्रजाः॥होतारंशुक्रंदीप्तिंअर्चिःईळतेस्तु
वंति॥ब॥अथचतुर्थीमृचमाह॥ब॥ ॥महान्त्सधस्थेध्रुवआनिषत्तोंऽतर्द्यावामाहिनेहर्यमाणः॥आ
स्क्रेसपत्नीअजरेअमृक्तेसबर्दुघेउरुगायस्यधेनू॥ब॥ ॥महान्अधिकोहर्यमाणःयजमानादि

१६०८ भिःकाम्यमानःयक्षाययजमानायधनंकामयमानःअग्निःमाहिनेमहिम्नायुक्तेरुशत्स्थेस्वकीयेस्थानेध्रुवः
अचलःसन्निषत्तःनिषण्णोभवति।आस्त्रेआक्रमणशीलेपत्नीसमानःएकःसूर्यःपतिर्ययोस्तेसप
त्न्यौअजरेजरारहितेअमक्तेअन्योन्याहिंसितेसबर्दुघेसबरित्यमृतस्युदकंतस्यादोग्ध्र्यौद्यावापृ
थिव्यौउरुगायस्यपृथुगमनस्यअधिकस्तुतेर्वाअग्नेःधेनूप्राणयित्र्यौभवतः॥छ॥अथपंचमीमृचमा
ह॥छ॥ ॥व्रतातेअग्नेमहतोमहानितवक्रत्वारोदसीआततंथ।त्वंदूतोअभवोजायमानस्त्वंनेता
वृषभचर्षणीनां॥छ॥ ॥हेअग्नेमहतःसर्वेभ्योऽधिकस्यतेतवव्रतानित्वत्संबंधीनिकर्माणिमहानिमह
तिभवंतितवक्रत्वाकर्मणाप्रकाशेनरोदसीद्यावापृथिव्यौआततंथविस्तृतवानसित्वंदूतोअभवः ४२
भवदेवृषभवर्षणशीलत्वंजायमानःभवन्चर्षणीनांयजमानानांनेताभिफलप्रापकोसि॥छ॥ ॥इति

द्वितीयस्याष्टमेषड्विंशोवर्गः॥छ॥ ॥अथषष्ठीमृचमाह॥छ॥ ॥ऋतस्यवाकेशिनायोग्याभिर्घृत
स्नुवारोहिताधुरिधिष्व।अथावहदेवान्देवविश्वान्त्स्वध्वराकृणुहिजातवेदः॥छ॥ ॥हेदेवकेशिनाप्र
शस्तकेशवंतौयोग्याभिःयोजनसाधनभूताभीरज्जुभिर्युक्तौघृतस्नुवाघृतंक्षरंतौरोहितावश्वौ
ऋतस्ययज्ञस्यवाशब्दश्चार्थेधुरिधिष्वधेहियोजयेत्यर्थः।अथानंतरंविश्वान्सर्वान्देवान्रथेसमा
रोप्यआवहहेजातवेदःतान्स्वध्वरान्शोभनाध्वरान्कृणुहिकुरु॥छ॥अथसप्तमीमृचमाह॥छ॥ ॥
दिवश्चिदातेरुचयंतरोकाउषोविभातीरनुभासिपूर्वीः।अपोयदग्नउशधग्वनेषुहोतुर्मन्द्रस्यपनयंत
देवाः॥छ॥ ॥हेअग्नेयत्यदावनेषुअरण्येषुअरण्येषुअपःउशाक्कामयमानोदहंश्चवर्तसेतदा
तेरोकाश्चवन्दीप्तयःदीप्तयःदिवश्चित्सूर्यादपिआरुचयंतआरोचंतेविभातीःविशेषेणभातीःप्रका

ऋ॰ ८ काशमानाः सुवः पुराणी॥उषःउषसः अनुभामिमंद्रस्य सुत्यस्य होतुः नवरो कान्देवास्तोनारः पनयंत
स्तुर्वंति॥ॾ॥ अथाष्टमीमृचमाह॥ॾ॥ ॥उरौवायेअंतरिक्षेमदंतिदिवोवायेरोचनेसंतिदेवाः॥ऊमा
वायेसुहवासोयजत्रा आयेमिरेरथ्योअग्नेअश्वाः॥ॾ॥ ॥उरौविस्तीर्णेअंतरिक्षेदेवामदंतिहृष्यंति
दिवःसूर्यस्यरोचनेप्रकाशनेआलोकेयेदेवाःसंतिऊमाःऊमसंज्ञकाःपितरःसंतियजत्राःयष्टव्याये
देवाःसुहवासःशोभनाह्वानःआयेमिरेआयच्छंतिरथ्यारथिनारेनेवएवअश्वाःसंतिहेअग्नेतेःसार्धं
सार्द्धंआयाहीतिउत्तरस्यामिंबंधः॥ॾ॥ अथनवमीमृचमाह॥ॾ॥ ॥एभिरग्नेसरथंयाह्यर्वाङ्नानार
थंवाविभवोह्यश्वाः॥पत्नीवतस्त्रिंशतंत्रींश्चदेवाननुष्वधमावहमादयस्व॥ॾ॥ ॥हेअग्नेएभिःसर्वो
क्तैर्देवगणैःसार्द्धंसरथंसमानरथंनानारथंवावह्नयेसमारोप्यआयाहियतःकारणात्तेअश्वाःवि

DR BHAU DAJI MEMORIAL

ऋ॰ ८ भवःसरथाःहिःप्रसिद्धाःपत्नीवतःपत्नीवतःपत्नीभिःसहितान्त्रिंशतंत्रींश्चत्रयस्त्रिंशतंदेवांश्चअनुष्व
धंसोमस्पृहित्वयआवहमादयस्वसोमेनेतिविशेषः॥ॾ॥ अथदशमीमृचमाह॥ॾ॥ ॥सहोतायस्य
रोदसीचिदुर्वीयज्ञंयज्ञमभिवृधेगृणीतः॥प्राचीअध्वरेवतस्थतुःसुमेकेऋतावरीऋतजातस्यसत्ये॥
॥ॾ॥ ॥सएवहोताभवतिउर्वीविस्तीर्णेरोदसीचिद्द्यावापृथिव्यावपियस्याग्नेःयज्ञंयज्ञंसर्वस्यय
ज्ञंवृधेसमृद्धयेअभिगृणीतःप्रशंसतःऋतजातस्यजातस्यसत्यस्ययस्याहोतुःसुमेकेसुरूपेऋता
वरीउदकवात्योसत्येसत्यस्वरूपेप्राचीअनुकूलेतस्थतुःतिष्ठतःकथमिवअध्वराविवयज्ञाविव॥ॾ॥
॥अथैकादशीमृचमाह॥ॾ॥ ॥इलामग्नेपुरुदंसंसनिंगोःशश्वत्तमंहवमानायसाध॥स्यान्नःसूनुस्त
नयोविजावाग्नेसातेसुमतिर्भूत्वस्मे॥ॾ॥ ॥इतिशर्वव्याख्येयं॥ॾ॥ ॥इतिद्वितीयस्याष्टमसप्तविं

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

द्वि०८

।शावर्ग्गः॥छ॥ ॥इतिद्वितीयस्याष्टकेष्टकंसंहिताभाष्यंसमाप्तः॥छ॥ ॥श्री॥ ॥यादृशमितिन्या
यान्नमेदोषः॥ ॥छ॥ ॥संवत्१७३०नाआखाडसुदि८भोमेलिखितमिदंपुस्तकं॥छ॥ ॥छ॥

द्वितीयाष्टकाष्टमाध्यायभाष्य।

५८